॥ अथ वक्रतुण्डस्य निधिप्रद एकत्रिंशदक्षर मंत्रः॥

यह मंत्र शत्रु द्वारा की गई दुष्कृत्या को नष्ट करता है, तथा निधिप्रद भी है।

मंत्रः-

रायस्पोषस्य दयिता निधिदो रत्न धातुमान्।
रक्षोहणो वलगहनो वक्रतुण्डाय हुँ॥

(मंत्रमहोदधि तथा मंत्रमहार्णव में '**दयिता**' के स्थान पर '**ददिता**' मुद्रित है, जो अन्य टीकाकारों के मत से अशुद्ध रूप में है।)

मंत्र के ऋषि छंद देवता व ध्यान मंत्र वक्रतुण्ड के ही है।

अथन्यास	**करन्यास**	**अङ्गन्यास**
ॐ रायस्पोषस्य	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ दयिता	तर्जनीभ्यां नमः	शिरसे स्वाहा
ॐ निधिदो रत्नधातुमान्	मध्यमाभ्यां नमः	शिखायै वौषट्
ॐ रक्षोहणो	अनामिकाभ्यां नमः	कवचाय हुँ

ॐ वल्गहनो	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
ॐ वक्रतुण्डाय हुम्	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्

॥ अथ उच्छिष्ट गणपति प्रयोगः ॥

उच्छिष्ट गणपति का प्रयोग अत्यंत सरल है तथा इसकी साधना में अशुचि शुचि आदि बंधन नहीं हैं तथा मंत्र शीघ्रफल प्रद है। यह अक्षय भण्डार का देवता है। प्राचीन समय में यति जाति के साधक उच्छिष्ट गणपति या उच्छिष्ट चाण्डालिनी (मातङ्गी) की साधना व सिद्धि द्वारा थोड़े से भोजन प्रसाद से नगर व ग्राम का भण्डारा कर देते थे।

इसकी साधना करते समय मुँह उच्छिष्ट होना चाहिये। मुँह में गुड़, पताशा, सुपारी, लौंग, इलायची ताम्बूल आदि कोई एक पदार्थ होना चाहिये। पृथक पृथक कामना हेतु पृथक पृथक पदार्थ है। यथा - लौंग, इलायची वशीकरण हेतु। सुपारी फल प्राप्ति व वशीकरण हेतु। गुडौदक अन्नधनवृद्धि हेतु तथा सर्व सिद्धि हेतु ताम्बूल का प्रयोग करें।

॥ अथ नवाक्षर उच्छिष्टगणपति मंत्रः॥

मंत्र - **हस्ति पिशाचि लिखे स्वाहा।**

विनियोगः **ॐ अस्य श्रीउच्छिष्ट गणपति मन्त्रस्य कंकोल ऋषिः, विराट् छन्दः, उच्छिष्टगणपति देवता, सर्वाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः - **ॐ अस्य श्री उच्छिष्ट गणपति मंत्रस्य कंकोल ऋषिः नमः शिरसि, विराट् छन्दसे नमः मुखे, उच्छिष्ट गणपति देवता नमः हृदये, सर्वाभीष्ट सिद्ध्यर्थे विनियोगाय नमः सर्वाङ्गे।**

अगर साधक पर तामसी कृत्या प्रयोग किया हुआ है, तो उच्छिष्ट गणपति शत्रु की गन्दी क्रियाओं को नष्ट कर साधक की रक्षा करते हैं।

षडङ्गन्यास	करन्यास	अङ्गन्यास
ॐ हस्ति	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ पिशाचि	तर्जनीभ्यां नमः	शिरसे स्वाहा
ॐ लिखे	मध्यमाभ्यां नमः	शिखायै वषट्
ॐ स्वाहा	अनामिकाभ्यां नमः	कवचाय हुम्
ॐ हस्ति पिशाचिलिखे	कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्

ॐ हस्ति पिशाचिलिखे स्वाहा करतलकरपृष्ठाभ्यां नमः अस्त्राय फट् स्वाहा

ध्यानम् :–

चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशाङ्कुशौ मोदकपात्रदन्तौ ।
करैर्दधानं सरसीरुहस्थमुन्मत्त गणेश मीडे ॥

(क्वचिद् पाशाङ्कुशौ कल्पलतां स्वदन्तं करैवहन्तं कनकाद्रि कान्ति)

अथ दशाक्षर उच्छिष्ट गणेश मंत्र :- गं हस्ति पिशाचि लिखे स्वाहा।

अथ द्वादशाक्षर उच्छिष्ट गणेश मंत्र – ॐ ह्रीं गं हस्ति पिशाचि लिखे स्वाहा।

अथ त्रिंशदक्षर उच्छिष्टगणेश मंत्र – ॐ नमो हस्तिमुखाय लंबोदराय उच्छिष्ट महात्मने क्रां क्रीं ह्रीं घे घे उच्छिष्टाय स्वाहा।

विनियोगः अस्योच्छिष्ट गणपति मंत्रस्य गणक ऋषिः, गायत्री छन्दः, उच्छिष्ट गणपतिर्देवता, ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।

अथ सप्तत्रिंदक्षर उच्छिष्टमहागणपति मंत्रः – ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लंबोदराय उच्छिष्ट महात्मने आँ क्रों ह्रीं गं घे घे उच्छिष्टाय स्वाहा।

विनियोग : ॐ अस्य श्रीउच्छिष्ट महागणपति मंत्रस्य मतंग भगवान ऋषिः, गायत्री छन्दः, उच्छिष्टमहागणपतिर्देवता, गं बीजम्, स्वाहा शक्तिः, ह्रीं कीलकं, ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः। (रुद्रयामले)

(मंत्रमहोदधि में गणक ऋषि कहा है)

ध्यानम्

शरान्धनुः पाशसृणी स्वहस्तै र्दधानमारक्त सरोरुहस्थम् ।
विवस्त्र पत्न्यां सुरतप्रवृत्तमुच्छिष्टमम्बासुतमाश्रयेऽहम् ॥

बायें हाथों में धनुष एवं पाश दाहिने हाथों में शर एवं अङ्कुश धारण किये हुये लालकमल पर आसीन अपनी विवस्त्र पत्नियों से रति में निरत पार्वती पुत्र उच्छिष्ट महागणपति का मैं आश्रय लेता हुँ ।

॥ अथ उच्छिष्टगणपति यंत्रार्चनम् ॥

मंडल मध्य में गणपति की नौ पीठ शक्तियों का पूजन करें।

पूर्वादिक्रमेण – ॐ तीव्रायै नमः। ॐ चालिन्यै नमः। ॐ नन्दायै नमः।

ॐ भोगदायै नमः। ॐ कामरूपिण्यै नमः। ॐ उग्रायै नमः। ॐ तेजोवत्यै नमः। ॐ सत्यायै नमः। मध्ये- ॐ विघ्ननाशिन्यै नमः।

उच्छिष्टगणपति यन्त्र

गणपति की मूर्ति को घृत से अभ्यजन करके दुग्धधारा व जलधारा से अग्न्युत्तारण करके शुभ्र वस्त्र से पोंछन करके यंत्र के मध्य में रखें। देव की गंधार्चन से पूजा करके, यंत्र के प्रत्येक आवरण की पूजा करें। यंत्रस्थ देवताओं की नामावलि के साथ **"नमः श्री पादुकां पूजयामि तर्पयामि"** कहते हुये अंगुष्ठ तर्जनी से गंधपुष्पाक्षत छोड़ें तथा अर्घपात्र के जल से तर्पण करे (स्वयं करे तो वाम हाथ से अनामिका व अंगुष्ठ के सहयोग से तर्पण करे) देव से आज्ञा ग्रहण करें।

सचिन्मयः परोदेव परामृतरस प्रिय । अनुज्ञां देहि गणेश परिवारार्चनाय मे ॥

प्रथमावरणम् :- षट्कोण मध्ये अग्निकोणे - **ॐ गं हस्ति हृदयाय नमः हृदय श्री पादुकां पूजयामि तर्पयामि नमः** ॥१॥ नैर्ऋत्ये - **ॐ गीं पिशाचि शिरसि स्वाहा, पिशाचि श्री पा०** ॥२॥ वायव्ये - **ॐ गूं लिखे शिखायै वषट्, शिखा श्री पा०** ॥३॥ ऐशान्ये - **ॐ गें स्वाहा कवचाय हुं कवच श्री पा०** ॥४॥ मध्याग्रे - **ॐ ग्रौं हस्ति पिशाचि लिखे स्वाहा नेत्रत्रयाय वौषट्, नेत्रत्रयाय श्रीपा०** ॥५॥ दिक्षु **ॐ गः हस्ति पिशाचि लिखे स्वाहा। अस्त्राय फट् अस्त्र श्री पा०** ॥६॥

पुष्पाञ्जलि मादाय :-

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

पूजिताः तर्पिताः सन्तु कहकर विशेषार्घ से जल छोड़ें।

द्वितीयावरणम् :- अष्टदले पूर्वादि क्रमेण - **ॐ ब्राह्म्यै नमः, ब्राह्मी श्री**

पा० पू० त० नमः ॥१॥ ॐ महेश्वर्यै नमः, माहेश्वरी श्री पा० ॥२॥ ॐ कौमार्यै नमः, कौमारी श्री पा० पू० त० ॥३॥ ॐ वैष्णव्यै नमः, वैष्णवी श्री पा० ॥४॥ ॐ वाराह्यै नमः, वाराहीं श्री पा० ॥५॥ ॐ इन्द्राण्यै नमः, इन्द्राणी श्रीपा० ॥६॥ ॐ चामुण्डायै नमः, चामुण्डा श्री पा० ॥७॥ ॐ महालक्ष्म्यै नमः, महालक्ष्मी श्री पा० पू० त० ॥८॥

पुष्पाञ्जलि - ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम्॥ **पूजिता तर्पिताः सन्तु** से जल छोडें।

तृतीयावरणम् :- अष्टदल के बाहर कर्णिका समीपे भूपूर मध्ये। दशो दिशाओं में - पूर्वे - **ॐ वक्रतुण्डाय नमः, वक्रतुण्ड श्री०पा० त० नमः ॥१॥** आग्नेये ॐ **एकदंष्ट्राय नमः श्री० पा० ॥२॥** दक्षिणे - **लंबोदराय नमः श्री०पा० ॥३॥** नैर्ऋत्ये ॐ **विकटाय नमः श्रीपा० ॥४॥** पश्चिमे - ॐ **धूम्रवर्णाय नमः श्री०पा० ॥५॥** वायव्ये ॐ **विघ्नराजाय नमः श्री०पा० ॥६॥** उत्तरे - ॐ **गजाननाय नमः श्री०पा० ॥७॥** ऐशान्ये - ॐ **विनायकाय नमः श्री०पा० ॥८॥** प्राच्येशानयोर्मध्ये ॐ **गणपतये नमः श्री०पा० ॥९॥** पश्चिमनिर्ऋतियोर्मध्ये - **ॐ हस्तिदंताय नमः, हस्तिदंत श्री०पा० त० नमः ॥१०॥**

पुष्पाञ्जलि - ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम्॥ पूजिताः तर्पिताः सन्तु से जल छोड़ें।

चतुर्थावरणम् :- भुपूरे दशदिक्षु - पूर्वे - **ॐ इन्द्राय नमः, इन्द्र श्री पा० पू० त० नमः ॥१॥ ॐ अग्नये नमः श्री पा० ॥२॥ ॐ यमाय नमः श्री पा० ॥३॥ ॐ निर्ऋतये नमः श्री पा० ॥४॥ ॐ वरुणाय नमः श्री पा० ॥४॥ ॐ वायवे नमः श्री पा० ॥५॥ ॐ कुबेराय नमः श्री पा० ॥६॥** ऐशान्ये - **ॐ ईशानाय नम० श्री पा० ॥७॥** इन्द्रेईशानयोर्मध्ये - **ॐ ब्रह्मणे नमः ब्रह्मा श्री पा० ॥८॥** वरुणनैर्ऋतयोर्मध्ये - **ॐ अनंताय नमः अनन्त श्री पा०पू०त० ॥९॥**

पुष्पाञ्जलि - ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्॥ पूजिताः तर्पिताः सन्तु से जल छोड़ें।

पंचमावरणम् - भुपूरे इन्द्रादि लोकपाल समीपे **ॐ वज्राय नमः श्री पा० ॥१॥ ॐ शक्त्यै नमः श्री० पा० ॥२॥ ॐ दण्डाय नमः श्री पा० ॥३॥ ॐ खड्गाय नमः श्री० पा० ॥४॥ ॐ पाशाय नमः श्री० पा० ॥५॥ ॐ अंकुशाय नमः श्री० पा० ॥६॥ ॐ गदायै नमः श्री० पा० ॥७॥ ॐ त्रिशूलाय नमः श्री**

पा० ॥८॥ ॐ पद्माय नमः श्री पा० ॥९॥ ॐ चं चक्राय नमः, चक्र श्री पा० पू० त० नमः ॥१०॥

पुष्पाञ्जलि - ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥ 'पूजिताः तर्पिताः सन्तु' से जल छोड़ें।

॥ पुरश्चरण विधिः ॥

वीरभद्र, उड्डीश, तंत्र मंत्रमहार्णव, मंत्रमहोदधि के अनुसार रक्तचंदन (कपि) अथवा श्वेतार्द्रक (श्वेतआक) की प्रतिमा अपने अंगुष्ठ परिमाण की पुष्य नक्षत्र में बनायें। अन्य ग्रन्थों में प्रतिमा को हाथी के ऊपर बैठकर बनाने को कहा है। अभाव में पत्थर या मिट्टी से बने हाथी पर बैठकर बनायें। यह भी नहीं हो सके तो हाथी के चित्रासन पर बैठकर बनाये। मूर्ति को गल्ले में रखने से धन वृद्धि होवे।

शत्रुनाश के लिये निम्बकाष्ठ की प्रतिमा बनाये अथवा लवण की प्रतिमा बनायें। गुड़ से निर्मित प्रतिमा सौभाग्य को देने वाली तथा बाँबी की मिट्टी से बनी प्रतिमा अभीष्ट की सिद्धि करती है।

साधक एकलक्ष जप संख्या पूरी करके हवनादि कर्म करें। कृष्णपक्ष की चतुर्दशी से शुक्लपक्ष की चतुर्दशी पर्यन्त गुड़ तथा पायसमात्र निवेदित करें। कृष्णपक्ष की अष्टमी से चतुर्दशी पर्यन्त नित्य साढ़े आठ हजार जप करे ८५० आहुतियाँ देकर तर्पणादि करें। इससे अभीष्ट सिद्धि को प्राप्त करें।

कुबेर ने इस मंत्र के प्रभाव से नौ निधियों को प्राप्त किया तथा सुग्रीव एवं विभीषण ने भी गणपति के वर से राज्य को प्राप्त किया। मधुमिश्रित लाजा होम करने से संसार को वशीभूत करने की शक्ति प्राप्त होवे, कन्या यदि करे तो शीघ्र वर को प्राप्त करें।

भोजन से पूर्व गणपति के निमित्त ग्रासान्न निकाल देवे तथा भोजन करते समय भी जप करने से मंत्र सिद्ध होता है।

शय्या पर सोये हुये उच्छिष्टावस्था में जप करने से शत्रु भी वश में हो जाता है। कटुतैल से मिश्रित राजीपुष्पों के हवन से शत्रुओं में विद्वेषण पैदा होवे। वाद विवाद में यह मंत्र विजय प्रदान करता है। नदी के जल से २७ बार अभिमंत्रित कर मुँह धोये तो वाक् सिद्धि होवें।

साधक लाल वस्त्र पहन कर लाल चंदन लगाकर ताम्बूल खाते हुये या नैवेद्य के मोदकादि को खाते हुये रक्तचंदन की माला पर जप करे, तुलसी की माला ग्रहण नहीं करें।

पूजित मूर्ति को मद्यपात्र में रखकर एकहाथ नीचे भूमि में गाड़ें और उस पर बैठकर अहर्निश जप करे तो एक सप्ताह के अन्दर सभी उपद्रव शांत होकर धन वैभव की प्राप्ति होवे। यह तामस प्रयोग है अतः नियम व्रत व सावधानी से करना चाहिये।

बलि विधानम् :- मधु, मांस माषान्न, पायसान्न अथवा फलादि से बलि प्रदान करें।

मंत्र:- **गं हं क्लौं ग्लौं उच्छिष्ट गणेशाय महायक्षायायं बलिः।**

॥ इति उच्छिष्ट गणपति यंत्रार्चनम् ॥

॥ अथ उच्छिष्टगणेश कवचम् ॥

॥ देव्युवाच ॥

देवदेव जगन्नाथ सृष्टि स्थिति लयात्मक ।
विना ध्यानं विना मंत्रं विना होमं विना जपम् ॥१॥
येन स्मरण मात्रेण लभ्यते चाशु चिंतितम् ।
तदेव श्रोतुमिच्छामि कथयस्व जगत्प्रभो ॥२॥

॥ ईश्वर उवाच ॥

श्रृणु देवि! प्रवक्ष्यामि गुह्याद्गह्यतरं महत् ।
उच्छिष्ट गणनाथस्य कवचं सर्वसिद्धिदम् ॥३॥
अल्पायासैर्विना कष्टैर्जपमात्रेण सिद्धिदम् ।
एकांते निर्जनेऽरण्ये गह्वरे च रणांगणे ॥४॥
सिंधुतीरे च गंगायाः कूले वृक्षतले जले ।
सर्वदेवालये तीर्थे लब्ध्वा सम्यग् जपं चरेत् ॥५॥
स्नान शौचादिकं नास्ति नास्ति निर्बन्धनं प्रिये ।
दारिद्यांतकरं शीघ्रं सर्वतत्त्वं जनप्रिये ॥६॥
सहस्त्र शपथं कृत्वा यदि स्नेहोऽस्ति मां प्रति ।
निंदकाय कुशिष्याय खलाय कुटिलाय च ॥७॥
दुष्टाय परशिष्याय घातकाय शठाय च ।
वंचकाय वरघ्नाय ब्राह्मणीगमनाय च ॥८॥

अशक्ताय च क्रूराय गुरुदोहरताय च ।
न दातव्यं न दातव्यं न दातव्यं कदाचन ॥९॥
गुरुभक्ताय दातव्यं सच्छिष्याय विशेषतः ।
तेषां सिध्यंति शीघ्रण ह्यन्यथा न च सिध्यति ॥१०॥
गुरु संतुष्टि मात्रेण कलौ प्रत्यक्षसिद्धिदम् ।
देहोच्छिष्टै प्रजप्तव्यं तथोच्छिष्टैर्महामनुः ॥११॥
आकाशे च फलं प्राप्तं नान्यथा वचनं मम ।
एषा राजवती विद्या विना पुण्यं न लभ्यते ॥१२॥
अथ वक्ष्यामि देवेशि कवचं मंत्र पूर्वकम् ।
येन विज्ञात मात्रेण राजभोगफल प्रदम् ॥१३॥

विनियोगः - अस्य श्री उच्छिष्टगणेश कवचस्य गणक ऋषिः, गायत्री छन्दः, उच्छिष्ट गणेश देवता, गं बीजं, स्वाहा शक्तिं, क्लीं कीलकं सर्वाभीष्ट सिद्धये जपे विनियोगः।

॥ कवचम् ॥

ऋषिर्मे गणकः पातु शिरसि च निरंतरम् ।
त्राहि मां देवि गायत्री छन्द ऋषिः सदा मुखे ॥१४॥
हृदये पातु मां नित्यमुच्छिष्टगणदेवता ।
गुह्ये रक्षतु तद्बीजं स्वाहा शक्तिश्च पादयोः ॥१५॥
काम कीलक सर्वाङ्गे विनियोगश्च सर्वदा ।
पार्श्वद्वयो सदा पातु स्वशक्तिं गणनायकः ॥१६॥
शिखायां पातु तद्बीजं भ्रूमध्ये तारबीजकम् ।
हस्तिवक्रश्च शिरसि लंबोदरो ललाटके ॥१७॥
उच्छिष्टो नेत्रयोः पातु कर्णौ पातु महात्मने ।
पाशांकुश महाबीजं नासिकायां च रक्षतु ॥१८॥
भूतीश्वरः परः पातु आस्यं जिह्वां स्वयं वपुः ।
तद्बीजं पातु मां नित्यं ग्रीवायां कंठदेशके ॥१९॥
गं बीजं च तथा रक्षेत्तथा त्वग्रे च पृष्ठके ।
सर्वकामश्च हृत् पातु पातु मां च करद्वये ॥२०॥
उच्छिष्टाय च हृदये वह्निबीजं तथोदरे ।

मायाबीजं च तथा कट्यां द्वा ऊरू सिद्धिदायकः ॥२१॥
जंघायां गणनाथश्च पादौ पातु विनायकः ।
शिरसः पादपर्यन्तमुच्छिष्टगण-नायकः ॥२२॥
आपादमस्तकान्तं च उमापुत्रश्च पातु माम् ।
दिशोऽष्टौ च तथाऽऽकाशे पाताले विदिशाऽष्टके ॥२३॥
अहर्निशं च मां पातु मदचंचल-लोचनः ।
जलेऽनले च संग्रामे दुष्टकारागृहे वने ॥२४॥
राजद्वारे घोरपथे पातु मां गणनायकः ।
इदं तु कवचं गुह्यं मम वक्त्राद्विनिर्गतम् ॥२५॥
त्रैलोक्ये सततं पातु द्विभुजश्च चतुर्भुजः ।
वाह्यमाभ्यंतरं पातु सिद्धि बुद्धिर्विनायकः ॥२६॥
सर्वसिद्धिप्रदं देवि कवचमृद्धि सिद्धिदम् ।
एकांते प्रजपेन्मंत्रं कवचं युक्ति संयुतम् ॥२७॥
इदं रहस्यं कवचमुच्छिष्ट-गणनायकम् ।
सर्ववर्मसु देवेशि इदं कवच नायकम् ॥२८॥
एतत् कवच माहात्म्यं वर्णितु नैव शक्यते ।
धर्मार्थ काम मोक्षं च नानाफलप्रदं नृणाम् ॥२९॥
शिवपुत्रः सदा पातु पातु मां सुरार्चितः ।
गजाननः सदापातु गणराजश्च पातुमाम् ॥३०॥
सदा शक्तिरतः पातु पातु मां काम विह्वलः ।
सर्वाभरणभूषाढ्यः पातु मां सिंदूरार्चितः ॥३१॥
पंचमोदकरः पातु पातु मां पार्वतीसुतः ।
पाशांकुशधरः पातु पातु मां च धनेश्वरः ॥३२॥
गदाधरः सदा पातु पातु मां काममोहितः ।
नग्ननारीरतः पातु पातु मां च गणेश्वरः ॥३३॥
अक्षयं वरदः पातु शक्ति युक्तः सदाऽवतु ।
भालचन्दः सदा पातु नानारत्न विभूषितः ॥३४॥
उच्छिष्टगणनाथश्च मदाघूर्णित लोचनः ।

नारीयोनिरसास्वादः पातु मां गजकर्णकः ॥३५॥
प्रसन्नवदनः पातु पातु मां भगवल्लभः ।
जटाधरः सदा पातु पातु मां च किरीटिकः ॥३६॥
पद्मासनस्थितः पातु रक्तवर्णश्चपातु माम् ।
नग्नसाम मदोन्मत्तः पातु मां गणदैवतः ॥३७॥
वामांगे सुन्दरीयुक्तः पातु मां मन्मथप्रभुः ।
क्षेत्रयः पिशितं पातु पातु मां श्रुतिपाठकः ॥३८॥
भूषाढ्यस्तु मां पातु नानाभोग समन्वितः ।
स्मिताननः सदापातु श्रीगणेश कुलान्वितः ॥३९॥
श्रीरक्तचन्दनमयः सुलक्षण गणेश्वरः ।
श्वेताऽर्क गणनाथश्च हरिद्रागणनायकः ॥४०॥
पारभद्र गणेशश्च पातु सप्तगणेश्वरः ।
प्रवालक गणाध्यक्षो गजदंतो गणेश्वरः ॥४१॥
हरबीज गणेशश्च भद्राक्षगणनायकः ।
दिव्यौषधि समुद्भूतो गणेशाश्चिंतित प्रदः ॥४२॥
लवणस्य गणाध्यक्षो मृत्तिकागणनायकः ।
तंडुलाक्षगणाध्यक्षो गोमयश्च गणेश्वरः ॥४३॥
स्फटिकागणाध्यक्षो रुद्राक्षगण दैवतः ।
नवरत्न गणेशश्च आदिदेवो गणेश्वरः ॥४४॥
पंचाननश्चतुर्वक्त्रः षडाननगणेश्वरः ।
मयूरवाहनः पातु पातु मां मूषकासनः ॥४५॥
पातु मां देवदेवेशः पातुमामृषिपूजितः ।
पातु मां सर्वदा देवो देव दानव पूजितः ॥४६॥
त्रैलोक्य पूजितो देवः पातु मां च विभुः प्रभुः ।
रंगस्थं च सदापातु सागरस्थं सदाऽवतु ॥४७॥
भूमिस्थं च सदा पातु पातालस्थं च पातुमाम् ।
अंतरिक्षे सदा पातु आकाशस्थं सदाऽवतु ॥४८॥
चतुष्पथे सदा पातु त्रिपथस्थं च पातु माम् ।

बिल्वस्थं च वनस्थं च पातु मां सर्वतस्तनुम् ॥४९॥
राजद्वारस्थितं पातु पातु मां शीघ्रसिद्धिदः ।
भवानी पूजितः पातु ब्रह्मविष्णु शिवार्चितः ॥५०॥

॥ फलश्रुति ॥

इदं तु कवचं देवि पठनात्सर्वसिद्धिदम् ।
उच्छिष्टगणनाथश्च समंत्रं कवचं परम् ॥५१॥
स्मरणाद्भूभुजत्वं च लभते सांगतां ध्रुवम् ।
वाचः सिद्धिकरं शीघ्रं परसैन्य विदारणम् ॥५२॥
प्रातर्मध्याह्न सायाह्ने दिवा रात्रौ पठेन्नरः ।
चतुर्थ्यां दिवसे रात्रौ पूजने मानदायकम् ॥५३॥
सर्व सौभाग्यदं शीघ्रं दारिद्यार्णवघातकम् ।
सुदार सुप्रजा सौख्यं सर्वसिद्धि करं नृणाम् ॥५४॥
जलेऽथवाऽनलेऽरण्ये सिंधुतीरे सरित्तटे ।
श्मशाने दूरदेशे च रणे पर्वतगह्वरे ॥५५॥
राजद्वारे भये घोरे निर्भयो जायते ध्रुवम् ।
सागरे च महाशीते दुर्भिक्षे दुष्टसंकटे ॥५६॥
भूत प्रेत पिशाचादि यक्षराक्षसजे भये ।
राक्षसी यक्षिणी क्रूरा शाकिनी डाकिनीगणाः ॥५७॥
राजमृत्युहरं देवि कवचं कामधेनुवत् ।
अनंत फलदं सति मोक्षं च पार्वति ॥५८॥
कवचेन विना मंत्रं यो जपेद्गणनायकम् ।
इह जन्मनि पापिष्ठो जन्मांते मूषको भवेत् ॥५९॥

इति परमरहस्यं देवदेवार्चनं च कवच परम दिव्यं पार्वती पुत्र रूपम्। पठति परमभोगैश्वर्य मोक्षप्रदं च लभति सकल सौख्यं शक्तिपुत्र प्रसादात् ॥६०॥

॥ इति रुद्रयामल तंत्रे उमामहेश्वर संवादे उच्छिष्टगणेश कवचं समाप्तं ॥

॥ अथ दशाक्षर क्षिप्रप्रसादगणपति (विघ्नराज) मंत्र ॥

मन्त्र – गं क्षिप्रप्रसादनाय नमः।

क्षिप्र प्रसाद गणपति का पूजन श्रीविद्या ललिता सुन्दरी उपासना में मुख्य है। इस मंत्र की उपासना से आलस्य, विघ्न, कलह दूर होकर धन प्राप्ति होवें।

विनियोगः - **ॐ अस्य श्री क्षिप्र प्रसाद गणपति मंत्रस्य गणक ऋषिः, विराट् छन्दः, क्षिप्र प्रसादनाय देवता, गं बीजं, आं शक्तिं, सर्वाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

ध्यानम्

पाशांकुशौ कल्पलतां विषाणं दधत् स्वशुण्डाहित बीजपूरः ।
रक्तस्त्रिनेत्रस्तरुणेन्दु मौलिर्हारोज्ज्वलो हस्तिमुखोऽवताद् वः ॥

यंत्रार्चनम् :- यंत्र देवता वक्रतुण्ड गणेश के ही है,

क्षिप्रप्रसाद गणेश यंत्रम्

प्रथमावरणम् - षट्कोण में **हृदयशक्ति, शिरशक्ति, शिखाशक्ति, कवचशक्ति, नेत्रशक्ति एवं अस्त्रशक्ति का** पूजन करें।

द्वितीयावरणम् - अष्ट दलों में निम्न स्वरूपों का पूजन करे - **ॐ विघ्नाय नमः ॥१॥ ॐ विनायकाय नमः ॥२॥ ॐ शूराय नमः ॥३॥ ॐ वीराय नमः ॥४॥ ॐ वरदाय नमः ॥५॥ ॐ इभवक्त्राय नमः ॥६॥ ॐ एकरदाय नमः ॥७॥ ॐ लंबोदराय नमः ॥८॥**

तृतीय व चतुर्थावरण में इसके बाद भूपूर में इन्द्रादि लोकपालों व आयुधों की पूर्व यंत्रार्चन विधि अनुसार करें।

॥ विरिगणपति ॥

इस देवता की वीरभाव से उपासना करे, पात्रासादन तथा शक्त्यार्चन कर पूजा करें तो अधिक लाभ रहे। **इस मंत्र के गणक ऋषि, गायत्री छन्द तथा विरिगणपति देवता है।**

मंत्र : **ॐ ह्रीं विरि विरिगणपति वर वरद सर्वलोकं मे वशमानय**

स्वाहा।

ध्यानम् :–

सिन्दूराभमिभाननं त्रिनयनं हस्तेषु पाशाङ्कुशौ
बिभ्राणं मधुमत् कपालमनिशं सार्धेन्दु मौलिं भजे ।
पुष्ट्याश्लिष्ट तनुं ध्वजाग्रकरया पद्मोलसद्धस्तया
तद् योन्याहित पाणिं मात्र वसुमत् पात्रोल्लसत् पुष्करम् ॥

यंत्रपूजा उच्छिष्टगणपति के समान करें।

॥ महागणपति मंत्रः॥

मंत्र - ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा।

यह मन्त्र संसार का वशीकरण कर सर्वसिद्धि देने वाला है।

विनियोगः - ॐ अस्य श्री महागणपति मंत्रस्य गणक ऋषिः (शिरसि), निवृद गायत्री छन्दः (मुखे), महागणपतये देवताये (हृदि), सर्वाभीष्ट सिद्ध्यर्थे जपे विनियोगः।

ध्यानम् :–

हस्तीन्द्रा चूडमरुणच्छायं त्रिनेत्रं रसा
दाश्लिष्टं प्रियया स पद्मकरया साङ्कस्थया सङ्गतम् ।
बीजापूर गदा धनुस्त्रिशिख युक् चक्राब्ज पाशोत्पलम्
व्रीह्यग्र स्व विषाण रत्न कलशान् हस्तैर्वहन्तं भजे ॥

कराङ्गन्यासः - श्रीं ह्रीं क्लीं ग्लौं गं गां अंगुष्ठाभ्यां नमः। श्रीं ह्रीं क्लीं ग्लौं गं गीं तर्जनीभ्यां स्वाहा। श्रीं ह्रीं क्लीं ग्लौं गं गूं मध्यमाभ्यां वषट्। श्रीं ह्रीं क्लीं ग्लौं गं गैं अनामिकाभ्यां हुं। श्रीं ह्रीं क्लीं ग्लौं गं गौं कनिष्ठाभ्यां वौषट्। श्रीं ह्रीं क्लीं ग्लौं गं गः करतल करपृष्ठाभ्यां फट्।

इसी तरह से हृदयादि न्यास करें।

अथ यंत्रार्चनम् - यंत्रार्चन विधियां पूर्व में दी जा चुकी है, उसी तरह से करें।

यंत्रोद्धार - त्रिकोण के बाहर षट्कोण उसके बाहर अष्टदल, उसके बाहर भूपूर की रचना करें।

` गणपति तर्पण एवं गुरुमण्डल पूजन पृष्ठ संख्या ७०६ पर दिया गया है।

महागणपति यंत्रम्

पश्चात् त्रिकोण के बाहर १. पूर्वे - **श्रियै सह श्रीपतये नमः**। २. दक्षिणे - **गौर्ये सह गौरीपतये नमः**। ३. पश्चिमे - **रत्यै सह रतिपतये नमः**। ४. उत्तरे - **ॐ मह्यै नमः ॐ वराहाय नमः**।५. देवताग्रे - **ॐ लक्ष्मी सहित गणनायकाय नमः**। गंधार्चन से पूजन तर्पण करें।

प्रत्येक आवरण के अंत में

अभीष्ट सिद्धिं मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं अमुकावरणार्चनम् ॥

से पुष्पाञ्जलि देवें तथा बाद में **पूजिताः तर्पिताः सन्तु** कहकर अर्घपात्र से जल छोड़ें।

द्वितीयावरणम् - (षटकोणे - अग्रे) पूर्वे **ॐ सिद्धि सहिता मोदाय नमः श्री पा०** ॥१॥ अग्निकोणे **ॐ समृद्धि सहित प्रमोदाय नमः श्री पा०** ॥२॥ नैर्ऋत्ये - **ॐ मदद्रवा सहित विघ्नाय नमः श्री पा०** ॥३॥ वायुकोणे - **ॐ द्राविणी सहित विघ्नकर्त्रे नमः श्री पा०** ॥४॥ ईशाने - **ॐ कांति सहिताय सुमुखाय नमः श्री पा०** ॥५॥ पश्चिमे **ॐ मदनावती सहिताय दुर्मुखाय नमः श्री पा०** ॥६॥ षट्कोण के दोनों ओर **ॐ वसुधा सहित शङ्खनिधये नमः, वसुमती सहित पद्मनिधये नमः**।

आवरण देवताओं के गंधार्चन तर्पण, '**ॐ अभीष्ट सिद्धिं .... द्वितीयावरणार्चनम्**' से पुष्पाञ्जलि देवें तथा बाद में **पूजिताः तर्पिताः सन्तु** कहकर अर्घपात्र से जल छोड़ें।

तृतीयावरणम् - (षट्कोण में अङ्गन्यास की तरह) "**ॐ श्रीं ह्रीं क्लीं ग्लौं गं गां हृदयाय नमः**"। **श्रीं ह्रीं क्लीं ग्लौं गं गीं शिरसे स्वाहा। श्रीं ह्रीं क्लीं ग्लौं गं गूं शिखायै वषट्। श्रीं ह्रीं क्लीं ग्लौं गं गैं कवचाय हुं। श्रीं ह्रीं क्लीं ग्लौं गं गौं नेत्रत्रयाय वौषट्। श्रीं ह्रीं क्लीं ग्लौं गं गः अस्त्राय फट्**।

शेष देवताओं का पूजन अष्टदल व भुपूर की उच्छिष्ट गणपति यंत्र पूजा विधि के समान षडङ्ग पूजा कर पुष्पाञ्जलि प्रदान करें '**ॐ अभीष्ट सिद्धिं ...... तृतीयावरणार्चनम्**'। बाद में **पूजिताः तर्पिताः सन्तु** कहकर अर्घपात्र से जल

छोडें।

चतुर्थावरणम् :- अष्टदल में ब्राह्मी आदि शक्तियों का पूजन उच्छिष्ट गणपति यंत्र की तरह से करें।

पंचम तथा षष्टम् आवरणपूजा में इन्द्रादि लोकपालों व आयुधों का पूजन तर्पण उच्छिष्ट गणपति यंत्रार्चन जैसे करें।

॥ श्री महागणपति वज्रपञ्जर–कवचम् ॥

महादेवि! गणेशस्य, वरदस्यः महात्मनः ।
कवचं ते प्रवक्ष्यामि, वज्र–पञ्जरकाभिधम् ॥

विनियोगः- **ॐ अस्य श्रीमहागणपति वज्रपञ्जर कवचस्य श्रीभैरव ऋषिः, गायत्र्यं छन्दः, श्रीमहागणपतिः देवता, गं बीजं, ह्रीं शक्तिः, कुरु कुरु कीलकं, वज्रविद्यादि-सिद्ध्यर्थे महागणपति-वज्रपञ्जर कवच पाठे विनियोगः।**

ऋष्यादिन्यासः - **श्रीभैरव ऋषये नमः शिरसि, गायत्र्यं छन्दसे नमः मुखे, श्रीमहागणपतिः देवतायै नमः हृदि, गं बीजाय नमः गुह्ये, ह्रीं शक्तये नमः नाभौ, कुरु कुरु कीलकाय नमः पादयोः, वज्रविद्यादि सिद्ध्यर्थे महागणपति वज्रपञ्जर कवचपाठे विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यास	करन्यास	अङ्गन्यास
गां	अङ्गुष्ठाभ्यां नमः	हृदयाय नमः
गीं	तर्जनीभ्यां नमः	शिरसे स्वाहा
गूं	मध्यमाभ्यां नमः	शिखायै वषट्
गैं	अनामिकाभ्यां नमः	कवचाय हुँ
गौं	कनिष्ठिकाभ्यां नमः	नैत्र-त्रयाय वौषट्
गः	करतल-करपृष्ठाभ्यां नमः	अस्त्राय फट्

विघ्नेशं विश्ववन्द्यं सुविपुल–यशसं लोकरक्षा–प्रदक्षं,
साक्षात्सर्वापदासु प्रशमनसुमतिं पार्वतीप्राण–सूनुम् ।
प्रायः सर्वासुरेन्द्रैः ससुरमुनिगणैः साधकैः पुज्यमानं,
कारुण्येनान्तरायामित भयशमनं विघ्नराजं नमामि ॥

मानस पूजन कर **कवच पाठ** करें। यथा-

॥ कवच पाठ ॥

ॐ श्रीं ह्रीं गं शिरः पातु, महागणपतिः प्रभुः ।
विनायको ललाटं मे, विघ्नराजो भ्रुवौ मम ॥१॥
पातु नेत्रे गणाध्यक्षो, नासिकां मे गजाननः ।
श्रुती मेऽवतु हेरम्बो, गण्डौ मे मोदकाशनः ॥२॥
द्वै-मातुरो मुखं पातु, चाधरौ पात्वरिन्दमः ।
दन्तान् ममैकदन्तोऽव्याद्, वक्रतुण्डोऽवताद् रसाम् ॥३॥
गाङ्गेयो मे गलं पातु, स्कन्धौ सिंहासनोऽवतु ।
विघ्नान्तको भुजौ पातु, हस्तौ मूषकवाहनः ॥४॥
ऊरू ममावतान्नित्यं, देवस्त्रिपुरघातनः ।
हृदयं मे कुमारोऽव्याज्जयन्तः पार्श्वयुग्मकम् ॥५॥
प्रद्युम्नो मेऽवतात् पृष्ठं, नाभिं शंकरनंदनः ।
कटिं नन्दिगणः पातु, शिश्नं वीरेश्वरोऽवतु ॥६॥
मेढ्रे मेऽवतु सौभाग्यो, भृङ्गिरीटी च गुह्यकम् ।
विराटकोऽवतादूरू, जानू मे पुष्पदन्तकः ॥७॥
जङ्घे मम विकर्तोऽव्याद्, गुल्फावन्त्य-गणोऽवतु ।
पादौ चित्तगणः पातु, पादाधो लोहितोऽवतु ॥८॥
पादपृष्ठं सुन्दरोऽव्याद्, नूपुराढ्यो वपुर्मम ।
विचारो जठरं पातु, भूतानि चोग्ररूपकः ॥९॥
शिरसः पादपर्यन्तं, वपुः सुप्तगणोऽवतु ।
पादादि-मूर्ध-पर्यन्तं, वपुः पातु विनर्तकः ॥१०॥
विस्मारितं तु यत् स्थानं, गणेशस्तत् सदाऽवतु ।
पूर्वे मां ह्रीं करालोऽव्यादाग्नेये विकरालकः ॥११॥
दक्षिणे पातु संहारो, नैर्ऋते रुरुभैरवः ।
पश्चिमे मां महाकालो, वायौ कालाग्निभैरवः ॥१२॥
उत्तरे मां सितास्योऽव्यादैशान्यामसितात्मकः ।
प्रभाते शतपत्रोऽव्यात्, सहस्रारस्तु मध्यमे ॥१३॥
दन्तमाला दिनान्तेऽव्यान्निशि पात्रं सदाऽवतु ।

कलशो मां निशीथेऽव्यान्निशान्ते परशुस्तथा ॥
सर्वत्र सर्वदा पातु शङ्ख-युग्मं च मद्-वपुः ॥१४॥
ॐ ॐ राजकुले हौं हौं रणभये ह्रीं ह्रीं कुद्यूतेऽवतात्,
श्रीं श्रीं शत्रुगृहे शशौं जलभये क्लीं क्लीं वनान्तेऽवतु ।
ग्लौं ग्लूं ग्लैं ग्लं गुं सत्त्वभीतिषु महाव्याध्यार्तिषु ग्लौं गं गौं,
नित्यं यक्ष-पिशाच-भूत-फणिषु ग्लौं गं गणेशोऽवतु ॥१५॥

॥ फलश्रुति ॥

इतीदं कवचं गुह्यं, सर्वतंत्रेषु गोपितम् ।
वज्रपञ्जर-नामानं, गणेशस्य महात्मनः ॥१॥
अङ्गभूतं मनुमयं, सर्वाचारैक-साधनम् ।
विनानेन न सिद्धिः स्यात् पूजनस्य जपस्य च ॥२॥
तस्मात् तु कवचं पुण्यं, पठेद्वा धारयेत् सदा ।
तस्य सिद्धिर्महादेवी! करस्था पारलौकिकी ॥३॥
यं यं कामयते कामं, तं तं प्राप्नोति पाठतः ।
अर्धरात्रे पठेन्नित्यं, सर्वाभीष्टफलं लभेत् ॥४॥
इति गुह्यं सुकवचं, महागणपतेः प्रियम् ।
सर्वसिद्धिमयंदिव्यं, गोपयेत् परमेश्वरि ॥५॥

॥ श्रीरुद्रयामले तन्त्रे महागणपति कवचं संपूर्णम् ॥

॥ हेरम्ब गणपति॥

हेरम्ब गणपति की उपासना से विघ्न दूर होकर आत्मबल व धन की वृद्धि होवे।

चतुरक्षर मंत्र - ॐ गूं नमः।

प्रधान मंत्र :- ॐ नमो हेरम्ब मदमोहित मम सङ्कटान् निवारय निवारय स्वाहा।

विनियोगः - अस्य श्री हेरम्ब गणपति मंत्रस्य गणक ऋषिः, गायत्री छन्दः, हेरम्ब गणपति देवता, गकारो बीजं, बिन्दुः शक्तिं, चतुर्वर्ग सिद्ध्यर्थे जपे विनियोगः।

विनियोग: अस्य श्री हेरम्ब गणपति मंत्रस्य गणक ऋषिः, गायत्री छन्दः, हेरम्ब गणपति देवता, गकारो बीजं, बिन्दुः शक्तिं, चतुर्वर्ग सिद्ध्यर्थे जपे विनियोगः।

गां, गीं, गूं, गैं, गौं गः से षडङ्गन्यास करें।

ध्यानम् :–

मुक्ता कांचन नीलकुन्द घुसृणच्छायैस्त्रिनेत्रान्वितै
र्नागास्यैर्हरि वाहनं शशिधरं हेरम्बमर्कप्रभम् ।
दृप्तं दानमभीति मोदक रदान् टंकंशिरोऽक्षात्मिकाम्
मालां मुद्गरमंकुशं त्रिशिखकं दोर्भिर्दधानं भजे ॥

यंत्रार्चन क्षिप्र प्रसादनाय गणपति की तरह करें।

॥ लक्ष्मी–विनायक ॥

विनियोग ॐ अस्य श्रीलक्ष्मीविनायक मंत्रस्य अंतर्यामी ऋषिः (शिरसि) गायत्री छन्दः (मुखे) लक्ष्मीविनायक देवता (हृदये) श्रीं बीजम् (गुह्ये) स्वाहा शक्तिं (पादयोः) ममाभीष्ट सिद्धये जपे विनियोगः (सर्वाङ्गे)।

मंत्र: ॐ श्रीं गं सौम्याय गणपतये वर वरद सर्वजनं मे वशमानय स्वाहा।

न्यासः	करन्याय	अङ्गन्यास
ॐ श्रां गां	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ श्रीं गीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा
ॐ श्रृं गूं	मध्यमाभ्यां नमः।	शिखायै वषट्
ॐ श्रैं गैं	अनामिकाभ्यां नमः।	कवचाय हुँ
ॐ श्रौं गौं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्
ॐ श्रः गः	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्

ध्यानम् :–

दन्ताभये चक्रवरौ दधानं कराग्रगं स्वर्णघटं त्रिनेत्रम् ।
धृताब्जयालिङ्गितमाब्धि पुत्र्या-लक्ष्मी गणेशं कनकाभमीडे ॥

(मन्त्रमहोदधि में चक्रदरौ अशुद्ध रूप में मुद्रित है, मंत्रमहार्णव व मंत्रकोष के

अनुसार शुद्ध चक्रवर्ती है।)

इस देवता के साथ लक्ष्मी का पूजन करने से श्रेष्ठफल मिलता है।

लक्ष्मी–विनायक यन्त्र

अथयंत्रार्चनम् :- आवरण पूजा विधि वक्रतुण्ड व उच्छिष्ट गणेश यंत्र की तरह के समान है। षट्कोण व अष्टदल पूजा में कुछ भेद है। यथा -

पीठ पूजन हेतु **'तीव्रा, चालिनी आदि'** नौ पीठ शक्तियों का पूजन करें।

प्रथमावरणम् - षट्कोण में पूजा करें - अग्निकोणे - **ॐ श्रां गां हृदयाय नमः** ॥१॥ नैर्ऋत्ये - **ॐ श्रीं गीं शिरसे स्वाहा** ॥२॥ **ॐ श्रूं गूं शिखायै वषट्** ॥३॥ **ॐ श्रैं गैं कवचाय हुं** ॥४॥ **ॐ श्रौं गौं नेत्रत्रयाय वौषट्** ॥५॥ **ॐ श्रः गः अस्त्राय फट्** ॥६॥

पुष्पाञ्जलि - ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥ **पूजिताः तर्पिताः सन्तु** से जल छोड़ें।

द्वितीयावरणम् :- देव के दक्षिण पार्श्व में - **ॐ शङ्खनिधये नमः शङ्खनिधि श्रीपादुकां पूजयामि तर्पयामि नमः**। देव के वामपार्श्व में - **ॐ पद्म निधये नमः पद्मनिधि श्री पा० पू० त० नम॥**

अष्टदल मध्ये (पूर्वादि क्रमेण) **ॐ बलायै नमः बला श्री पा० पू० त० नमः** ॥१॥ **ॐ विमलायै नमः श्री पा० पू० त० नमः** ॥२॥ **ॐ कमलायै नमः श्री पा० पू० त० नमः** ॥३॥ **ॐ वनमालिकायै नमः श्री पा० पू० त० नमः** ॥४॥ **ॐ विभीषिकायै नमः श्री पा० पू० त० नमः** ॥५॥ **ॐ मालिकायै नमः श्री पा० पू० त० नमः** ॥६॥ **ॐ शांकर्यै नमः शांकरी श्री पा० पू० त० नमः** ॥७॥ **ॐ वसुबालिकायै नमः वसुबालिका श्री पा० पू० त० नमः** ॥८॥

पुष्पाञ्जलि - ॐ अभीष्ट... द्वितीयावरणार्चनम्॥ **पूजिताः तर्पिताः सन्तु** से

जल छोड़ें।

तृतीयावरणम् एवं चतुर्थावरणम् - भुपूर में इन्द्रादि दशलोकपालों व उनके आयुधों का पूजन तर्पण करें। विधि वक्रतुण्ड व उच्छिष्ट गणेश यंत्र के अनुसार है।

पुरश्चरण प्रयोग :- हृदय पर्यन्त जल में खड़े होकर सूर्य मण्डल में लक्ष्मी विनायक का ध्यान कर ३ लाख जप करे तो धन वृद्धि होवें। बिल्ववृक्ष के मूल भाग में बैठकर इतने ही जप करे तो धन वृद्धि होवें। अशोक की लकड़ी से प्रज्ज्वलित अग्नि में घृताक्त चावलों के होम से सारा विश्व वशीभूत होवें। खादिर की लकड़ी से प्रज्वलित अग्नि में अर्क समिधा के होम से राजा वश में होवें, पायस होम से महालक्ष्मी प्रसन्न होवें।

॥ इति लक्ष्मी-विनायक प्रयोगः ॥

॥ अथ त्रैलोक्यमोहन गणेश विधानम् ॥

इस मन्त्र की उपासना से विवाह दोष विघ्न दूर होवें। वर प्राप्ति एवं धन प्राप्ति होवे।

मंत्र : **वक्रतुण्डैकदंष्ट्राय क्लीं ह्रीं श्रीं गं गणपते वरवरद सर्वजनं मे वशमानय स्वाहः।**

विनियोगः - **अस्य श्रीत्रैलोक्यमोहन कर गणेश मंत्रस्य गणक ऋषिः, गायत्री छन्दः, त्रैलोक्य मोहनकरो गणेशो देवता, ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः गणक ऋषये नमः शिरसि। गायत्री छंद से नमः मुखे। त्रैलोक्यमोहनकरो गणेश देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।

मंत्रन्यास	करन्यास	अङ्गन्यास
ॐ वक्रतुण्डैकदंष्ट्राय क्लीं ह्रीं श्रीं	अंगुष्ठाभ्यां नमः	हृदयाय नमः
ॐ गं गणपते	तर्जनीभ्यां नमः।	शिरसे स्वाहा
ॐ वरवरद	मध्यमाभ्यां नमः।	शिखायै वषट्
ॐ सर्वजनम्	अनामिकाभ्यां नमः।	कवचाय हुँ
ॐ मे वशमानय	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्
ॐ स्वाहा	करतल करपृष्ठाभ्यां नमः	अस्त्राय फट्

ध्यानम् :–

गदाबीजपूरे धनुः शूल चक्रे सरोजत्पले पाशधान्यग्र दंतान ।
करै सन्दधानं स्वशुण्डाग्र राजन् मणी कुंभमङ्काधिरूढं स्वपत्न्या ॥१॥
सरोजन्मना भूषणाम्भरेणो ज्वलद्धस्त तन्व्या समालिङ्गताङ्गम् ।
करीन्द्राननं चन्द्रचूडं त्रिनेत्रं जगन्मोहनं रक्तकान्तिं भजेत्तम् ॥२॥

यंत्रार्चनम् – षट्कोण उसके बाहर अष्टदल तथा उसके बाहर भुपूर युक्त गणेश यंत्र होता है। मूर्ति का घृत से अभ्यजन करे दुग्धधारा या जलधारा से अग्न्युत्तारण करके मंडल मध्य में रखें, गंधार्चन करें।

पीठपूजा :- तीव्रा चालिनी आदि नौ शक्ति का पूजन करें।

देव से अर्चन की आज्ञा प्राप्त करें –

ॐ सचिन्मयः परेश त्वं परामृतरस प्रिय ।
अनुज्ञां देहि गणप परिवारार्चनाय मे ॥

प्रथमावरणम् :- षट्कोण मध्ये केसरेषु अग्निकोणे **ॐ वक्रतुण्डैक दंष्ट्राय क्लीं ह्रीं श्रीं गं हृदयाय नमः ॥१॥** नैर्ऋते – **ॐ गणपते शिरसे स्वाहा ॥२॥** वायवे – **ॐ वरवरद शिखायै वषट् ॥३॥** ऐशान्यें – **ॐ सर्वजनं कवचाय हुं ॥४॥** मध्याग्रे – **ॐ मे वशमानय नेत्रत्रयाय वौषट् ॥५॥** दिक्षु – **ॐ स्वाहा अस्त्राय फट् ॥६॥** (गंधार्चन करें)

त्रैलोक्यमोहन गणपति यन्त्रम्

पुष्पाञ्जलि – 'ॐ अभीष्ट सिद्धिं .... प्रथमावरणार्चनम्'। बाद में पूजिताः तर्पिताः सन्तु कहकर अर्घपात्र से जल छोड़ें।

द्वितीयावरणम् :- अष्टदले पूर्वादिक्रमेण – **ॐ वामाये नमः, वामा श्री पादुकां पूजयामि तर्पयामि नमः ॥१॥ ॐ ज्येष्ठायै नमः, ज्येष्ठ श्री पा० ॥२॥ ॐ रौद्रायै नमः, रौद्री श्री पा० ॥३॥ ॐ काल्यै नमः, काली श्री**

पा० ॥४॥ ॐ कलपदादिकायै नमः, कलपदादिका श्री पा० ॥५॥ ॐ विकरिण्यै नमः, विकरिणी श्री पा० ॥६॥ ॐ बलायै नमः, बला श्री पा० ॥७॥ ॐ प्रमथिन्यै नमः, प्रमथिनी श्री पादुकां पूजयामि तर्पयामि नमः ॥८॥

देवस्याग्रे - ॐ सर्वभूतदमन्यै नमः, सर्वभूतदमनी श्री पा०। ॐ मनोन्मन्यै नमः, मनोन्मनी श्री पा०॥ देवस्य चतुर्षु दिक्षु - ॐ प्रमोदाय नमः, प्रमोद श्री पा० ॥१॥ ॐ सुमुखाय नमः, सुमुख श्री पा० ॥२॥ ॐ दुर्मुखाय नमः, दुर्मुख श्री पा० ॥३॥ ॐ विघ्ननाशाय नमः, विघ्ननाश श्री पा० ॥४॥

पुष्पाञ्जलि :- ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम्॥ पूजिताः तर्पिताः सन्तु से जल छोड़ें।

तृतीयावरणम् :- अष्टदलाग्रे पूर्वादिक्रमेण - **ॐ आं ब्राह्मयै नमः, ब्राह्मी श्री पा० ॥१॥ ॐ ईं माहेश्वर्यै नमः, माहेश्वरी श्री पा० ॥२॥ ॐ ऊं कौमार्यै नमः, कौमारी श्री पा० ॥३॥ ॐ ॠं वैष्णव्यै नमः, वैष्णवी श्री पा० ॥४॥ ॐ लृं वाराह्यै नमः, वाराही श्री पा० ॥५॥ ॐ ऐं इन्द्राण्यै नमः, इन्द्राणी श्री पा० ॥६॥ ॐ औं चामुण्डायै नमः, चामुण्डा श्री पा० ॥७॥ ॐ अः महालक्ष्म्यै नमः, महालक्ष्मी श्री पा० ॥८॥**

पुष्पाञ्जलि :- ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम्॥ पूजिताः तर्पिताः सन्तु से जल छोड़ें।

चतुर्थावरणम् तथा पंचमावरणम् में इन्द्रादि दशदिक्पालों का अर्चन करें। विधि उच्छिष्ट गणपति यंत्रार्चन में देखें।

अस्यपुरश्चरण प्रयोग : ४ लाख जप पूरे करके हवन तर्पण मार्जन ब्राह्मण भोजन करायें।

कमल के पुष्प से हवन करने से राजा तथा कुमुद पुष्पों के हवन से मंत्री को वश में किया जा सकता है। समिध होम में पीपल से ब्राह्मणों को, उदुम्बर होम से क्षत्रियों को, प्लक्ष होम से वैश्यों को तथा वृक्ष समिध होम से शूद्रों का वशीकरण होता है। (शूद्र का अर्थ नीच कर्म के विचार वालों से भी है चाहे वह सवर्ण होवें)।

मुनक्का के होम से सुवर्ण, गो दुग्ध के हवन से गोधन की वृद्धि होवे। दधि मिश्रित चरु होम से ऋद्धि तथा घी व घृतान्न के होम से अन्न-धन की वृद्धि होवे तथा वेतस के होम से सुवृष्टि होवे। लाजा होम से अभीष्ट को प्राप्त करे विघ्नों का नाश होवे, कन्या को वर की प्राप्ति होवें।

॥ अथ हरिद्रा गणेश प्रयोगः ॥

हरिद्रा गणेश का प्रयोग बगलामुखी उपासना में विशेष रूप से करना चाहिये। विवाहादि मंगल कार्यों में हरिद्रा पिष्ठी का लेप विघ्ननाश कर्ता है, सौंदर्य व सुखसौभाग्य का देने वाला माना जाता है। त्रिपुरसुन्दरी श्रीदेवी के स्मरण करने पर हरिद्रा गणपति ने प्रकट होकर भण्डासुर दैत्यकृत अभिचार यंत्र को नष्ट किया था। हरिद्रागणेश के प्रयोग से शत्रु का हृदयद्रवीभूत होकर वश में हो जाता है।

विनियोग :- ॐ **अस्य श्रीहरिद्रा गणेश मन्त्रस्य मदन ऋषिः, अनुष्टुप् छन्दः, हरिद्रा गणेश देवता, ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः - ॐ मदन ऋषये नमः शिरसि। अनुष्टुप् छंदसे नमः मुखे। हरिद्रागणेश देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।

न्यास	करन्यास	अङ्गन्यास
ॐ हुँ गं ग्लौं	अंगुष्ठाभ्यां नमः	हृदयाय नमः।
हरिद्रा गणपतये	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
वरवरद	मध्यमाभ्यां नमः।	शिखायै वषट्।
सर्वजन हृदयम्	अनामिकाभ्यां नमः।	कवचाय हुँ।
स्तंभय स्तंभय	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
स्वाहा	करतल करपृष्ठाभ्यां नमः	अस्त्राय फट्।

मंत्र : ॐ हुँ गं ग्लौं हरिद्रागणपतये वर वरद सर्वजनहृदयं स्तंभय स्तंभय स्वाहा।

ध्यानम् :—

पाशाङ्कुशौ मोदकमेकदन्तं करैदधानं कनकासनस्थम्।
हरिद्राखण्ड प्रतिमं त्रिनेत्रं पीतांशुकं रात्रिगणेशमीडे ॥

यंत्रार्चनम् :- संपूर्ण विधि तथा देवता त्रैलोक्य मोहन गणपति के समान है। केवल षडङ्ग देवताओं के पूजन में भिन्नता है।

प्रथमावरणम् - (षट्कोणेषु) यथा :- अग्निकोणे **ॐ हुँ गं ग्लौं हृदयाय नमः हृदय श्री पादुकां पूजयामि तर्पयामि नमः** ॥१॥ नैर्ऋत्ये - **ॐ हरिद्रा गणपतये शिरसे स्वाहा। शिरसि श्री पा०** ॥२॥ वायवे - **ॐ वर वरद शिखायै वषट्, शिखायां श्री पा०** ॥३॥ ऐशान्ये - **ॐ सर्वजन हृदयं कवचाय हुं, कवचे** श्री पा० ॥४॥ मध्याग्रे - **ॐ स्तंभय स्तंभय नेत्रत्रयाय वौषट्, नेत्र**

श्री पा० ॥५॥ दिक्षु ॐ स्वाह अस्त्राय फट्, अस्त्रे श्री पा० ॥६॥

पुष्पाञ्जलि :- ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥ पूजिताः तर्पिताः सन्तु कहकर अर्घ पात्र से जल छोड़ें।

हरिद्रागणपति यन्त्रम्

द्वितीयावरण में अष्टदल में वामा, ज्येष्ठा आदि शक्तियों का, **तृतीयावरण** में ब्राह्मी आदि मातृकाओं का, **चतुर्थ-पंचम** आवरण में इन्द्रादि लोकपालों व आयुधों का पूजन त्रैलोक्य मोहन गणपति के समान करें।

पुरश्चरण प्रयोग :- गुड़ व हरिद्रा पिष्ठी से अथवा हरिद्रा से गणेशजी की प्रतिमा बनाकर पूजन करें।

८ लाख जप करके हल्दी मिश्रित चावलों से दशांश होम करें। काम्य प्रयोग हेतु शुक्ला चतुर्थी को कन्या द्वारा पीली हल्दी का लेपकर तीर्थजल से स्नान कर गणेश पूजन करें।

गणेशजी के सामने तर्पण कर १००८ जप करें। घी व पुए से १०० आहुतियाँ देकर बटुकों को भोजन करायें, कन्याओं को तथा गुरु को भोजनादि से संतुष्ट करें तो सभी मनोकामनाऐं पूर्ण होती है।

लाजा होम से कन्या को वर की प्राप्ति तथा पुरुष को उत्तम कन्या की प्राप्ति होती है।

वन्ध्या (सन्तान हीन स्त्री) ऋतु स्नान कर गणेश पूजन पूर्वक ४ तोले गोमूत्र से दूधिया बच (दूध में भिगोयी) और हल्दी पीसकर उसे १०० बार अभिमंत्रित करें फिर कन्या एवं वटुकों को लड्डू खिलाकर उक्त औषधि का पान करे तो उसे पुत्र लाभ होवें।

शत्रु के वशीकरण हेतु हल्दी मिश्रित चांवलों का होम करें।

॥ इति हरिद्रागणपति विधानम्॥

॥ अथ हरिद्रागणेश कवचम् ॥

॥ ईश्वरउवाच ॥

श्रृणु वक्ष्यामि कवचं सर्वसिद्धिकरं प्रिये ।
पठित्वा पाठयित्वा च मुच्यते सर्व संकटात् ॥१॥
अज्ञात्वा कवचं देवि गणेशस्य मनुं जपेत् ।
सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि ॥२॥
ॐ आमोदश्च शिरः पातु प्रमोदश्च शिखोपरि ।
संमोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः ॥३॥
गणक्रीडश्चाक्षियुगं नासायां गणनायकः ।
गणक्रीडाचितः पातु वदने सर्वसिद्धये ॥४॥
जिह्वायां सुमुखः पातु ग्रीवायां दुर्मुखः सदा ।
विघ्नेशो हृदये पातु विघ्ननाशश्च वक्षसि ॥५॥
गणानां नायकः पातु बाहुयुग्मं सदा मम ।
विघ्नकर्त्ता च उदरे विघ्नहर्ता च लिङ्गके ॥६॥
गजवक्त्रः कटौ देशे एकदन्तो नितम्बके ।
लम्बोदरः सदा पातु गुह्यदेशे ममारुणः ॥७॥
व्यालयज्ञोपवीती मां पातु पादयुगे सदा ।
जापकः सर्वदा पातु जानुजङ्घे गणाधिपः ॥८॥
हारिद्रः सर्वदा पातु सर्वाङ्गे गणनायकः ।
य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि ॥९॥
कवचं सर्वसिद्धाख्यं सर्वविघ्नविनाशनम् ।
सर्वसिद्धिकरं साक्षात्सर्वपापविमोचनम् ॥१०॥
सर्वसंपत्प्रदं साक्षात्सर्वपापविमोक्षणम् ।
सर्वसंपतिप्रदं साक्षात्सर्वशत्रुक्षयंकरम् ॥११॥
ग्रहपीड़ा ज्वरा रोगा ये चान्ये गुह्यकादयः ।
पठनाद्धारणा देवि नाशमायान्ति तत्क्षणात् ॥१२॥
धनधान्यकरं देवि कवचं सुरपूजितम् ।
समो नास्ति महेशानि त्रैलोक्ये कवचस्य च ॥१३॥

हारिद्रस्य महेशानि कवचस्य च भूतले ।
किमन्यैरसदालापैर्यत्रायुर्व्ययमाप्नुयात् ॥१४॥

॥ इति विश्वसारतन्त्रे हरिद्रागणेश कवचम् समाप्तं ॥

॥ पार्थिवगणेश ॥

जिस तरह पार्वतीजी को अपने मल की पिष्ठी से गणेश प्रतिमा बनाकर प्राण संस्कार करने पर प्रसन्नता हुई थी, उसी तरह साधक यदि गणेशजी की पार्थिव प्रतिमा बनाकर प्राणप्रतिष्ठा मंत्र पूर्वक पूजा आराधना करे तो प्रसन्नता व लाभ प्राप्त करता है। पुत्र लाभ हेतु यह प्रयोग करें।

गणेश प्रतिमा बाँबी या नदी तट की मिट्टी की बनाने से अर्थ सिद्धि, हो गुड़ की प्रतिमा वाञ्छित लाभ देवें, हरिद्रा गोधूमान्न, चिपट (चिउड़ा) आदि की प्रतिमा बनाने से कार्य सिद्धि होवें। पार्थिव शिव की तरह ही यह विधान है।

तिथि वार नक्षत्रादि का उल्लेख कर कामना का संङ्कल्प कर प्रतिदिन १, ११, २१, ५१, १०८ या १००८ प्रतिमायें बनायें। गणेश, महागणपति उच्छिष्ट गणपति आदि स्वरूपों में से इष्ट नाम से आराधना करे। सहस्त्र नामावलि से अक्षत पुष्प गंध भी १००८ १००८ बार चढ़ावें या पुष्पों की पंखुड़ियाँ कर अक्षत पुष्पगंधार्चन करके शामिल करके एक साथ चढ़ावें। शर्करा तथा नुकति के दानें विशेष मात्रा में चढ़ाकर १००८ बार नैवेद्य की कल्पना करें। प्रतिमा नित्य विर्सजन करे दूसरे दिन पुन: इसी क्रम से करके यथा संख्या जप या प्रतिमा संख्या पूरी कर हवनादि कार्य कर कन्या वटुक ब्राह्मण भोजन करने पर अपुत्र भी पुत्र लाभ प्राप्त करे तथा धन वैभव प्राप्त करें।

॥ अथ चौरगणपति प्रयोग:॥

तंत्र शास्त्र में चौर विद्या का उल्लेख भी है। साबर मंत्रों व तामसी क्रियाओं द्वारा साधक दूसरे के तप तेज व सिद्धि का हरण कर स्वयं उसका अधिपति हो जाता है। वानराज बालि ने भी इसी प्रकार की सिद्धि प्राप्त कर रखी थी जिसके कारण शत्रु का आधा बल उसमें आ जाता और शत्रु नि:स्तेज हो जाता था। परद्रव्य हरण पर विद्या हरण के प्रयोग भी इस विद्या के अर्न्तगत आते है।

दूसरे व्यक्ति की शक्ति को दृष्टिमात्र से अथवा स्पर्श द्वारा खींची जा सकती है।

ऐसे तामसी तांत्रिकों से बचने के लिये दो साधारण उपाय है।

१. ऐसी अवस्था में यह धारणा करें कि यह शरीर मेरा नहीं है, मेरी जगह मेरे गुरु बैठे है, हृदय में इष्ट देवता का ध्यान करें तथा भावना करें कि इष्ट का तेज मेरे चारों ओर कवच रूप मे रक्षा कर रहा है।

२. चौर गणपति की सात्त्विक उपासना से रक्षा कवच प्राप्त करें।

जिस तरह जब आत्मा शरीर छोड़ती है तो शरीर के दश द्वारों में से कहीं से भी प्राण निकल जाते हैं उसी तरह तेज का हरण भी इन्हीं दश द्वारों से होता है। अतः दस द्वारों की रक्षा करनी चाहियें।

इस मन्त्र को जपने से अपने इष्ट मन्त्र की सिद्धि हानि नहीं होगी।

प्राणतोषणी तन्त्र में भी विलास तंत्र से उल्लेखित कर कहा है। (गणेशतन्त्रे)

गणेश उवाच –

अधुनाहं प्रवक्ष्यामि चौर मंत्रमतः शृणु। चौर मन्त्र परिज्ञानं बिना हि ब्राह्मणीश्वरि! पुराणं प्रपठेत् यस्तु स एव मूर्तिमान् कलिः। परजन्मनि पापिष्ठःस भवेच्चौर कुक्कुरः। शिवपूजा विष्णुपूजा शक्तिपूजा तथैव च। सर्व पूजासु यत् तेजो हरते गणपः स्वयं। पञ्चाशद् गणदेवानां ज्योतिषिं मुनि पुङ्गवाः। प्रतिद्वारपथे गत्वा प्रतिपद्मेषु जृंभते। हरन्ति जप तेजांसि प्रतिपद्मेषु संस्थिताः। जपपूजासु यत् तेजस्तत्र चौर गणाधिपः। तस्माच्चौर प्रबोधार्थं चौर मन्त्रान् जपेद् दश। ततस्तु पूजयेद् धीमान् यस्य या इष्ट देवताः। ततः फलमवाप्नोति ब्रह्मादिभिर्दिवौकसः। चौरमन्त्रं महामंत्रं पञ्चाशद् गणतोषणं। चौर मन्त्रं विना भद्रे! शांति स्वस्त्ययनं कुतः?

षट्दलों में मूलाधारादि केन्द्रों में तथा शरीर के नेत्र कर्णादि दश द्वारों में चौर गणपति का मंत्र जप करना चाहिये यह "**कपाट**" के समान रक्षा करता है। अंतर्मातृका न्यास की तरह ५० वर्णात्मिका सहित शरीर में न्यास करना चाहिये। यथा –

रहस्यं ते प्रवक्ष्यामि पञ्चाशद् गणतोषणं। अंकुशं पचमं (क्रौं) बीजं प्रथमे दशधाजपेत्। प्रजप्य सुभगे मात! कवाटं निक्षिपेत् ततः।

अन्यथा अंकुशैर्बीजैः कवाटं भेदिरे गणाः। चन्द्रिकान्तर्गता नित्यं शङ्करं वरसुन्दरं। चन्द्रिका सुषमा सीता शिञ्जनी अणिमागुणा। चन्द्रविन्द्वात्मिका नित्या गणेशपरिपूजिता।

अजपामंत्र जपकाल कथनम् - शृणु चापि प्रवक्ष्यामि मंत्रप जपनिर्णयं। प्रातः काले च शय्यायां मुक्तस्वापः स्वदेहके। पूर्ववत् मातृका न्यासं विन्यसे मातृकास्थले। तथा एकदश द्वारे चौर मंत्राणि विन्यसेत्। चौर मन्त्र जपात् तुष्टिर्गणेशस्य तदा भवेत्। यमस्य नाधिकारोऽपि चौर मंत्र जपात् प्रिये! सर्वमन्त्र जपातृ तेजः सर्व स्मात् समुपस्थितं। तत् तेजोहरणे शक्तिगेणशस्य न चैव हि।

॥ अस्य प्रयोगः॥

एकादश द्वारों में सर्वत्र दश दशवार जप करें। ॥१॥ हृदये - क्रों दश बार जपे ॥२॥ दक्षिण नेत्रे - ह्रीं ह्रीं दश बार जपे ॥३॥ वाम नेत्रे - ह्रीं ह्रीं दश बार जपे ॥४॥ दक्षिण कर्णे - ह्रीं ह्रीं दश बार जपे ॥५॥ वाम कर्णे - ह्रीं ह्रीं दशधा जपेत् ॥६॥ दक्षिणनासापुटे - हूं हूं दशवारं ॥७॥ वामनासापुटे - हूं हूं दशवारं ॥८॥ मुखे - स्त्रीं स्त्रीं दशवारं ॥९॥ नाभौ - क्लीं क्लीं दशवारं ॥१०॥ लिंगे - हसौः दशवारं ॥॥११ गुह्ये - ब्लुं दशवारं ॥१२॥ भ्रूमध्ये - हूं दशधा जपेत् ।

मतान्तर में भ्रूमध्य में ॐ तथा मनस्थान में भी ॐ का दशवार जप करना कहा गया है।

अथ मंत्राः - १. क्रों ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं हूं हूं हूं हूं स्त्रीं स्त्रीं क्लीं क्लीं हसौः ब्लुं हूं ॐ।

२. क्रों ह्रीं ह्रीं हूं हूं स्त्रीं स्त्रीं क्लीं क्लीं हसौः ब्लुं हूं ॐ

मूलाधारादि षट्चक्रों में इन मंत्रों का जाप करें। अन्तर्मातृका न्यास के जो स्थान बतायें है उनमें इन मंत्रों से न्यास करें।

अशक्ति व समयाभाव में "क्रों ह्रीं हूं स्त्रीं क्लीं हसौः ब्लुं हूं ॐ" से अथवा "क्रों हूं स्त्रीं क्लीं हसौः" से मातृका न्यास करें।

॥इति चौर गणपति प्रयोग समाप्तम् ॥

॥ ऋणहर्तागणपति प्रयोगः ॥

इस मन्त्र का प्रयोग कर मधुत्रय से होम करें।

विनियोगः - ॐ अस्य श्री ऋणहरणकर्तृगणपति स्तोत्र मन्त्रस्य, सदाशिव ऋषिः। अनुष्टुप् छन्दः। श्री ऋणहरणकर्तृगणपति देवता। ग्लौं बीजम्। गः शक्तिः। गौं कीलकम्, मम सकल ऋण नाशने जपे विनियोगः।

ऋष्यादिन्यासः - ॐ सदाशिव ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्री ऋणहर्तृगणेश देवतायै नमः हृदि। ग्लौं बीजाय नमः गुह्ये। गः शक्तये नमः पादयोः। गौं कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

करन्यासः - ॐ गणेश अंगुष्ठाभ्यां नमः। ऋणं छिन्धि तर्जनीभ्यां नमः। वरेण्यम् मध्यमाभ्यां नमः। हुम् अनामिकाभ्यां नमः। नमः कनिष्ठकाभ्यां नमः। फट् करतलकर पृष्ठाभ्यां नमः।

हृदयादिन्यासः - ॐ गणेश हृदयाय नमः। ऋणं छिंधि शिरसे स्वाहा। वरेण्यम् शिखायै वषट्। हुं कवचाय हुम्। नमः नेत्रत्रयाय वौषट्। फट् अस्त्राय फट्।

ध्यानम् –

सिन्दूरवर्ण द्विभुजं गणेशं लम्बोदरं पद्मदले निविष्टम् ।
ब्रह्मादि देवैः परिसेव्यमानं सिद्धैर्युतं तं प्रणमामि देवम् ॥

मन्त्रः - ॐ गणेश ऋणं छिन्धि वरेण्यं हुं नमः फट्।

इस मन्त्र के १ लाख जप करके मधुत्रय से होम करें तो सुख-समृद्धि प्राप्त होवें।

॥ स्तोत्रम् ॥

सृष्ट्यादौ ब्रह्मणा सम्यक् पूजितः फलसिद्धये ।
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ॥
त्रिपुरस्य वधात् पूर्व शम्भुना सम्यगर्चितः ।
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ॥
हिरण्यकश्यपादीनां वधार्थे विष्णुनार्चितः ।
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ॥
महिषस्य वधे देव्या गणनाथः प्रपूजितः ।
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ॥
तारकस्य वधात् पूर्व कुमारेण प्रपूजितः ।
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ॥
भास्करेण गणेशस्तु पूजितश्छवि सिद्धये ।
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ॥
शशिना कान्तिसिद्ध्यर्थे पूजितो गणनायकः ।

सदैव पार्वती पुत्र ऋणनाशं करोतु मे ॥
पालनाय च तपसा विश्वामित्रेण पूजितः ।
सदैव पार्वती पुत्र ऋणनाशं करोतु मे ॥
इदं त्वृणहरण स्तोत्रं तीव्रदारिद्र्य नाशनम् ।
एक वारं पठेन्नित्यं वर्षमेकं समाहितः ॥
दारिद्रं दारुण त्यक्त्वा कुबेर समतां व्रजेत् ।
फडन्तोऽयं महामन्त्रः सार्धपञ्चदशाक्षरः ॥

॥ वक्रतुण्ड स्तोत्रम् ॥

ॐ ॐ ॐ कार रूपं हिमकर रुचिरं यत्स्वरूपं तुरीयं
त्रैगुण्या तीतलीलं कलयति मनसा तेजसोदारवृत्तिः ।
योगीन्द्रा ब्रह्मरन्ध्रे सहजगुणमयं श्रीहरेन्द्रं स्वसज्ञं
गं गं गं गणेशं गजमुखमनिशं व्यापकं चिंतयति ॥१॥
वं वं वं विघ्नराजं भजति निजभुजे दक्षिणे पाणि शुण्डं
क्रों क्रों क्रों क्रोधमुद्रा दलितरिपुकुलं कल्पवृक्षस्य मूले ।
दं दं दं दंतमेकं दधतमभिमुखं कामधेन्वादिसेव्यं
धं धं धं धारयंतं दधतमतिशयं सिद्धि बुद्धिर्ददंतम् ॥२॥
तुं तुं तुं तुंगरूपं गगनमुपगतं व्याप्नुवन्तं दिगंतं
क्लींक्लीं क्लीं कामनाथं गलितमद दल लोलमत्तालिमालम्।
ह्रीं ह्रीं ह्रींकाररूपं सकलमुनिजनध्येंय मुद्दिक्षु दंडं
श्रीं श्रीं श्रीं संश्रयंतं निखिलनिधिकलं नौमि हेरम्बलंबम् ॥३॥
ग्लौं ग्लौं ग्लौंकारमाद्यं प्रणवमय महामंत्र मुक्तावलीनां सिद्धं
विघ्नेश बीजं शशिकर सदृशं योगिनां ध्यानगम्यम् ।
डां डां डां डामरूपं दलितभवभयं सूर्यकोटि प्रकाशं
यं यं यं यक्षराजं जपति मुनिजनो ब्राह्यमाभ्यंतरं च ॥४॥
हुं हुं हुं हेमवर्णं श्रुतिगणितगुणं शूपकर्णं कृपालं
ध्येयं यं सूर्यबिम्बे उरसि च विलसत्सर्प यज्ञोपवितम् ।
स्वाहा हुं फट् समेतैष्ठ ठ ठ ठ सहितैः पल्लवैः
सेव्यमानैर्मंत्राणां सप्तकोटि प्रगुणितमहि मध्यानमीशं प्रपद्ये ॥५॥

पूर्व पीठं त्रिकोणं तदुपरि रुचिरं षड्दलं सूपपत्रं तस्योर्द्धे
बद्धरेखा वसुदलकमलं बाह्यतोऽधश्च तस्य ।
मध्ये हुंकारबीजं तदनु भगवतो बीज षट्कं पुरारेरष्टौ
शुक्लेश सिन्धौ बहुलगणपते र्विष्टरं वाष्टकं च ॥६॥

धर्माद्यष्टौ प्रसिद्धा दिशि विदिशि गणा बाह्यतो लोकपालान्
मध्ये क्षेत्राधिनाथं मुनिजनतिलकं मंत्रमुद्रापदेशम् ।
एवं यो भक्ति युक्तो जपति गणपतिं पुष्प धूपाक्षताद्यै
नैवेद्यैर्मोदकानां स्तुति नटविलसद्गीत वादित्रनादैः ॥७॥

राजानस्तस्य भृत्या इव युवतिकुलं दासवत्सर्वदाऽऽस्ते
लक्ष्मीः सर्वाङ्ग युक्तां त्यजति न सदनं किंकराः सर्वलोकाः ।
पुत्राः प्रौत्राः प्रपौत्रा रणभुवि विजयो द्यूतवादे प्रवीणो
यस्येशो विघ्नराजो निवसति हृदये भक्ति भाजां स देवः ॥८॥

॥ इति शंकराचार्य विरचितं वक्रतुण्ड स्तोत्रम् ॥

॥ सन्तानगणपति स्तोत्रम् ॥

नमोऽस्तु गणनाथाय सिद्धिबुद्धियुताय च ।
सर्व प्रदाय देवाय पुत्रवृद्धिप्रदाय च ॥

गुरुदराय गुरवे गोप्त्रे गुह्यासिताय ते ।
गोप्याय गोप्ताशेषभुवनाय चिदात्मने ॥

विश्वमूलाय भव्याय विश्वसृष्टि करायते ।
नमो नमस्ते सत्याय सत्यपूर्णाय शुण्डिने ॥

एकदन्ताय शुद्धाय सुमुखाय नमो नमः ।
प्रपन्नजनपालाय प्रणतार्तिविनाशिने ॥

शरणं भव देवेश संततिं सुदृढ़ां कुरु ।
भविष्यन्ति च ये पुत्रा मत्कुले गणनायक ॥

ते सर्वे तव पूजार्थं निरताः स्युर्वरो मतः ।
पुत्रप्रदमिदं स्तोत्रं सर्वसिद्धिप्रदायकम् ॥

॥ इति श्री संतान गणपति स्तोत्रं सम्पूर्णम् ॥

॥ श्री एवं पुत्र प्राप्ति हेतु–श्रीगणाधिपस्तोत्रम् ॥

सरागिलोक दुर्लभं विरागिलोक पूजितं
सुरासुरैर्नमस्कृतं जरादिमृत्यु नाशकम् ।
गिरा गुरु श्रिया हरिं जयन्ति यत्पादार्चका
नमामितं गणाधिपं कृपापयः पयोनिधिम् ॥१॥

गिरीन्द्रजा मुखाम्बुज प्रमोद दान भास्करं
करीन्द्रवक्त्रमानताघसंघवारणोद्यतम् ।
सरीसृपेश–बद्धकुक्षिमाश्रयामि संततं
शरीरकान्ति निर्जिताब्जबन्धुबालसंततिम् ॥२॥

शुकादिमौनिबन्दितं गकारवाच्यमक्षरं
प्रकाममिष्टदायिनं सकामनम्र पंक्तये ।
चकासनं चतुर्भुजैर्विकासिपद्म पूजितं
प्रकाशितात्मतत्त्वकं नमाम्यहं गणाधिपं ॥३॥

नराधिपत्वदायकं स्वरादिलोकदायकम्
जगदिरोगवारकं निराकृतासुरव्रजम् ।
कराम्बुजैर्धरन् सृणिान् विकारशून्यमानसै-
र्हृदासदाविभावितं मुदा नमामि विघ्नपम् ॥४॥

श्रमापनोदनक्षमं समाहितान्तरात्मना
समाधिभिः सदार्चितं क्षमानिधि गणाधिपम् ।
रमाधवादि पूजितं यमान्तकात्म सम्भवं
शमादिषड्गुणप्रदं नमामि तं विभूतये ॥५॥

गणाधिपस्य पञ्चकं नृणामभीष्ट दायकं
प्रणाम पूर्वकं जनाः पठन्ति यः मुदायुताः ।
भवन्ति ते विदाम्पुरः प्रगीतवैभवाः
जनाश्चिरायुषोऽधिकश्रियः सुसूनवो न संशयः ॥६॥

॥ इति श्री मद्शंकराचार्य विरचित गणाधिपस्तोत्रम् सम्पूर्णम् ॥

॥ एकदन्तनामाष्टक स्तोत्रम् ॥

ज्ञानार्थ वाचको गश्चणश्च निर्वाण वाचकः ।
तयोरीशं परं ब्रह्म गणेशं प्रणमाम्यहम् ॥
एक शब्दः प्रधानार्थो दन्तश्च बल वाचकः ।
बलं प्रधानं सर्वस्मादेकदन्तं नमाम्यहम् ॥
दीनार्थ वाचको हेश्चरम्बः पालक वाचकः ।
दीनानां परिपालकं हेरम्बं प्रणमाम्यहम् ॥
विपत्ति वाचको विघ्नो नायकः खण्डनार्थकः ।
विपत्खण्डन कारकं नमामि विघ्न नायकम् ॥
विष्णुदत्तैश्च नैवेद्यैर्यस्य लम्बोदरं पुरा ।
पित्रा दत्तैश्च विविधैर्वन्दे लम्बोदरं च तम् ॥
शूर्पाकारौ च यत्कर्णौ विघ्नवारणकारणौ ।
सम्पदौ ज्ञानरूपौ च शूर्पकर्णं नमाम्यहम् ॥
विष्णुप्रसाद पुष्पं च यन्मूर्ध्नि मुनिदत्तकम् ।
तद् गजेन्द्रवक्त्रं युक्तं गजवक्त्रं नमाम्यहम् ॥
गुहस्याग्रे च जातोऽयमाविर्भूतो हरालये ।
वन्दे गुहाग्रजं देवं सर्वदेवाग्रपूजितम् ॥
एतन्नामाष्टकं दुर्गे नामभिः संयुतं परम् ।
पुत्रस्य पश्य वेदे च तदा कोपं यथा कुरू ॥
एतन्नामाष्टकं स्तोत्रं नानार्थ संयुतं शुभम् ।
त्रिसंध्यं यः पठेन्नित्यं स सुखी सर्वतोजयी ॥
ततो विघ्ना पलायन्ते वैनतेयाद् यथोरगः ।
गणेश्वर प्रसादेन महाज्ञानी भवेद ध्रुवम् ॥
पुत्रार्थी लभते पुत्रं भार्यार्थी विपुलं स्त्रियम् ।
महाजड़ः कविन्द्रश्च विद्यावांश्च भवदे ध्रुवम् ॥

॥ इति ब्रह्मवैवर्त पुराणान्तर्गत श्री एकदन्तनामाष्टक स्तोत्र संपूर्णम् ॥

॥ शक्ति–शिवकृतं गणाधीश स्तोत्रम् ॥

॥ श्रीशक्ति शिवावुसतुः ॥

नमस्ते गणनाथाय गणानां पतये नमः ।
भक्ति प्रियाय देवेश भक्ते भयः सुखदायकः ॥
स्वानन्द वासिने तुभ्यं सिद्धि-बुद्धि वराय च ।
नाभिशेषाय देवाय ढुण्ढिराजाय ते नमः ॥
वरदऽभय हस्ताय नमः परशु धारिणे ।
नमस्ते सृणिहस्ताय नाभिशेषाय ते नमः ॥
अनामयाय सर्वाय सर्व पूज्याय ते नमः ।
सगुणाय नमस्तुभ्यं ब्रह्मणे निर्गुणाय च ॥
ब्रह्मभ्यो ब्रह्मदात्रे च गजानन नमोऽस्तुते ।
आदि पूज्याय ज्येष्ठाय ज्येष्ठराजाय ते नमः ॥
मात्रे पित्रे च सर्वेषां हेरम्बाय नमो नमः ।
अनादये च विघ्नेश विघ्नकर्त्रे नमो नमः ॥
विघ्नहर्त्रे स्वभक्तानां लम्बोदर नमोऽस्तुते ।
त.दीय भक्ति योगेन योगीशाः शान्तिमागताः ॥
किं स्तुवो योगरूपं तं प्रणमावश्च विघ्नपम् ।
तेन तुष्टोभव स्वामिन्नित्युक्त्वा तं प्रणेमतुः ॥
तावुत्थाप्य गणाधीश उवाच तौ महेश्वरो ॥

॥ श्रीगणेश उवाच ॥

भवदकृतमिदं स्तोत्रं मम भक्ति विवर्धनम् ।
भविष्यति च सौख्यस्य पठते श्रृण्वते प्रदम् ॥
भुक्ति मुक्ति प्रवं चैव पुत्रपौत्रादिकं तथा ।
धन धान्यादिकं सर्व लभते तेन निश्चितम् ॥

॥ इति श्रीशक्ति-शिवकृतं गणाधीश स्तोत्रम् सम्पूर्णम् ॥

॥ सर्वसंपत्प्रद गणपति स्तोत्रम् ॥

ध्यानम्—

दन्ताभये चक्रवरौ दधानं कराग्रगं स्वर्ण घटं त्रिनेत्रम् ।
धृताब्जयालिंगितमब्धिपुत्र्या लक्ष्मी गणेशं कनकाभमीडे ॥

ॐ नमो विघ्नराजाय सर्व सौख्य प्रदायिने ।
दुष्टारिष्ट विनाशाय पराय परमात्मने ॥
लम्बोदरं महावीर्य नागयज्ञाप शोभितम् ।
अर्धचन्द्रधरं देवं विघ्न व्यूह विनाशनम् ॥
ॐ ह्रां ह्रीं ह्रुं ह्रें ह्रौं ह्रः हेरम्बाय नमो नमः ।
सर्व सिद्धिप्रदो सित्वं सिद्धि-बुद्धि प्रदोभव ॥
चिन्तितार्थ प्रदस्त्व हि सततं मोदक प्रियः ।
सिन्दुरारूणत्रस्त्रेश्च पूजितो वरदायकः ॥
इदं गणपति स्तोत्रं यः पठेद् भक्तिमान् नरः ।
तस्य देहं च देहं च स्वयं लक्ष्मीर्न मुंचति ॥

॥ इति श्रीसर्व संपत्प्रद गणपति स्तोत्रम् ॥

॥ संसारमोहन गणेश कवचम् ॥

विनियोगः- ॐ अस्य श्री गणेश कवच मंत्रस्य, प्रजापतिः ऋषिः, वृहती छन्दः, श्रीगजमुख विनायको देवता, गं बीजं, गीं शक्तिः, गः कीलकम्, धर्मकामार्थमोक्षेषु, श्री गणपति प्रीत्यर्थे जपे विनियोगः।

॥ कवचम् ॥

ॐ गं हुं श्रीगणेशाय स्वाहा मे पातु मस्तकम् ।
द्वात्रिंशदक्षरो मंत्रो ललाटो मे सदाऽवतु ॥
ॐ ह्रीं श्रीं क्लीं गमिति वै सततं पातु लोचनम् ।
तालुकं पातु विघ्नेशः सततं धरणीतले ॥
ॐ ह्रीं श्रीं क्लीमिति परं सततं पातु नासिकाम् ।
ॐ गौं गं शूपकर्णाय स्वाहा पात्वधरं मम ॥

दन्ताश्च तालुकां जिह्वा पातु मे षोडशाक्षरः ।
ॐ लं श्री लम्बोदरायेति स्वाहा गण्डं सदाऽवतु ॥
ॐ क्लीं ह्रीं विघ्ननाशाय स्वाहा कर्णं सदाऽवतु ।
ॐ श्रीं गं गजाननायेति स्वाहा स्कंधं सदाऽवतु ॥
ॐ ह्रीं विनायकायेति स्वाहा पृष्ठं सदाऽवतु ।
ॐ क्लीं ह्रीमिति कंकालं पातु वक्षःस्थलं च गम् ॥
करौ पादौ सदा पातु सर्वाङ्गं विघ्ननिघ्नकृत ।
प्राच्यां लम्बोदरः पातु चाग्नेय्यां विघ्ननायकः ॥
दक्षिणे पातु विघ्नेशो नैर्ऋत्यां तु गजाननः ।
पश्चिमे पार्वती पुत्रो वायव्यां शंकरात्मजः ॥
कृष्णस्यांशश्चोत्तरे च परिपूर्णतमस्य च ।
ऐशान्यामेकदन्तश्च हेरम्बः पातु चोर्ध्वतः ॥
अधो गणाधिपः पातु सर्वपूज्यश्च सर्वतः ।
स्वप्ने जागरणे चैव पातु मां योगिनां गुरुः ॥
इति ते कथितं वत्स सर्वमन्त्रौघविग्रहम् ।
संसार मोहनं नाम कवचं परमाद्भुतम् ॥

॥ ब्रह्मवैवर्तान्तर्गते श्रीसंसार मोहन कवच सम्पूर्णम् ॥

॥ गणेश कवचम् ॥

॥ गौर्युवाच ॥

एकोऽति चपलो दैत्यान्बाल्येपि नाशयत्यहो ।
अग्रे किं कर्म कर्तेति न जाने मुनि सत्तम ॥
दैत्या नानाविधा दुष्टा साधुदेवद्रुहः खलाः ।
अतोऽस्य कण्ठे किंचित्त्वं रक्षार्थ वद्द्युमर्हसि ॥

॥ मुनिरुवाच ॥

ध्यायेत् सिंहगतं विनायकममुं दिग्बाहुमाद्ये युगे ।
त्रेतायां तु मयूरवाहनममुं षड्बाहुकं सिद्धिदम् ॥
द्वापरके तु गजाननं युगभुजं रक्तांग रागं विभुं ।

तुर्ये तु द्विभुजं सितांगरुचिरं सर्वार्थदं सर्वदा ॥
विनायकः शिखां पातु परमात्मा परात्परः ।
अति सुन्दरकायस्तु मस्तकं सुमहोत्कटः ॥
ललाटं कश्यपः पातु भ्रूयुगं तु महोदरः ।
नयने भालचन्द्रस्तु गजासयस्त्वोष्ठपल्लवौ ॥
जिह्वां पातु गणाक्रीडश्चिबुकं गिरिजासुतः ।
वाचं विनायकः पातु दन्तान् रक्षतु दुर्मुखः ॥
श्रवणौ पाशपाणिरस्तु नासिकां चिंतितार्थदः ।
गणेशस्तु मुखं कण्ठं पातु देवो गणञ्जः ॥
स्कन्धौ पातु गजस्कंधः स्तनौ विघ्न विनाशनः ।
हृदयं गणनाथस्तु हेरंबो जठरं महान् ॥
धराधरः पातु पार्श्वौ पृष्ठं विघ्नहरः शुभः ।
लिङ्गं गुह्यं सदा पातु वक्रतुण्डो महाबलः ॥
गणक्रीडो जानु जंघे ऊरु मंगलमूर्तिमान् ।
एकदन्तो महाबुद्धिः पादौ गुल्फौ सदाऽवतु ॥
क्षिप्रप्रसादनो बाहु पाणी आशाप्रपूरकः ।
अंगुलीश्च नखान्पातु पद्महस्तोरिनाशनः ॥
सर्वाङ्गाणि मयूरेशो विश्वव्यापि सदाऽवतु ।
अनुक्तमपि यत्स्थानं धुम्रकेतुः सदाऽवतु ॥
आमोदस्त्वग्रतः पातु प्रमोदः पृष्ठतोऽवतु ।
प्राच्यां रक्षतु बुद्धीश आग्नेयां सिद्धिदायकः ॥
दक्षिणस्यामुमापुत्रो नैऋत्यां तु गणेश्वरः ।
प्रतीच्यां विघ्नहर्ताऽव्याद्वायव्यां गजकर्णकः ॥
कौबेर्या निधिपः पायादीशान्यामीशनन्दनः ।
दिवोऽव्यादेकदन्तस्तु रात्रौ संध्यासु विघ्नहृत् ॥
राक्षसासुर वेताल ग्रह भूत पिशाचतः ।
पाशांकुशधरः पातु रजः सत्वतमः स्मृतीः ॥
ज्ञानं धर्मं च लक्ष्मीं च लज्जां कीर्तिं तथा कुलम् ।

वपुर्धनं च धान्यं च गृह दारान्सुतान्सखीन् ॥
सर्वायुधधरः क्षेत्रं मयूरेशोऽवतात्सदा ।
कपिलाऽजाविकं पातु गजाश्वान् विकटोऽवतु ॥
भुर्जपत्रे लिखित्वेदं यः कण्ठे धारयेत्सुधीः ।
न भयं जायते तस्य यक्ष रक्षः पिशाचतः ॥
त्रिसंध्यं जपते यस्तु वज्रसार तनुर्भवेत् ।
यात्रा काले पठेद्यस्तु निर्विघ्नेन फलं लभेत् ॥
युद्धकाले पठेद्यस्तु विजयं चाप्युयाद ध्रुवम् ।
मारणोच्चाटनाकर्ष स्तंभं मोहन कर्मणि ॥
सप्तवारं जपेदेतद्दिनानामेकविंशतिम् ।
तत्तत्फलमवाप्नोति साधको नात्र संशयः ॥
एकविंशतिवारं च पठेत्तावद्दिनानि यः ।
कारागृह गतं सद्यो राज्ञावध्यं च मोचयेत् ॥
राजदर्शन वेलयां पठेदेत त्रिवारतः ।
स राजानं वशं नीत्वा प्रकृतिञ्च सभां जयेत् ॥
इदं गणेश कवचं कश्यपेनसमीरितम् ।
मुद्गलाय च तेनाथ माण्डव्याय महर्षये ॥
मह्यं स प्राह कृपया कवचं सर्वसिद्धिदम् ।
पूर्णपुरश्चरण – पुरश्चरण ३२ लाख जप का होता है। पायस होम से मन्त्र सिद्धि होवे। लक्ष्मी प्राप्ति हेतु बिल्वकाष्ठ से होम करें। मंत्र जप कर श्वेत वचा का चर्वण करे तो वाक् सिद्धि होवे। दूर्वा होम से आयुवृद्धि, मरीचि व सर्षप होम से शत्रुनाश होवे। मंत्र जाप करके कुशा व दुर्वा से मार्जन करने पर रोग शांत होवे।

शत्रुनाश हेतु मंत्र में **मृत्युमृत्युं** की जगह **'साध्य (शत्रु का नाम) मृत्युं'** उच्चारण करें नखों व दाँत के टुकड़ों से रात्रि हवन करें। इससे राजा व सेनापति के दंभ का दमन होकर दास बन जाते है।

॥ नृसिंह लक्ष्मी ॥

एकत्रिंशद्वर्णो मन्त्रः – **ॐ श्रीं ह्रीं जयलक्ष्मीप्रियाय नित्यप्रमुदितचेतसे लक्ष्मीश्रितार्ध -देहाय श्रीं ह्रीं नमः।**

विनियोगः – **ॐ अस्य मन्त्रस्य पद्मोभव ऋषिः। अतिजगती छन्दः। श्रीनरकेसरी देवता। श्रीं बीजम्। ह्रीं शक्तिः ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋषिन्यासः – **ॐ पद्मोभव ऋषये नमः शिरसि। अति जगती छन्दसे नमः**

मुखे। श्री नरकेसरी देवतायै नमः हृदि। श्रीं बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः। विनियोगाय नमः सर्वाङ्गे।

कराङ्गन्यासः - श्रां, श्री, श्रूं, श्रैं, श्रौं, श्रः से षड्ङ्गन्यास करें।

ध्यानम् -

क्षीराब्धौ वसुमुख्य देवनिकरैरग्राादि संवेष्टितः
शङ्खं चक्रगदाम्बुजं निजकरैर्बिभ्रस्त्रिनेत्रः सितः ।
सर्पाधीशफणातपत्रलसितः पीताम्बरालंकृतो
लक्ष्म्याश्लिष्ट कलेवरो नरहरिस्तान्नीलकण्ठो मुदे ॥

॥ यन्त्रावरण पूजनम् ॥

विष्णु की नृसिंह मूर्ति का पूजन करें।

नृसिंह–लक्ष्मी यंत्रम्

अथ प्रथमावरणम् - षट्कोण में अग्नि आदि क्रम से - **ॐ श्रां हृदयाय नमः। ॐ श्रीं शिरसि स्वाहा। ॐ श्रूं शिखायै वषट्। ॐ श्रैं कवचाय हुं।** मध्ये - **ॐ श्रौं नेत्रत्रयाय वौषट्।** दिक्षु - **ॐ श्रः अस्त्राय फट्।**

द्वितीयावरणम् - अष्टदल में पूर्वादिक्रम से - **ॐ भास्वत्यै नमः। ॐ भास्कर्यै नमः। ॐ चिन्तायै नमः। ॐ द्युत्यै नमः। ॐ उन्मीलिन्यै नमः। ॐ रमायै नमः। ॐ कान्त्यै नमः। ॐ रुच्यै नमः।**

तृतीयावरणम् - भूपुर में (परिधि में) पूर्वादिक्रम से **इन्द्रादि की पूजा करें।**

चतुर्थावरणम् - भूपुर में इन्द्रादि देवों के **वज्रादि आयुधों का पूजन करें।**

सभी देवों की पादुकां '**पूजयामि तर्पयामि से गंधार्चन**' व तर्पण कर पुष्पाञ्जलि प्रदान करें।

अस्य पुरश्चरणं षष्टिसहस्राधिक लक्षत्रयम्। तथा च एवं ध्यात्वा जपेल्लक्षत्रयं षष्टिसहस्रकम्। मध्वक्तैर्मल्लिका पुष्पैर्जुहुयात् जातवेदसि (हवन करें) **मल्लिका कुसुमैर्होमादिष्ट सिद्धिमवाप्नुयात्॥**

॥ इति नृसिंह मन्त्र प्रयोग ॥

॥ त्रैलोक्यमोहननृसिंह कवचम् ॥

विनियोगः - ॐ अस्य श्रीनृसिंह कवच मन्त्रस्य प्रजापतिर्ऋषिः गायत्रीश्छन्दः नृसिंह देवता, क्ष्रौं बीजं, मम सर्वारिष्ट च शत्रुक्षयाय पूर्वकं ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।

॥ नारद उवाच ॥

इन्द्रादि देववृंदेश ईडमेश्वर जगत्पते ।
महाविष्णोर्नृसिंहस्यकवचं ब्रूहि मे प्रभो ।
यस्य प्रपठनाद्विद्वांस्त्रैलोक्ये विजयी भवेत ॥१॥

॥ ब्रह्मोवाच ॥

शृणु नारद! वक्ष्यामि पुत्रश्रेष्ठ तपोधन ।
कवचं नरसिंहस्य त्रैलोक्यविजयी भवेत् ॥२॥
स्त्रष्टाहं जगतां वत्स पाठनाद्धारणाद्यतः ।
लक्ष्मीर्जगत्त्रयपतिं संहर्ता च महेश्वरः ॥३॥
पाठनाद्धारणादेवा बहवश्च दिगीश्वराः ।
ब्रह्ममंत्रमयं वक्ष्ये भ्रांत्यादिनिवारकम् ॥४॥
यस्य प्रसादा दुर्वासास्त्रैलोक्य विजयी भवेत् ।
पाठनाद्धरणाद्यस्य शास्ता च क्रोध भैरवः ॥५॥
त्रैलोक्यविजयस्यापि कवचस्यः प्रजापतिः ।
ऋषिश्छन्दस्तु गायत्री नृसिंहो देवता विभुः ॥६॥
क्ष्रौं बीजं मे शिरः पातु च न्द्रवर्णोमहामनुः ॥७॥
ॐ उग्रं वीरं महाविष्णुं ज्वलंतं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्यं नमाम्यहम् ॥८॥
द्वात्रिंशदक्षरो मंत्रो मंत्रराजः सुरद्रुमः ।
कंठं पातु ध्रुवं क्ष्रौं हृद्भगवते चक्षुषी मम ॥९॥
नरसिंहाय च ज्वालामालिने पातु कर्णकम् ।
दीपदंष्ट्राय च तथा अग्निनेत्राय नासिकाम् ॥१०॥
सर्वरक्षोघ्नाय च तथा सर्वभूतहिताय च ।
सर्वज्वरविनाशाय दह दह पदद्वयम् ॥११॥

रक्ष रक्ष वर्ममन्त्रः स्वाहा पातु मुखं मम ।
तारादि रामचन्द्राय नमः पातु हृदं मम ॥१२॥
क्लीं पायात्पार्श्वयुग्मं च तारो नमः पदं ततः ।
नारायणाय नाभिं च आं ह्रीं क्रौं क्ष्रौं च हुं फट् ॥१३॥
षडक्षरः कटिं पातु ॐ नमो भगवते पदम् ।
वासुदेवाय च पृष्ठं क्लीं कृष्णाय क्लीं उरुद्वयम् ॥१४॥
क्लीं कृष्णाय सदापातु जानुनी च मनुत्तमः ।
क्लीं ग्लौं क्लीं श्यामलांगाय नमः पायात्पदद्वयम् ॥१५॥
क्ष्रौं नृसिंहाय क्ष्रौं च सर्वाङ्गे मे सदावतु ।
इति ते कथितं वत्स सर्वमंत्रोघ विग्रहम् ॥१६॥
तवस्नेहान्मयाख्यातं प्रवक्तव्यं न कस्यचित् ।
गुरु पूजां विधायाथ गृहीत्वा कवचं ततः ।
सर्वपुण्ययुतो भूत्वा सर्वसिद्धि युतोभवेत् ।
शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ॥१८॥

इस कवच में षडक्षर एवं ३२ अक्षर के अलावा अन्य मन्त्र का भी उल्लेख है। यथा -

ॐ क्ष्रौं भगवते नरसिंहाय ज्वालामालिने दीपदंष्ट्राय अग्निनेत्राय सर्वरक्षोघ्नाय सर्वरक्षोघ्नाय सर्वभूतहिताय सर्वज्वर विनाशय दह दह रक्ष रक्ष हुं फट् स्वाहा।

जो साधक दशांश हवन के द्वारा कवच को सिद्ध करता है। उस साधक के घर में लक्ष्मी तथा मुख में सरस्वती का वास होता है। हजार वर्ष की पूजा का फल प्राप्त करता है। भोजपत्र पर लिखकर कवच को स्वर्ण में स्त्रीवाम भाग में तथा पुरुष दक्षिण हाथ में अथवा कण्ठ में धारण करे तो रोग, शत्रु भूतपिशाचादि बाधा दूर होवे, त्रैलोक्य में विजय होवे। संतानहानि योग दूर होवे।

॥ इति ब्रह्म संहितायाम् त्रैलोक्य मोहनं नाम नृसिंह कवचं ॥

॥ हयग्रीव पूजनम् ॥

एकाक्षर मन्त्रः - ह्सूं

ऋषिन्यासः - (हिन्दी तन्त्रसार के अनुसार) ब्रह्मण ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। हयग्रीव रूपिणे विष्णवे देवतायै नमः हृदि।

हकाराय बीजाय नमः गुह्ये। सकाराय शक्तये नमः पादयोः। उकाराय कीलकाय नमः सर्वाङ्गे।

अन्यमन्त्रः - मेरुतन्त्र के एकाक्षर मन्त्र तीन तरह से दिये हैं।

१. ह्सुं २. ह्सौं ३. ह्सें। छन्द त्रिष्टुप् बताया है।

ध्यानम् –

श्वेत पद्मस्थितं गौरं श्वेतपद्मनुलेपनं ।
भक्तप्रियं हयग्रीवं वन्देऽहं दानवान्तकम् ॥

अष्टाक्षरमन्त्र - ह्सूं हयशिरसे नमः।

ध्यानम् –

हस्तैर्दधानं मालां च पुस्तकं वर-पङ्कजं ।
कर्पूराभं सौम्यरूपं नानाभूषण भूषितम् ॥

त्रयस्त्रिंशदक्षर मन्त्रः - ॐ उद्गिरद् प्रणवोद्गीथ सर्ववागीश्वरेश्वर सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय।

ऋषिन्यासः - शिरसि ब्रह्मणे ऋषये नमः, मुखेऽनुष्टुप् छन्दसे नमः हृदि, श्रीहयग्रीवाय देवतायै नमः।

कराङ्गन्यास - ॐ अंगुष्ठाभ्यां नमः। उद्गिरद् प्रणवोद्गीथ तर्जनीभ्यां स्वाहा। सर्ववागीश्वरेश्वर मध्यमाभ्यां वषट्। सर्ववेदमयाचिन्त्य अनामिकाभ्यां हुं। सर्वं बोधय बोधय कनिष्ठाभ्यां फट्।

इसी तरह हृदयादि न्यास करें।

शरच्छशाङ्क प्रभमश्ववक्त्रं मुक्तामयैभरणैः प्रदीप्तम् ।
रथाङ्ग शङ्खार्चित बाहुयुग्मं जानुद्वयन्यस्तकरं भजामः ॥

अन्य मन्त्राः –

१. ॐ उद्गिरत् प्रणवोद्गीथ सर्ववागीश्वर सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय स्वाहा ॐ। २. ह्सूं ॐ उद्गिरत् ...... सर्वं बोधय बोधय स्वाहा। ३. ॐ ह्सूं उद्गिरत् ...... सर्वं बोधय बोधय स्वाहा। ४. विश्वोत्तीर्ण स्वरूपाय चिन्मयानन्द रूपिणे तुभ्यं नमो हयग्रीव विद्याराजाय विष्णवे। ५. हंसः विश्वोत्तीर्ण स्वरूपाय .... विष्णवे स्वाहा हंसः।

॥ यन्त्रपूजनम् ॥

हयग्रीव यंत्रम्

प्रथमावरणम् – षट्कोणेहसां हृदयाय नमः। हसीं शिरसे स्वाहा। हसूं शिखायै वषट्। हसैं कवचाय हुं। हसौं नेत्रत्रयाय वौषट्। हसः अस्त्राय फट्।

द्वितीयावरणम्– (अष्टदल मूले) – ॐ प्रज्ञाहयाय नमः। ॐ मेधाहयाय नमः। ॐ स्मृतिहयाय नमः। ॐ विद्याहयाय नमः। ॐ लक्ष्मीहयाय नमः। ॐ वागीशहयाय नमः। ॐ विद्याविशालहयाय नमः। ॐ नादविमर्दनहयाय नमः।

तृतीयावरणम् – (अष्टदले मध्ये) ॐ लक्ष्म्यै नमः। ॐ सरस्वत्यै नमः। ॐ रत्यै नमः। ॐ प्रीत्यै नमः। ॐ कीर्त्यै नमः। ॐ कान्त्यै नमः। ॐ तुष्ट्यै नमः। ॐ पुष्ट्यै नमः।

चतुर्थावरणम् – (अष्टदलाग्रे) – ॐ ऐरावताय नमः। ॐ पुण्डरीकाय नमः। ॐ वामनाय नमः। ॐ कुमुदाय नमः। ॐ अंजनाय नमः। ॐ पुष्पदंताय नमः। ॐ सार्वभौमाय नमः। ॐ सुप्रतीकाय नमः।

पञ्चमावरणम् – पञ्चमावरण में भूपूर (परिधि) में इन्द्रादि दिक्पालों का तथा **षष्टमावरण** में उनके आयुधों का पूजन करें।

॥ वराह मन्त्र प्रयोगः॥

भगवान विष्णु के वराह स्वरूप की आराधना भूमि लाभ हेतु तथा शत्रुनाश हेतु करना शुभ है। यज्ञ स्वरूप भी इनको माना है अतः ज्ञान की वृद्धि होवे।

मन्त्र यथाः – **ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये (स्वस्पतये) भूपतित्वं मे देहि ददापय स्वाहा।** यह तैंतीस अक्षर का मंत्र है।

ऋषिन्यासः – **शिरसि भार्गव ऋषये नमः। मुखे अनुष्टुपृछन्दसे नमः। हृदि** आदिवराहाय देवतायै नमः। विनियोगाय नमः सर्वाङ्गे।

कराङ्गन्यासः - एकदंष्ट्राय अंगुष्ठाभ्यां नमः। व्योमोल्काय (व्योमकेशाय) तर्जनीभ्यां स्वाहा। तेजोधिपतये मध्यमाभ्यां वषट्। विश्वरूपाय अनामिकाभ्यां हुं। महादंष्ट्राय कनिष्ठाकाभ्यां नमः।

इसी तरह हृदय, मस्तक, शिखा, कवच और अस्त्र न्यास करें।

ध्यानम् –

आपादं जानुदेशाद् वरकनकनिभं नाभिदेशाद
धस्तान्मुक्ताभंकण्ठ देशात् तरुणरविनिभं मस्तकान्नीलभासम् ।
ईडे हस्तैर्दधानं रथचरणदरौ खड्ग खेटोगदाख्यम्
शक्तिं दानोभये च क्षितिधरण लसद् द्रंष्ट्रमाद्यं वराहम् ॥

यन्त्र मध्य में प्रधान का पूजन कर आवरण पूजा करें।

वराह यंत्रम्

प्रथमावरणम् - षट्कोण में पञ्चांग पूजा करे - एकदंष्ट्राय हृदयाय नमः। व्योमोल्काय शिरसे स्वाहा। तेजोधिपतये शिखायै वषट्। विश्वरूपाय कवचाय हुं। महादंष्ट्राय अस्त्राय फट्।

द्वितीयावरणम् - अष्टदले - (पूर्वादिक्रमेण) ॐ चक्राय नमः। ॐ शङ्खाय नमः। ॐ खड्गाय नमः। ॐ खेटकाय नमः। ॐ गदायै नमः। ॐ शक्तये नमः। ॐ वराय नमः। ॐ अभयाय नमः।

तृतीयावरणम् - तृतीय आवरण में इन्द्रादि का तथा चतुर्थावरण में उनके वज्रादि आयुधों का पूजन करें।

एक लाख जप का पुरश्चरण करें। घृत, मधु, शर्करा युक्त कमलों से दशांश होम करें। (वैशम्पायन संहिता में विष्णु मन्त्र के जप को रात्रि में निषेध बताया गया है)

॥ इति वराह मन्त्रप्रयोगः ॥

॥ वेदव्यास मन्त्र प्रयोगः ॥

ज्ञानवृद्धि हेतु तथा कथा उपदेशक पद हेतु वेदव्यासजी का जप पूजन करना चाहिये।

अष्टाक्षरो मन्त्रः - **व्यां वेदव्यासाय नमः।**

विनियोगः - **अस्य मन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, सत्यवतीसुतो देवता, व्यां बीजम्, नमः शक्तिः, ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋषिन्यासः - **ब्रह्मऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। सत्यवतीसुतो देवता हृदि। व्यां बीजाय नमः गुह्ये। नमः शक्तये नमः पादयो। विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यासः - **ॐ व्यां हृदयाय नमः। व्यीं शिरसे स्वाहा। व्यूं शिखायै वषट्। व्यैं कवचाय हुं। व्यौं नेत्रत्रयाय वौषट्। व्यः अस्त्राय फट्।**

इसी तरह से कराङ्गन्यास करें।

ध्यानम् -

व्याख्यामुद्रिकया लसत्करतलं सद्योगपीठस्थितं
वामेजानुतले दधानमपरं हस्तेषु विद्यानिधिम् ।
विप्रव्रातवृतं प्रसन्नमनसं पाथोरुहांगद्युतिं
पाराशर्य्यमतीव पुण्यचरितंव्यासं स्मरेत्सिद्धये ॥

इस तरह ध्यान कर पूजन करें। सर्वतोभद्रमण्डल पर धर्मादिपीठ देवताओं का पूजन करें।

वेदव्यास यंत्रम्

पूर्वादि चार दिशाओं में- **धं धर्माय नमः, ज्ञां ज्ञानाय नमः, वैं वैराग्नाय नमः, ऐं ऐश्वराय नमः।** अग्नि आदि चार कोणों में - **अं अधर्माय नमः, अं अज्ञानाय नमः, अं अवैराग्याय नमः, अं अनैश्वर्याय नमः।**

इसके बाद यंत्र में आवरण पूजन करें। यंत्र मध्य में वेदव्यास जी की पूजा करें।

प्रथमावरणम्- (षट्कोणे) अग्नि आदि चार कोणों में - **व्यां हृदयाय नमः, व्यीं शिरसे स्वाहा, व्यूं शिखायै वषट्, व्यैं कवचाय हुँ, व्यों नेत्रत्रयाय वौषट्, व्यः अस्त्राय फट् चतुर्दिक्षु** (पश्चिमे)

द्वितीयावरणम् - (अष्टदले) पूर्वादि चार दिशाओं में - **ॐ शल्याय** (पैलाय) **नमः। ॐ वैशम्पायनाय नमः। ॐ जैमिन्यै नमः। ॐ सुन्मताय नमः।**

अग्नि आदि चार कोणों में - **ॐ श्री शुकाय नमः। ॐ उग्रश्रवसे नमः। ॐ समन्याय नमः। ॐ चिमनाय नमः।** (मतान्तरे) **ॐ शुकाय नमः। ॐ रोम हर्षणाय नमः। ॐ उग्रश्रवसे नमः। ॐ अन्यमुनीन्द्रेभ्यो नमः।**

तृतीयावरणम् - में **इन्द्रादि की भूपूर (परिधि) में** तथा उनके बाहर **आयुधों की चतुर्थावरण में पूजा करें।** पुरश्चरण करके पायसान्न से दशांश होम करें कवित्व को प्राप्त करें। कीर्ति लाभ सम्पदा मिले।

मृत्युञ्जय पुटित व्यास मंत्रः - **ॐ जूं सः व्यां वेदव्यासाय नमः।** सर्वोपद्रव शान्त होकर विजय प्राप्त करें।

॥ इति व्यास विधानम् ॥

॥ परशुराम मन्त्र प्रयोगः॥

भगवान परशुराम का प्रयोग दरिद्रतादोहन, धनलाभ, भूमि प्राप्ति, शत्रुनाश, ज्ञानवृद्धि, राजबंधन मुक्ति हेतु तथा अभीष्ट लाभ हेतु किया जाता है।

पंचदशाक्षर मंत्र - **ॐ राँ राँ ॐ राँ राँ ॐ परशु हस्ताय नमः।**

षडङ्गन्यास - **ॐ हृदयाय नमः। राँ राँ शिरसे स्वाहा। ॐ राँ राँ शिखायै वषट्। ॐ परशुहस्ताय कवचाय हुँ। ॐ नमः अस्त्राय फट्। इसी तरह से करन्यास करें।**

॥ यन्त्र पूजनम् ॥

यन्त्रमध्य में भगवान परशुराम का ध्यान करें।

सम्पूर्णा विलसन्ति सोपनिषदो वेदोपवेदाः पुरः
पृष्ठे मार्गण पूर्णतूर्ण विलसत् कोदण्ड-दण्डो महान् ।
बर्हिष्टेम-कमण्डलु च परशुं पाण्योर्वहन् शास्त्रवित्
शापे शस्त्र वरे च पेशलकरः श्रीभार्गवो भ्राजते ॥

प्रथमावरणम् – षट्कोण में हृदयादिन्यास के मन्त्रों से पूजन करें।

परशुराम यंत्रम्

द्वितीयावरणम् – (अष्टदले) – पूर्वादिक्रमेण – **ॐ जामदग्न्ये नमः, ॐ शबरीयै नमः, ॐ भीष्माय नमः, ॐ कार्तवीर्याय नमः। अग्निआदि चारों कोणों में – ॐ द्रां दत्तात्रेयाय नमः, ॐ गणेशाय नमः, ॐ रामाय नमः, ॐ शिवाय नमः।**

तृतीयावरणम् – (भूपूरे) – इन्द्रादि देवों तथा चतुर्थावरण में उनके आयुधों का पूजन करें।

परशुराम गायत्री मंत्रः – ॐ जामदग्न्याय विद्महे महावीराय धीमहि। तन्नः परशुरामः प्रचोदयात्॥

षडङ्गन्यासः – **ॐ जामदग्न्याय हृदयाय नमः, ॐ विद्महे शिरसे स्वाहा, ॐ महावीराय मध्यमाभ्यां नमः, ॐ धीमहि कवचाय हुं, ॐ तन्नः परशुरामो नेत्रत्रयाय वौषट्। ॐ प्रचोदयात् करतलकरपृष्ठाभ्यां नमः।** इसी तरह करन्यास करें।

परशुरामगायत्री – (मन्त्रकोषोक्त) – **ॐ ब्रह्मक्षत्राय विद्महे क्षत्रियान्ताय धीमहि तन्नो रामः प्रचोदयात्।**

इस मन्त्र के भारद्वाज ऋषि, गायत्रीछन्द, तथा देवता परशुराम है।

षडङ्गन्यास हेतु विभाग इस प्रकार से है। – **१. ॐ ब्रह्मक्षत्राय विद्महे २. क्षत्रियान्ताय ३. धीमहि ४. तन्नो ५. रामः ६. प्रचोदयात्।**

सात्विक प्रयोग –

सात्विकं श्वेतवर्णं च भस्मोद्धूलित विग्रहं
किरीटिनं कुण्डलिनं वरं स्वक्षवराभयान्।
करैर्दधानं तरलं विप्रं क्षत्रवधोद्यतं
पीताम्बधरं कामरूपं बाला-निरीक्षितम्॥

विशेष पुरश्चरण २४ लाख जप का है, दशांश होम सिताढ्य घृत पायस से करें। सात्विक ध्यान कर वैदिकगायत्री के प्रथमपाद का जप कर बाद में परशुरामगायत्री

का जप करें तो संतान, विवाह, कृषि हेतु वर्षा, धन संपत्ति वाक्सिद्धि आदि अभिलाषा पूर्ण होती है।

राजसीध्यानम् –

ध्यायेच्च्यतामसं क्षत्ररुधिराक्त परश्वधं ।
आरक्तनेत्रं कर्णस्थ ब्रह्मसूत्रं यमप्रभम् ॥

वैदिक गायत्री के मध्य पाद को प्रथम जपकर बाद में मन्त्र को जपे या मध्यपाद से युक्त कर परशुरामगायत्री का पुरश्चरण करें तो देश ग्राम पुर में बालकों व गायों की रक्षा होवे, महामारी, शीतला आदि की शांति होवें।

तामसध्यानम् –

धनुष्टङ्कार-निर्घोष सन्त्रस्त भुवनत्रयं ।
चतुर्बाहुं मुसलिनं राजसं क्रुद्धमेव च ॥

वैदिक गायत्री के अन्तिम पाद से युक्त कर सर्षप होम करें तो रोगक्षय व शत्रुनाश होवें।

परशुरामनाम मन्त्रः – आद्यो रामो जामदग्न्यः क्षत्रियाणां कुलान्तकः। परश्वध धरो दाता मातृहा मातृजीवकः। समुद्रतीरनिलयो महेशपठिताखिलः। गोत्राणकृद् गोप्रदाता विप्रक्षत्रिय-कर्मकृत्। द्वादशैतानि नामानि त्रिसन्ध्यं यः पटेन्नरः। नाऽपमृत्युर्न-दारिद्र्यं न च वंशक्षयो भवेत्॥

(दोनों मन्त्रों का विशेष विधान परशुराम तन्त्र में है।)

॥ परशुराम स्तोत्रम् ॥

(आचार्य श्रीमदमृतवाग्भव प्रणीत)

विक्रम सम्वत् १९८९ वैशाख शुक्ला तृतीया रविवार के दिन श्री मार्तण्डक्षेत्र में (मटन, कश्मीर) इस स्तोत्र की विद्वान् श्रीमदमृतवाग्भव ने रचना की। परशुरामजी के बल की प्रसंशा करते हुये कहा कि सहस्रबाहु के रक्त से पितरों का तर्पण करने वाले, २१ बार पृथ्वी को जीतकर कश्यप मुनि को दान करने वाले परमवीर आपके हाथ में परशु को देखकर महाराज दशरथ भी स्त्री भेष में छिपकर भाग गये थे। जिनको इन्द्र ने अपने आधे सिंहासन पर बिठाकर सम्मानित किया था। निश्चय ही यह स्तोत्र प्रभावशाली है।

श्रीपरशुराम-मंत्रो यथा मंत्र-महार्णवे प्रतिपादितः – '' **ॐ राँ राँ ॐ राँ राँ**

ॐ परशु-हस्ताय नमः "।

श्रीपरशुरामगायत्री- "ॐ जामदग्नाय विद्महे महा-वीराय धीमहि। तन्नः परशुरामः प्रचोदयात् "।

करन्यास/अङ्गन्यास- ॐ जामदग्नाय अङ्गुष्ठाभ्यां नमः (हृदयाय नमः), ॐमहावीराय मध्यमाभ्यां नमः (शिखायै वषट्), ॐ धीमहि अनामिकाभ्यां नमः (कवचाय हुँ), ॐ तन्नः परशुरामो कनिष्ठकाभ्यां नमः (नैत्र-त्रयाय वौषट्), ॐ प्रचोदयात् करतल-करपृष्ठाभ्यां नमः (अस्त्राय फट्)।

ध्यानम्-

सम्पूर्णा विलसन्ति सोपनिषदो वेदोपवेदोः पुरः ।
पृष्ठे मार्गण-पूर्ण-तूर्ण-विलसत्-कोदण्ड-दण्डो महान् ॥
बर्हिष्ठेम-कमण्डलू व परशुं पाण्योर्वहन् शास्त्रवित् ।
शापे शस्त्र-वरे च पेशल-करः श्रीभार्गवो भ्राजते ॥

॥ स्तोत्रम् ॥

मत्तक्षत्रियकृत्तकण्ठ-विगलद् रक्तौघ सम्प्लावितम्
भक्तानुग्रहणं कठोरपरशुं धृत्वावतीर्याधुना ।
दृप्तोदृण्ड दुरीह दुष्टदमनो दीनावलीपालको
धर्मोद्धार धुरन्धरो भृगुवरो रामः समुज्जृम्भताम् ॥१ ॥

श्रीमद्-रेणुकया धृतं स्वजठरे भूभारनाशाय यत्
श्रीमद्भार्गव जामदग्न्यमतुलं रामाभिधानं महः ।
दृप्यत्-पार्थिव वृन्दकानन ललज्ज्वालाढ्य -
वैश्वानरश्चण्डीप्राणपति प्रियस्य परशोदारायि तत्संस्तुमः ॥२ ॥

लक्ष्मीपतेरुरसि रोषकषायिताक्षः
पाद प्रहारमकरोन्मुनि - पुङ्गवो यः ।
ब्रह्मर्षिवृन्द परिचुम्बित-पादपद्म
स श्रीभृगुर्जयति विप्रकुलप्रकाशः ॥३ ॥

श्रीमानुदारचरितो जयतादजस्त्रं
ब्रह्मर्षि - सोम - जमदग्निरिति प्रसिद्धः ।
दृप्यन्नृपान्त करणं तनयं प्रसूय
येनाऽखिलं जगदिदं परितो व्यरक्षि ॥४ ॥

संपूर्ण भूमिगतवीर महीपतीनां
अन्यायमाश्रितवतां प्रमदोद्धतानाम्
साकालरात्रिरिव नाशकरी समन्तात्
श्रीरेणुकाभगवती विजयाय भूयात् ॥५॥

देवेन येन ततमस्ति समस्तमेतद् विश्वं
स्वशक्तिखचितं स्वविलासरूपम् ।
तं त्वां महर्षिगणपूजितपाद पद्मं
सर्वात्मना भृगुवरं शरणं भजामः ॥६॥

धर्मद्विषां नियमनाय गृहीतदीक्षं
श्रीरेणुकाभगवतीजठरात् प्रसूतम् ।
श्रीभार्गवस्य जमदग्निमुनेः सुपुत्रं,
रामं लसत् परशुपाणितलं नमामः ॥७॥

स्फूर्जन्मदोद्धत - नृपावलि - काननाली-
र्दग्ध्वा महीसुरगणान् परिरक्ष्य बन्धून् ।
त्रातं भुवस्तलमिदं भवता समस्त,
सम्प्राप्य खण्डपरशोः परशुं प्रसन्नात् ॥८॥

लोकत्रयातुलपराक्रम जन्मभूमे,
शीर्षनिकृत्य कृतवीरसुतार्जुनस्य ।
त्रिः सप्तवारमकरोर्वसुधा समस्तां,
निः क्षत्रियां स्वपितृतर्पणकामनायाः ॥९॥

दुर्नीतपार्थिवकदम्ब - निकृत्तशीर्ष,
ग्रावद्रवद रुधिर - सिद्धधुनीजलौघैः ।
आकण्ठतो निजपितृन् परितर्प्य,
पश्चात् प्रादाद् धरां वसुमतीं किल कश्यपाय ॥१०॥

पाणौ विलोक्य परशुं भगवंस्त्वदीये,
स्त्रीवेषभाग् - दशरथोऽपि पलायितोऽभूत् ।
यः स्वासनार्ध - उपवेश्यपुरन्दरेण,
सम्मानितोऽभवदमोघबलेन शश्वत् ॥११॥

श्रीराम! भार्गव! भवच्चरणारविन्द,

मूलं शरण्यमधुना वयमागताः स्मः
कारुण्यपूर्ण सुदृशा किल नोऽनुगृह्य,
शक्तिं निजामनयनाशकरीं प्रदेहि ॥१२॥

वाक् - चातुरी चलति नो चतुराननस्य यच्छक्ति
वर्णनविधौ खलु तत्र केयम् ।
अस्माकमल्पविदुषां नृगिरा वराकी,
शक्ता भवेत् तदपि नाथ वरं प्रदेहि ॥१३॥

वीर - श्रीजामदग्न्यस्य पुण्यं स्तोत्रमिदं नराः ।
पठन्त्यनन्य मनसो येऽर्थ बोधपुरस्मरम् ॥१४॥
दुःशासनान्त करणी भीमा धर्म प्रबोधिनी ।
तेषां करगता शक्ति श्चकास्त्येव न संशयः ॥१५॥

अङ्काष्टनन्द पृथिवीमिति वैक्रामाब्दे वैशाखशुक्ल
गिरिजा दिवसे ग्रहेशे ।
मार्तण्डतीर्थभवने जमदग्निपुत्र स्तोत्रं
व्यधायि विदुषामृतवाग्भवेन ॥१६॥

॥ इति परशुराम प्रयोगः ॥

॥ गरुड मन्त्र प्रयोगः ॥

गरुड के मन्त्र विष निवारण के अलावा मारण मोहन षट्कर्मों के कार्यों में भी विशेष रूप से काम में आते हैं अतः षट्कर्मो को गारुड़ी विद्या के नाम से जाना जाता है।

पञ्चाक्षरी मन्त्रः - ''क्षिप ॐ स्वाहा'' (मन्त्र महोदधौक्त)

इस मन्त्र के अनन्त ऋषि, छन्द पंक्ति, देवता पक्षीन्द्र, ॐ बीज तथा स्वाहा शक्ति है।

अङ्गन्यासः - ॐ ज्वल ज्वल महामते स्वाहा हृदये। ॐ गरुड चूडानने स्वाहा शिरसि। ॐ गरुड शिखे शिखायै वषट्। ॐ गरुड़ प्रभञ्जय प्रभञ्जय प्रभेदय प्रभेदय त्रासय त्रासय विमर्दय विमर्दय स्वाहा कवचाय हुँ। ॐ उग्ररूपधर सर्वविषहर भीषय भीषय सर्वं दह दह भस्मी कुरु कुरु स्वाहा नेत्रत्रयाय वौषट्। ॐ अप्रतिहतबलाप्रतिहतशासन हुं फट् स्वाहा अस्त्राय फट्।

इसी तरह कराङ्गन्यास करें।

वर्णन्यासः ॐ क्षिं नमः पादयोः। ॐ पं नमः कट्योः। ॐ ॐ नमः हृदि। ॐ स्वां नमः वक्रे। ॐ हां नमः मूर्ध्नि।

ध्यानम् –

तमस्वर्णनिभं फणीन्द्रनिकरैः क्लृप्तागंभूषं प्रभुम्
स्मर्तृणां शमयं तमुग्रमखिलं नृणां विषं तत्क्षणात् ।
चंच्वग्रप्रचलद्भुजङ्गमभयं पाण्योर्वरं बिभ्रतम्
पक्षोच्चारित सामगीतममलं श्रीपक्षिराजं भजे ॥

यन्त्रपीठ पूजनम् – पक्षिराजाय स्वाहा से पीठ पूजा करें।

गरुड यंत्रम्

प्रथमावरणम् – षट्कोण में – हृदयादि अङ्ग पूजन हेतु हृदयादि न्यास पूर्वानुसार करें।

द्वितीयावरणम् – (अष्टदले) – ॐ अनन्ताय नमः। ॐ वासुकये नमः। ॐ तक्षकाय नमः। ॐ कर्कोटकाय नमः। ॐ पद्माय नमः। ॐ महापद्माय नमः। ॐ शङ्खपालाय नमः। ॐ कुलिकाय नमः।

तृतीयावरणम् – भूपूर (४ द्वारयुक्त परिधि) में इन्द्रादि दिक्पालों का तथा चतुर्थावरणं में उनके आयुधों का पूजन करें।

५ लाख जप का पुरश्चरण करें फिर तिलादि से दशांश होम करें।

॥ गरुड यन्त्र प्रयोगः विधि ॥

(आशुगरुडयन्त्रकल्पे)

(१) षट्कोण बनाये उसके मध्य में साध्य व्यक्ति का नाम लिखें। षट्कोण में रं, यं, ह्रीं, रं, यं, ह्रीं लिखें। उसके चारों ओर ॐ विष्णु वाहनाय लिखें। पुनः चारों ओर ''ह्रीं'' बीज लिखकर वेष्टित करें।

(२) अष्टदल पर पुनः अष्टदल बनाये या षोडशदल बनायें। प्रत्येक में मूलमन्त्र ''ॐ पक्षिराजाय विष्णु वाहनाय'' लिखें। उसके बाहर चार रेखायें

खींचकर चतुरस्त्र बनाये। चतुरस्त्र के चारों कोणों में त्रिशूल बनाकर शूलाग्र के आगे साध्य का नाम लिखे।

(३) त्रिकोण बनायें उसके ऊपर षट्कोण बनायें, उसके बाहर अष्टदल एवं अष्टदल के बाहर चतुरस्त्र (चोकोर) बनायें। त्रिकोण में 'लं' षट्कोणों में 'वं' तथा अष्टदलों में 'रं' यह अग्निबीज लिखें। अष्टदलों में 'ह्रीं' लिखे। भूपूर 'चतुरस्त्र' के चारों कोणों में 'हं' लिखें। पुनः षट्कोण में व भूपूर के चारों कोणों में 'रं, वं' लिखकर उनके आगे साध्य व्यक्ति का नाम लिखें। ऐसा करने से साध्य शत्रु पीड़ित होगा।

॥ गरुड़यन्त्र द्वितीय प्रकारा:॥

प्रथमावरणम् - षट्कोणे - **१. रं हृदयाय नमः, २. लं शिरसे स्वाहा, ३. वं शिखायै वषट्, ४. यं कवचाय हुं, ५. ह्रीं नेत्रत्रयाय वौषट्, ६. ॐ विष्णु वाहनाय अस्त्राय फट्।**

द्वितीयावरणम्- (अष्टदले) - **ॐ सुपर्णाय नमः पूर्वे। ॐ गरुडाय नमः दक्षिणे। ॐ वैनतेयाय नमः पश्चिमे। ॐ ताक्ष्याय नमः उत्तरे। ॐ लक्ष्म्यै नमः अग्निकोणे। ॐ कीर्त्यै नमः नैऋते। ॐ जयायै नमः वायवे। ॐ मायायै नमः ईशाने।**

तृतीयावरणम्- भूपूरे (पूर्वादिक्रमेण) - **ॐ कुमुदायै नमः। ॐ पुण्डरीकाक्षायै नमः। ॐ वामदेवाय नमः। ॐ सनकाय नमः। ॐ सनत्कुमाराय नमः। ॐ शंकुकर्णाय नमः। ॐ सर्वनेत्राय नमः। ॐ सुमुखायै नमः। ॐ सुप्रतिष्ठायै नमः।**

चतुर्थावरणम् - भूपूर में **इन्द्रादि दिक्पलों का आयुधों** सहित पूजन करें।

॥ इति यंत्र आवरण पूजा ॥

॥ आशुगारुड मालामन्त्रा:॥

विनियोगः - **ॐ अस्य श्री आशु गारुड़ स्तोत्रस्य शंख ऋषिः अनुष्टुप् छन्दः श्री आशुताक्ष्यों देवता, गां बीजं, गों शक्तिः, गूः कीलकं मम आशुगरुडप्रीत्यर्थे जपे विनियोगः।**

गां, गीं, गूं, गें, गौं, गः से षडङ्गन्यास करे।

ध्यानम् –

आजानोस्तप्त हेमप्रभममलहिमं प्रख्यमानं हि तस्मा
दाकर्ण कुङ्कुमाभं भ्रमरकुलमिवश्यामलं मूर्ध्नि केशम् ।
ब्रह्माण्डव्याप्तदेहं भुजमहि प्रवरैर्भूषणैर्भूषिताङ्गम्
पिङ्गाक्षं तार्क्ष्य दंष्ट्रं वरदमभयदं तार्क्ष्यमुग्रं नमामि ॥

(१) ॐ नमो भगवते श्री आशुगरुडाय गरुडाय महागरुडाय समस्ताण्डबहि - स्त्रैलोक्यनायकाय नागशोणिततीर्थाय पक्षिराजाय विष्णुवाहनाय सर्वसर्वान् संहर संहर मर्दय-२ मोटय-२ त्रोटय-२ भ्रमय-२ मुञ्च-२ आगच्छ-२ आवेशय-२ शीघ्रं -२ समस्तभूतवेतालान्नाशय नाशय परमंत्र परहोम परजप परशून्य परक्षुद्रान् छेदय छेदय स्वविद्या मंत्रान् प्रकटय-२ स्वाहा।

(२) ॐ नमो भगवते श्री आशुगरुड़ाय स्वर्णपक्षाय विनतादास्य मोचनाय कश्यपानन्दवर्धनाय सर्पशत्रून्निवारणाय ॐ हन् २ दह२ ॐ पच २ हन२ दहि२ सर्वसर्पान्ति भक्षय२ सर्वविषान्नाशय नाशय हूं फट् स्वाहा।

विनियोगः - अस्य श्री आशुगारुड़ मन्त्रस्य शंकर ऋषिः, जगतीछन्दः, आशुगरुडो देवता, गं बीजं, स्वाहा शक्तिः, सर्वविषहरणे विनियोगः।

(३) ॐ श्री गरुडाय महागरुडाय समस्ताण्डाद् वहिस्त्रैलोक्य नायकाय नागशोणित दिग्धाङ्गाय ॐ पक्षिराजाय विष्णु वाहनाय सर्प सर्प संहर२ मठ२ मर्दय२ मोटय२ लोपय२ त्रौटय२ भ्रामय२ मुञ्चय२ आकर्षय२ आवेशय२ सिद्धय२ शीघ्र२ समस्त भूत वेतालान् नाशय२ सर्वग्रहान् नाशय२ सर्वशत्रून् विद्रावय२ सर्वदष्टान् विनाशय२ सर्वविषं नाशय नाशय स्वाहा।

(४) (तन्त्रसारे) ॐ नमो भगवते गरुडाय कालाग्निवर्णाय एह्येहि कालानल -लोलजिह्वाय पातय२ मोहय२ विद्रावय२ भ्रम२ भ्रामय२ हन२ दह२ पत२ हुं फट् स्वाहा।

इस मन्त्र का अयुत जप का पुरश्चरण है। घृताक्त कृष्णपुष्पों से दशांश होम करें।

(५) ॐ नमो भगवते गरुडाय महेन्द्रपर्वतशिखराकार रूपाय संहारय२ मोचय२ निर्विष२ विषमप्यमृतं चाहारसदृशरूपमिदं ज्ञापयामि स्वाहा।

(६) गरुडस्तव- (तन्त्रसारे) सुपर्णं वैनतेयं च नागारिं नागभीषणम्। जैवातृकं विषारं च हयजितं विश्वरूपिणम् ॥१॥ गुरुत्मंतं खगश्रेष्ठं तार्क्ष्यं

कश्यपनंदनम् द्वादशैतानि नामानि गरुडस्य महात्मनः ॥२॥ यः पठेत्प्रातरुत्थाय स्थाने वा शयनेऽपि वा। विषं नाक्रमते तस्य न हिंसंति हिंसकाः ॥३॥ संग्रामे व्यवहारे च विजयस्तस्य जायते। बंधनान् मुक्तिमाप्नोति यात्रायां सिद्धिमेव च॥

(७) (हारीतः) नर्मदायै नमः प्रातर्नर्मदायै नमो निशि। नमोस्तु नर्मदे तुभ्यं त्राहिमां विषसर्पतः ॥१॥ सर्पायसर्व भद्रं ते दूरं गच्छ महाविष। जन्मेजयस्य यज्ञान्ते आस्तीक वचनं स्मर ॥२॥ आस्तीक वचनं श्रुत्वा यः सर्पो न निवर्तते। शतधाभिद्यते मूर्ध्नि शिंशवृक्ष फलं यथा ॥३॥ एतान्गरुडमंत्रांस्तु निशायां पठते यदि। मुच्यते सर्वबाधाभ्यो नात्र कार्या विचारणा।

॥ इति गरुड़ मन्त्रप्रयोग विधानम् ॥

॥ आयुध मंत्राः ॥

१. शङ्ख (नवाक्षर) - ॐ क्लीं जलचराय स्वाहा।

(अष्टादशाक्षर) महाजलचराय हुं फट् स्वाहा। पाञ्चजन्याय नमः।

२. स-शरधनुः (शार्ङ्ग) - महाशार्ङ्गाय सशराय हुं फट् स्वाहा।

३. सुदर्शनचक्र (सप्ताक्षर) - ॐ सहस्त्रार हुं फट्।

इसके ऋषि अहिर्बुध्न्य, छन्द अनुष्टुप् देवता, चक्ररूपहरि बीज सं, शक्ति हुं क्रमशः है।

(षोडशाक्षर) - ॐ नमो भगवते महासुदर्शनाय हुं फट्।

षडाङ्गन्यास - क्रमशः छः मन्त्रों से करें - ॐ आचक्राय स्वाहा। ॐ विचक्राय स्वाहा। ॐ सुचक्राय स्वाहा। ॐ धीचक्राय स्वाहा। ॐ संचक्राय स्वाहा। ॐ ज्वालाचक्राय स्वाहा।

ध्यानम् –

कल्पान्तार्क प्रकाशं त्रिभुवनमखिलं तेजसापूरयन्तं
रक्ताक्षं पिङ्गकेशं रिपुकुलभयदं भीमदंष्ट्राट्टहासम् ।
चक्रं शङ्खं गदाब्जे पृथुतरमूषलं चापपाशाङ्कुशान्
स्वैर्बिभ्राणं दोर्भिराद्यं मनसि मुररिपुं भावयेच्चक्र संज्ञम् ॥

समचत्वारिंशाक्षर मन्त्रः - ॐ नमो भगवते महासुदर्शनाय महाचक्राय

महाज्वालाय दीप्तरूपाय सर्वनाथ रक्ष रक्ष मां महाबलाय हुं फट्।

ऋष्यादि न्यास पूर्ववत् करें। पुरश्चररण में ६४ सहस्र जप करें।

एकसमत्यक्षर – ॐ सुदर्शन महाचक्रराज दह दह सर्वदुष्ट भयं कुरु कुरु छिन्दि२ विदारय२ परमंत्रान् ग्रस२ भक्षय२ भूतानि त्रासय२ हुं फट् स्वाहा सुदर्शनाय नमः।

४. खड्ग ॐ क्लीं खड्ग तीक्ष्ण भिंधि भिंधि हुं फट्।

५. गदा क्लीं कौमोदकि महासर्वबले सर्वासुरान्तिके प्रसीद हुं फट् स्वाहा।

६. अङ्कुश – ॐ क्लीं अङ्कुश! कंचु कंचु हुं फट् स्वाहा।

७. मुसल – काम संवर्तक मुसल! पोथय पोथय हुं फट् स्वाहा।

८. पाश – ॐ क्लीं पाश! वध वध आकर्षयाकर्षय हुं फट् स्वाहा।

९. किरीट ॐ किरीट केयूर हार मकर कुण्डलालंकृत शङ्ख चक्र गदा पद्म हस्त पीताम्बरधर श्रीवत्साङ्कित वक्षःस्थल श्रीभूमिसहित स्वात्मज्योतिर्द्वय दीप्तिकराय सहस्त्रादित्य तेजसे नमः।

१०. छत्र – छं छत्राय नमः। (मेरुतन्त्रे) छन्द गायत्री, देवता हर।

ध्यानम् – स्वर्ण दण्डं सितप्रभं आरक्त कलशं ध्यायेन्मस्तके स्वे च पूजयेत्।

११. चामर – शशांङ्क करसङ्काश क्षीरडिण्डिमपाडुर प्रोत्सरयाशु दुरितं चामर श्री नमोस्तुते।

१२. ध्वज – ॐ शक्रकेतवे महावीर्याय श्यामवर्णायच्छत्रराजाय नमो नारायणध्वज गरुड़ासन रक्ष रक्ष आयुधानि रिपून् दह दह हुं फट् स्वाहा।

१३. पताका – ॐ श्रीं श्रीं श्रीं हिरण्यकशिपोर्युद्धे पूतने दैवतासुरे रणारपति कालन मृत्युकालहन्त्रि दह दह रिपून् सर्वान् पतातिके हुं फट् स्वाहा।

१४. परशु – ॐ क्लीं रामायुधाय श्री पं परशवे नमः।

दण्डगायत्री – ब्रह्मोद्भवाय विद्महे स्वर्णरूपाय धीमहि तन्नो दण्डः प्रचोदयात्।

卐 इति श्रीविष्णु तन्त्रम् सम्पूर्णम् 卐

॥ शिव तन्त्रम् ॥

एकाक्षरीमंत्र - **'हौं'**। हिन्दी तन्त्रसार में ऋषि वामदेव, छन्द पंक्ति, देवता सदाशिव कहे गये है। शारदा तिलक में **'हं'** बीज **'औं'** शक्ति कहा है।

एकाक्षर चिंतामणि - **'क्ष्रौं'** शारदा तिलक के अनुसार यह भगवान शिव के उत्तरवक्त्र से सम्बन्धित है। ऋषि काश्यप, छन्द अनुष्टुप्, देवता अर्द्धनारीश्वर **'रं'** बीज **'ॐ'** शक्ति का उल्लेख है।

षड्ङ्गन्यास - रं, **कं, षं, मं, रं, यं** इन छः व्यञ्जनों से करें।

नील प्रवाल रुचिरं विलसत् त्रिनेत्रं पाशारुणोत्पल कपाल-त्रिशूल हस्तम् ।
अर्धाम्बिकेश मनिशं प्रविभक्त भूषं बालेन्दु-बद्धमुकुटं प्रणमामि रूपम् ॥

टीकाकार के अनुसार देवता उमेश है तो **ध्यान** इस प्रकार करें -

अहिशशधर - गङ्गाबद्धतुङ्गासमौलिः
त्रिदशगण नतांघ्रिस्त्रीक्षणः स्त्रीविलासः ।
भुजगपरशु शूलान् खड्ग वह्नी कपालं
शरमपि धनुरीशो विभ्रदव्याच्चिरं वः ॥

इस प्रकार करके जप समय मूलध्यान अर्द्धनारीश्वर स्वरूप का ही करें। पुरश्चरण का दशांश होम मधुयुक्त तिलतण्डुलों से करें।

एकाक्षरतुम्बरु - **'क्ष्म्र्यूँ' ऋषि** आदि शारदातिलकोक्त है।

रक्ताभमिन्दु-शकलाभरणं त्रिनेत्रं खट्वाङ्ग पाशसृणिशुभ्रकपाल हस्तम् ।
वेदाननं चिपिट नासमनर्घभूषं, रक्ताङ्गराग-कुसुमांशुकमीशमीडे ॥

द्वयक्षर दक्षिणामूर्ति - **'हंसः'**। ब्रह्मा ऋषि, छन्द गायत्री, देवता दक्षिणामूर्ति बीज **'हं'** शक्तिः। **ह्सां, ह्सीं** इत्यादि से षडङ्गन्यास करें।

त्र्यक्षर नीलकण्ठ - **'प्रों त्रीं ठः'** हिन्दी तंत्रसार में मन्त्र **'प्रों नू त्रीं ठः'** लिखा है जिसके बारे में मतभेद हैं। ऋषि अरुण, छन्द अनुष्टुप्, देवता नीलकण्ठ लिखा है तो ''मन्त्र मञ्जूषा'' में ऋषि ब्रह्मा, छन्द गायत्री, देवता, नीलकण्ठ एवं स्थावर- जङ्गम विषहरणार्थे विनियोग कहा है। पुनः शारदा तिलक में अरुणा ऋषि, त्रिष्टुप् छन्द, **'प्र'** बीज एवं **'ठ'** शक्ति बताये है।

मेरुतन्त्रोक्त त्र्यक्षरीमन्त्र - नीलकण्ठमनुं वक्ष्ये समस्त विषनाशनं - **''शं नीं ठः''**।

अरुण ऋषि, छन्द अनुष्टुप्, देवता नीलकण्ठ, बीज शं, शक्ति ठः है।

षडङ्गन्यास - हराय हृदये नमः। कपर्दिने शिरसे स्वाहा। नीलकण्ठाय शिखायै वषट्। कालकूट विषभक्षणाय कवचाय हुं। श्रीकण्ठाय नेत्रत्रयाय वौषट्। शितकण्ठाय अस्त्राय फट्। इसी तरह करन्यास करें।

मन्त्र न्यास करें तो त्र्यक्षर के प्रत्येक अक्षर से दो आवृत्ति में करें।

ध्यानम् –

ध्यायेद्देवं नीलकण्ठं बालार्कयुतवर्चसं,
जटाभूत लसच्चन्द्राकारकैः फणिसत्तमैः ।
कृतकल्प कराम्भोजैर्दधानं जपमालिकां,
शूलं कपालं खट्वाङ्गमक्षमालां च विभ्रतम्
प्रतिवक्त्रं त्रिनयनं व्याघ्रचर्माम्बरावृतं,
पद्ममध्ये समासीनमति सुन्दर विग्रहम् ॥

३ लाख जप करके घृताक्त हविष्य से दशांश होम करें।

पञ्चाक्षर ईशानः मन्त्र - 'नमः शिवाय' हिन्दीतन्त्रसार में **ऋषि वामदेव, छन्द पंक्ति, देवता ईशान** आदि हैं तो "मन्त्ररत्न मंजूषा" में देवता '**ईश**' कहा है। मेरुतन्त्र में देवता का नाम **सदाशिव** बताया है।

पञ्चांगन्यासः - मन्त्र के एक-एक अक्षर से अर्थात् **नं हृदयाय नमः, मं शिरसे स्वाहा, शिं शिखायै वषट्, वां कवचाय हुं, यं अस्त्राय फट्,** पञ्चांग न्यास करें।

ध्यानम् –

चारुचन्द्रकलाराजज्जटा - मुकुटमण्डितं,
पञ्चवक्त्रधरं शंभुं प्रतिवक्त्रं त्रिलोचनम्
शार्दूलचर्मवसनं रत्नाभरणभूषितं,
दक्षोर्ध्वहस्ते टङ्कं च वरं व दधतं करैः ।
वामोर्ध्वहस्ते हरिणं दधानमभये परे,
सुप्रसन्नमुखाम्भोजं निविष्टिं कुशविष्टरे ।
ब्रह्मविष्णुमहेशाद्यैः स्तुतं कृष्णं सुरासुरैः,
विश्वाद्यं विश्ववपुषं भवभीतिहरं भवम् ॥

पुरश्चरण हेतु ५ लाख जपकर घृताक्त तिलादि में दशांश होम करें।

षडक्षर-ईशानमन्त्र - '**ॐ नमः शिवाय**'। हिन्दीतन्त्रसार में ऋषि वामदेव, छन्द पंक्ति, देवता ईशान बताया है।

''**हसकहल ह्रीं ॐ, हसकल ह्रीं नमः, सकल ह्रीं शिवाय**''। निम्न देवताओं के बाद **नमः** बोलते हुये षडङ्गन्यास करें।

षडङ्गन्यास : **१. सर्वज्ञाय २. नित्यतृप्तये ३. अनादिबोधाय ४. स्वतन्त्राय ५. नित्यमलुप्त शक्तये ६. नित्यमनन्त शक्तये नमः।**

मन्त्र के ऋषि छन्द पूर्ववत् है देवता ईशान की जगह सदाशिव कहे है।

ध्यानम् –

गोक्षीरफेन धवलं रजताद्रिसमप्रभं,
चारुचन्द्रकला राजज्जटा मुकुट मण्डितम् ।
पञ्चवक्त्रधरं शंभुं प्रतिवक्त्रं त्रिलोचनम्,
शार्दूलचर्मवसनं रत्नाभरणभूषितम् ॥

षडक्षर दक्षिणामूर्ति मन्त्र - '**महादेवाय हुं**'।

मेरु तन्त्र में ऋषिवामदेव, छन्दविराट्, देवता वामनायक बताये है।

लिङ्गन्यस्त महाकालिं मदिरासक्त मानसं,
लोहदण्ड मांसपिण्डं पानपात्रं त्रिशूलकम् ।
दधतं भर्जितं मत्स्यं चषकं रुधिरस्य च,
स्पृशन्तमेकेन भगमपरेण कुचद्वयम् ॥

आठ लाख से पुरश्चरण करे। विशेपाहुति दधिमांसादि से।

सप्ताक्षर उमापतिः मन्त्र - '**ह्रीं नमः शिवाय ह्रीं**'। मेरुतन्त्र में ऋषि वामदेव, छन्द पंक्ति, देवता उमापति बताये हैं।

अष्टाक्षर उमापतिः मन्त्र - '**ह्रीं ॐ नमः शिवाय ह्रीं**'। ऋषि देवता पूर्ववत्।

ध्यानम् –

बन्धूक कुसुमारक्तं चन्द्रार्धकृत शेखरं,
शूलं कपालमभयं वरं च दधतं करैः ।
वामोरु-संस्थितां देवीं श्लिष्यन्तं वामबाहुना,
स्मेरवक्त्रं त्रिनयनं सर्वाभरण भूषितम् ॥

अष्टाक्षर नीलकण्ठः – '**ॐ नमो नीलकण्ठाय**'। मेरुतन्त्र व तन्त्रसार में ऋषिब्रह्मा, छन्द गायत्री, देवता नीलकण्ठ बताये है।

भिन्नपाद षडक्षर-ईशान मन्त्र – विद्यार्णव तन्त्रोक्त (एकादश श्वासे) '**ॐ हौं हसकल ह्रीं ह्रीं हसकहल ह्रीं नमः सकल ह्रीं शिवाय**'। जो श्रीविद्या में दीक्षित है, बालात्रिपुर सुन्दरी के उपासक है उनको त्रिकूटों से संपूटित मन्त्र जपने से अपने आराध्य का भी आशीर्वाद मिलेगा।

ऋषिवामदेव, छंद पंक्ति, देवता सदाशिव, हं बीज तथा ॐ शक्ति है। हां हीं इत्यादि से षडङ्गन्यास करें।

सिन्दूरपुंज शोणाङ्गं स्मेर वक्त्रं त्रिलोचनम्,
मणिमौलिलसच्चन्द्रकलालंकृत मस्तकम् ।
दक्षिणोर्ध्व करे टङ्कं दधानं दतधो वरं,
वामोर्ध्व हस्ते हरिणं तदधोऽभयमादरात् ।
पीनवृत्तघनोतुङ्ग-स्तनाग्रे विनिवेश्य च,
वामाङ्के सन्निविष्टायाः प्रियाया रक्तपङ्कजे ।
दधत्यां दक्षिणेहस्ते चासीनं रक्तपङ्कजे,
नानाभरण संदीप्तं नित्यगंधस्त्रगम्बरम् ॥

अष्टाक्षर सदाशिवः – '**ॐ ह्रीं ग्लौं नमः शिवाय**'। (मेरुतन्त्रोक्त) **ऋषिवामदेव, छन्द पंक्ति, देवता सदाशिव है।** ज्ञानवृद्धि हेतु उपासना करें।

ध्यायेत् सततं सिन्दूरारुणं शंभुं त्रिलोचनं,
टङ्कं मृगं तथा देवीं चालिङ्गन्तं वरप्रदम् ।
हस्तैश्चतुर्भिरारक्तपद्मं च दधतीं करैः,
पीनवृतघनोत्तुङ्गस्तनीं वामाङ्क संस्थिताम् ।
रक्तपद्मसमासीनं रक्तस्त्रग् गन्धलेपनम् ॥

दशाक्षर रुद्रः – '**ॐ नमो भगवते रुद्राय**'। (मेरुतन्त्रोक्त) ऋषि बोद्धायन, छन्द पंक्ति देवता रुद्र है। ध्यान पञ्चाक्षर मन्त्र की तरह है।

भिन्नपाद दशाक्षर रुद्रः – (विद्यार्णवतन्त्रोक्त) '**ॐ हसकल ह्रीं नमो हसकहल ह्रीं भगवते सकल ह्रीं रुद्राय**'। यह भगवती त्रिपुर सुन्दरी के तीनों कूटों से संपुटित होने से प्रभावशाली है।

इसके ऋषि ब्रह्मा, छन्द विराट् और देवता सदाशिव है।

षडङ्गन्यास - १. ॐ २. नमः ३. भगवते ४. रुद्राय ५. ॐ नमो भगवते रुद्राय ६. रुद्राय अस्त्राय फट्।

आकीर्णं दिव्यभौगैरमरदिति सुतैरर्चितंशैलकन्या देहार्धं, धारयन्तं स्फटिकमणिनिभं व्याघ्रचर्मोत्तरीयम् । द्वैपीं कृत्तिं वसानं हिमकिरण कला शेखरं नीलकण्ठं हृष्टं व्याप्तं कलाभिर्धृत कपिलजटं भावयेऽहं महेशं ॥

यथा शक्ति जप करके दशांश घृतपायस तिलादि से होम करें।

॥ अथ पञ्चाक्षरी मन्त्र प्रयोगः॥

मन्त्र - (शारदायाम्) ''नमः शिवाय एवं षडाक्षरी'' ॐ नमः शिवाय' ऋष्यादि से विनियोग करके न्यास करें

विनियोग - अस्य मन्त्रस्य वामदेव ऋषि, पंक्ति छन्द, ईशान देवता, ॐ बीजाय, नमः शक्तये, शिवायेति कीलकाय, सदाशिव प्रसन्नार्थे जपे विनियोगः।

ऋष्यादिन्यासः - ॐ वामदेवर्षये नमः शिरसि। पंक्ति छन्दसे नमः मुखे। ईशान देवतायै नमः हृदि। ॐ बीजाय नमः गुह्ये। नमः शक्तये नमः पादयोः। शिवायेति कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

पञ्चाङ्गन्यास - पञ्चाक्षरी मन्त्र के प्रत्येक अक्षर से न्यास करें। नेत्रन्यास नहीं करें।

षडङ्गन्यास -	करन्यास	अङ्गन्यास
ॐ ॐ	अगुंष्ठाभ्यां नमः।	हृदयाय नमः
ॐ नं	तर्जनीभ्यां नमः।	शिरसे स्वाहा
ॐ मं	मध्यमाभ्यां नमः।	शिखायै वषट्
ॐ शिं	अनामिकाभ्यां नमः।	कवचाय हुँ।
ॐ वां	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
ॐ यं	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

पञ्चमूर्तिन्यास -

ॐ नं तत्पुरुषाय नमः	तर्जनीभ्यां नमः।	मुखे। पूर्ववक्त्रे।
ॐ मं अघोराय नमः	मध्यमाभ्यां नमः।	हृदये। दक्षिण वक्त्रे।

ॐ शिं सद्योजाताय नमः	अनामिकाभ्यां नमः।	पादयोः। पश्चिम वक्त्रे।
ॐ वां वामदेवाय नमः	कनिष्ठिकाभ्यां नमः।	गुह्ये। उत्तर वक्त्रे
ॐ यं ईशानाय नमः	इत्यगुंष्ठयोः नमः।	मूर्ध्नि। उर्द्ध वक्त्रे।

व्यापक न्यास – इस मन्त्र से करें -

ॐ नमोस्तु स्थाणुभूताय ज्योतिंर्लिंगामृतात्मने ।
चतुर्मूर्तिवपुःस्थाय भसितांगाय शंभवे ॥

ध्यानम् –

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रवतंसं
रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समंतात्स्तुतममरगणै व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

शिवयंत्र पूजनम् :- अत्र रुद्राः स्मृता रक्ता धृतशूल कपालका : ।

लिङ्गतोभद्रपीठ पर ''**मंडूकादि परतत्त्वान्त पीठ देवताभ्यो नमः**'' से पूजन करे ॐ से पीठ शक्तियों का पूजन करें।

शक्तयो रुद्रपीठस्थाः सिंदूरारुण विग्रहाः। रक्तोत्पलक पालाभ्याम-लंकृतकरांबुजा॥ इति ध्यात्वा॥

शिव पंचाक्षरी

रुद्र की नौ पीठ शक्तियों का पूर्वादि-क्रम से व मध्य में पूजन करें।

१. ॐ वामायै नमः, २. ॐ ज्येष्ठायै नमः ३. ॐ रौद्रयै नमः ४. ॐ काल्यै नमः ५. ॐ कलविकरिण्यै नमः ६. ॐ बलविकरिण्यै नमः ७. ॐ बलप्रमथिन्यै नमः ८. ॐ सर्वभूतदमन्यै नमः ९. मध्ये – **ॐ मनोन्मन्यै नमः।**

इसके बाद पीठ पर शिव यंत्र को अग्न्युत्तारण करके दुग्धधारा-जलधारा से

शोधन कर रखें। प्रधान देव से यंत्र के आवरण देवताओं के पूजन की आज्ञा मांगें।

संविन्मयः परोदेवः परामृतरसप्रिय ।
अनुज्ञां शिव मे देहि परिवारार्चनाय मे ॥

प्रथमावरणम् (षट्कोणे) - यंत्रपूजा में सर्वत्र प्रत्येक देवता के बाद प्रथमा से संबोधन करते हुये **पादुकां पूजयामि तर्पयामि नमः** से पुष्पगंधार्चन करते हुये तर्पण करें।

१. ऐशान्याम् - **ॐ ईशानाय नमः। ईशान श्री पादुकां पूजयामि तर्पयामि नमः**। २. पूर्वे - **ॐ तत्पुरुषाय नमः**। ३. दक्षिणे **ॐ अघोराय नमः**। ४. पश्चिमे **वामदेवाय नमः**। ५. उत्तरे - **सद्योजाताय नमः**। पूजन के बाद पुष्पाञ्जलि प्रदान करें।

ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणाचर्नम् ॥

इस तरह प्रत्येक आवरण में अमुकावरण कहते हुये पुष्पाञ्जलि देवें।

द्वितीयावरणम् - (षट्कोणाद्बह्ये) ६. ऐशान्याम् **निवृत्त्यै नमः**। ७. पूर्वे - **प्रतिष्ठायै नमः**। ८. दक्षिणे **विद्यायै नमः**। ९. पश्चिमे - **शांत्यै नमः**। १०. उत्तरे **शांत्यतीतायै नमः, शान्त्यतीता श्री पादुकां पूजयामि तर्पयामि नमः**।

पुष्पाञ्जलि - ॐ अभीष्टसिद्धिं मे .... द्वितीयावरणाचर्नम्॥

तृतीयावरणम् - (अष्टदले) पूर्वादिक्रमेण - **ॐ अनन्ताय नमः। ॐ सूक्ष्मायै नमः। ॐ शिवोत्तमाय नमः। ॐ एकनेत्राय नमः। ॐ एकरुद्राय नमः। ॐ त्रिमूर्तये नमः। ॐ श्रीकण्ठाय नमः। ॐ शिखण्डिने नमः**। पुष्पाञ्जलि देवें।

चतुर्थावरणम् - (अष्टदले पत्राग्रे) **पूर्वादिक्रमेण - ॐ उमायै नमः। ॐ चण्डेश्वराय नमः। ॐ नन्दिने नमः। ॐ महाकालाय नमः। ॐ गणेशाय नमः। ॐ वृषभाय नमः। ॐ भृंगरिटये नमः। ॐ स्कंदाय नमः।**

पुष्पाञ्जलि ॐ अभीष्टसिद्धिं मे .... चतुर्थावरणाचर्नम्। से पुष्पाञ्जलि देवें।

पञ्चमावरणम् - भूपूरे (परिधौ) पूर्वे **इन्द्राय नमः। इन्द्र श्री पादुकां पूजयामि तर्पयामि**। इसी तरह अग्नि, यम, नैरृति, वरुण, वायव्य, कुबेर, ईशान, ब्रह्म एवं अनन्त सभी दिक्पालों का पूजन करें।

षष्ठमावरणम् - (भूपूरे) इन्द्रादि देवताओं के पास उनके आयुधों का पूजन

करें। ॐ वज्राय नमः। ॐ शक्त्यै नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशायै नमः। ॐ अङ्कुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।

पुष्पाञ्जलि ॐ अभीष्टसिद्धिं मे .... पष्ठमावरणार्चनम्॥

विशेष पुरश्चरण २४ लाख जप का है। पायस, त्रिमधु (घृत, मधु, शर्करा) एवं पलाश समिध से दशांश हवन करें।

॥इति पञ्चाक्षर शिव मन्त्र प्रयोगः॥

॥ अष्टाक्षरी शिवमन्त्र प्रयोगः ॥

उमापति (शारदायाम्)

मन्त्र - "ह्रीं ॐ नमः शिवाय ह्रीं"।

विनियोगः - ॐ अस्य श्रीशिवाष्टाक्षर मन्त्रस्य वामदेव ऋषिः, पंक्ति छन्दः, उमापतिर्देवता सर्वेष्टसिद्धये जपे विनियोगः।

ऋषिन्यासः - ॐ वामदेवर्षये नमः शिरसि, पंक्ति छन्दसे नमः मुखे, उमापतिदेवतायै नमः हृदि, विनियोगाय नमः सर्वाङ्गे।

अङ्गन्यास	करन्यास	षडङ्गन्यास
ह्रीं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
नं	तर्जनीभ्यां नमः।	शिरसे स्वाहा
मं	मध्यमाभ्यां नमः।	शिखायै वषट्
शिं	अनामिकाभ्यां नमः।	कवचाय हुँ।
वां	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
यं	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

> बंधूकसन्निभं देवं त्रिनेत्रं चन्द्रशेखरं ।
> त्रिशूलधारिणं वंदे चारुहासं सुनिर्मलम् ॥
> कपालधारिणं देवं वरदाभयहस्तकम् ।
> उमयासहितं शम्भुं ध्यायेत्सोमेश्वरं सदा ॥

लिङ्गतोभद्र मण्डल पर मण्डूकादि पीठ देवों का पूजन कर शिव की वामा ज्येष्ठा आदि ९ पीठ शक्तियों का आवाहन करें। (पञ्चाक्षरी विधान में वर्णित हैं)। यंत्र को अग्न्युत्तारण कर दुग्ध-जलधारा से शुद्धकर मण्डलपीठ पर रखें। देव से

आज्ञा मांगें।-

सविन्मय परो देव परामृतरस प्रिय ।
अनुज्ञां शिव मे देहि परिवारार्चनाय च ॥

प्रथमावरणम् - षट्कोणे आग्नेयादि चतुर्दिक्षु (अग्निकोणे) **१. ॐ नं हृदयाय नमः हृदय श्री पादुकां पूजयामि तर्पयामि नमः।** पुष्पगंधार्चन व तर्पण करें।

इस तरह सब जगह पादुका पूजन करें। नैर्ऋत्यां - **ॐ मं शिरसे स्वाहा।** वायवे - **ॐ शिं शिखायै वषट्।** ईशाने - **ॐ वां कवचाय हुं।** मध्ये - **ॐ यं अस्त्राय फट्।**

पुष्पाञ्जलि देवें -

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इसी तरह सर्वत्र द्वितीय, तृतीय, चतुर्थ पञ्चमावरणार्चन के बाद आवरण का नाम लेते हुये कहें।

द्वितीयावरणम् - (षट्कोणाद्बाह्ये) **६. ॐ हृल्लेखायै नमः। ७. ॐ गगनायै नमः। ८. ॐ रक्तायै नमः। ९. ॐ कालिकायै नमः। १०. ॐ महोच्छुष्मायै नमः।**

शिव अष्टाक्षरी

ये सभी पाश अंकुश पर अभय धारण किये हुए हैं।

गंधार्चन तर्पण के बाद "ॐ अभीष्ट सिद्धि ...वत्सल" से पुष्पाञ्जलि देवें।

तृतीयावरणम् - (अष्टदले) पूर्वादिक्रमेण - **ॐ वृषभाय नमः। ॐ क्षेत्रपालाय नमः। ॐ दुर्गायै नमः। ॐ कार्तिकेयाय नमः। ॐ नंदिने नमः। ॐ विघ्नेशाय नमः। ॐ श्यामाय नमः। ॐ सेनाय नमः।**

गंधार्चन तर्पण के बाद पुष्पाञ्जलि देवें।

चतुर्थावरणम् - (अष्टदलपत्राग्रे) - **ॐ ब्राह्म्यै नमः। ॐ माहेश्वर्य्यै नमः। ॐ कौमार्यै नमः। ॐ वैष्णव्यै नमः। ॐ वाराह्यै नमः। ॐ इन्द्राण्यै नमः। ॐ चामुण्डायै नमः। ॐ महालक्ष्म्यै नमः।** गंधार्चन करे व पुष्पाञ्जलि देवें।

पञ्चमावरणम् में भूपूर में इन्द्रादि लोकपालों व **षष्ठमावरण** में उनके आयुधों का पूजन करे व ॐ अभीष्ट सिद्धिं .....वत्सल से पुष्पाञ्जलि देवें।

इस मन्त्र का १४ लाख जप का पुरश्चरण है। दशांश होम करें।

जुहुयान्मधुरासिक्तैरारग्वधसमिद्वरैः।

(इति उमापति मन्त्र प्रयोगः)

॥ अथ दशाक्षररुद्र मन्त्र विधानम् ॥

रुद्रयाग व विशिष्ट साधना में विविध ऋचाओं से न्यास किये जाते है। इसलिये इनका प्रयोग भी यहाँ दिया जा रहा है।

मन्त्र - ॐ नमो भगवते रुद्राय।

विनियोगः - **ॐ अस्य श्री रुद्रमन्त्रस्य बोधायन ऋषिः, पंक्ति छन्दः, रुद्रो देवता ममाभिष्ट सिद्ध्यर्थे जपे विनियोगः।**

ऋषिन्यासः - **ॐ बोधायनर्षये नमः शिरसि, पंक्ति छन्दसे नमः मुखे, रुद्र देवतायै नमः हृदि, विनियोगाय नमः सर्वाङ्गे।**

॥ न्यासः ॥

ॐ या ते रुद्र शिवा तनूरघोरापापकाशिनी। तयानस्तन्वा शंतमया गिरिशंताभिचाकशीहि ॥ इति शिखायां ॥१॥ **ॐ अस्मिन्महत्यर्णवेऽतरिक्षे भवा अधि। तेषा ॐ सहस्त्रयोजने०।** इति शिरसि ॥२॥ **सहस्त्राणि सहस्त्रशोबाह्वोस्तव हेतयः। तासामीशानो भगवः पराचीना मुखाकृधि॥** इति ललाटे ॥३॥ **ॐ ह ॐ सः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथि-र्दुरोणसत्। नृषद्वरसदृतसद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्** ॥ इतिभ्रुवोर्मध्ये ॥४॥ **ॐ त्र्यंबकं यजामहे...** ॥ नेत्रयोः ॥५॥ **नमः स्त्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च नमो नादेयाय च वैशंताय च** ॥ कर्णयोः॥ ६॥ **मानस्तोके तनये मानऽआयुषिमानो गोषुमानो अश्वेषुरीरिषः। मानोवीरान् रुद्रभामिनो वधीर्हविष्मंतः सदमित्वा हवामहे** ॥ नासिकयोः ॥७॥ **ॐ अवतत्य**

धनुष्ट्व ॐ सहस्राक्षशतेषुधे । निशीर्यशल्यानांमुखोशिवो नः सुमनाभव॥ इतिमुखे ॥८॥ नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः। तेषा ॐ सहस्र योजने० ॥ इतिकण्ठे ॥९॥ ॐ नीलग्रीवाः शितिकण्ठा दिव ॐ रुद्रा उपश्रिता तेषांॐसहस्र॥ इत्युपकण्ठे ॥१०॥ नमस्ते आयुधायानातताय धृष्णवे। उभाभ्यामुतते नमो बाहुभ्यां तवधन्वने ॥ इतिस्कंधे॥११॥ यातेहेतिर्मीढुष्टम हस्ते बभूवते धनुः। तया ऽस्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥ इति बाह्वो ॥१२॥ ये तीर्थानि प्रचंरति सृकाहस्तानिषंगिणः। तेषा ॐ सहस्र. ॥ इति हस्तयोः ॥१३॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवेनातिभवे भवस्व मां भवोद्भवाय नमः ॥ इत्यंगुष्ठयोः ॥१४॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः बलायनमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ इति तर्जन्योः ॥१५॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ मध्यमायोः ॥१६॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॥ इत्यनामिकयोः ॥१७॥ ईशान सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति र्ब्रह्मणो ऽधिपतिर्ब्रह्मा। शिवो मे अस्तु सदाशिवोम्॥ इति कनिष्ठिकयोः ॥१८॥

नमो व किरिकेभ्यो देवानां ॐ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमः आनिर्हतेभ्यः ॥ इति हृदये ॥१९॥ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥ इति पृष्ठे ॥२०॥ नमो व हिरण्य बाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमो नमः। सस्पिञ्जरायत्विषीमते पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने पुष्टानाम्पतये नमो नमो बभ्लुशाय ॥ इति पार्श्वद्वये ॥२१॥ विज्यंधनुः कपर्द्दिनो विशल्यो बाणवाँ २ उत। अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः॥ इति जठरे ॥२२॥ हिरण्यगर्भः समवर्तताग्रेभृतजातस्यजातः पतिरेकआसीत्। सदाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ इतिनाभौ ॥२३॥ मीढुष्टम शिवतम शिवो नः सुमना भव। परमेवृक्ष आयुधन्निधायकृत्तिं वसानआचर पिनाकम्बिभ्रदागहि ॥ इति कट्याम् ॥२४॥ ये भूतानामधिपतयो विशिखासः कपर्द्दिनः। तेषा ॐ सहस्र.॥ इति गुह्ये ॥२५॥ ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। सनः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः॥ इति गुदे ॥२६॥ मानो महान्त

मुतमानो अभंकंमान उक्षन्तमुतमान उक्षितम्। मानो ऽवधीः पितरंमोतमातरंमानः प्रियास्तन्वोरुद्र रीरिषः ॥ इति ऊर्वो ॥२७॥ एषतेरुद्रभागस्तं जुषस्व तेनावसेन परोमूज वतोतीहि। अवततधन्वा पिनाकहस्तः कृत्तिवासाः॥ इति जानुनो ॥२८॥ ये पंथा परि रक्षय ऐलबृदाऽआयुर्युधः। तेषा ७ सहस्त्र.॥ इति पादयो ॥२९॥ अध्यवोच दधिवक्ता प्रथमोदैव्योभिषक। अहींश्चसर्वाञ्जम्भन्त्सर्वाश्च यातुधान्यो धराचीः परासुव॥ इति कवचम् ॥३०॥ नमो बिल्म्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनत्र्याय च नमो धृष्णवे ॥ इत्युपकवचम् ॥३१॥ नमोऽस्तु नीलग्रीवाय सहस्त्राक्षायमीढुषे। अथो ये अस्य सत्त्वाना हन्तेभ्यो करन्नमः ॥ इति तृतीय नेत्रं ॥३२॥ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्चते हस्त इषवः पराता भगवो वप॥ इत्यस्त्रम् ॥३३॥

(इति प्रथमोन्यासः)

१ दिग्बंधन य एतावन्तश्च भूयाँ सश्चदिशोरुद्रा वितस्थिरे। तेषा ७ सहस्त्रयोजनेऽव धन्वानितन्मसि ॥

२. दशाङ्ग अक्षर न्यास : ॐ नमः मूर्ध्नि। नं नमः नासिकायाम्। मों नमः ललाटे। भं नमः मुखे। गं नमः कण्ठे। वं नमः हृदये। तें नमः दक्षिण हस्ते। रुं नमः वामहस्ते। द्रां नमः नाभौ। यं नमः पादयोः।

३. तृतीय न्यासः ॐ सद्योजातं ...... नमः हंस हंस पादयो। वामदेवाय ...... नमः हंस हंस उर्वोः। अघोरेभ्यो ..... रुद्ररूपेभ्यः हंस हंस हृदि। तत्पुरुषाय ..... प्रचोदयात् हंस हंस मुखे। ईशान ..... शिवोम् हंस हंस मूर्ध्नि। इस प्रकार ५ ऋचाओं से न्यास करें।

न्यासः (सम्पुट) -दशों दिशाओं में लोकपालों के मन्त्रों से न्यास पूर्वादिक्रम से करें। -

त्रातारमिन्द्र० ..... इन्द्राय नमः। त्वंनो अग्ने० ..... अग्नये नमः। सुगन्नः पंथां प्रदिशन्न एहि ज्योतिष्मद्धेह्य जरन्न आयुः। अपैतुमृत्युरमृतं आगाद्वैवस्वतो नो अभयं कृणोतु दक्षिणे यमायः नमः॥ असुन्वन्तम य जमानमिच्छस्तेन स्येत्यामन्विहि त स्करस्य। अन्यमस्मदिच्छसात इत्यानमो देवि निर्ऋते तुभ्यमस्तु॥ निर्ऋते नमः। तत्वायामि० ..... वरुणाय नमः। आनोनियुद्भिः शतिनीभिरध्वर ७ सहस्त्रिणीभिरुपयाहि यज्ञम्। वायो अस्मिन्त्सवनेमादय स्वयूयं पातस्वस्तिभिः सदानः। वायवे नमः॥ वय ७ सोमव्रते तवमनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि। कुबेराय नमः॥ तमीशानं जगत....। ईशानाय

नमः। अस्मेरुद्रा महेना पर्वता सो वृत्रहत्येभरहूतौ सजोषाः। यः स ठं सतेस्तुवतेधायि वज इन्द्र ज्येष्ठा अस्माँ अवन्तुदेवाः। ब्रह्मणे नमः॥ स्योना पृथिवी.....। धरायै नमः॥

४. चतुर्थ न्यास - मनोजूतिर० .... इति गुह्ये। अबोध्याग्निः समिधाजानानां प्रतिधेनुमिवायतीमुषासम् । यह्वा इवप्रवयामुज्जिहानाः प्रभानवः सिस्त्रतेनाकमच्छ। इति उदरे॥ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम्। कवि ठं सम्राजमतिथिं जनानामासन्ना पात्रं जनयंत देवाः। इति हृदये॥ मर्म्माणिते वर्म्मणाछादयामि सोमस्त्वाराजामृतेनानुवस्ताम्। उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानु देवामदन्तु। इति मुखे॥ जातवेदा य दिवापाकोसि विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। संबाहुभ्यां धमति संपत त्रैर्द्यावाभूमि जनयन्देव एकः इति शिरसि॥

५. पञ्चमन्यासः - रुद्राष्टाध्यायी के मन्त्रों से इस प्रकार न्यास करे यज्जग्रतो० इत्यादि शिवसंकल्प के ६ सूत्रों का हृदय पर, सहस्त्रशीर्षाः इत्यदि १६ मन्त्रों से शिर पर, अद्भ्यः संभृतं.... इत्यादि ६ मन्त्रों से शिखा पर आशुः शिशानो इत्यादि १२ मन्त्रों से कवच पर, विभ्राट...... इत्यादि १७ मन्त्रों से नेत्रों पर, नमस्ते रुद्रमन्यवे इत्यादि ६६ मन्त्रों से अस्त्राय फट् का न्यास करें।

इसके बाद अष्टऋचाओं से नमस्कार करें। यथा -

हिरण्यगर्भः समवर्तताग्रे.। ब्रह्मजज्ञानं प्रथमं.। यः प्राणतो.। ॐ मही द्यौः पृथिवीचन इमं यज्ञं मिमिक्षताम्। पितृन्नोभरीमभिः। उपश्वासय.। अग्नेनय.। यातेअग्ने.। इमंयम.।

॥ रुद्रयन्त्रम् ॥

रुद्र यन्त्र के मध्य में पञ्चकोण है, उसके बाहर अष्टदल, उसके बाहर षोडशदल, उसके ऊपर चतुर्विंशतिदल, उसके ऊपर द्वात्रिंशदल तथा उसकें बाहर चत्वारिंशदल (कहीं-कहीं पर ४५ दल का भी लेख है।) पश्चात् बाहर भूपूर में (द्वारयुक्त परिधि) बनाकर यन्त्र शोधन करें। यह यन्त्र शिव पूजन व मृत्युञ्जय प्रयोग दोनों में किया जाता है। (मन्त्र. महो.)

कैलासाचल सन्निभं त्रिनयनं पञ्चास्यमम्बायुतं
नीलग्रीव महीश भूषणधरं व्याघ्रत्वचाप्रावृतम् ।
अक्षस्त्रग्वर कुण्डिकाभयकरं चान्द्रीं कलां बिभ्रतं
गङ्गाम्भो विलसज्जटं दशभुजं वन्दे महेशं परम् ॥

लिङ्गतोभद्र या सर्वतोभद्र पर "**ॐ मण्डूकादि परतत्त्वांत पीठ देवताभ्यो नमः**" से पीठ पूजन करें पश्चात् नवपीठ शक्तियों का पूजन करें-

पूर्वादिक्रमेण - **ॐ वामायै नमः, ज्येष्ठायै नमः, रौद्रयै नमः, काल्यै नमः, कलविकरिण्यै नमः, बलविकरिण्यै नमः, बलप्रमथिन्यै नमः, सर्वभूतदमन्यै नमः,। मध्ये - ॐ मनोन्मन्यै नमः।**

स्वर्णादिनिर्मित यंत्र का **अग्न्युत्तारण कर** दुग्ध व जलधारा से शोधन कर भद्रमण्डल पर पुष्पादि का आसन देकर "**ॐ नमो भगवते सकलगुणात्मक शक्तियुक्तायानंत योगपीठाय नमः**" से स्थापित करें।

भगवान रुद्र का पृजन करें। यंत्र के आवरण देवताओं के पूजन की रुद्र से आज्ञा मांगें।

ॐ संविन्मयः परोदेव परामृतरस प्रियः ।
अनुज्ञां रुद्र मे देहि परिवारार्चनाय मे ॥

प्रत्येक देवता की नामावलि में संबोधन के पश्चात् प्रथमा से पुष्पगंधार्चन तर्पण करते हुये "**पादुकां पूजयामि तर्पयामि नमः**" कहें। प्रत्येक आवरण की पूजा पश्चात् "**ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं अमुकावरणार्चनम्**" से पुष्पाञ्जलि प्रदान करें।

प्रथमावरणम् - (पञ्चकोणे) **१.ॐ सद्योजाताय नमः। २. वामदेवाय नमः। ३. अघोराय नमः। ४. तत्पुरुषाय नमः। ५. ईशानाय नमः।** पूजनकर पुष्पाञ्जलि देवें।

द्वितीयावरणाम् - (अष्टदले) पूर्वादिक्रमेण **ॐ नंदिने नमः। महाकालाय नमः। गणेश्वराय नमः। वृषभाय नमः। भृंगिरिटये नमः। स्कंदाय नमः। उमायै नमः। चण्डेश्वराय नमः।** पूजन करके पुष्पाञ्जलि देवें।

तृतीयावरणम् - (षोडशदले) **अनंताय नमः। सूक्ष्माय नमः। शिवाय नमः। एकपादाय नमः। एकरुद्राय नमः। त्रिमूर्तये नमः। श्रीकण्ठाय नमः। वामदेवाय नमः। ज्येष्ठायै नमः। श्रेष्ठाय नमः। रुद्राय नमः। कालाय नमः। कलविकरणाय नमः। बलाय नमः। बलविकरणाय नमः। बलप्रमथनाय नमः।** पूजन करके पुष्पाञ्जलि देवें।

चतुर्थावरणम् - (चतुर्विंशति दले) **अणिमायै नमः। महिमायै नमः। लघिमायै नमः। गरिमायै नमः। प्राप्त्यै नमः। प्राकाम्यायै नमः। ईशितायै नमः। वशितायै नमः। ब्राह्म्यै नमः। माहेश्वर्यै नमः। कौमार्यै नमः। वैष्णव्यै नमः। वाराह्यै नमः। इन्द्राण्यै नमः। चामुण्डायै नमः। चण्डिकायै नमः। असितांगभैरवाय नमः। रुरुभैरवाय नमः। चण्डभैरवाय नमः। क्रोधभैरवाय नमः। उन्मत्तभैरवाय नमः। कालभैरवाय नमः। भीषणभैरवाय नमः। संहारभैरवाय नमः।** इति पूजयित्वा पुष्पाञ्जलिं च दद्यात्।

पञ्चमावरणम् - (द्वात्रिंशत्पत्रके पूर्वादिक्रमेण) **ॐ भवाय नमः। शर्वाय नमः। ईशानाय नमः। पशुपतये नमः। रुद्राय नमः। उग्राय नमः। भीमाय नमः। महादेव नमः। अनंताय नमः। वासुकये नमः। तक्षकाय नमः। कुलीरकाय नमः। कर्कोटकाय नमः। शङ्खपालाय नमः। कंबलाय नमः। अश्वतराय नमः। वैन्याय नमः। पृथवे नमः। हैहनाय नमः। अर्जुनाय नमः। शाकुंतेलाय नमः। भरताय नमः। नलाय नमः। रामाय नमः। हिमवते नमः। निषधाय नमः। विंध्याय नमः। माल्यवते नमः। पारियात्राय नमः। मलयाय नमः। हेमकूटाय नमः। ॐ गंधमादनाय नमः।** इति पूजयित्वा पुष्पाञ्जलिं च दद्यात्।

षष्ठमावरणम् - (चत्वारिंशदले) सभी तन्त्र ग्रन्थों में **प्रथम ८ दिक्पाल, पश्चात् उनकी ८ शक्तियां, उनके ८ आयुधों एवं ८ वाहन तथा अष्टदिग्गजो का पूजन क्रम लिखा है।** परन्तु इससे देवता कहीं, उनकी शक्ति व वाहन कहीं, आयुध कहीं इस तरह का क्रम हो जाता है। जब की आवाहन मन्त्रों में आता है कि अमुक देवतायै सांगायै सशक्त्यै सायुधायै सवाहनायै आवाहामि। अतः यहाँ इस आवाहन क्रम से स्थापना व पूजन दिया जा रहा है जो दूसरे मतों से भिन्न हो सकता है।

पूर्वादिक्रमेण - **ॐ इन्द्रायै नमः। ॐ शच्यै नमः। ॐ वज्राय नमः। ॐ ऐरावतायै नमः। ॐ अग्नये नमः। ॐ स्वाहायै नमः। ॐ शक्त्यै नमः। ॐ अजाय नमः। ॐ यमाय नमः। ॐ वाराह्यै नमः। ॐ दण्डाय नमः। ॐ**

महिषाय नमः। ॐ निर्ऋतये नमः। ॐ खड्गिन्यै नमः। ॐ खड्गाय नमः। ॐ प्रेताय नमः। ॐ वरुणाय नमः। ॐ वारुण्यै नमः। ॐ पाशाय नमः। ॐ मीनाय नमः। ॐ वायवे नमः। ॐ वायव्यै नमः। ॐ अङ्कुशायै नमः। ॐ पृषदे नमः। ॐ कुबेराय नमः। ॐ कौबेर्यै नमः। ॐ गदायै नमः। ॐ नराय नमः। ॐ ईशानाय नमः। ॐ ईशान्यै नमः। ॐ त्रिशूलाय नमः। ॐ वृषभाय नमः। ॐ ऐरावताय नमः। ॐ पुण्डरीकाय नमः। ॐ वामनाय नमः। ॐ कुमुदाय नमः। ॐ अञ्जनाय नमः। ॐ पुष्पदंताय नमः। ॐ मार्वभौमाय नमः। ॐ सुप्रतीकाय नमः।

सप्तमावरणम् - (भूपूरे) इन्द्रादि देवों का अनन्त पर्यंत १० दिक्पालों का पूजन करें।

अष्टमावरणम् - (भूपूरे आग्नेयादि कोणेषु) **ॐ विरूपाक्षाय नमः। ॐ विश्वरूपाय नमः। ॐ पशुपतये नमः। ॐ उर्ध्वलिङ्गाय नमः ऐशान्ये।**

भूपूर के बाहर पूर्वादि ८ दिशाओं में - **ॐ श्वेताय विप्रवर्णाय सहस्त्रफणाय शेषाय नमः। ॐ नीलाय वैश्यवर्णाय पञ्चशतफणाय तक्षकाय नमः। ॐ कुंकुमाभाय विप्रवर्णाय सहस्त्रफणाय अनन्ताय नमः। ॐ पीताय क्षत्रियवर्णाय सप्तशतफणाय वासुकये नमः। ॐ कृष्णाय वैश्यवर्णाय सप्तशतफणाय शङ्खपालाय नम.। ॐ उज्ज्वलाय शूद्रवर्णाय पञ्चशतफणाय महापद्माय नमः। ॐ उज्ज्वलाय शूद्र वर्णाय त्रिंशदफणाय कंबलाय नमः। ॐ उज्ज्वलाय शूद्रवर्णाय त्रिंशद्फणाय कर्कोटकाय नमः।**

इति अष्टमावरणं पूजयित्वा पुष्पाञ्जलिं च दद्यात्। एवमावरणपूजनं कृत्वा धूपादि नीराजनान्तं संपूज्य बद्धांजलि पूर्वकं प्रार्थयेत्।

ॐ नमो विरिंचिविष्णवीशभेदिने परमात्मने। सर्गसंस्थिति संहार व्यापृत-व्यक्तमूर्तये॥१॥ नमश्चतुर्धाप्रोद्भूत भूतभीतात्मनो भुवः। भूरिभारार्ति संहर्त्रे भूतनाथय शूलिने ॥२॥ विश्वग्रासाय विकसत्कालकूट विषाशने। तत्कालां कांकितग्रीव नीलकण्ठाय ते नमः ॥३॥ नमो देहार्द्धकांताय दग्धदक्षाध्वराय च। चतुर्वर्गेष्ट सिद्ध्यर्थदायिने मायिनेऽणवे ॥४॥ स्थूलाय मूलभूताय शूलवारितविद्विषे। कालहंत्रे नमश्चन्द्रखण्डमण्डितमौलये ॥५॥ भस्मासक्ताय भक्ताय भुक्ति-मुक्ति प्रदायिने। सकृद्व्यक्त स्वरूपाय शंकराय नमो नमः ॥६॥ नमो अंधकांतकरिपवेऽसृगद्विषे नमोऽस्तु ते द्विरदवराभवभेदिने। विषोल्लसत्फणिकुलबद्धमूर्तये नमः सदा वृषवरवाहनायते ॥७॥ वियन्मरुद्भूत

वहवायु कुंभनीमखेशख्यमृत मयूखमूर्तये । नमः सदा नरकायावभेदिने भवेह नो भवभयभंगकृद्विभो ॥८॥

इति रुद्रस्वतेन स्तुत्वा साष्टांगं प्रणाम्य जपं कुर्यात्। अस्य पुरश्चरणं दशलक्षं जपः एवमर्चन्महादेवं पञ्चाङ्गन्यास पूर्वकम्। दशाक्षर जपासक्तो न सीदेत्स्वेष्टसाधने॥ मनोहराणिगेहानि सुंदर्योवामलोचनाः । धनमिच्छापूरणांतं लभते शिवसेवनात् ॥

॥ इति दशाक्षर रुद्रमन्त्र प्रयोगः ॥

॥ अथ त्वरित्रुद्रमन्त्र प्रयोगः॥

(हेमाद्रिशांति रत्नेषु)

इस मन्त्र का प्रयोग सभी कामनाओं की सिद्धि हेतु तथा विघ्ननाश हेतु किया जाता है। औषधोपचार में यदि दवाकाम नहीं कर रही है तो इसके प्रयोग से मार्गदर्शन होकर रोगी को लाभ प्राप्त होगा।

मन्त्रोयथा – ॐ यो रुद्रो ऽग्नौ योऽप्सुय ओषधीषु यो रुद्रो विश्वाभुवनाविवेश तस्मै रुद्राय नमोऽस्तु॥

नव पीठादौ रचिते सर्वतोभद्रमण्डले लिंगतोभद्रमण्डले वा यन्त्रमध्ये ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् ।

महामृत्युञ्जय पूजन

तद्यथा। पूर्वादिक्रमेण। ॐ वामायै नमः ॥ १॥ ॐ ज्येष्ठायै नमः ॥ २॥ ॐ रौद्रयै नमः ॥ ३॥ ॐ काल्यै नमः ॥ ४॥ ॐ कलविकरिण्यै नमः ॥ ५॥ ॐ बलविकरिण्यै नमः ॥ ६॥ ॐ बलप्रमथिन्यै नमः ॥ ७॥ ॐ सर्वभूतदमन्यै नमः ॥ ८॥ मध्ये ॐ मनोन्मन्यै नमः ॥ ९॥ इति पूजयेत्।

ततः स्वर्णादिनिर्मितं यंत्रं मूर्ति वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेणाशोध्य "ॐ नमो भगवते सकलगुणात्मकशक्तियुताय अनन्ताय योगपीठात्मने नमः॥" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्ति

प्रकल्प्य पाद्यादिपुष्पां तैरुपचारैः संपूज्य देवाज्ञया आवरणपूजां कुर्य्यात्।

तद्यथा पुष्पांजलिमादाय "**सचिनमयः परो देवः परामृतरसप्रियः॥ अनुज्ञां शिव मे देहि परिवारार्चनाय ते ॥ १॥**" इत्याज्ञां गृहीत्वा पुष्पांजलिं च दत्त्वा आवरणपूजाकुर्य्यात् ॥

पंचकोणे। ऐशान्याम् - "**ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥**" **ॐ ईशानाय नमः। ईशानश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्रा ॥ १॥** पूर्वे - "**ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नो रुद्र प्रचोदयात्**" **ॐ तत्पुरुषाय नमः। तत्पुरुषश्रीपा० ॥ २॥** दक्षिणे - "**ॐ अघोरेभ्योऽथ घोरभ्यो घोरघोरतरेभ्यः॥ सर्वेभ्यः सर्व्वशर्व्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥**' **ॐ अधोराय नमः। अधोरश्रीपा० ॥ ३॥** पश्चिमे -"**ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः॥**" **ॐ वामदेवाय नमः। वामदेवश्रीपा० ॥ ४॥** उत्तरे - "**ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥**" **ॐ सद्योजाताय नमः। सद्योजातश्रीपा० ॥ ५॥** (इति पंचमूर्तीः पूजयेत्) ॥

ततः पुष्पांजलिमादाय मूलमुच्चार्य्य '**अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १॥** इतिपठित्वा पुष्पांजलि च दत्त्वा विशेपार्घाद्रिंदुं निःक्षिप्य **पूजितास्तर्पिताः संतु** इति वदेत्। (इति प्रथमावरणम्) ॥ १॥

ततः पंचकोणाग्रेषु ऐशान्यादिक्रमेण। **ॐ निवृत्त्यै नमः। निवृत्तिश्रीपा० ॥ १॥ ॐ प्रतिष्ठायै नमः । प्रतिष्ठाश्रीपा० ॥ २॥ ॐ विद्यायै नमः विद्याश्रीपा० ॥ ३॥ ॐ शांत्यै नमः । शांतिश्रीपा० ॥ ४॥ ॐ शांत्यतीतायै नमः । शांत्यतीताश्रीपा० ॥ ५॥** इति पूजयित्वा पुष्पांजलिं च दद्यात्। (इति द्वितीयावरणम्) ॥ २॥

ततोऽष्टदले - **पूज्य पूजकयोरंतराले प्राचीं तदनुसारेण** अन्या दिशः **प्रकल्प्य** प्राचीक्रमेण। **ॐ सूर्य्यमूर्तये नमः। सूर्य्यमूर्तिश्रीपा० ॥ १ ॐ इन्दुमूर्तये नमः इन्दुमूर्तिश्रीपा० ॥ २॥** ॐ क्षितिमूर्तये नमः । क्षितिमूर्तिश्रीपा० ॥ ३॥ ॐ **तोयमूर्तये नमः। तोयमूर्तिश्रीपा० ॥ ४॥** ॐ अग्निमूर्तये नमः। अग्निमूर्तिश्रीपा०

॥ ५ ॥ ॐ **पवनमूर्तये नमः। पवनमूर्तिश्रीपा०** ॥ ६ ॥ ॐ **आकाशमूर्तये नमः। आकाशमूर्तिश्रीपा०** ॥ ७ ॥ ॐ **यज्ञमूर्तये नमः। यज्ञमूर्तिश्रीपा०** ॥ ८ ॥ इत्यष्टौ मूर्तीः पूजयित्वा पुष्पांजलिं च दद्यात्। (इति तृतीयावरणम्) ॥३॥

तद्बहिरष्टदले - प्राचीक्रमेण ॐ **रमायै नमः। रमाश्रीपा०** ॥१॥ ॐ **राकायै नमः। राकाश्रीपा०** ॥ २ ॥ ॐ **प्रभायै नमः। प्रभाश्रीपा०** ॥ ३ ॥ ॐ **ज्योत्स्नायै नमः। ज्योत्स्तनाश्रीपा०** ॥ ४ ॥ ॐ **पूर्णायै नमः । पूर्णाश्रीपा०** ॥ ५ ॥ ॐ **पूषायैनमः। पूषाश्रीया०** ॥ ६ ॥ ॐ **पूर्ण्यै नमः। पूर्णाश्रीपा०** ॥ ७ ॥ ॐ **सुधायै नमः ॥ सुधाश्रीपा०** ॥ ८ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात्॥ (इति चतुर्थावरणम्) ॥ ४ ॥

तद्बहिरष्टदले - प्राचीक्रमेण। ॐ **विश्वायै नमः। विश्वाश्रीपा०** ॥ १ ॥ ॐ **वंद्यायै नमः। वंद्याश्रीपा०** ॥ २ ॥ ॐ **सितायै नमः । सिताश्रीपा०** ॥ ३ ॥ ॐ **प्रह्लायै नमः। प्रह्लाश्रीपा०** ॥ ४ ॥ ॐ **सारायै नमः। साराश्रीपा०** ॥ ५ ॥ ॐ **संध्यायै नमः। संध्याश्रीपा०** ॥ ६ ॥ ॐ **शिवायै नमः। शिवाश्रीपा०** ॥ ७ ॥ ॐ **निशायै नमः। निशाश्रीपा०** ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ (इति पंचमावरणम्) ॥ ५ ॥

तद्बहिरष्टदलेप्राचीक्रमेण। ॐ **आर्य्यायै नमः । आर्य्याश्रीपा०** ॥ १ ॥ ॐ **प्रज्ञायै नमः। प्रज्ञाश्रीपा०** ॥ २ ॥ ॐ **प्रभायै नमः। प्रभाश्रीपा०** ॥ ३ ॥ ॐ **धृत्यै नमः। धृतिश्रीपा०** ॥ ३ ॥ ॐ **मेधायै नमः। मेधाश्रीपा०** ॥ ४ ॥ ॐ **शांत्यै नमः। शांतिश्रीपा०** ॥ ५ ॥ ॐ **कांत्यै नमः। कांतिश्रीपा०** ॥ ६ ॥ ॐ **धृत्यै नमः । धृतिश्रीपा०** ॥ ७ ॥ ॐ **मत्यै नमः। मतिश्रीपा०** ॥ ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात्। (इति षष्ठावरणम्) ॥ ६ ॥

तद्बहिरष्टदले-प्राचीक्रमेण। ॐ **धरायै नमः। धराश्रीपा०** ॥ १ ॥ ॐ **उमायै नमः। उमाश्रीपा०** ॥ २ ॥ ॐ **पावन्यै नमः। पावनीश्रीपा०** ॥ ३ ॥ ॐ **पद्मायै नमः। पद्माश्रीपा०** ॥ ४ ॥ ॐ **शांतायै नमः। शांताश्रीपा०** ॥ ५ ॥ ॐ **अमोघायै नमः। अमोघाश्रीपा०** ॥ ६ ॥ ॐ **जयायै नमः। जयाश्रीपा०** ॥ ७ ॥ ॐ **अमलायै नमः। अमलाश्रीपा०** ॥ ८ ॥ इत्यष्टो पूजायित्वा पुष्पांजलिं च दद्यात्॥ (इति सप्तमावरणम्) ॥ ७ ॥

तद्बहिरष्टदले प्राचीक्रमेण। ॐ अनंताय नमः। अनंतश्रीपा० ॥ १ ॥ ॐ सूक्ष्मसंज्ञय नमः। सूक्ष्मसंज्ञश्रीपा० ॥२॥ ॐ शिवोत्तमाय नमः शिवोत्तमश्रीपा० ॥ [illegible] नमः। [illegible]श्रीपा० ॥ ४ ॥ ॐ एकरुद्राय नमः।

एकरुद्रश्रीपा० ॥५॥ ॐ त्रिमूर्तये नमः। त्रिमूर्तिश्रीपा० ॥६॥ ॐ श्रीकंठाय नमः । श्रीकंठश्रीपा०॥ ७॥ ॐ शिखंडिने नमः। शिखंडिश्री० ॥ ८॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात् ॥ (इत्यष्टमावरणम्) ॥ ८॥

तद्बहिरष्टदले उत्तरमारभ्य ॐ उमायै नमः। उमाश्रीपा० ॥ १॥ ॐ चण्डेश्वराय नमः। चण्डेश्वरश्रीपा० ॥ २॥ ॐ नंदिने नमः। नंदिश्रीपा०॥ ३॥ ॐ महाकालाय नमः। महाकालश्रीपा० ॥४॥ ॐ गणेशाय नमः। गणेशश्रीपा० ॥ ५॥ ॐ वृषभाय नमः। वृषभश्रीपा० ॥ ६॥ भृंगिरिटये नमः। भृंगिरिटिश्रीपा० ॥७॥ ॐ स्कंदाय नमः। स्कंदश्रीपा० ॥८॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात्। (इति नवमावरणम्) ॥ ९॥

तद्बहिरष्टदले प्राचीक्रमेण। ॐ ब्राह्मयै नमः। ब्राह्मीश्रीपा० ॥ १॥ ॐ माहेश्वर्य्यै नमः। माहेश्वरीपा० ॥ २॥ ॐ कौमार्यै नमः। कौमारीश्रीपा० ॥ ३॥ ॐ वैष्णव्यै नमः। वैष्णवीश्रीपा० ॥४॥ ॐ वाराह्यै नमः। वाराहीश्रीपा० ॥ ५॥ ॐ इन्द्राण्यै नमः। इन्द्राणीश्रीपा० ॥ ६॥ ॐ चामुंडायै नमः। चामुण्डाश्रीपा० ॥७॥ ॐ महालक्ष्म्यै नमः। महालक्ष्मीश्रीपा० ॥८॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं च दद्यात्॥ (इति दशमावरणम्)

तद्बाह्ये भूपुरे पूर्वादिक्रमेण - इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं दद्यात्। इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतां संपूज्य कृतांजलिः प्रार्थयेत् -

ॐ मृत्युंजय महारुद्रत्राहिमां शरणागतम् ।
जन्ममृत्यु-जरारोगैः पीडितं कर्मबंधनैः ॥१॥
तावकस्त्वद्गत-प्राणास्त्वच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं जपेनमृत्युंजयं परम् ॥२॥

इति संप्रार्थ्य जपं कुर्य्यात्

अस्य पुरश्चरणमेकलक्षजपः। जपांते दशांशतो दशद्रव्यैर्होमः। होमदशांशेन मंत्रांते ॐ मृत्युंजयं तर्पयामीत्युक्त्वा दुग्धमिश्रितजलेन तर्पयेत्। ततस्तर्पणदशांशे मंत्रांते आत्मानमभिषिंचामि नमः इति यजमानमूर्द्धन्यभिषेकः॥ होमतर्पणाभिषेकाशक्तौ तत्स्थाने तत्तद्द्विगुणो जपः कार्यः। ततोऽभिषेकदशांशतोऽष्टोत्तरशतसंख्यातो वा ब्राह्मणभोजनं कुर्य्यात्। एवं कृते मंत्रः सिद्धो भवति।

दशद्रव्यैः - प्रजुहुयान्नानि बिल्वफलं [illegible] पायसं सर्वर्षं दुग्धं

दधि दूर्वा च सप्तमी ॥ वटात्पलाशात्ख दिरात्समिधो मधुरप्लुताः ॥ २ ॥ एवं कृते प्रयोगार्हो जायतेऽयं महामनुः ॥ जन्मभे दशमे तस्मात्पुनश्चैकोनविंशके ॥ ३ ॥ जुहुयाद्यः सुधावल्याः समिधश्चतुरंगुलाः ॥ स रोगान् सकलाञ्शत्रून् पराभूय श्रिया युतः ॥ ४ ॥ मोदते पुत्रपौत्राद्यैः शतवर्षाणि साधकः ॥ समिद्भिः श्रीफलोत्थाभिर्होमः संपत्तिसिद्ध्ये ॥ ५ ॥ पलाशतरुजाभिस्तु ब्रह्मवर्चस सिद्धये ॥ वटोत्थभिर्धनप्राप्त्यै खादिरीभिस्तु कांतये ॥ ६ ॥ तिलैरधर्मनाशाय सर्षपैः शत्रुनष्टये ॥ पायसेन कृतो होमः कांति श्रीकीर्तिदायकः ॥ ७ ॥ कृत्वा मृत्युक्षयारोग्यं दध्ना संवादसिद्धिदः ॥ होमसंख्या तु सर्वत्रायुतमानेन कीर्तिता ॥ ८ ॥ अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षयः ॥ स्वजनमदिउवसे यस्तु प्रायसैर्मधुरान्वितैः ॥ ९ ॥ जुहोति तस्य वर्द्ध । कुलमारोग्यकीर्तयः ॥ गुडूचीबकुलोत्थभिः समिद्भिर्हवनं नृणाम् ॥ १० ॥ जन्मतापत्रयं रोगान् मृत्युं चापि विनाशयेत् ॥ प्रत्यहं जुहुयाद्दूर्वा अपमृत्युविनष्टये ॥ ११ ॥ किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम् ॥ अपामार्गसमिद्भिश्च सिद्धान्नैर्ज्वर नष्टये ॥ दुग्धात्कैरमृताखंडैर्मासं होमोऽखिलामये ।।''

॥ इति महामृत्युजयमंत्रप्रयोगः मंत्रमहोदधि ॥

॥ अथ महामृत्युञ्जय मन्त्र प्रयोगः॥

(शुक्रोपासिता)

विनियोगः - ॐ अस्य श्री महामृत्युञ्जय मन्त्रस्य महर्षि भृगु ऋर्षि, पंक्ति गायत्री, अनुष्टुप् छन्दः , सदाशिव महामृत्युञ्जय मन्त्रो देवता, श्रीं बीजं, ह्रीं शक्तिं ममाभीष्ट सिद्धये जपे विनियोगः।

षडाङ्गन्यास - ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ त्र्यम्बकं नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः। ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय शिरसे स्वाहा। ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ सुगन्धिंम पुष्टिवर्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा - शिखायै वषट्। ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ उर्वारुकमिव बन्धनान् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय कवचाय हुं। ॐ हौं ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुः साम [illegible] नेत्रत्रयाय वौषट्। ॐ हौं

ॐ जूं ॐ सः ॐ भूः ॐ भुवः ॐ स्वः ॐ मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष ॐ अघोरास्त्राय नमः अस्त्राय फट्।

इसी तरह करागन्यास करें। ध्यान व यन्त्रार्चन पूर्व में दिये गये पूजन प्रयोगों के अनुसार ही जाने।

॥ शुक्रोपासिता भिन्नपाद मृतसञ्जीवनी विद्या॥

शुक्राचार्य उपासित ६२ अक्षरात्मक महामृत्युञ्जय मन्त्र का उल्लेख पूर्व में किया जा चुका है।

यह मन्त्र भिन्नपाद मृत्युञ्जय मन्त्र है जो कि पूर्व में श्रीविद्याणर्व तंत्र के अनुसार ललिता त्रिपुर सुन्दरी के मन्त्र से पुटित भिन्नपाद मन्त्र बताया जा चुका है।

यह मन्त्र गायत्री मन्त्र से भिन्नपाद मन्त्र बनता है। यथा -

वेदादि-भूरादिपदत्रयं च मध्ये कृतं मृत्युहरं त्रियम्बकम् ।
जपेत् फलार्थी विधिवत् प्रजप्य प्रासादबीजं मृत्युञ्जयसंपुटेत् ॥

मन्त्र - ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं त्र्यम्बकं यजामहे भर्गो देवस्य धीमहि सुगन्धिं पुष्टिवर्धनम् धियो यो नः प्रचोदयात् उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् स्वः भुवः भूः ॐ सः जूं हौं ॐ।

अन्यकल्पों में दूसरा मन्त्र भेद स्वरूप में है।

ॐ हौं जूं सः ॐ भूर्भुवः स्वः ॐ त्र्यम्बकं यजामहे तत्सवितुर्वरेण्यं सुगन्धिं पुष्टिवर्धनम् भर्गो देवस्य धीमहि उर्वारुकमिव बन्धनान् धियो यो नः प्रचोदयात् मृत्योर्मुक्षीय मामृतात् स्वः भुवः भूः ॐ सः जूं हौं ॐ।

॥ मृत्युञ्जय श्रीचक्रपूजा ॥

त्रैलोक्य चिन्तामणि, दीक्षावल्लभ में शिवात्मक श्रीचक्र का वर्णन है।

श्रीचक्र में श्रीत्रिपुरसुन्दरी का पूजन अपने शिव कामेश्वर के साथ किया जाता है, उसी तरह मृत्युञ्जय के साथ उनकी शक्ति अमृतेश्वरी का पूजन करना चाहिये।

यंत्रोद्धार –

बिन्दु त्रिकोण षट्कोण वृत्ताष्टदलमण्डितम् ।
वृत्तत्रयं धरासद्म श्रीचक्रं शिवमीरितम् ॥

इसके अनुसार बिन्दु त्रिकोण षट्कोण वृत्त अष्टदल, वृत्तत्रय चक्र और भूपूर से यह यन्त्र बनता है।

इसका यन्त्र श्रीयन्त्र की तरह ही यन्त्रार्चन चक्र पूजा करें। विशेष विधान मृत्युञ्जय पटल में देखें।

मृत्युञ्जय श्री यंत्रम्

प्रथमावरणम् - बिन्दु में भगवान मृत्युञ्जय का ध्यान करें। उसके वामभाग में उनकी शक्ति अमृतेश्वरी का आवाहन करें।

ॐ ह्रीं श्रीं मृत्युञ्जये भगवति चैतन्य चन्द्रे हंस संजीवनी स्वाहा। इहागच्छ इहतिष्ठ। गुरुचतुष्टय का ध्यान करें। ॐ गुरवे नमः। परम गुरवे नमः। परात्पर गुरवे नमः। परमेष्ठी गुरवे नमः।

द्वितीयावरणम् - (त्रिकोणे) **सं सत्वाय नमः। रं रजसे नमः। तं तमसे नमः। तद्वाह्वये तत्रैव। वामायै नमः। जेष्ठायै नमः। रौद्रयै नमः।**

तृतीयावरणम् - (षट्कोणे) मृत्युञ्जय मन्त्र के षडाङ्ग न्यास करते हैं, उन मन्त्रों से करें। अथवा सामान्य क्रम में - **ॐ मृत्युञ्जयाय हृदयशक्तये नमः। शिरो शक्तये नमः। शिखा शक्तये नमः। कवच शक्तये नमः। नेत्रत्रयाय शक्तये नमः। अस्त्र शक्तये नमः।**

चतुर्थावरणम् - (अष्टदले) **ॐ अर्कमूर्तये नमः। इन्द्रमूर्तये नमः। वसुधामूर्तये नमः। तोयमूर्तये नमः। वह्निमूर्तय नमः। वायुमूर्तये नमः। आकाशमूर्तये नमः। यजमानमूर्तये नमः।**

पञ्चमावरणम् - (अष्टदले) **ॐ रमायै नमः। राकायै नमः। प्रभायै नमः। ज्योत्स्नायै नमः। पूर्णायै नमः। उषायै नमः। पूरण्यै नमः। सुधायै नमः।**

षष्टमावरणम् - (अष्टदले) **ॐ विश्वायै नमः। विद्यायै नमः। सितायै नमः। प्रह्वायै नमः। सारायै नमः। सन्ध्यायै नमः। शिवायै नमः। निशायै नमः।**

सप्तमावरणम् - (अष्टदले) **ॐ आर्यायै नमः। प्रज्ञायै नमः। प्रभायै नमः। मेधायै नमः। शान्त्यै नमः। कान्त्यै नमः। धृत्यै नमः। सत्यै नमः।**

अष्टमावरणम् - (अष्टदले) **ॐ धरायै नमः। उमायै नमः। पाविन्यै नमः। पद्मायै नमः। शान्तायै नमः। मोघायै नमः। जयायै नमः। अमलायै नमः।**

नवमावरणम् - (अष्टदले) **ॐ भवायै नमः। शर्वायै नमः। पशुपतये नमः। ईशानाय नमः। उग्राय नमः। रुद्राय नमः। भीमाय नमः। महते नमः।**

दशमावरणम् - (अष्टदले) **ॐ भवान्यै नमः। शर्वाण्यै नमः। पशुपत्यै नमः। ईशान्यै नमः। उग्रायै नमः। रुद्राण्यै नमः। भीमायै नमः। महत्यै नमः।**

एकादशावरणम् - प्रथमवृत्त में गायत्री मन्त्र से सविता का आवाहन करे। द्वितीय वृत्त में -

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धु दुरितात्यग्नि ॥
ॐ जातवेदसे दुर्गायै नमः।

तृतीय वृत्त में - **ॐ त्र्यम्बकं यजामहे.......। त्र्यम्बकायै नमः।**

द्वादशावरणम् - (भूपूरे) पूर्वादिक्रमेण - **ॐ ज्येष्ठायै नमः। श्रेष्ठाय नमो रुद्राय नमः। कालायै नमः। कलविकरणाय नमो बलविकरणाय नमः। बलाय नमो बलप्रमथनाय नमः। सर्वभूतदमनाय नमः। मनोन्मनाय नमः। भवोद्भवाय नमः।**

त्रयोदशावरणम् - (भूपूरे) पूर्वादिक्रमेण - **ॐ ब्रह्मयै नमः। माहेश्वर्यै नमः। कौमार्यै नमः। वैष्णाव्यै नमः। वाराह्यै नमः। इन्द्राण्यै नमः। चामुण्डायै नमः। महालक्ष्म्यै नमः।**

चतुर्दशावरणम् - (भूपूरे) इन्द्रादि लोकपालों का आवाहन करें।

पञ्चदशामावरणम् - (भूपूरे) इन्द्रादि दिक्पालों के वज्रादि आयुधों का पूजन करें।

॥ विविध देवस्य आयुष्यकर मृत्युञ्जय मन्त्र ॥

वैरिञ्चकल्प में ब्रह्मा, नृसिंहविष्णु एवं त्र्यम्बकरुद्र के तीन वैदिक मन्त्र दिये हैं। व्यास एवं धर्मराज के भी आयुष्यमन्त्र उपलब्ध है। यथा

॥ ब्रह्मा ॥

ॐ हंसात्मको यो अपामग्रेस्तेजसा दीप्यमानः ।
स नो मृत्योस्त्रायतां नमो ब्रह्मणे विश्वनाभिः ॥

॥ नृसिंहविष्णु ॥

ॐ उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥

त्र्यम्बकं **ॐ त्र्यम्बकं यजामहे ....॥ (पूर्ण ऋचा)**

॥ व्यासमन्त्र ॥

मन्त्रमहोदधि में कहा गया है कि –

मृत्युञ्जयेन पुटितं यो व्यासस्य मन्त्रं जपेत् ।
सर्वोपद्रव सन्त्यक्तो लभते वाञ्छितं फलम् ॥

प्रायः कई बार ऐसी परिस्थिति बनती है कि विभिन्न वैद्य, डॉक्टरों का इलाज लंबे समय तक चलने पर भी रोग का शमन नहीं होता है तो उस समय मृत्युञ्जय मन्त्र संपुटित व्यासमन्त्र का जप करने से महर्षि वेदव्यास स्वयं सदबुद्धि देकर रोगी की रक्षा के लिये मार्गदर्शन करते है एवं वातावरण अनुकूल बनने लगता है।

मन्त्र – **''ॐ जूं सः व्यां वेदव्यासाय नमः सः जूं ॐ''।**

विनियोग – **ॐ अस्य श्रीव्यासमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप छन्दः, सत्यवती सुतो देवता व्यां बीजं, नमः शक्तिः, मम रोगज्ञान पूर्वकं सर्वारिष्टनिवृत्तये मृत्युञ्जय संपुटित व्यास मन्त्र जपे विनियोगः।**

ऋषिन्यास – **ब्रह्मणे ऋषये नमः शिरसि, अनुष्टुप् छन्दसे नमः मुखे, सत्यवतीसुतो देवता हृदये, व्यां बीजं नमः गुह्ये, नमः शक्तिं नमः पादयो विनियोगाय नमः सर्वाङ्गे।**

मन्त्र	**करन्यास**	**अंगन्यास**
व्यां	अंगुष्ठाभ्यां नमः।	हृदयाय नमः
व्यीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा
व्यूं	मध्यमाभ्यां नमः।	शिखायै वषट्
व्यैं	अनामिकाभ्यां नमः।	कवचाय हुँ।
व्यौं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
व्यः	करतल करपृष्ठाभ्यां नमः।	अस्त्राय फट्।

ध्यानम् –

व्याख्यामुद्रिकया लसत्करतलं सद्योगपीठस्थितं
वामे जानुतले दधानमपरं हस्तं सुविद्यानिधिम् ।

विप्रव्रातवृतं प्रसन्नमनसं पाथोरुहाङ्गद्युतिं
पाराशर्यमतीव पुण्यचरितं व्यासं भजे सिद्धये ॥

॥ व्यासयन्त्र पूजनम् ॥

यन्त्र के मध्य में षट्कोण उसके बाहर अष्टदल उसके बाहर भूपूर (परिधि) युक्त हैं। मध्यबिन्दु में (यन्त्रमध्य) में महर्षि व्यास का आवाहन करे।

व्यास पूजन यंत्र

प्रथमावरण पूजनम् - (षट्कोणे) **व्यां हृदयाय नमः आग्नेये। व्यीं शिरसे स्वाहा नैर्ऋत्ये। व्यूं शिखायै वषट् वायव्ये। व्यैं कवचाय हुं ऐशान्ये व्यौं नेत्रत्रयाय वौषट् अग्रे। व्यः अस्त्राय फट् सर्व दिक्षु** (पश्चिमे)।

द्वितीयावरण पूजनम् - (अष्टदले) **ॐ पैलाय नमः पूर्वे। ॐ वैशम्पायनाय नमः दक्षिणे। ॐ जैमिन्यै नमः पश्चिमे। ॐ सुमन्तवे नमः दक्षिणे।**

आग्नेयादि चारों कोणों में - (अष्टदले) **ॐ श्री शुकाय नमः आग्नेये। ॐ रोमहर्षणाय नमः नैर्ऋत्ये। ॐ उग्रश्रवसे नमः वायव्ये। ॐ अन्यमुनीन्द्रेभ्यो नमः ऐशान्ये॥**

तृतीयावरणम् - (भूपूरे) **इन्द्रादि दश दिक्पालों का पूजन करें।**

चतुर्थावरणम् - (भूपूरे वाह्ये) **पूर्वादिक्रमेण वज्रादि आयुधों की पूजा करें।**

॥इति व्यास मन्त्र प्रयोगः॥

॥ सर्वरोगनाशक धर्मराज मन्त्र विधानम् ॥

(मन्त्रमहोदधि ग्रन्थ में इसका संक्षिप्त विधान है।)

संकल्प - **मम सकलापदां विनाशनाय सर्वरोगाणां प्रशमनार्थे श्रीधर्मराज मन्त्र जपमहं करिष्ये।**

करन्यास - हृदयादि न्यास की तरह करें। **ॐ क्रों ह्रीं हृदयाय नमः। ॐ आं वैं शिरसे स्वाहा। ॐ वैवस्वताय शिखायै वषट्। ॐ धर्मराजाय कवचाय हुं। ॐ भक्तानुग्रहकृते नेत्रत्रयाय वौषट्। ॐ नमः अस्त्राय फट्।**

मन्त्र - **ॐ क्रों ह्रीं आं वैं वैतवस्ताय धर्मराजाय भक्तानुग्रहकृते नमः।**

ध्यानम् -

पाथः संयुतमेघसन्निभतनुः प्रद्योतनस्यात्मजो
नृणां पुण्यकृतां शुभावहवपुः पापीयसां दुःखकृत्।
श्रीमद्दक्षिणदिक्पति र्महिषगो भूषाभरालंङ्कृतो
ध्येयः संयमनीपतिः पितृगण स्वामी यमो दण्डभृत् ॥

॥ इति धर्मराज प्रयोग ॥

॥ अरिष्टनाशक यन्त्रादिभिषेक प्रयोगः ॥

रोगोपचार हेतु निम्नलिखित यन्त्र बनाये। मण्डल बनाये। मध्य में साध्यनाम (रोगी का नाम लिखे)। बाहर षट्कोण में षडङ्गों की पूजा करें। उसके बाहर **पञ्चदल में ईशानादि देवों का नाम** लिखें। उसके बाहर **अष्टदल में त्र्यम्बक मन्त्र** के आठ भाग लिखें। **अ......... अं अः। क वर्गादि आठवर्गो को लिखें,** लिखना असंभव हो तो कल्पना करें। उसके बाहर भूपूर परिधि में इन्द्रादि देवों का आयुध सहित पूजन करें।

मण्डल के मध्य में कलश रखें उसमें सतावरी व अन्य औषधियों डालें। शिवार्चन व यन्त्रार्चन करे एवं उस जल से रोगी का अभिषेक करें।

उपरोक्त तरह के दो यन्त्र भोजपत्र पर लोहे की कलम से लिखें। जिस शत्रु का भय हो उस शत्रु का नाम मध्य में लिखें। यन्त्र का उत्तराभिमुख होकर अर्चन करें। एक यन्त्र ताबीज में भरकर स्वयं के बांध लेवें। एवं दूसरा यन्त्र एक शिला पर रखकर दूसरी भारी शिला से दाब देवें तो शत्रु अनुकूल होगा।

अगर विशेष भय होवे तो स्वयं के पास रखने वाला यंत्र तो गंध व लोहे की कलम से लिखें परन्तु शिला के नीचे दबानें वाला यन्त्र गंध व भस्म से आक व धतूर के रस में कौवे के पंख की कलम मे लिखें।

॥ रणदीक्षा और वीराभिषेक ॥

नरपतिजयचर्या के शान्त्याध्याय में अभिषेक विधि मृत्युञ्जय कवच न्यासादि दिये गये हैं। यथा -

अभिषेकात् परं पूजा कर्तव्या पूर्व मण्डले ।
मृत्युञ्जयेन मन्त्रेण पूर्वोक्तविधिना ततः ।
"ॐ जूं सः"

पश्चात् समर्पयेन्मन्त्रं रणदीक्षा भवेदियम् ।
तया समन्वितो वीरस्त्रिदशैरपि दुर्जयः ॥

इसके अनुसार युद्ध में विजय का इच्छुक मृत्युञ्जय दीक्षा लेवें। शुद्ध भूमि पर एक अष्टदल बनायें उसके बाहर ३ परिधी (तीन रंगों में - सत, रज, तम युक्त बनायें) बनायें।

अष्टदल में मृत्युयन्त्र के अष्टदल में ६४ देवों का यन्त्रार्चन करें। एवं एक एक पत्र में ८-८ देवों का अर्चन करें।

पद्मपत्रे लिखेद् देवांश्चतुः षष्टिप्रमाणतः ।
एकैकपद्मपत्रेषु वसुसंख्या दले दले ॥
भैरवी भैरवा सिद्धिर्ग्रहा नागा उपग्रहाः ।
पीठोपपीठ संयुक्ता दिक्पालैश्च समन्विता ॥
कर्णिकायां न्यसेद देवं साङ्गं सहस्त्रकम् ।
प्रणवादिनमोऽन्तैश्च नाममन्त्रैस्ततो ऽर्चयेत् ॥

अर्थात् भैरवी भैरव, सिद्धियां, ग्रह, नाग, उपग्रह, पीठ, उपपीठ का अर्चन करें। भूपुर में दिक्पाल व आयुधों का अर्चन करें, अथवा पूर्व में बताई गयी यन्त्र पूजा में भैरव, नाग, अष्टसिद्धि की पूजा वाला यन्त्र काम में लेवें।

यन्त्र मध्य में कुम्भ स्थापित करे उसमें सर्वोषधी शतावरी दूर्वा अक्षत पल्लव युक्त करें।

यन्त्रार्चन बाद कुछ दूरी पर अष्टदल के मण्डल युक्त आसन पर वीर पुरुष को बैठाकर उस कुम्भ के जल से मृत्युञ्जय कवचादि मन्त्रों से अभिषेक कर मृत्युञ्जय मन्त्र की दीक्षा प्रदान करें।

॥ अमृतेश्वरी मन्त्र प्रयोगः॥

पुरुष देवता के साथ उसकी शक्ति देवता का पूजन करने से पूर्णाङ्ग होता है। स्त्री देवता के साथ पुरुष देवता का पूजन अर्चन भी आवश्यक है।

यदि पुरुष देवता के एक लक्ष जप किये जाये तो उसके दशांश जप (दस हजार) उसकी स्त्री देवता के करने आवश्यक है। अतः मृत्युञ्जय प्रयोग के साथ अमृतेश्वरी देवी का पूजन अर्चन व जप किया जाय तभी पूर्णाङ्ग होगा।

श्रीभुवनेश्वरी महास्तोत्र में श्रीपृथ्वीधराचार्य ने मन्त्रोद्धार इस प्रकार किया है।

श्रीमृत्युञ्जयनामधेय भगवच्चैतन्य चन्द्रात्मिके
ह्रींङ्कारि प्रथमा तमांसि दलय त्वं हंससञ्जीविनि ।
जीवं प्राणविजृम्भमाण हृदयग्रंथिस्थितं मे कुरु
त्वां सेवे निजबोधलाभरभसा स्वाहा भजामीश्वरीम् ॥

मन्त्र ॐ श्रीं ह्रीं मृत्युञ्जये भगवति चैतन्य चन्द्रे हंससञ्जीवनी स्वाहा।

ध्यानम् –

जाग्रद बोधसुधामयूखनिचयैराप्लाव्य सर्वादिशो,
यस्याः कापि कला कलङ्करहिता षट्चक्रमाक्रार्मति ।
दैन्यध्वान्तविदारणैकचतुरा वाचं परां तन्वती,
या नित्या भुवनेश्वरी विहरतां हंसीव मन्मानसे ॥

यही पृथ्वीधराचार्य ने यन्त्रोद्धार दिया है :

व्योमेन्दो रसनार्णकर्णिकमचां द्वन्द्वै स्फुरत्केसरं,
पत्रान्तर्गत पञ्चवर्ग यशलार्णादि त्रिवर्ग क्रमात् ।
आशास्वस्त्रिषु लान्तलाङ्गलियुजा क्षोणीपुरेणावृतं,
वर्णाब्जं शिरसि स्थितं विषगद प्रध्वंसि मृत्युञ्जयेत् ॥

उपरोक्त यन्त्र में वर्णादि लिखकर पूजाकर धारण करने से शुभ रहे।

॥ चित्रविद्या अमृतेश्वरी प्रयोगः॥

मृत्युञ्जय प्रयोग के साथ इसका प्रयोग करने से प्रयोग सफल होकर लाभ मिलता है।

विनियोगः ॐ अस्य श्री चित्रविद्या अमृतेश्वरी मंत्रस्य संवर्त्तकऋषिः, शक्करी छन्दः, चित्रविद्या अमृतेश्वरी देवता, ठं बीजं, सूं शक्ति, इष्ट सिद्ध्यर्थे जपे विनियोगः।

षडङ्गन्यासः - ठां, ठीं, ठूं, ठें, ठौं, ठः से क्रमशः न्यास करें।

ध्यानम्–

अमलकमलमध्ये चन्द्रपीठे निषण्णाम–
मृतकलश वीणा भिन्न मुद्राग्र हस्ताम् ।
प्रणतशिरसि पूरं संस्रवन्तीं सुधायाः
शरणमहमुपैमि श्री शिवां चित्रविद्याम् ॥

मंत्र : वं सं ज्झूं ज्झूं जूं ठं ह्रीं श्रीं श्री भगवति चित्रविद्ये महामाये अमृतेश्वरि एह्येहि वरे वरदे प्रसन्न वदने अमृतं स्रावय स्रावय अनलं शीतल कुरु कुरु सर्वविष- नाशय नाशय सर्वताप ज्वरं हन हन सर्वपैत्योन्मादं मोचय मोचय

आज्योस्थ शमय शमय सर्वजनं मोहय मोहय मां पालय पालय श्रीं ह्रीं ठं जृं ज्झूं ज्झूं सं वं स्वाहा।

ह्रीं श्रीं का मन में स्मरण कर साध्य का ध्यान करें एवं अमृतकलश से मिञ्चित होने का ध्यार करें।

किसी के पैत्योन्माद होवे तो साध्यनाम की जगह यंत्र में उसका नाम लिखें। मूल मंत्र के दस हजार जप करें। यंत्र को गुड़ की गुटिका बनाकर खिला देवे। प्रधान देव की पूजा में रखें अमृतकलश से साध्य का सिंचन करे लाभ होवे। जब कामना हेतु प्रयोग नहीं करना होवे तो साध्यनाम बिना लिखे यंत्र का पूजन जप करें।

॥ मृत्युञ्जयमन्त्र होम द्रव्याणी ॥

दशद्रव्यैः (मन्त्रमहोदधौ)

प्रजुहुयात्तानि बिल्वफलं तिलाः॥ १॥ पायसं सर्षपा दुग्धं दधि दूर्वा च सप्तमी॥ वटात्पलाशात्खदिरात्समिधो मधुरप्लुताः॥ २॥ एवं कृते प्रयोगार्हो जायतेऽयं महामनुः॥ जन्मभे दशमे तस्मात्पुनश्चैकोनविंशके ॥ ३॥ जुहुयाद्यः सुधावल्याः समिधश्चतुरंगुलाः ॥ स रोगान् सकलाच्छशत्रून् पराभूय श्रिया युतः ॥ ४॥ मोदते पुत्रपौत्राद्यैः शतवर्षाणि साधकः॥ समिद्भिः श्रीफलोत्थाभिर्होमः संपत्तिसिद्‌ध्ये ॥५॥ पलाशतरुजाभिस्तु ब्रह्मवर्चससिद्धये॥ वटोत्थाभिर्धनप्राप्त्यै खादिराभिस्तु कांतये ॥ ६॥ तिलैरधर्मनाशाय सर्षपैः शत्रुनष्टये ॥ पायसेन कृतो होमः कांति श्रीकीर्तिदायकः ॥ ७॥ कृत्वा मृत्युक्षयाकरो दध्ना संवादसिद्धिदः॥ होमसंख्या तु सर्वत्रायुतमानेन कीर्तिता ॥ ८॥ अष्टोत्तरशतं दूर्वात्रिकहोमाद्रुजां क्षयः ॥ स्वजन्मदिवसे यस्तु प्रायसैर्मधुरान्वितैः ॥ ९॥ जुहोति तस्य वर्द्धन्ते कुमलारोग्यकीर्तयः॥ गुडूचीबकुलोत्थभिः समिद्भिर्हवनं नृणाम् ॥ १०॥ जन्मतारात्रयेरोगं मृत्युं चापि विनाशयेत्॥ प्रत्यहं जुहुयाद्दूर्वा अपमृत्युविनष्टये ॥ ११॥ किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम् ॥ अपामार्गसमिद्भिश्च सिद्धान्नैर्ज्वरनष्टये ॥ दुग्धाक्तैरमृताखंडैर्मासं होमोऽखिलाप्तये॥"

सुधावल्ली - (गुडूची, कश्मरी एवं बकुल) की चार अंगुल की समिधाओं का हवन पुरश्चरण में अथवा अपने जन्म नक्षत्र से १० वें या २१ वें नक्षत्र में करें तो रोग, शोक शत्रु का नाश होकर सम्पत्ति को प्राप्त करता है। वंश वृद्ध होवे। तीन पत्तों वाली दूर्वा के होम से आयुवृद्धि होवे। धनप्राप्ति हेतु श्रीफल बिल्वफल एवं

बरगद की समिधाओं से हवन करें। पलाश समिध में वाकसिद्धि, ब्रह्मवर्चस्व वृद्धि, खदिर समिध से कान्तिवृद्धि, सरसों के होम से शत्रुनाश, तिलों के होम से अधर्मनाश व शत्रुनाश होवे।

खीर के होम से कांन्ति कीर्ति व लक्ष्मी की प्राप्ति होवें। दही के होम से शत्रुकृत प्रेतादिविघ्ननाश होवे तथा अपमृत्युनाश होवें। त्रिमधु (घी, मधु, शर्करा) मिश्रित खीर के होम से आरोग्य कीर्ति व लक्ष्मी का विस्तार होवे। अपामार्ग के होम से ज्वर नाश होवे तथा अभिलषित प्राप्ति हेतु दुग्ध में डुबोये गये गिलोय के टुकड़ों से एक मास पर्यन्त हवन करना चाहिये।

॥ महामृत्युञ्जय कवचम् ॥

विनियोगः :- ॐ अस्य श्रीमहामृत्युञ्जय कवचस्य श्रीभैरवऋषिः गायत्री छन्दः श्रीमृत्युञ्जय रुद्रो देवता ॐ बीजं जूं शक्तिः सः कीलकं हौमिति तत्त्वं श्री चतुर्वर्गफल साधनाय पाठे विनियोगः।

ऋष्यादिन्यासः :- श्रीभैरव ऋषये नमः (शिरसि), गायत्रीछन्दसे नमः (मुखे), श्रीमृत्युञ्जयरुद्र देवतायै नमः (हृदये), ॐ बीजाय नमः (गुह्ये), जूं शक्तये नमः (पादयोः), सः कीलकाय नमः (नाभौ), हौंतत्त्वाय नमः (हृदि), विनियोगाय नमः (सर्वाङ्गे)।

कर षडङ्गादिन्यासः :- ॐ हौं जूं सः इस मंत्र से कर एवं हृदयादि षड़ङ्गन्यास करे।

ध्यानम् :-

चन्द्रमण्डल मध्यस्थे रुद्रमाले विचित्रिते ।
तत्रस्थं चिन्तयेत् साध्यं मृत्यु प्राप्तोऽपि जीवति ॥१॥

॥ स्तोत्रम् ॥

ॐ जूं सः हौं शिरः पातु देवो मृत्युञ्जयो मम ।
श्रीशिवो वै ललाटं च ॐ हौं भ्रुवौ सदाशिवः ॥२॥
नीलकण्ठोऽवतान्नेत्रे कपर्द्दी मेवताच्छ्रुती ।
त्रिलोचनोऽवताद् गण्डौ नासां मे त्रिपुरान्तकः ॥३॥
मुखं पीयूषघटभृदोष्ठौ मे कृत्तिकाम्बरः ।
हनुं मे हाटकेशानो मुखं बटुकभैरवः ॥४॥

कन्धरां कालमथनो गलं गणप्रियोऽवतु।
स्कन्धौ स्कन्दपिता पातु हस्तौ मे गिरिशोऽवतु ॥५॥
नखान् मे गिरिजानाथः पायादङ्गुलिसंयुतान्।
स्तनौ तारापतिः पातुः वक्षः पशुपतिर्मम ॥६॥
कुक्षि कुबेरवरदः पार्श्वौ मे मारशासनः।
शर्वः पातु तथा नाभिं शूली पृष्ठं ममावतु ॥७॥
शिश्नं मे शङ्करः पातु गुह्यं गुह्यकवल्लभः।
कटिं कालान्तकः पायादूरू मेऽन्धकघातकः ॥८॥
जागरूकोऽवताज्जानू जङ्घे मे कालभैरवः।
गुल्फौ पायाज्जटाधारी पादौ मृत्युञ्जयोऽवतु ॥९॥
पादादिमूर्धपर्यन्तं सद्योजातो ममावतु।
रक्षाहीनं नामहीनं वपुः पात्वमृतेश्वरः ॥१०॥
पूर्वं बलविकरणो दक्षिणे कालशासनः।
पश्चिमे पार्वतीनाथ उत्तरे मां मनोन्मनः ॥११॥
ऐशान्यामीश्वरः पायादाग्नेय्याममग्निलोचनः।
नैर्ऋत्यां शम्भुरव्यान्मां वायव्यां वायुवाहनः ॥१२॥
ऊर्ध्वे बलप्रमथनः पाताले परमेश्वरः।
दश दिक्षु सदा महामृत्युञ्जयश्च माम् ॥१३॥
रणे राजकुले द्यूते विषये प्राणसंशये।
पायादों जूं महारुद्रो देवदेवो दशाक्षरः ॥१४॥
प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु।
सायं सर्वेश्वरः पातु निशायां नित्यचेतनः ॥१५॥
अर्द्धरात्रे महादेवो निशान्ते मां महोदयः।
सर्वदा सर्वतः पातु ॐ जूं सः हौं मृत्युञ्जयः ॥१६॥

॥ फलश्रुति ॥

इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभम्।
सर्वमन्त्रमयं गुह्यं सर्वतन्त्रेषु गोपितम् ॥१७॥
पुण्यं पुण्यप्रदं दिव्यं देवेदेवाधिदैवतम्।
य इदं च पठेन्मन्त्रं कवचं वाचयेत्ततः ॥१८॥

तस्य हस्ते महादेवि! त्र्यम्बकस्याष्टसिद्धयः ।
रणे धृत्वा चरेद् युद्धं हत्वा शत्रून् जयं लभेत् ॥१९॥
जयं कृत्वा गृहं देवि! स प्राप्स्यति सुखं पुनः ।
महाभये महारोगे महामारी भये तथा ॥२०॥
दुर्भिक्षे शत्रुसंहारे पठेत् कवचमादरात् ।

॥ इति महामृत्युञ्जय कवचम् ॥

॥ श्रीमहामृत्युञ्जय सहस्त्रनाम स्तोत्रम् ॥

विनियोग : अस्य श्रीमहामृत्युञ्जय सहस्त्रनाम स्तोत्रस्य भैरवऋषिरुष्णिक् छन्दः श्रीमहामृत्युञ्जयरुद्रो देवता। ॐ बीजं जुं शक्तिः सः कीलकं मम सर्वविधरोगादिशमनपूर्वकं दीर्घायुः प्राप्तये पाठे विनियोगः।

ऋष्यादिन्यास :- भैरवऋषये नमः (शिरसि), उष्णिक्छन्दसे नमः (मुखे), श्रीमहामृत्युञ्जयरुद्रदेवतायै नमः (हृदये), ॐ बीजाय नमः (गुह्ये), जुं शक्तये नमः (पादयोः), सः कीलकाय नमः (नाभौ) विनियोगाय नमः सर्वाङ्गे।

कर-हृदयादिन्यासः :- ॐ (अंगु० हृदयाय नम०), जूं (तर्जनी० शिरसे०), सः (मध्यमा० शिखायै०) ॐ (अना० कवचाय०), जूं (कनि० नेत्र०), सः (कर० अस्त्राय०)

ध्यानम् :–

उद्यच्चन्द्र समानदीप्तिममृतानन्दैकहेतुं शिवं,
ॐ जूं सः भुवनैकसृष्टिप्रलयोद् भूतैकरक्षाकरम् ।
श्रीमत्तारदशार्णमण्डिततनुं त्र्यक्षं द्विबाहुं परं,
श्रीमृत्युञ्जयमीड्य विक्रमगुणैः पूर्ण हृदयाब्जे भजे ॥

॥ भैरव उवाच ॥

ॐ जूं सः हौं महादेवो मन्त्रेशो मन्त्रनायकः ।
मानी मनोरमाङ्गश्च मनस्वी मानवर्धनः ॥१॥
मायाकर्ता मल्लरूपो मल्लमारान्तको मुनिः ।
महेश्वरो महामान्यो मन्त्री मन्त्रजनप्रियः ॥२॥

मारुतो मरुतां श्रेष्ठो मासिकः पाक्षिकोऽमृतः ।
मातङ्गो मात्तचित्तो मत्तचिन्मत्तभावनः ॥३॥
मानवेष्टप्रदो मेशो मानकीपति वल्लभः ।
मानकायो मधुस्तेयी मारयुक्तो जितेन्द्रियः ॥४॥
जयो विजयदो जेता जयेशो जयवल्लभः ।
डामरेशो विरूपाक्षो विश्वभक्तो विभावसुः ॥५॥
विश्वेशो विश्वतातश्च विश्वसूर्विश्वनायकः ।
विनीतो विनयी वादी वान्तदो वाग्भवो वटुः ॥६॥
स्थूलः सूक्ष्मश्चलो लोलो ललज्जिह्वाकरालकः ।
वीरध्येयो विरागीणो विलासी लास्यलालसः ॥७॥
लोलाक्षो ललधीर्धर्मी धनदो धनदार्चितः ।
धनी ध्येयोऽप्यध्येयश्च धर्मी धर्ममयोदयः ॥८॥
दयावान् देवजनको देवसेव्यो दयापतिः ।
दुर्णिचक्षुर्दरीवासो दम्भी देवदयात्मकः ॥९॥
कुरूपः कीर्तिदः कान्तः क्लीबः क्लीबात्मकः कुजः ।
बुधो विद्यामयः कामी कामकालान्धकान्तकः ॥१०॥
जीवो जीवप्रदः शुक्रः शुद्धः शर्मप्रदोऽनघः ।
शनैश्चरो वेगगतिर्वाचालो राहुरव्ययः ॥११॥
केतु राकापतिः कालः सूर्योऽमितपराक्रमः ।
चन्द्रो भद्रप्रदो भास्वान् भाग्यदो शर्वरूपभृत् ॥१२॥
कूर्तो धूर्तो वियोगी च संगी गङ्गाधरो गजः ।
गजाननप्रियो गीतो ज्ञानी स्नानार्चनः प्रियः ॥१३॥
परमः पीवराङ्गश्च पार्वती बल्लभो महान् ।
परात्मको विराड्वास्यो वानरोऽमितकर्मकृत् ॥१४॥
चिदानन्दी चारुरूपो गारुडो गरुडप्रियः ।
नन्दीश्वरो नयो नागो नागालङ्कारमण्डितः ॥१५॥
नागहारो महानागी गोधरो गोपतिस्तपः ।
त्रिलोचनस्त्रिलोकेश स्त्रिमूर्तिस्त्रिपुरान्तकः ॥१६॥

त्रिधामयो लोकमयो लोकैकव्यसनापहः ।
व्यसनी तोषितः शम्भुस्त्रिधारूपस्त्रिवर्णभाक् ॥१७॥
त्रिज्योतिस्त्रिपुरीनाथस्त्रिधाशान्तिस्त्रिधा गतिः ।
त्रिधा गुणी विश्वकर्ता विश्वभर्ता त्रिपुरुषः ॥१८॥
उमेशो वासुकिर्वीरो वैनतेयो विचारकृत् ।
विवेकाक्षो विशालाक्षो विधिर्विधिरनुत्तमः ॥१९॥
विद्यानिधिः सरोजाक्षो निःस्मरः स्मरशासनः ।
स्मृतिदः स्मृतिमान् स्मार्तो ब्रह्मा ब्रह्मविदां वरः ॥२०॥
ब्राह्मी व्रती ब्रह्मचारी चतुरश्चतुराननः ।
चलाचलोऽचलगतिर्वेगी वीराधिपोऽपरः ॥२१॥
सर्ववासः सर्वगतिः सर्वमान्यः सनातनः ।
सर्वव्यापी सर्वरूपः सागरश्च समेश्वरः ॥२२॥
समनेत्रः समद्युतिः समकायः सरोवरः ।
सरस्वान् सत्यवाक् सत्यः सत्यरूपः सुधीः सुखी ॥२३॥
स्वराट् सत्यः सत्यमती रुद्रो रुद्रवपुर्वसुः ।
वसुमान् वसुधानाथो वसुरूपो वसुप्रदः ॥२४॥
ईशानः सर्वदेवानामीशानः सर्वबोधिनाम् ।
ईशोऽवशेषोऽवयवी शेषशायी श्रियः पतिः ॥२५॥
इन्द्रश्चन्द्रावतंसी च चराचरजगत्पतिः ।
स्थिरः स्थाणुरणुः पीनः पीनवक्षाः परात्परः ॥२६॥
पीनरूपो जटाधारी जटाजूटसमाकुलः ।
पशुरूपः पशुपतिः पशुज्ञानी पयोनिधिः ॥२७॥
वेद्यो वैद्यो वेदमयो विधिज्ञो विधिमान् मृदुः ।
शूली शुभङ्कर शोभ्यः शुभकर्ता शचीपतिः ॥२८॥
शशाङ्कधवलः स्वामी वज्री शङ्खी गदाधरः ।
चतुर्भुजश्चाष्टभुजः सहस्रभुज मण्डित ॥२९॥
स्रुवहस्तो दीर्घकेशो दीर्घो दम्भविवर्जितः ।
देवो महोदधिर्दिव्यो दिव्यकीर्तिर्दिवाकरः ॥३०॥

उग्ररूपश्चोग्रपतिरुग्र - वक्षास्तपोमयः ।
तपस्वी जटिलस्तापी तापहा तापवर्जितः ॥३१॥
हरिद्धयो हयपतिर्हयदो हरिमण्डितः ।
हरिवाही महौजस्को नित्यौ नित्यात्मकोऽनलः ॥३२॥
समानी संसृतिस्त्यागी सङ्गी सन्निधिरव्ययः ।
विद्याधरो विमानी वैमानिक वरप्रदः ॥३३॥
वाचस्पति वमासारी वामाचारी बलन्धरः ।
वाग्भवो वासवो वायुर्वासनाबीजमण्डितः ॥३४॥
वाग्मी कौलश्रुतिर्दक्षो दक्षयज्ञविनाशनः ।
दक्षो दौर्भाग्यहा दैत्यमर्दनो भोगवर्धनः ॥३५॥
भोगी रोगहरो योगी हारी हरिविभूषणः ।
बहुरूपो बहुमतिर्वङ्गवित्ती विचक्षणः ॥३६॥
नृत्तकृच्चित्तसन्तोषी नृत्यगीतविशारदः ।
शरदवर्णविभूषाढ्यो गलदग्धोऽघनाशनः ॥३७॥
लागी नागमयोऽनन्तोऽनन्तरूपः पिनाकभृत् ।
नटलो कारकेशानो वरीयान् वै विवर्णभृत् ॥३८॥
साङ्कारष्टङ्कहस्तश्च पाशीशार्ङ्गः शशिप्रभः ।
सहस्त्ररूपी समगुः साधूनामभयप्रदः ॥३९॥
साधुसेव्यः साधुगतिः सेवाफलप्रदो विभुः ।
स्वमहो मध्यमो मत्तो मन्त्रमूर्तिः सुमन्तकः ॥४०॥
कीलालीलाकरो लूतो भवबन्धैकमोचनः ।
रेचिष्णुर्विच्युतरतोऽमृतनो नूतनो नथः ॥४१॥
न्यग्रोधरूपो भयदो भयहारीतिधारणः ।
धरणीधरसेव्यश्च धराधरसुतापतिः ॥४२॥
धराधरोऽन्धकरिपुर्विज्ञानी मोहवर्जितः ।
स्थाणुः केशो जटी ग्राम्यो ग्रामारामो रमाप्रियः ॥४३॥
प्रियकृत प्रियरूपश्च विप्रयोगी प्रतापनः ।
[illegible] प्रभा[illegible]मो मनमान् मानवेश्वरः ॥४४॥

तीक्ष्णबाहुस्तीक्ष्णकरस्तीक्ष्णांशुस्तीक्ष्णलोचनः ।
तीक्ष्णचित्तस्त्रयीरूपस्त्रयीमूर्तिस्त्रयी तनुः ॥४५॥
हविर्भुग् हविषां ज्योतिर्हालाहलो हलीपतिः ।
हविष्मल्लोचनो हालामयो हरिणरूपभृत् ॥४६॥
भ्रदिमाभ्रमयो वृक्षो हुताशो हुतभुग् गुणी ।
गुणज्ञो गरुडो गानतत्परो विक्रमी गुणी ॥४७॥
क्रमेश्वरः क्रमकरः कृमिकृत् क्लान्तमानसः ।
महातेजा महामारी मोहितो मोहवल्लभः ॥४८॥
मनस्वी त्रिदशो बालो वाल्यापतिरघापहः ।
बाल्यो रिपुहरो हार्यो गविर्गविमतो गुणः ॥४९॥
सगुणो वित्तराट् गेयो विरोचनो विभावसुः ।
मालामयो माधवश्च विकर्तनोऽविकत्थनः ॥५०॥
मानकृन्मुक्तिदोऽमूल्यः साध्यः शत्रुभयङ्करः ।
हिरण्यरेताः शुभगः सतीनाथः सुरापतिः ॥५१॥
मेढ़ो मैनाकभगिनीपतिरुत्तमरूपभृत् ।
आदित्यो दितिजेशानो दितिपुत्रः क्षयङ्करः ॥५२॥
वासुदेवो महाभाग्यो विश्वावसुर्वसुप्रियः ।
समुद्रोऽमिततेजश्च खगेन्द्रो विशिखी शिखी ॥५३॥
गुरुत्मान् वज्रहस्तश्च पौलोमीनाथ ईश्वरः ।
यज्ञिपेयो वाजपेयः शतिक्रतुः शताननः ॥५४॥
प्रतिष्ठस्तीव्रविस्त्रम्भी गम्भीरो भाववर्धनः ।
मायिष्ठो मधुरालापो मधुमत्तश्च माधवः ॥५५॥
मायात्मा भोगिनां त्राता नाकिनामिष्टदायकः ।
नाकेन्द्रो जनको जन्यस्तम्भनो रम्भनाशनः ॥५६॥
ईशान ईश्वर ईशः शर्वरीपति शेखरः ।
लिङ्गाध्यक्षः सुराध्यक्षो वेदाध्यक्षो विचारकः ॥५७॥
भव्योऽनर्घो नरेशानो नरकान्तकरूवितः ।
चतुरो भविता भावी विरामो रात्रिवल्लभः ॥५८॥

मङ्गलो धरणीपुत्रो धन्यो बुद्धि विवर्धनः ।
जयो जीवेश्वरो जारो जाठरो जह्नुतापनः ॥५९॥
जह्नुकन्याधरः कल्पो वामगे मास एव च ।
कर्तुर्ऋभुसुताध्यक्षो विहारो विहगापतिः ॥६०॥
शुक्लाम्बरो नीलकण्ठः शुक्लो भृगुसुतो भगः ।
शान्तः शिवप्रदो भव्यो भेदकृच्छान्तकृत्पतिः ॥६१॥
नाथो दान्तो भिक्षुरूपो धन्यश्रेष्ठो विशाम्पतिः ।
कुमारः क्रोधनः क्रोधी विरोधि विग्रही रसः ॥६२॥
नीरसः सुरसः सिद्धो वृषणी वृषघातनः ।
पञ्चास्यः षणमुखश्चैव विमुखः सुमुखी प्रियः ॥६३॥
दुर्मुखो दुर्जयो दुःखी सुखी सुखविलासदः ।
पात्री पौत्री पवित्रश्च भूतोक्त पूतनान्तकः ॥६४॥
अक्षरं परमं तत्त्वं बलवान् बलघातनः ।
भल्ली मौलिभवाभावो भावाभावविमोचनः ॥६५॥
नारायणो युक्तकेशो दिग्देवो धर्मनायकः ।
कारामोक्षप्रदो जेयो महाङ्ग सामगायनः ॥६६॥
उत्सङ्गमो नामकारी चारी स्मरनिषूदनः ।
कृष्णः कृष्णाम्बरः स्तुत्यस्तारावर्णस्त्रयाकुलः ॥६७॥
त्रियामा दुर्गतित्राता दुर्गमो दुर्गघातकः ।
महानेत्रो महाधाता नानाशस्त्रविचक्षणः ॥६८॥
महामूर्धा महादन्तो महाकर्णो महोरगः ।
महाचक्षुर्महानाशो महाग्रीवो दिगालयः ॥६९॥
दिग्वासा दितिजेशानो मुण्डी मुण्डाक्षसूत्रधृत् ।
स्मशाननिलियो रागी महाकटिरनूतनः ॥७०॥
पुराणपुरुषः पारम्परमात्मा महाकरः ।
महालस्यो महाकेशो महेशो मोहनो विराट् ॥७१॥
महासुखो महाजङ्घो मण्डली कुण्डली नटः ।
असपत्न्यः पत्रकरः पत्रहस्तश्च पाटवः ॥७२॥

लालसः सालसः सालः कल्पवृक्षश्च कल्पितः ।
कल्पहा कल्पनाहारी महाकेतुः कठोरकः ॥७३॥
अनलः पवनः पाठः पीठस्थ पीठरूपकः ।
पाठीनः कुलसी पीनो मेरुधामा महागुणी ॥७४॥
महातूणीरसंयुक्तो देवदानवदर्पहा ।
अथर्वशेषः सौम्यास्य ऋक्सहस्त्रामितेक्षणः ॥७५॥
यजुः साममुखो गुह्यो यजुर्वेदविचक्षणः ।
याज्ञिको यज्ञरूपश्च यज्ञो वै धरणीपतिः ॥७६॥
जङ्गमी भङ्गदी भासा दक्षाभिगमदर्शनः ।
अगम्यः सुगमः खर्व खेटी खेटाननो नयः ॥७७॥
अमोघार्थः सिन्धुपतिः सैन्धवः सानुमध्यगः ।
विकालज्ञः सगणकः पुष्करस्थः परोपकृत् ॥७८॥
उपकर्ताऽपकर्ता च घृणी रणभयप्रदः ।
धर्मा चर्माम्बरश्चारूरूपश्चारु विभूषणः ॥७९॥
नक्तञ्चरः कायवशी वशी वशिवशो वशः ।
वश्या वश्यकरो भस्मशायी भस्मविलेपनः ॥८०॥
भस्माङ्गी मलिनाङ्गश्च मालामण्डितमूर्धजः ।
गणकार्यः कुलाचारः सर्वाचारः सखा समः ॥८१॥
मकरो गोत्रभिद् गोप्ता भीमरूपो भयानकः ।
अरुणश्सचैकवित्तश्च त्रिशङ्कुः शङ्कुधारणः ॥८२॥
आश्रमी ब्राह्मणो वज्री क्षत्रियः कार्यहेतुकः ।
वैश्यः शूद्रः कपोतस्थस्त्वरुष्टोऽथ रुषाकुलः ॥८३॥
रोगी रोगापहा शूरः कपिलः कपिनायकः ।
पिनाकीचाष्टमूर्तिश्च क्षितिमान् धृतिमांस्तथा ॥८४॥
जलमूर्तिर्वायुमूर्तिर्गताशः सोममूर्तिमान् ।
सूर्यदेवो यजमान आकाशः परमेश्वरः ॥८५॥
भवहा भवमूर्तिश्च भूतात्मा भूतभावनः ।
भवः शर्वस्तथा रुद्रः पशुनाथश्च शङ्करः ॥८६॥

गिरिजो गिरिजानाथो गिरिन्द्रश्च महेश्वरः ।
भीम ईशान भीतिज्ञः खण्डपश्चण्डविक्रमः ॥८७॥
खण्डभृत् खण्डपरशुः कृत्तिवासा वृषापहः ।
कङ्काल कलनाकार श्रीकण्ठो नीललोहितः ॥८८॥
गुणीश्वरो गुणी नन्दी धर्मराजौ दुरन्तकः ।
भृङ्गरीटी रसासारी दयालु रूपमण्डितः ॥८९॥
अमृतः कालरुद्रश्च कालाग्निः शशिशेखरः ।
त्रिपुरान्तक ईशानस्त्रिनेत्रः पञ्चवक्त्रकः ॥९०॥
कालहृत् केवलात्मा च ऋग्यजु सामवेदवान् ।
ईशानः सर्वभूतानामीश्वरः सर्वरक्षसाम् ॥९१॥
ब्रह्मणोऽधिपतिर्ब्रह्म ब्रह्मणोऽधिपतिस्था ।
ब्रह्मा शिवः सदानन्दी सदानन्दः सदाशिवः ॥९२॥
मेषस्वरूपश्चार्वङ्गो गायत्रीरूपधारणः ।
अघोरेभ्योऽथ घोरेभ्या घोरघोरतराय च ॥९३॥
सर्वतः सर्वसर्वेभ्यो नमस्ते रुद्र रूपिणे ।
वामदेवस्तथा ज्येष्ठः श्रेष्ठः कालकराकलः ॥९४॥
महाकालो भैरवेशो वेशा कलविकारणः ।
बलविकारणो बालो बलप्रमथनस्तथा ॥९५॥
सर्वभूतादिदमनो देवदेवो मनोन्मनः ।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ॥९६॥
भवे भवेनातिभवे भवस्व मां भवोद्भवः ।
भवनो भावनो भाव्यो बलकारी परःपदम् ॥९७॥
परः शिवः परो ध्येयः परं ज्ञानं परात्परः ।
परावरः पलाशी च मांसाशी वैष्णवोत्तमः ॥९८॥
ॐ ऐं श्रीं हसौं देवः ॐ ह्रीं हैं भैरवोत्तमः ।
ॐ ह्रां नमः शिवायेति मन्त्रो वटुवरायुधः ॥९९॥
ॐ ह्रौं सदाशिवः ॐ ह्रीं आपदुद्धारणो मतः ।
ॐ ह्रीं महाकरालास्य ॐ ह्रीं बटुकभैरवः ॥१००॥

भर्गस्त्रियम्बक ॐ ह्रीं ॐ ह्रीं चन्द्रार्धशेखरः ।
ॐ ह्रीं सं जटिलो धूम्र ॐ ऐं त्रिपुरघातकः ॥१०१॥
ह्रां ह्रीं हं हरिवामाङ्ग ॐ ह्रीं हं ह्रीं त्रिलोचनः ।
ॐ वेदरूपो वेदज्ञ ऋग्यजुः सामरूपवान् ॥१०२॥
रुद्रो घोररवो घोर ॐ क्षं हं ह्रीं अघोरकः ।
ॐ जूं सः पीयूषसक्तोऽमृताध्यक्षोऽमृतालसः ॥१०३॥
ॐ त्र्यम्बकं यजामहे सुगंधिम् पुष्टिवर्धनम् ।
उर्व्वारुकमिव बन्धनान् मृत्योर्मुक्षीय माऽमृतात् ॥१०४॥
ॐ ह्रौं जूं सः ॐ भूर्भुवः स्वः ॐ जूं सः मृत्युञ्जयः ।
पातु मा सर्वदेवेशो मृत्युञ्जय सदाशिवः ॥१०५॥

॥ अथ सदाशिव कवचम् ॥

॥ श्रीदेव्युवाच ॥

भगवन्देवदेवेश सर्वाम्नाय प्रपूजित ।
सर्वं मे कथितं देव कवचं न प्रकाशितम् ॥१॥
प्रासादाख्यस्य मंत्रस्य कवचं मे प्रकाशय ।
सर्वरक्षाकरं देव यदि स्नेहोस्ति मां प्रति ॥२॥

विनियोग:- अस्य श्री प्रासादमंत्र कवचस्य वामदेव ऋषिः। पंक्तिच्छन्दः। सदाशिवो देवता। साधकाभीष्टसिद्धये जपे विनियोगः।

शिरो मे सर्वदा पातु प्रासादाख्यः सदाशिवः ।
षडक्षरस्वरूपो मे वदनं तु महेश्वरः ॥३॥
पञ्चाक्षरात्मा भगवान्भुजौ मे परिरक्षतु ।
मृत्युंजयस्त्रिबीजात्मा आस्यं रक्षतु मे सदा ॥४॥
वटमूलं समासीनो दक्षिणामूर्तिरव्ययः ।
सदा मां सर्वदः पातु षट्त्रिंशार्णस्वरूपधृक् ॥५॥
द्वाविंशार्णात्मको रुद्रो दक्षिणः परिरक्षतु ।
त्रिवर्णात्मा नीलकण्ठः कण्ठं रक्षतु सर्वदा ॥६॥

चिन्तामणि बीजरूपो ह्यर्द्धनारीश्वरो हरः ।
सदा रक्षतु मे गुह्ये सर्वसम्पत्प्रदायकः ॥७॥
एकाक्षर स्वरूपात्मा कूटव्यापी महेश्वरः ।
मार्तण्डभैरवो नित्यं पादौ मे परिरक्षतु ॥८॥
तुम्बुराख्यो महाबीजस्वरूपस्त्रिपुरान्तकः ।
सदा मां रणभूमौ च रक्षतु त्रिदशाधिपः ॥९॥
ऊर्ध्वमूर्द्धानमीशानो मम रक्षतु सर्वदा ।
दक्षिणास्यं तु तत्पुरुषोऽव्यान्मे गिरिनायकः ॥१०॥
अघोराख्यो महादेवः पूर्वास्यं परिरक्षतु ।
वामदेवः पश्चिमास्यं सदा मे परिरक्षतु ॥११॥
उत्तरास्यं सदा पातु सद्योजातस्वरूपधृक् ।
इत्थं रक्षाकरं देवि कवचं देवदुर्लभम् ॥१२॥
प्रातः काले पठेद्यस्तु सोभीष्टं फलमाप्नुयात् ।
पूजाकाले पठेद्यस्तु कवचं साधकोत्तमः ॥१३॥
कीर्तिश्रीकान्तिमेधायुः सहितो भवति ध्रुवम् ।
कण्ठे यो धारयेदेतत्कवचं मत्स्वरूपकम् ॥१४॥
युद्धे च जयमाप्नोति द्यूते वादे च साधकः ।
कवचं धारयेद्यस्तु साधको दक्षिणे भुजे ॥१५॥
देवा मनुष्यगंधर्वा वश्यास्तस्य न संशयः ।
कवचं शिरसा यस्तु धारयेद्यतमानसः ॥१६॥
करस्थास्तस्य देवेशि अणिमाद्यष्टसिद्धयः ।
भूर्जपत्रे त्विमां विद्यां शुक्लपट्टेन वेष्टिताम् ॥१७॥
रजतोदरसंविष्टां कृत्वा वा धारयेत्सुधीः ।
सम्प्राप्य महतीं लक्ष्मीमन्ते मद्देहरूपभाक् ॥१८॥
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ।
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥१९॥
अन्यथा सिद्धिहानिः स्योत्सत्यमेतन्मनोरमे ।
तवस्नेहान्महादेवि कथितं कवचं शुभम् ॥२०॥

न देयं कश्यचिद्भद्रे यदीच्छेदात्मनो हितम् ।
योऽर्चयेद् गंधपुष्पाद्यैः कवचं मन्मुखोदितम् ।
तेनार्चिता महादेवि सर्वे देवा न संशयः ।

(इति भैरवतंत्रे सदाशिव कवचं समाप्तम्)

॥ अथ शतनाम स्तोत्रम् ॥

ॐ शिवो महेश्वरः शम्भुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥१॥
शंकरः शूलपाणिश्च खट्वाङ्गी विष्णुवल्लभः ।
शिपिविष्टोम्बिकानाथः श्रीकण्ठो भक्तवत्सलः ॥२॥
भवः सर्वस्त्रिलोकेशः शितिकण्ठः शिवाप्रियः ।
उग्रः कपाली कामारिरन्धकासुरसूदनः ॥३॥
गंगाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥४॥
कैलासवासी कवची कठोरस्त्रिपुरान्तकः ।
वृषाङ्को वृषभारूढो भस्मोद्धूलितविग्रहः ॥५॥
सामप्रियः स्वरमयस्त्रयीमूर्तिरनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥६॥
हविर्यज्ञमयः सोमः पञ्चवक्त्रः सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥७॥
हिरण्यरेता दुर्द्धर्षो गिरिशो गिरिशोऽनघः ।
भुजङ्गभूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥८॥
कृत्तिवासाः पुरारातिर्भगवान्प्रमथाधिपः ।
मृत्युंजयः सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥९॥
व्योमकेशो महासेनो जनकश्चारुविक्रमः ।
रुद्रो भूतपतिः स्थाणुरहिर्बुध्न्यो दिगम्बरः ॥१०॥
अष्टमूर्तिरनेकात्मा सात्त्विकः शुद्धविग्रहः ।
शाश्वतः खण्डपरशुरजः पाशविमोचकः ॥११॥

मृडः पशुपतिर्द्देवो महादेवोऽव्ययः प्रभुः ।
पूषदन्तभिदव्यग्रो दक्षाध्वर हरो हरः ॥१२॥
भगनेत्रभिदव्यक्तः सहस्त्रक्षः सहस्त्रपात् ।
अपवर्गप्रदोऽनन्तस्तारकः परमेश्वरः ॥१३॥
इमानि दिव्यनामानि जप्यन्ते सर्वदा मया ।
नामकल्पलतेयं मे सर्वाभीष्ट प्रदायिनी ॥१४॥
नामान्येतानि सुभगे शिवदानि न संशयः ।
वेदसर्वस्वभूतानि नामान्येतानि वस्तुतः ॥१५॥
एतानि यानि नामानि तानि सर्वार्थदान्यतः ।
जप्यन्ते सादरं नित्यं मया नियमपूर्वकम् ॥१६॥
वेदेषु शिवनामानि श्रेष्ठान्यघहराणि च ।
सन्त्यनन्तानि सुभगे वेदेषु विविधेष्वपि ॥१७॥
तेभ्यो नामानि संगृह्य कुमाराय महेश्वरः ।
अष्टोत्तर सहस्त्रं तु नाम्नामुपदिशत्पुरा ॥१८॥

॥ इति शिवाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ श्रीशिव मालामन्त्रः॥

ॐ नमो भगवते सदाशिवाय। त्र्यम्बक सदाशिव! नमस्ते नमस्ते् । ॐ ह्रीं ह्रीं लूं अः अं एं ऐं महाघोरेशाय नमः। ह्रीं ॐ ह्रौं शं नमो भगवते सदाशिवाय।

सकल तत्त्वात्मकाय, आनन्द-सन्दोहाय, सर्वमन्त्र स्वरूपाय, सर्वयन्त्राधिष्ठिताय , सर्वतन्त्रप्रेरकाय, सर्वतत्त्वविदूराय, सर्व तत्त्वाधिष्ठिताय, ब्रह्मरुद्रावतारिणे, नीलकण्ठाय, पार्वतीमनोहरप्रियाय, महारुद्राय, सोमसूर्याग्नि लोचनाय, भस्मोद्धूलित-विग्रहाय अष्टगन्धादि गन्धोप शोभिताय शेषाधिप-मुकुटभूषिताय, महामणिमुकुट धारणाय , सर्पालङ्काराय, माणिक्यभूषणाय, सृष्टिस्थितिप्रलय काल रौद्रावताराय, दक्षाध्वर ध्वंसकाय, महाकाल भेदनाय, महाकालाधिकालोग्र रूपाय, मूलाधारैकनिलयाय।

तत्त्वातीताय, गङ्गाधराय, महाप्रपात विषभेदनाय, महाप्रलयान्तनृत्याधिष्ठिताय, सर्वदेवाधिदेवाय, षडाश्रयाय, सकलवेदान्त साराय, त्रिवर्गसाधनायानन्त-कोटि -ब्रह्माण्ड नायकायानन्त वासुकि तक्षक कर्कोटक शङ्ख कुलिक

पद्ममहापद्मेत्यष्ट महानागकुल भूषणाय प्रणवस्वरूपाय। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः।

चिदाकाशायाकाशादि दिक् स्वरूपाय, ग्रहनक्षत्रादि सर्वप्रपञ्च मालिने, सकलाय, कलङ्क रहिताय, सकललोकैक-कर्त्रे, सकल लोकैक-भर्त्रे,सकल लोकैक-संहर्त्रे, सकल लोकैक-गुरवे,सकल लोकैक-साक्षिणे, सकलनिगम गुह्याय, सकलवेदान्त पारगाय, सकल लोकैकवरप्रदाय, सकल-लोकैक सर्वदाय, शर्मदाय, सकललोकैक शङ्कराय।

शशाङ्कशेखराय, शाश्वत निजावासाय, निराभासाय, निराभयाय, निर्मलाय, निर्लोभाय, निर्मदाय, निश्चिन्ताय, निरहङ्काराय, निरंकुशाय, निष्कलङ्काय, निर्गुणाय, निष्कामाय, निरुपलवाय, निरवद्याय, निरन्तराय, निष्कारणाय, निरातङ्काय, निष्प्रयप्रकाय, निःसङ्गाय, निर्द्वन्द्वाय, निराधाराय, नीरागाय, निष्क्रोधाय, निर्मलाय, निष्पापाय, निर्भयाय, निर्विकल्पाय, निर्भेदाय, निष्क्रियाय, निस्तुलाय, निःसंशयाय निरञ्जनाय, निरुपमविभवाय, नित्यशुद्ध बुद्धपरिपूर्ण सच्चिदानन्दाद्वयाय ॐ हसौं ॐ हसौंः ह्रीं सौं क्षमलक्लीं क्षमलइस्फ्रिं ऐं क्लीं सौः क्षां क्षीं क्षूं क्षैं क्षौं क्षः।

परमशान्तस्वरूपाय, सोहं तेजोरूपाय, हंसतेजोमयाय, सच्चिदेकं ब्रह्ममहामन्त्र स्वरूपाय, श्रीं ह्रीं क्लीं नमो भगवते विश्वगुरवे, स्मरण मात्रसन्तुष्टाय, महाज्ञान प्रदाय, सच्चिदानन्दात्मने महायोगिने सर्वकामफलप्रदाय, भवबन्धप्रमोचनाय, क्रों सकलविभूति दाय, क्रीं सर्वविश्वाकर्षणाय।

जय जय रुद्र, महारौद्र, वीरभद्रावतार, महाभैरव, कालभैरव, कल्पान्त भैरव, कपालमालाधर, खट्वाङ्ग खड्ग चर्म पाशांकुश डमरुशूल चाप वाण गदा शक्ति भिन्दिपालतोमर मुसल मुद्गर पाश वज्र परिघ भुशुण्डी शतघ्नी ब्रह्मास्त्र पाशुपतास्त्रादि महास्त्र चक्रायुधाय।

भीषणकर, सहस्त्रमुख दंष्ट्राकराल वदन, विकटाट्टहास, विस्फारित ब्रह्माण्डमण्डल, नागेन्द्रकुण्डल, नागेन्द्रहार, नागेन्द्रवलय, नागेन्द्रचर्मधर, मृत्युञ्जय, त्र्यम्बक, त्रिपुरान्तक, विश्वरूप, विरूपाक्ष, विश्वम्भर, विश्वेश्वर, वृषभवाहन, वृषविभूषण, विश्वतोमुख! सर्वतो मां रक्ष रक्ष, ज्वल ज्वल, प्रज्वल प्रज्वल, स्फुर स्फुर, आवेशय आवेशय, मम हृदये प्रवेशय प्रवेशय, प्रस्फुर प्रस्फुर।

महामृत्युमपमृत्युभयं नाशय नाशय, चोरभयमुत्सादयोत्सादय, विषसर्पभयं

शमय शमय, चौरान् मारय् मारय्, मम शत्रूनुच्चाटयोच्चाटय, मम क्रोधादि सर्व सूक्ष्म तमात् स्थूलतम पर्यन्त स्थितान् शत्रूनुच्चाटयोच्चाटय, त्रिशूलेन विदारय विदारय, कुठारेण भिन्धि भिन्धि, खड्गेन छिन्धि छिन्धि खट्वाङ्गेन विपोथय विपोथय, मुसलेन निष्पेषय निष्पेषय बाणैः सन्ताडय सन्ताडय, रक्षांसि भीषय भीषय, अशेष भूतानि विद्रावय विद्रावय, कूष्माण्ड वेताल मारीच गण ब्रह्मराक्षस गणान् सन्त्रासय सन्त्रासय, सर्वरोगादि महाभयान्ममाभयं कुरु कुरु, वित्रस्तं मामाश्वासयाश्वासय, नरक महाभयान्मामुद्धरोद्धर, सञ्जीवय सञ्जीवय, क्षुत् तृषा ईर्ष्यादि विकारेभ्यो मामाप्याययाप्यायय, दुःखातुरं मामानन्दयानन्दय, शिव कवचेन मामाच्छादयाच्छादय।

मृत्युञ्जय, त्र्यम्बक, सदाशिव! नमस्ते, नमस्ते, शं ह्रीं ॐ ह्रौं।

॥ महाकाल स्तोत्रम् ॥

कैलास शिखरे रम्ये, सुखासीनं जगद्गुरुं ।
प्रणम्य परया भक्त्या, पार्वती परिपृच्छति ॥

॥ श्रीपार्वत्युवाच ॥

त्वत्तः श्रुतं पुरा देव, भैरवस्य महात्मनः ।
नाम्नामष्टोत्तरं शतं, ककरादिमभीष्टदम् ॥
गुह्याद् गुह्यतरं गुह्यं, सर्वाभीष्टार्थ साधकम् ।
तन्मे वदस्व देवेश! यद्यहं तव वल्लभा ।

॥ श्रीशिवोवाच ॥

लक्षवार-सहस्राणि, वारिताऽसि पुनः पुनः ।
स्त्री स्वभावान्महा देवि! पुनस्तत्वं त्वं पृच्छसि ॥
रहस्याति रहस्यं च, गोप्याद् गोप्यं महत्तरम् ।
तत्ते वक्ष्यामि देवेशि! स्नेहात्तव शुचिस्मिते ॥
कूर्चयुग्मं महाकाल, प्रसीदेति पदद्वयम् ।
लज्जायुग्मं वह्निजाया, राजराजेश्वरो महान् ॥

अथ मन्त्रः – हूँ हूँ महाकाल! प्रसीद प्रसीद ह्रीं ह्रीं स्वाहा।

मन्त्रग्रहण मात्रेण, भवेत्सत्यं महाकविः ।

गद्य-पद्य मयी वाणी, गङ्गा निर्झरिणी यथा ॥

विनियोग :- ॐ अस्य श्रीराजराजेश्वर श्रीमहाकाल ककाराद्यष्टोत्तर शतनाम माला मन्त्रस्य श्रीदक्षिणा कालिका ऋषिः, विराट् छन्दः, श्रीमहाकालः देवता, हूँ बीजं, ह्रीं शक्तिः, स्वाहा कीलकं, सर्वार्थ साधने पाठे विनियोगः।

ऋष्यादिन्यास :- शिरसि श्रीदक्षिणा कालिका ऋषये नमः। मुखे विराट् छन्दसे नमः। हृदि श्रीमहाकाल देवतायै नमः। गुह्ये हूँ बीजाय नमः। पादयोः ह्रीं शक्तये नमः। नाभौ स्वाहा कीलकाय नमः। सर्वाङ्गे सर्वार्थ साधने पाठे विनियोगाय नमः।

करन्यास :- ह्रां अंगुष्ठाभ्यां नमः। ह्रीं तर्जनीभ्यां नमः। ह्रूं मध्यमाभ्यां नमः। ह्रैं अनामिकाभ्यां नमः। ह्रौं कनिष्ठिकाभ्यां नमः। ह्रः करतल करपृष्ठाभ्यां नमः।

षडङ्गन्यास :- ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुम्। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।

ध्यानम् :-

कोटि कालानलाभासं, चतुर्भुजं त्रिलोचनं ।
श्मशानाष्टक मध्यस्थं, मुण्डाष्टक विभूषितम् ॥
पञ्चप्रेत स्थितं देवं, त्रिशूलं डमरुं तथा ।
खड्गं च खर्परं चैव, वाम दक्षिण योगतः ॥
विभ्रतं सुन्दरं देहं, श्मशान भस्म भूषितम् ।
नानाशवैः क्रीडमानं, कालिका हृदय स्थितम् ॥
लालयन्तं रतासक्तं, घोरचुम्बन तत्परम् ।
गृध्र गोमायु संयुक्तं, फेरवीगण संयुतम् ॥
जटापटल शोभाढ्यं सर्वशून्यालय स्थितम् ।
सर्वशून्यं मुण्ड भूषं, प्रसन्न वदनं शिवम् ॥

॥ अथ स्तोत्रम् ॥

ॐ कूं कूं कूं कूं शब्दरतः, क्रूं क्रूं क्रूं क्रूं परायणः ।
कविकण्ठ स्थितः कै ह्रीं, हूँ कँ कँ कवि पूर्णदः ॥
कपाल कज्जल समः, कज्जल प्रिय तोषणः ।

कपालमालाऽऽभरणः, कपालकर भूषणः ॥
कपाल पात्र सन्तुष्टः, कपालार्घ्य परायणः ।
कदम्ब पुष्पसम्पूज्यः, कदम्ब पुष्प होमदः ॥
कुलप्रियः कुलधरः, कुलाधारः कुलेश्वरः ।
कौलव्रतधरः कर्म, कामकेलि प्रियः क्रतुः ॥
कलह ह्रीं मन्त्रवर्णः, कलह ह्रीं स्वरूपिणः ।
कङ्काल भैरवो देवः, कङ्काल भैरवेश्वरः ॥
कादम्बरी पानरतः, तथा कादम्बरीकलः ।
कराल भैरवानन्दः, कराल भैरवेश्वरः ॥
करालः कलनाधारः, कपर्दीश वर प्रदः ।
करवीर प्रिय प्राणः, करवीर प्रपूजनः ॥
कलाधरः कालकण्ठः, कूटस्थः कोटराश्रयः ।
करुणः करुणावासः, कौतुकी कालिका पतिः ॥
कठिनः कोमलः कर्णः, कृत्तिवास कलेवरः ।
कलानिधिः कीर्तिनाथः, कामेन हृदयङ्गमः ॥
कृष्णः काशीपतिः कौलः, कुलचूडामणिः कुलः ।
कालांजन समाकारः, कालांजन निवासिनः ॥
कौपीनधारी कैवर्तः, कृतवीर्यः कपिध्वजः ।
कामरूपः कामगतिः, कामयोग परायणः ॥
काम सम्मर्दनरतः, कामगेह निवासिनः ।
कालिका रमणः कालि-नायकः कालिका-प्रियः ॥
कालीशः कालिकाकान्तः, कल्पद्रुम लता मतः ।
कुलटालाप मध्यस्थः, कुलटासङ्ग तोषितः ॥
कुलटाचुम्बनोद्युक्तः, कुलटाकुच मर्दनः ।
केरलाचार निपुणः, केरलेन्द्र ग्रह स्थितः ॥
कस्तूरी तिलकानन्दः, कस्तूरी तिलकप्रियः ।
कस्तूरी होम सन्तुष्टः, कस्तूरी तर्पणोद्यतः ॥
कस्तूरी मार्जनोद्युक्तः, कस्तूरी कुण्डमज्जनः ।

कामिनी पुष्पनिलयः, कामिनी पुष्पभूषणः ॥
कामिनी कुण्ड संलग्नः, कामिनी कुण्ड मध्यगः ।
कामिनी मानसाराध्यः, कामिनी मान तोषितः ॥
काममञ्जीर रणितः, कामदेव प्रियातुरः ।
कर्पूरामोद रुचिरः, कर्पूरामोदधारिणः ॥
कर्पूरमालाऽऽभरणः, कर्पूरार्णव मध्यगः ।
क्रकसः क्रकसाराध्यः, कलाप पुष्परूपिणः ॥
कुशलः कुशलाकर्णी, कुक्कुरासङ्ग तोषितः ।
कुक्कुरालय मध्यस्थः, काश्मीर करवीरभृत् ॥
कूटस्थः क्रूर दृष्टिश्च, केशवासक्त मानसः ।
कुम्भीनस विभूषाढ्यः, कुम्भीनस वधोद्यतः ॥

॥ फलश्रुति ॥

नाम्नामष्टोत्तर शतं, स्तुत्वा महाकाल देवम् ।
ककारादि जगद्वन्द्यं, गोपनीयं प्रयत्नतः ॥
य इदं पठते प्रातः, त्रिसन्ध्यं वा पठेन्नरः ।
वाञ्छितं समवाप्नोति, नात्र कार्या विचारणा ॥
लभते ह्यचलां लक्ष्मीं, देवानामपि दुर्लभाम् ।
पूजाकाले जपान्ते च, पठनीयं विशेषतः ॥
यः पठेत्साधकाधीशः, काली रूपो हि वर्षतः ।
पठेद्वा पाठयेद्वापि शृणोति श्रावयेदपि ॥
वाचकं तोषयेद्वापि, स भवेद् भैरवी तनुः ।
पश्चिमाभि मुखं लिङ्गं, वृषशून्यं शिवालयम् ॥
तत्र स्थित्वा पठेन्नाम्नां, सर्वकामाप्तये शिवे ।
भौमवारे निशीथे च, अष्टम्यां वा निशामुखे ॥
माषभक्त बलिं छागं, कृसरान्नं च पायसं ।
मद्यं मीनं शोणितं च, दुग्धं मुद्रागुडार्द्रकम् ॥
बलिं दत्वा पठेत्तत्र, कुबेरादधिको भवेत् ।
पुरश्चरणमेतस्य, सहस्त्रावृत्तिरुच्यते ॥

महाकालसमो भूत्वा, यः पठे न्निशि निर्भयः ।
सर्वं हस्तगतं भूयान्नात्र कार्या विचारणा ॥
मुक्तकेशो दिशावासः, ताम्बूल पूरितानन: ।
कुजवारे मध्यरात्रौ, होमं कृत्वा श्मशानके ॥
पृथ्वीशाकर्षणं कृत्वा, नात्र कार्या विचारणा ।
ब्रह्माण्ड गोले देवेशि! या काचिज्जगती तले ॥
समस्ता सिद्धयो देवि! वाचकस्य करे स्थिता ।
भस्माभिमन्त्रितं कृत्वा, ग्रहग्रस्ते विलेपयेत् ॥
भस्म संलेपनाद् देवि! सर्वग्रह विनाशनम् ।
वन्ध्या पुत्रप्रदं देवि! नात्र कार्या विचारणा ॥
गोपनीयं गोपनीयं, गोपनीयं प्रयत्नतः ।
स्वयोनिरिव गोप्तव्यं, न देयं यस्य कस्यचित् ॥

विशेषः- यह स्तोत्र केवल अभिषिक्त साधकों के द्वारा पठनीय है। अतः अन्य लोग इससे विरक्त ही रहे, यहीं उत्तम होगा।

॥इति श्रीभैरवागमे श्रीशिव पार्वति सम्वादे श्रीमहाकाल ककाराद्यष्टोत्तर शतनाम स्तोत्रम् ॥

॥ पार्थिवशिव पूजन ॥

मृत्त्री शुद्धमिट्टी को '**ॐ हराय नमः**' से गीली करें। '**ॐ महेश्वराय नमः**' से शिवलिङ्ग का निर्माण करें। '**ॐ शूलपाणये नमः**' से शिवलिङ्ग को पूजा पात्र में रखें और उसके चारों ओर आठ पार्थिव मूर्तियां बनाकर रखें।

वैसे पुत्रकामेष्ठि प्रयोग हेतु सवालाख छोटे-छोटे शिवलिङ्ग बनाकर उनका षोडशोपचार पूजन किया जाता है।

ध्यानम् :–

ध्याये नित्यं महेशं रजतगिरि निभं चारु चन्द्रावतंसम् ।
रत्नाकल्पोज्ज्वलाङ्गं परशु मृगवराऽभीति हस्तं प्रसन्नम् ॥
पद्मासीनं समन्तात् स्तुतिममर गणैर्व्याघ्र कृत्तिं वसानं ।
विश्वाद्यं विश्ववन्द्यं निखिल भय हरं पञ्चवक्त्रं त्रिनेत्रम् ॥

प्राण प्रतिष्ठा :- **ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हौं हंसः शूलपाणे । इह सर्वेन्द्रियाणि वाङ्मनश्चक्षुःश्रोत्रं घ्राण प्राणा यदादीनि सर्वेन्द्रियाणिं सहितं**

इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। ॐ क्षं लं सं हंमः ह्रीं ॐ।

पुष्पाञ्जलि : स्वामिन्! सर्वजगन्नाथ! यावत् पृजाऽवसानकम्। तावत् त्वं प्रीति भावेन, लिङ्गेऽस्मिन् सन्निधौ भव।

मन्त्र :- ॐ शूल पाणये नमः इह प्रतिष्ठो भव भो पिनाकधृक्! तिष्ठ सन्निहितो वरदो भव। अत्राधिष्ठानं कुरु कुरु, मम पूजां गृहाण। यावत् पूजां करोम्यहं, तावदिहाधिष्ठानं कुरु कुरु स्वाहा।

सङ्कल्प के अंत में यह वाक्य जोड़ लें सकल पापक्षय पूर्वकं धर्मार्थ काम मोक्षार्थे पुत्र सुख प्राप्ति हेतवे श्रीशिव लिङ्ग पृजनमहं करिष्ये।

'ॐ पशुपतये नमः आसनार्थे पुष्पं समर्पयामि नमः' मंत्र पढ़कर आसन के लिए एक पुष्प शिवलिङ्ग पर रखें।

तत्पश्चात् षोडशोपचार से पृजन करें। पश्चात् आठों पार्थिवों की एक एक करके जल चन्दन से अधोलिखित मंत्रों से पृजन करें

१. ॐ शर्वाय क्षिति मृर्तये नमः, २. ॐ रुद्राय अग्नि मूर्तये नमः, ३. ॐ भवाय जलमृर्तये नमः, ४. ॐ उग्राय वायुमृर्तये नमः, ५. ॐ भीमाय आकाशमृर्तये नमः, ६. ॐ पशुपतये यजमानमृर्तये नमः, ७. ॐ ईशानाय सूर्यमूर्तये नमः, ८. ॐ महादेवाय सोममृर्तये नमः।

इस प्रकार पूजन करने के बाद १०८ बार 'ॐ नमः शिवाय' का जप करें, और निम्न स्तोत्र से भगवान शिव की स्तुति करें -

ॐ सर्वज्ञान प्रविज्ञान प्रदायैक महात्मने ।
नमस्ते देव देवेश! सर्व भूतहिते रतः ॥

अनन्त कान्ति सम्भोग परमेश! नमोऽस्तुते । अनन्त कान्ति सम्पन्न! अनन्तासन संस्थित । परापर! परातीत! उत्पत्ति स्थितिकारक । सर्वार्थ साधनोपाय! विश्वेश्वर नमोऽस्तुते । सर्वार्थ निर्मलाभोग! सर्वव्याधि विनाशन। योग योगि! महायोगि! योगीश्वर! नमोऽस्तुते ।

॥ फलश्रुति ॥

कृत्वा लिङ्ग प्रतिष्ठां च, ध्यात्वा देवं सदा शिवम् ।
लिङ्ग स्तवं महापुण्यं, यः श्रृणोति सदा नरः ॥
नोत्पद्यते च संसारे, स्थानं प्राप्नोति शाश्वतम् ।
पापकञ्चुक निर्मुक्तः, प्राप्नोति परमं पदम् ॥

''**स्तुति पाठ**'' के बाद निम्न मंत्र से सदाशिव को जल अर्पण करें

ॐ गुह्याति गुह्य गोप्ता त्वं, गृहाणास्मत् कृतं जपम्।
सिद्धिर्भवतु मे देवत्वत् प्रसादान्महेश्वर ॥

अब संहार मुद्रा से विसर्जन करें और निम्न मंत्र पढ़ें **ॐ गच्छ गच्छ महादेव! गच्छ गच्छ पिनाकधृक् ! कैलासादि पीठे गच्छन्तु, यत्र तिष्ठति पार्वति॥**

॥ तुम्बुरू शिव ॥

(शारदा तिलके)

एकाक्षर मंत्र: - **(मंत्रोद्धार) क्षकारोमाग्नि पवन ामकर्णार्द्ध चन्द्रवान।**

क्ष्+म्+र्+यूँ= क्ष्म्र्यूँ

विनियोग - **अस्य मंत्रस्य काश्यप ऋषिः, अनुष्टुप् छंदः, तुम्बुरू शिव देवता, रं बीजं, ॐ शक्तिं सर्वसमृद्धि हेतुवे जपे विनियोगः।**

षड्ङ्गन्यासः - **षड् दीर्धभाजा बीजेन षड़ङ्गानिप्रकल्पयेत्।**

अर्थात बीजं मंत्र के षड् दीर्धो से न्यास करें यथा - **(१) क्ष्म्र्यां (२) क्ष्म्र्यीं (३) क्ष्म्र्यूं (४) क्ष्म्र्यें (५) क्ष्म्र्यौं (६) क्ष्म्र्यः।**

इसके बाद जया, विजया, अजिता एवं अपराजिता देवियों के बीज मंत्रों का उल्लेख है।

क्षकाररहितं बीजं क्रमाज्जभसहान्वितम्। चत्वारि देवीबीजानि देव्योज्ञेया इमाः क्रमात्।

अर्थात् बीज मंत्र में **क्ष** की क्रमशः **ज, भ, स, ह,** से अन्वित करें

भक्त्या सभर्पयेतुभ्यं प्रथमावरणार्चनम् ॥

इस प्रकार प्रत्येक आवरण पूजा में पुष्पांजलि देवे एवं जल छोड़कर कहें **पूजिताः तर्पिताः सन्तु।**

द्वितीयावरणम्- अष्टदल में अष्टकुबेरमूर्ति की पूजा करे- **ॐ यक्षाय नमः। वैश्रवणाय नमः। धनदाय नमः। वित्तेश्वराय नमः। धनाध्यक्षाय नमः। निधिनायकाय नमः। धान्याधिपतये नमः। शिवसखाय नमः।** पुष्पांजलि देवें।

तृतीयावरणम् - अष्टदल के बाहर भूपूर (चार द्वार युक्त परिधि) में पूर्वे- **इन्द्राय नमः।** आग्नेयां- **अग्नये नमः।** दक्षिणे **यमाय नमः।** नैऋत्यां-**नैऋतये नमः।** पश्चिमे **वरुणाय नमः।** वायव्यां- **वायवे नमः।** उत्तरे **सोमाय नमः।** ऐशान्यां-**ईशानाय नमः।** पूर्व ईशान मध्ये - **ब्रह्मणेनमः।** पश्चिम नैऋत मध्ये **अनन्ताय नमः।**

चतुर्थावरणम्- पूर्वादि क्रम से दिक्पालों के आयुधों का पूजन करे - **ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अङ्कुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।**

इस प्रकार यंत्रार्चन कर पुष्पांजलि देवें।

शिवालये जपेन्मंत्रयुत धनवृद्धये॥ बिल्वमूलोपविष्टेन जप्तो लक्षं धनिद्धिदः।

॥ अथ रुद्रचण्डी प्रयोगः॥

यद्यपि यह प्रयोग अनुष्ठान कर्म के देवीखण्ड में देते परन्तु शिव के हृदय में विराजमान इस देवी का प्रयोग रुद्र के साथ देना उचित समझा अतः मंत्र व स्तोत्र दोनो प्रयोग यहाँ पर दिये जा रहे है।

नवाक्षरः- **ॐ ऐं ह्रीं ॐ क्रीं ह्रीं क्लीं ह्रीं ह्रीं।**

विनियोगः- (त्रैलोक्य विजय कवच अन्तर्गत) **अस्य श्री रुद्रचण्डी मंत्रस्य रुद्र ऋषिः, अनुष्टुप् छन्दः, श्री रुद्रचण्डी देवता ह्रीं बीजं चतुर्वर्ग साधने जपे विनियोगः।**

षडंगन्यास - **ह्रां, ह्रीं, ह्रूं , ह्रैं, ह्रौं, ह्रः** इन छः विभागो से अंगन्यास

करन्यास करें।

ध्यानम्–

ॐ रक्तवर्णां महादेवी लसच्चन्द्रविभूषितां ।
पट्टवस्त्रपरीधानां स्वर्णालङ्कारभूषितम् ।
वराभयकरां देवीं मुण्डमालाविभूषितां ।
कोटिचन्द्रसमासीनां वदनैः शोभितां पराम् ॥
करालवदनां देवीं किञ्चिज्जिह्वां च लोलितां
स्वर्णवर्णमहादेव – हृदयोपरि-संस्थिताम् ।
अक्षमालाधरां देवीं जपकर्मसमाहिताम्
वांछितार्थप्रदायिनीं रुद्रचण्ड़ीमहं भजे ॥

॥ रुद्रचण्डीस्तोत्र पाठ ॥ (रुद्रयामलोक्त)

इस स्तोत्र का रुद्र पाठ या सहस्त्रधारा रुद्राभिषेक के समय भी पठन किया जा सकता है, तंत्र में कहा गया है कि पुरुष देवता के साथ स्त्री देवता के तद् दशांश जप तो होने ही चाहिये।

प्रस्तुत स्तोत्र में अन्यत्र पाठ भेदों को समाहित करने से श्लोक संख्या अधिक है तथा कई स्तोत्रो में प्रयोग विधि मध्य में है प्रस्तुत श्लोक में प्रारम्भ में है।

॥ श्रीशंकर उवाच ॥

चण्डिका हृदयं न्यस्य शरणं यः करोत्यपि ।
अनन्तफलमाप्नोति देवी चण्डीप्रसादतः ॥१॥
रविवारे यदा चण्डीं पठेदागमसंमताम् ।
नवावृति फलं तस्य जायत्रे नात्र संशयः ॥२॥
सोमवारे यदाचण्डीं पठेद्यस्तु समाहितः ।
सहस्त्रावृत्तिपाठस्य फलं जानीहि सुव्रते ॥३॥
कुजवारे जगद्धात्रीं पठेदागमसंमताम् ।
शतावृत्तिफलं बुधेलक्षध्रुवम् ॥४॥
गुरौ यदि महामाये लक्षयुग्म फलं ध्रुवम् ।
शुक्रे देवी जगद्धात्रि चण्डीपाठेन शंकरि ॥५॥
ज्ञेयं तुल्यं फलं दुर्गे यदि चण्डी समाहितः ।
शनिवारे जगद्धात्री कोट्यावृत्तिफलं ध्रुवम् ॥६॥

अत एव महेशानि यो वै चण्डीं समभ्यसेत् ।
ससद्यश्च कृतार्थश्च राजराजाधिपो भवेत् ॥७॥
आरोग्यं विजयं सौख्यं वस्त्ररत्न - प्रवालकम् ।
पठनाच्छ्रवणाच्चैव जायते नात्र संशयः ॥८॥
धनं धान्यं प्रवालं च वस्त्रं रत्न विभूषणम् ।
चण्डीश्रवण मात्रेण कुर्यात्सर्वं महेश्वरी ॥९॥

॥ स्तोत्रम् ॥

घोरचण्डी महाचण्डी चण्डमुण्डविखण्डिनी ।
चतुर्वक्त्रा महावीर्या महादेव विभूषिता ॥१०॥
रक्तदंता वरारोहा महिषासुरमर्दिनी ।
तारणी जननी दुर्गा चण्डिका चण्डविक्रमा ॥११॥
गुह्यकाली जगद्धात्री चण्डी च यामलोद्भवा ।
श्मशानवासिनी देवी घोरचण्डी भयानका ॥१२॥
शिवाघोरा रुद्रचण्डी महेशा गणभूषिता ।
जाह्नवी परमा कृष्णा महात्रिपुरसुन्दरी ॥१३॥
श्रीविद्या परमाविद्या चण्डिका वैरिमर्दिनी ।
दुर्गा दुर्गं शिवा घोरा चण्डहस्ता प्रचण्डिका ॥१४॥
माहेशी बगला देवी भैरवी चण्डविक्रमा ।
प्रमथैर्भूषिता कृष्णा चामुण्डा मुण्डमर्दिनी ॥१५॥
रणखण्डा चन्द्रघण्टा रणरामवरप्रदा ।
भारणी भद्रकाली च शिवाघोरभयानका ॥१६॥
विष्णुप्रिया महामाया नन्दगोपगृहोद्भवा ।
मङ्गला जननी चण्डीं महाक्रुद्धभयंकरी ॥१७॥
विमला भैरवी निद्रा जातिरूपा मनोहरा ।
तृष्णा निद्रा क्षुधा माया शक्तिर्मायामनोहरा ॥१८॥
तस्यै देव्यै नमस्तस्यै सर्वरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥
इमां चण्डीं जगद्धात्रीं ब्राह्मणस्तु सदा पठेत् ।
नान्यांस्तु पाठयेद्देवि पठने ब्रह्महा भवेत् ॥२०॥

यः शृणोति धरायां च मुच्यते सर्वपातकैः ।
ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम् ॥२१॥
श्वश्रूगमनपापं च कन्यागमनपातकम् ।
तत्सर्वं पातकं दुर्गे मातृगमन पातकम् ॥२२॥
सुतस्त्रीगमने चैव यद्यत्पापं प्रजायते ।
परदारकृतं पापं तत्क्षणादेव नश्यति ॥२३॥
जन्मजन्मान्तरात्पापाद् गुरुहत्यादिपातकम् ।
मुच्यते मुच्यते देवि गुरुपत्नीसुसंगमात् ॥२४॥
मनसा वचसा पापं यत्पापं ब्रह्महिंसने ।
मिथ्यायाश्चैव यत्पापं तत्पापं नश्यति क्षणात् ॥२५॥
श्रवणं पठनं चैव यः करोति धरातले ।
स धनश्च कृतार्थश्च राजराजाधिपो भवेत् ॥२६॥
यः करिष्यत्यविज्ञाय रुद्रयामल चण्डिकाम् ।
पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत् ॥२७॥
अश्रद्धया च कुर्वन्ति ते च पातकिनो नराः ।
रौरवं नरकं कुण्डं कृमिकुण्डं मलस्य वै ॥२८॥
शुक्रस्य कुण्डं स्त्रीकुण्डं यान्ति ते ह्यचिरेण वै ।
ततः पितृगणैः सार्धं विष्ठाया जायते कृमिः ॥२९॥
शृणु देवि महामाये चण्डीपाठं करोति यः ।
गङ्गायां चैव यत्पुण्यं काश्यां विश्वेश्वराग्रतः ॥३०॥
प्रयोगे मुण्डने चैव हरिद्वारे हरेर्गृहे ।
तस्यपुण्यं भवेद्देवि सत्यं दुर्गे रमे शिवे ॥३१॥
त्रिगयायां त्रिकाश्यां वै यच्च पुण्यं समुत्थितम् ।
तच्च पुण्यं तच्च पुण्यं तच्च पुण्यं न संशयः ॥३२॥

(अन्यश्च)–

भवानी च भवानी च भवानी चोच्यते बुधैः ।
भकारस्तु भकारस्तु भकारः केवलः शिवः ॥३३॥
वाणी चैव जगद्धात्री वरारोहे भकारकः ।
प्रेतवद्देवि विश्वेशि भकारः प्रेतवत्सदा ॥३४॥

आरोग्यं च जयं पुण्यं नातः सुखविवर्धनम् ।
धनं पुत्र जरारोग्यं कुष्ठं गलितनाशनम् ॥३५॥
अर्धांगरोगन्मुच्यते दद्रुरोगाच्च पार्वति ।
सत्यं सत्यं जगद्धात्रि महामाये शिवे शिवे ॥३६॥
चण्डे चण्डि महारावे चण्डिका व्याधिनाशिनी ।
मन्दे दिने महेशानि विशेषफलदायिनी ॥३७॥
सर्वदुःखादिमुच्यते भक्त्या चण्डीं शृणोति यः ।
ब्राह्मणो हितकारी च पठेन्नियतमानसः ॥३८॥
मङ्गलं मङ्गलं ज्ञेयं मङ्गलं जयमङ्गलम् ।
भवेद्धि पुत्रपौत्रैश्च कन्यादासादिभिर्युतः ॥३९॥
तत्त्वज्ञानेन निधनकाले निर्वाणमाप्नुयात् ।
मणिदानोद्भवं पुण्यं तुलाहिरण्यके तथा ॥४०॥
चण्डीश्रवणमात्रेण पठनाद् ब्राह्मणोऽपि च ।
निर्वाणमेति देवेशि महास्वस्त्ययने हितः ॥४१॥
सर्वत्र विजयं याति श्रवणाद् ग्रहदोषतः ।
मुच्यते च जगद्धात्रि राजराजाधिपो भवेत् ॥४२॥
महाचण्डी शिवा घोरा महाभीमा भयानका ।
कांचनी कमला विद्या महारोगविमर्दिनी ॥४३॥
गुह्यचण्डी घोरचण्डी चण्डी त्रलोक्यदुर्लभा ।
देवानां दुर्लभा चण्डी रुद्रयामल संमता ॥४४॥
अप्रकाश्या महादेवी प्रिया रावणमर्दिनी ।
मत्स्यप्रिया मांसरता मत्स्यमांसबलिप्रिया ॥४५॥
मदमत्ता महानित्या भूतप्रमथसंगता ।
महाभागा महारामा धान्यदा धनरत्नदा ॥४६॥
वस्त्रदा मणिराज्यादि-सदाविषयवर्द्धिनी ।
मुक्तिदा सर्वदा चण्डी महाविपदनाशिनी ॥४७॥
इमां हि चण्डीं पठतेमनुष्यः शृणोति भक्ता परमां शिवस्य ।
चण्डीं धरण्यामतिपुण्ययुक्तां स वै न गच्छेत्परमंदिरं किल ॥४८॥

जप्यं मनोरथं दुर्गे तनोति धरणीतले ।
रुद्रचण्डीप्रसादेन किं न सिद्ध्यति भूतले ॥४९॥
रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा ।
रुद्रशक्ति रुद्ररूपा रुद्रमुख समन्विता ॥५०॥
शिवचण्डी महाचण्डी शिवप्रेतगणान्विता ।
भैरवी परमा विद्या महाविद्या च षोडशी ॥५१॥
सुन्दरी परमा पूज्या महात्रिपुर सुन्दरी ।
गुह्यकाली भद्रकाली महाकालविमर्दिनी ॥५२॥
कृष्णा तृष्णा स्वरूपा सा जगन्मोहनकारिणी ।
अतिमंत्रा महालज्जा सर्वमङ्गलदायिनि ॥५३॥
घोरतन्त्री भीमरूपा भीमादेवी मनोहरा ।
मंगला बगला सिद्धिदायिनी सर्वदा शिवा ॥५४॥
स्मृतिरूपा कीर्तिरूपा योगाद्रैरपि सेविता ।
भयानका महादेवी भयदु:खविनाशिनी ॥५५॥
चण्डिका शक्तिहस्ता च कौमारी सर्वकामदा ।
वा ही च वाराहस्य इन्द्राणी शक्रपूजिता ॥५६॥
माहेश्वरी महेशस्य महेशगण भूषिता ।
चामुण्डा नारसिंही च नृसिंहशत्रुमर्दिनी ॥५७॥
सर्वशत्रुप्रशमनी सर्वारोग्य प्रदायिनी ।
इति सत्ये महादेवि सत्यं सत्यं वदाम्यहम् ॥५८॥
नैवशोकं नैवरोगं नैवदु:खं भयं तथा ।
आरोग्यं मङ्गलं नित्यं करोति शुभमंगलम् ॥५९॥
महेशानि वरारोहे ब्रवीमि सत्यमुतमम् ।
अभक्तायन दातव्यं मम प्राणाधिकं शुभम् ॥६०॥
तव भक्ताय शान्ताय शिवविष्णुप्रियाय च ।
दद्यात्कदाचिद्देवेशि सत्यं सत्यं महेश्वरि ॥६१॥
अनंतफलमाप्नोति शिवचण्डी प्रसादत: ।
अश्वमेघ वाजपेय राजसूय-शतानि च ॥६२॥

तुष्टाश्च पितरो देवास्तथा च सर्वदेवताः ।
दुर्गेयं मृन्मयी ज्ञानं रुद्रयामलपुस्तकम् ॥६३॥
मन्त्रमक्षरसंज्ञानं करोत्यपि नराधमः ।
अत एव महेशानि किं वक्ष्ये तव सन्निधौ ॥६४॥
लंबोदराधिकश्च चण्डीपठनाच्छ्रवणात्तु यः ।
तत्त्वमस्यादि वाक्येन मुक्तिं प्राप्नोति दुर्लभाम् ॥६५॥

॥ इति रुद्रयामलोक्त रुद्रचण्डी स्तोत्रम् ॥

॥ अथ श्रीत्रिशिरा देवी विधानम् ॥

विनियोग :- ॐ अस्य श्रीशत्रु विध्वंसिनी स्तोत्र मन्त्रस्य ज्वलत् पावकः ऋषिः , अनुष्टुप् छन्दः, श्रीशत्रुविध्वंसिनी देवता, मम शत्रुं शीघ्रं विध्वंसनार्थे जपे विनियोगः।

ऋष्यादिन्यासः - ज्वलत् पावक ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीशत्रु विध्वंसिनी देवतायै नमः हृदि। श्री शत्रुविध्वंसिनी देवता प्रसादात् मम शत्रुं शीघ्रं विध्वंसनार्थे जपे विनियोगाय नमः सर्वाङ्गे।

करन्यास - ॐ शत्रु विध्वंसिन्यै अंगुष्ठाभ्यां नमः। ॐ रौद्रायै तर्जनीभ्यां स्वाहा। ॐ त्रिशिरसे मध्यमाभ्यां वषट्। ॐ रक्त लोचनायै अनामिकाभ्यां हुम्। ॐ अग्निर्ज्वालायै कनिष्ठिकाभ्यां नमः। ॐ रौद्रमुख्यै करतल करपृष्ठाभ्यां फट्।

हृदयादिन्यास - ॐ घोर दंष्ट्रायै हृदयाय नमः। ॐ त्रिशूलिन्यै शिरसे स्वाहा। ॐ दिगम्बर्यै शिखायै वषट्। ॐ मुक्त केश्यै कवचाय हुम्। ॐ रक्तपाण्यै नेत्रत्रयाय वौषट्। ॐ महोदर्यै अस्त्राय फट्।

फट् से तालत्रय दें (तीन बार ताली बजायें) और 'ॐ रौद्रमुख्यै नमः' से दशों दिशाओं में चुटकी बजाकर दिग् बन्धन करें।

ध्यानम् :-

रक्ताङ्गीं शिववाहनां त्रिशिरसां रौद्री महाभैरवीम्
धूम्राक्षीं भव नाशिनीं घन निभां नीलालंकारकृताम् ।

खड्गं शूलं त्रिशूलं वराभय युतां ध्यात्वा कृताङ्गी महा
सर्वाङ्गी त्रिजटां महानलं निभां, ध्यायेत् पिनाकीं च ताम् ।

॥ स्तोत्रम् ॥

ॐ शत्रु विध्वंसिनी रौद्री त्रिशिरा रक्तलोचना ।
अग्निर्ज्वाला रौद्रमुखी, घोरदंष्ट्रा त्रिशूलिनी ॥
दिगम्बरी मुक्तकेशी, रक्त पाणिर्महोदरी ।
सर्वदा विप्लवे घोरे, शीघ्रं वश्यकरी द्विषाम् ॥

॥ फलश्रुति ॥

इदं स्तवं जपेन्नित्यं, विजयं शत्रुनाशनम् ।
सहस्त्रं त्रिदिनं कुर्यात्, कार्य सिद्धिर्न संशयः ॥
गुग्गुलं चन्दनं सर्पिः, होमयेत् सर्पिषाऽथवा ।
विवादे वाद संग्रामे, विजयं भवति ध्रुवम् ॥

हवन विधि अग्नि संस्कारं कृत्वा गुग्गुलुं, रक्त चंदनं घृताप्लुतं वा केवलं नाम चतुर्थ्यन्त नमः स्वाहा। इति विधानेन हवनं कुर्यात् प्रति नाम्ना।

॥ शत्रुविध्वंसिनी मन्त्र ॥

मन्त्र - **ॐ नमो भगवति चामुण्डे रक्त वाससे अप्रतिहत रूप पराक्रमे! अमुकं वधाय विचेतसे स्वाहा।**

शापोद्धार मन्त्र - "**ॐ श्रीं ह्रीं क्लीं क्रों ऐं लोभाय मोहाय उत्कीलय स्वाहा**"

अग्नि मंत्र - **ॐ ह्रीं श्रीं क्लीं शत्रु भस्मं कुरु कुरु ॐ हूँ फट् स्वाहा।**

विशेष :- रक्षार्थ पाठ करने के बाद १ माला शापोद्धार, १००० **शत्रुविध्वंसिनी मन्त्र का जप** करे। ३ दिन में १००० बार **द्वादश नाम वाले स्तोत्र** का पाठ करें। विधिवत् हवन कुण्ड बनाकर अग्नि डालकर अग्निमन्त्र का १०८ जाप करे।

हवन विधि में उल्लेखित द्रव्यों पीलीसरसों, कटुतैल, निम्बपत्र, गुग्गुल आदि से अग्निमन्त्र पढ़ता हुआ १००० आहुतियाँ दें। इससे **मारण प्रयोग** कदापि नहीं करे। इससे अपना ही सर्वनाश होता है। काम, क्रोध, लोभ, मोह, मद आदि **दुर्वासना का मारण** करना उचित है।

॥ अथ सर्वरोगहरं श्रीमाहेश्वर कवचम् ॥

॥ राजोवाच ॥

अङ्गन्यासो यदुक्तो भो महेशाक्षर संयुतः ।
विधानं कीदृशं तस्य कर्तव्यः केन हेतुना ॥१॥
तद्वदस्व महाभाग विस्तरेण मामग्रतः ।

॥ भृगुरुवाच ॥

कवचं माहेश्वरं राजन्देवैरपि सुदुर्लभम् ।
यः करोति स्वगात्रेषु पूतात्मा स भवेन्नरः ॥२॥
कृत्वा न्यासमिमं यस्तु संग्रामं प्रविशेन्नरः ।
न शरास्तोमरास्तस्य खड्गशक्तिपरश्वधाः ॥३॥
प्रभवंति रिपोः क्वापि भवेच्छिवपराक्रमः ।
व्याधिग्रस्तस्तु यः कश्चित्कारयेच्चैव मार्जनम् ॥४॥
एकादशकुशैः साग्रैर्मुक्तो भवति नान्यथा ।
न भूता न पिशाचाश्च कूष्माण्डा न विनायकाः ॥५॥
शिवस्मरणमात्रेण न विशन्ति कलेवरम् ।

विनियोगः- ॐ नमः पञ्चवक्राय शशिसोमार्कनेत्राय भयार्तानामभयाय मम सर्वगात्ररक्षार्थे विनियोगः ।

॥ कवचम् ॥

ॐ ह्रौं ह्रां ह्रं मन्त्रेणानेन वृषगोमयभस्मनाम् ।
आमन्त्र्य ललाटे तिलकमादाय पठेत् ।
त्राहि मां देव दुष्प्रेक्ष शत्रूणां भयवर्द्धन ।
ॐ स्वच्छंदभैरवः प्राच्यामाग्नेय्यां शिखिलोचनः ॥१॥
भूतेशो दक्षिणे भागे नैर्ऋत्यां भीमदर्शनः ।
वारुण्यां वृषकेतुश्च वायौ रक्षतु शङ्करः ॥२॥
दिग्वासाः सौम्यतो नित्यमैशान्यां मदनान्तकः ।
वामदेवोर्ध्वतो रक्षेदधो रक्षेत्रिलोचनः ॥३॥
पुरारिः पुरतः पातु कपर्द्दी पातु पृष्ठतः ।
विश्वेशो दक्षिणेभागे वामे कालीपतिः सदा ॥४॥

महेश्वरः शिरोभागे भवो भाले सदैव तु ।
भ्रुवोर्मध्ये महातेजास्त्रिनेत्रो नेत्रयोर्द्वयोः ॥५॥
पिनाकी नासिकादेशे कर्णयोर्गिरिजापतिः ।
उग्रः कपोलयो रक्षेन्मुखदेशे महाभुजः ॥६॥
जिह्वायामन्धकध्वंसी दंतान् रक्षतु मृत्युजित् ।
नीलकंण्ठः सदा कण्ठे पृष्ठे कामाङ्गनाशनः ॥७॥
त्रिपुरारिः स्कंधदेशे बाह्वोश्च चन्द्रशेखरः ।
हस्तिचर्मधरो हस्ते नखाङ्गुलिषु शूलभृत् ॥८॥
भवानीशः पातु हृदि पातूदरकटी मृडः ।
गुदे लिङ्गे च मेढ्रे च नाभौ च प्रमथाधिपः ॥९॥
जंघोरुचरणे भीमः सर्वाङ्गे केशवप्रियः ।
रोमकूपे विरूपाक्षः शब्दस्पर्शे च योगवित् ॥१०॥
रक्तमज्जावसामांसशुक्रे वसुगणार्चितः ।
प्राणापानसमानेषूदानव्यानेषु धूर्जटिः ॥११॥
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन यत् ।
तत्सर्वे रक्ष मे देव व्याधि दुर्गज्वरादितः ॥१२॥
कार्य्यं कर्म्म त्विदं प्राज्ञैर्दीपं प्रज्वाल्य सर्पिषा ।
निवेद्य शिखिनेत्राय वारयेत्तु ह्युदङ्मुखम् ॥१३॥
ज्वरदाहपरिक्रांतं तथान्यव्याधिसंयुतम् ।
कुशैः संमार्ज्यसंमार्ज्य क्षिपेद्दीपशिखां ज्वरम् ॥१४॥
ऐकाहिकं द्व्याहिकं वा तृतीयकचतुर्थकम् ।
वातपित्तकफोद्भूतं सन्निपातोग्रतेजसम् ॥१५॥
अन्यं दुःखदुराधर्षकर्म्मजं चाभिचारिकम् ।
धातुस्थं कफसं मिश्रं विषमं कामसम्भवम् ॥१६॥
भूताभिषङ्गसंसर्ग भूतचेष्टादिसंस्थितम् ।
शिवाज्ञां घोरमन्द्रेण पूर्ववृत्तं स्वयं स्मर ॥१७॥
त्यज देहं मनुष्यस्य दीपं गच्छ महाज्वर ।
कृतं तु कवचं दिव्यं सर्वव्याधिभयार्द्दनम् ॥१८॥

न बाधंते व्याधयस्तं बालग्रहभयानि च ।
लूताविस्फोटकं घोरं शिरोर्तिच्छर्दिविग्रहम् ॥१९॥
कामलां क्षयकासं च गुल्माश्मरीभगंदराः ।
शूलोन्मादं च हृद्रोगयकृती पाण्डुविद्रधिम् ॥२०॥
अतिसारादिरोगांश्च डाकिनीपीडकग्रहान् ।
पामाविचर्चिकादद्रुकुष्ठ व्याधिविषार्दनम् ॥२१॥
स्मरणान्नाशयत्याशु कवचं शूलपाणिनः ।
यस्तु स्मरति नित्यं वै यस्तु धारयने नरः ॥२२॥
स मुक्तः सर्व पापेभ्यो वसेच्छिवपु चिरम् ।
संख्याव्रतस्य दानस्य यज्ञस्यास्तीह शास्त्रतः ॥२३॥
न संख्या विद्यते शम्भोः कवचस्मरणाद्यतः ।
तस्मात्सम्यगिदं सर्वैः सर्वकामफलप्रदम् ॥२४॥
श्रोतव्यं सततं भक्त्या कवचं सर्वकामिकम् ।
लिखितं तिष्ठते यस्य गृहे सम्यगनुत्तमम् ॥२५॥
न तत्र कलहोद्वेगो नाकालमरणं भवेत् ।
नाल्पप्रजाः स्त्रियस्तत्र न दौर्भाग्यं समाश्रिताः ॥२६॥
तस्मान्माहेश्वरं नाम कवचं देवगाणार्चितम् ।
श्रोतव्यं पठितव्यं च मंतव्यं भावुकप्रदम् ॥२७॥
श्रीमाहेश्वर कवचं सर्वव्याधिनिषूदनम् ।
यः पठेत्तु नरो नित्यं स व्रजेच्छाङ्करं पुरम् ॥२८॥

॥ इति सर्वव्याधिहरं श्रीमाहेश्वरकवचं सम्पूर्णम् ॥

॥ दत्तात्रेय मन्त्र प्रयोगः ॥

१ एकाक्षरी मन्त्र – द्रां

यह एकाक्षरी उपनिषत् प्रोक्त मोक्षप्रद महामन्त्र है।

विनियोगः– अस्य श्रीदत्तात्रेयस्यैकाक्षरी मंत्रस्य सदाशिव ऋषिः, गायत्रीः छन्दः, श्रीचतुर्भुज-दत्तात्रेयो देवमा मम श्रीदत्तप्रसाद सिद्धये विनियोगः।

[illegible] द्रां, द्रीं, द्रूं, द्रैं, द्रौं, द्रः से करन्यास तथा अंगन्यास करें।

ध्यानम्–

सदानन्दात्मकं शुद्धं सात्त्विकं तारकं परम् ।
विश्वरूपं जगद्योनिं दत्तात्रेयं भजाम्यहम् ॥

२. षडक्षर मंत्र:– ॐ श्रीं ह्रीं क्रों ग्लौं द्रां।

यह मंत्र "औपनिषद् मंत्र" कहलाता है। यह योग और सम्पत्ति की समृद्धि देने वाला है। इसके ऋष्यादि पूर्ववत् है। ४ अंगन्यास एक एक बीज से करन्यास एवं अंगन्यास करें।

ध्यानम्–

दत्तात्रेयं शिवं शान्तमिन्द्र नीलनिभं विभुम् ।
आत्ममायारतं देवमवधूतं दिगम्बरम् ॥
भस्मोद्धूलित सर्वाङ्गं जटाजूटधरं विभुम् ।
चतुर्बाहुमुदारांगं प्रफुल्ल कमलेक्षणम् ।
ज्ञानयोगनिधिं विश्वगुरुं योगिजनप्रियम् ॥
भक्तानुकम्पिनं देवं दत्तात्रेयमहं भजे ।

३ अष्टाक्षर मंत्र– द्रां दत्तात्रेयाय नमः।

इस मंत्र के ऋषि एवं छन्द पूर्ववत् है। न्यास द्रां बीज से पूर्व बताये गये अनुसार करें।

४ द्वादशाक्षरी मंत्र – आं ह्रीं क्रों द्रां एहि दत्तात्रेय स्वाहा।

यह सभी कामनाओं का पूरक तथा अमृत्व प्रदान करने वाला है।

विनियोग:– अस्य श्रीदत्तात्रेय द्वादशाक्षरी मंत्रस्य सदाशिव ऋषिः, गायत्री छन्दः, श्रीदत्तात्रेयो देवता, ॐ बीजं, स्वाहा शक्तिः, श्रीदत्तात्रेय कीलकं, मम श्रीदत्तप्रसाद सिद्धये जपे विनियोगः।

करन्यास:– आं ह्रीं अंगुष्ठाभ्यां नमः। क्रों द्रां तर्जनीभ्यां नमः। एहि मध्यमाभ्यां नमः। दत्त अनामिकाभ्यां नमः। आत्रेय कनिष्ठिकाभ्यां नमः। स्वाहा करतलकरपृष्ठाभ्यां नमः।

अङ्गन्यास– उपर्युक्त मंत्र के दो-दो अक्षरो वाले छह खण्डों से ही [illegible] में ('हृदय से अस्त्राय फट्' तक) न्यास करें। ध्यान पूर्ववत् ही है

[illegible] ाक्षरी मंत्र– ॐ ऐं क्रों क्लीं क्लूं ह्रां ह्रीं हूं सौः दत्तात्रेया[illegible]

विनियोग:- **अस्य श्रीदत्त-षोडशाक्षरी मंत्रस्य सदाशिव ऋषिः, गायत्री छन्दः, श्रीदत्तात्रेयो देवता, ॐ बीजं, स्वाहा शक्तिः, दत्तात्रेयाय कीलकं, चतुर्विधपुरुषार्थ-प्राप्तये जपे विनियोगः**

ऋष्यादि न्यासः- **सदाशिव ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीदत्तात्रेय देवतायै नमः हृदये। ॐ बीजाय नमः गुह्ये। स्वाहा शक्तये नमः पादयोः। दत्तात्रेयाय कीलकाय नमः नाभौ। चतुर्विधपुरुषार्थ प्राप्तये विनियोगाय नमः सर्वाङ्गे।**

अङ्गन्यास	करन्यास	षडङ्गन्यास
ॐ ऐं	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
क्रों	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
क्लां क्लीं क्लूं	मध्यमाभ्यां नमः।	शिखायै वषट्।
सौः	अनामिकाभ्यां नमः।	कवचाय हुम्।
दत्तात्रेयाय	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
स्वाहा	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्।

॥ द्वात्रिंशदक्षर मंत्र ॥

माया, कमण्डलु, वाद्य, त्रिशूल, शंख, और चक्र को छहों भुजाओं में धारण किये हुए, महर्षि अत्रि को वर देने वाले श्रीदत्तात्रेय का मैं भजन करता हूँ। ऐसा ध्यान करके फिर मंत्रजप करें।

मंत्र इस प्रकार है-

दत्तात्रेय हरे कृष्ण उन्मत्तानन्ददायक ।
दिगम्बर मुने बाल पिशाच ज्ञानसागर ॥

विनियोग:- **अस्य श्रीदत्तात्रेयानुष्टुप् मंत्रस्य शिव ऋषिः, अनुष्टुप छन्दः, षडभुजः श्रीदत्तात्रेयो देवताततप्रीत्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः- **शिव ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। षडभुज श्रीदत्तात्रेय देवतायै नमः हृदये। विनियोगाय नमः सर्वाङ्गे।**

हृदयादिन्यासः दत्तात्रेय (हृदये)। हरे कृष्ण (शिरसि)। उन्मत्त (शिखायाम्)। आनन्ददायक दिगम्बर (कण्ठे)। मुने (भुजयोः)। बाल (नेत्रयोः) पिशाच ज्ञानसागर (अस्त्राय फट्)।

करन्यासः- दत्तात्रेय (अंगुष्ठाभ्यां नमः)। हरे कृष्ण (तर्जनीभ्यां नमः)। उन्मत्त (मध्यमाभ्यां नमः)। आनन्ददायक दिगम्बर (अनामिकाभ्यां नमः)। मुने (कनिष्ठिकाभ्यां नमः)। बाल (करतलाय नमः) पिशाच ज्ञानसागर (करपृष्ठाभ्यां नमः)।

॥ ऋणनाशक दत्तात्रेय मंत्र ॥

विनियोगः - अस्य श्रीऋणनाशक दत्तमंत्रस्य सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीदत्तो देवता मम ऋणनाशनार्थे श्रीदत्तमंत्र जपे विनियोगः।

ऋष्यादिन्यासः सदाशिव ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीदत्तदेवतायै नमः हृदये। मम ऋणनाशनार्थे श्रीदत्तमंत्र जपे विनियोगाय नमः सर्वाङ्गे।

अङ्गन्यास	करन्यास	षडङ्गन्यास
ॐ	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
द्रां	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ह्रां	मध्यमाभ्यां नमः।	शिखायै वषट्।
क्लीं	अनामिकाभ्यां नमः।	कवचाय हुम्।
दत्तात्रेयाय	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
स्वाहा	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्।

ध्यानम्—

रविमण्डलमध्यस्थं रक्तं रक्ताब्जसंस्थितम् ।
योगारूढं ज्ञानधनं दत्तात्रेयं नमाम्यहम् ॥

मूल मंत्र-

ॐ अत्रेरात्मप्रदानेन यो मुक्तो भगवान् ऋणात् ।
दत्तात्रेयं तमीशानं नमामि ऋणमुक्तये ॥

इस मंत्र के पाँच लाख जप करने से ऋण से मुक्ति मिलती है।

॥ अन्य सिद्ध मंत्र ॥

श्रीदत्तात्रेय भगवान् की स्वयं ब्रह्माजी ने तथा अन्य महर्षियों ने भी समय-समय पर अपनी इष्टसिद्धियों के लियें भिन्न-भिन्न मंत्रो से उपासनाऐं की है। अतः उनके द्वारा किये गये मंत्र भी अनेक प्रकार के तंत्रग्रंथो में प्राप्त होते है।

विनियोगः- अस्य श्रीदत्तात्रेयमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः,

श्रीदत्तात्रेयो देवता, आं बीजं, ह्रीं शक्तिः, क्रौं कीलकम्, मम श्रीदत्तात्रेय प्रसाद सिद्धये (अमुक कामना सिद्धये) जपे विनियोगः।

ऋष्यादिन्यासः- ब्रह्मणे ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीदत्तात्रेय देवतायै नमः हृदये। आं बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः। क्रौं कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

कर-षडंगन्यासः- क्रमशः आं, ह्रीं, क्रौं, आं, ह्रीं, क्रौं इन छह बीजो से करन्यास तथा हृदयादिन्यास पूर्वोक्त विधि से करें। ध्यान ऊपर लिखें अनुसार करें। मंत्र इस प्रकार है-

१ ॐ आं ह्रीं क्रौं एहि दत्तात्रेय स्वाहा।
२ ॐ दत्तात्रेयाय नमः
३ श्रीं ह्रीं क्लीं दत्तात्रेयाय स्वाहा।
४ द्रां दत्तात्रेयाय नमः।
५ द्रां ॐ दत्तात्रेयाय नमः।
६ द्रां (एकाक्षरी मंत्र) आदि।

इसके पश्चात् मानसिक पंचोपचार-पूजा करके ध्यान करें-

माया-कमण्डलु वाद्य-त्रिशूले शंखचक्रके ।
दधानमत्रिवरदं दत्तात्रेयं भजाम्यहम् ॥

✿विशेष -दत्तात्रेय का अन्य स्तोत्र मिश्रतन्त्र के अर्न्तगत दिया गया है। ✿

॥ दत्तात्रेय माला मंत्र ॥

अत्यन्त प्रभावशाली तथा समस्त कामनाओं को पूर्ण करने वाला यह मालामंत्र श्रीविष्णु के द्वारा ब्रह्माजी को बताया गया था। इसके जप से चित्तशुद्धि, समदृष्टि, दोषों से मुक्ति एवं सभी प्रकार से उपकार करने की शक्ति प्राप्त होती है।

मालामंत्र - ॐ नमो भगवते दत्तात्रेयाय स्मरणमात्रसंतुष्टाय महाभयनिवारणाय महाज्ञानप्रदाय चिदानन्दात्मने बालोन्मत्त-पिशाचवेषाय महायोगिने अवधूताय अनुसूयानन्द-वर्धनायात्रिपुत्राय। ॐ भवबन्धविमोचनाय ह्रीं सर्वविभूतिदाय क्रों असाध्याकर्षणाय ऐं वाक्-प्रदाय क्लीं जगत्त्रय वशीकरणाय सौः सर्वमनःक्षोभणाय श्रीं महासम्पत्प्रदाय ग्लौं भूमण्डला-

धिपत्यप्रदाय द्रां चिरजीवने वषट् वशीकुरु वशीकुरु वौषट् आकर्षय-आकर्षय हुं विद्वेषय विद्वेषय फट् उच्चाटय उच्चाटय ठः ठः स्तम्भय स्तम्भय खें खें मारय मारय नमः सम्पन्नय सम्पन्नय स्वाहा पोषय पोषय परमंत्र-परयंत्र-परतंत्राणि छिन्धि-छिन्धि ग्रहान् निवारय निवारय व्याधीन् विनाशय विनाशय दुःखं हर हर दारिद्रयं विद्राव्य विद्राव्य देहं पोषय पोषय चित्तं तोषय तोषय सर्वमंत्रस्वरूपाय सर्वतंत्रस्वरूपाय सर्वपल्लवस्वरूपाय ॐ नमो महासिद्धाय स्वाहा।

॥ श्रीदत्त गायत्री मंत्र ॥

विनियोगः- ॐ अस्य श्रीदत्तात्रेयमंत्रस्य शबर ऋषिः, गायत्री छन्दः, श्रीदत्तात्रेयो देवता, द्रां बीजं, ह्रीं शक्तिः, क्रौं कीलकं, श्रीदत्तात्रेय प्रीत्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः- शबर ऋषये नमः शिरसि। गायत्री छन्दसे नमः मुखे। श्रीदत्तात्रेय देवतायै नमः हृदये। द्रां बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः। क्रों कीलकाय नमः नाभौ। श्रीदत्तात्रेय प्रीत्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।

अङ्गन्यास	करन्यास	षडङ्गन्यास
द्रां	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
द्रीं	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
द्रूं	मध्यमाभ्यां नमः।	शिखायै वषट्।
द्रैं	अनामिकाभ्यां नमः।	कवचाय हुम्।
द्रौं	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
द्रः	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्।

ध्यानम्–

रविमण्डलमध्यस्थं रक्तं रक्ताब्जसंस्थितम्।
योगारूढं ज्ञानधनं दत्तात्रेयमहं भजे ॥

दत्तगायत्री मंत्र- ॐ द्रां ह्रीं क्रों दत्तात्रेयाय विद्महे योगीश्वीराय धीमहि। तन्नो दत्तः प्रचोदयात्।

॥ इति शिवतन्त्रम् सम्पूर्णम् ॥

॥ श्री शरभ शालुव पक्षिराज ॥

राजस्थान की एक प्रसिद्ध रियासत का भित्ति चित्र

॥ शरभ तन्त्रम् (रुद्रावतार)॥

(शरभ–शालुव–पक्षिराज–आकाशभैरव इत्यादि प्रख्यात नामानि)

(शत्रुसंहार विशेष प्रयोग)

शिव पुराण में शरभ की उत्पत्ति नृसिंह अवतार के समय बताया है। विष्णुपुराण में विष्णु की महिमा बताते हुये कहा गया है कि भक्त प्रह्लाद की स्तुति से नृसिंह का क्रोध शान्त हुआ। शिव पुराण में शिव की महिमा बताते हुये कथा है कि समस्त देवताओं ने शिव से प्रार्थना की तो शिवजी ने विशेष विचित्र पक्षी का रूप धारण किया जिसका मुँह उल्लू की तरह नेत्र में अग्नि सूर्य चन्द्र का वास था। धड़ मनुष्य की तरह जो चार हाथों में विशेष आयुध धारण किये हुये है, नख वज्र के समान तीखें है, दो पंख जिनमें काली व दुर्गा का निवास है, हृदय में जठरानल व पेट में बड़वानल अग्नि विराजमान है। कटिप्रदेश से बाद का भाग हिरण की तरह एवं पूंछ सिंह के समान लंबी है उरु में व्याधि एवं मृत्यु को धारण किये हुये है ऐसे शरभरूप पक्षिराज ने नृसिंह को चोंचमार मूर्छित कर दिया। अपनी पूंछ से दोनों पैर बाँध दिये, अपने दोनो पिछले पैर नृसिंह के पैरो पर रखें अग्रपादों को नृसिंह के वक्षस्थल पर तथा अपने हाथों से नृसिंह के हाथों को पकड़कर आकाश में उड़े पश्चात् नृसिंह ने शिवजी की स्तुति की एवं अपने स्वरूप का विसर्जन किया तो शिव ने उनकी चर्म को प्रिय मानकर बाघाम्बर धारण किया। ऐसी तन्त्र ग्रन्थों में कथा है।

अत: पक्षिराज शरभ का प्रयोग नृसिंह प्रयोग से भी घातक है। इसलिये इसके प्रयोग का अधिकारी उच्च साधक ही हो सकता है। यदि कार्यवश इस शत्रुसंहारक प्रयोग को करना पड़े तो उसे आत्मरक्षा कवच एवं मृत्युञ्जय प्रयोग का विधिवत साधन करने के बाद ही इसके जप करने चाहिये। अन्यथा प्रयोग कर्ता को हानि या असफलता हाथ लगेगी।

उच्चकोटि के साधक साधना के विघ्नो को शमन करने हेतु इसका प्रयोग करते हैं काम-क्रोधादि षट् रिपुओं का स्तम्भन करने व साधना के क्रम को आगे बढ़ाने में यह प्रयोग सहायक है।

'आकाश भैरव कल्प' में शरभराज या शालुव पक्षिराज नाम से कई विशेष प्रयोग दिये है।

पक्षिराज प्रयोग में वैष्णव उपासना में गरुड़ के प्रयोग दिये गये है जिन्हें भी मारण, मोहन, उच्चाटनादि षट्कर्मों के काम में लिया जाता है। इसलिये शरभपक्षिराज व गरुड़ प्रयोगों को गारुड़ी विद्या कहा गया है एवं इन्हें गुप्त रखने हेतु कहा गया है कि-

'गारुड़ी विद्या पिता पुत्रं न देय'

शरभ प्रयोग विषय में किवदंति है कि अकबर के समय में तत्कालीन राजस्थान की एक प्रसिद्ध रियासत के नरेश, जो अकबर के सेनापति भी थे। वे किसी भ्रांति के कारण आशंकित व भयक्रांत हो गये थे कि कहीं अकबर हम पर आक्रमण नहीं कर देवें। अत: भय व शत्रुनाश हेतु मारवाड़ से श्यामजी पाण्डे (संभव है माघजी पण्डित भी उन्हीं का नाम हो) के संरक्षण में शरभराज का प्रयोग किया गया।

श्यामजी पाण्डे अच्छे साधक थे उनको षोढ़ान्यास सिद्ध थे। (षोढ़ान्यास सिद्ध व्यक्ति किसी को नमस्कार नहीं कर सकता, ऐसा करने पर सामने वाला नष्ट हो जाता है उसके द्वारा मूर्ति को नमस्कार करने से मूर्ति खण्डित हो जाती है।) श्यामजी पाण्डे ने जप समाप्ती के पश्चात् हवन कर्म में जब शत्रु के पुतले की आहुति दी तो वह पुतला बाहर आ गया, ऐसा सात बार हुआ तब पण्डितजी ने ध्यान योग से कहा कि अभी ऐसा ईश्वरीय विधान है कि शत्रु की सात पीढ़ीयां राज्य करेगी, अगर तुम अपनी सात पीढ़ीयों के सुख का दान करते हो तो शत्रु की सात पीढ़ी सुख पूर्वक राज्य नहीं करेगी कोई आजीवन ताज का बादशाह नहीं होकर नहीं मरेगा तब सङ्कल्प करने पर प्रयोग सफल हुआ।

किवदंती के कथानक की सत्यता का ज्ञान तो ईश्वर को ही है, किन्तु उस समय का बनाया हुआ शरभ स्वर्णभित्तिचित्र आज भी जनानीड्योडी में मौजूद तथा तत्कालीन नरेश के बाद सातपीढ़ी सन्तान, सब 'गोद' ही आई तथा बाद मे वंशानुगत हुई। अकबर की पीढ़ीयां गृहयुद्ध व शत्रुयद्ध में उलझी रही ५ वीं पीढ़ी बाद नाममात्र के शासक रह गये।

मैनें स्वयं भी इसके प्रयोग साधना हेतु व अन्य कामना प्रयोग हेतु किये, सफल भी रहे।

नये साधक को प्रारंभकाल में गुस्सा, आवेश अधिक आता है, आँखें रक्तवर्ण की रहने लगती है, परन्तु बाद में अच्छा ध्यान लगने लग जाता है, चित्त में शान्ति व स्फुर्ति बनती है। उच्चकेन्द्रों में ध्यान लगकर उन्नति होती है, आर्थिक विकास साधारण रह सकता है।

इसके साथ कवच मन्त्रों का पाठ करना उचित होगा।

शरभ को अन्य नाम आकाश भैरव से भी जाना जाता है। यहां पक्षिराज मन्त्र प्रयोग के साथ कुछ अन्य स्तोत्र भी दिये जा रहे है। साधक सात्विक प्रयोग हेतु व साधना की उन्नति हेतु ही श्रेष्ठ गुरु के मार्गदर्शन में प्रयोग करें।

इसकी महिमा के लिये लिखा है कि -

संग्रामे शत्रवो दृष्ट्वा पलायन्ते च तत्क्षणात् ।
स्वर्गभूतल पाताल वासिनोऽमर्त्य मर्त्यकाः ॥
शालुवस्मरणादेव मरणं यात्यहेतुकम् ।
शालुवस्य प्रयोगेन त्रिमूर्तिर्नैव रक्षति ॥

अर्थात् शालुव पक्षिराज शरभ का प्रयोग किसी पर किया जाय तो स्वर्ग पाताल भूतल पर त्रिदेव ब्रह्मा विष्णु शिव भी रक्षा नहीं कर सकते हैं।

इसके प्रयोग के साथ रुद्रसूक्त का पाठ करने का भी उल्लेख है।

श्रीरुद्रसूतं प्रजेपत्रिवारं तथाखिलेशः परितुष्टहृत्स्यात् ॥
चमकोक्ताखिलं भाग्यं ददस्वाकाशभैरव ।
संतुष्ट हृदयस्तस्मै ददात्यैव न संशयः ।
तेन श्रीरुद्रसूक्तेन शिवालिङ्गाभिषेचनम् ।
कृत्वैकादशधा मन्त्री पूजयेत्सर्व सिद्धये ॥

अर्थात् साधक रुद्रसूक्त का ३ पाठ करे। चकमाध्याय के एकादश पाठ से रुद्राभिषेक करे तो शरभराज प्रसन्न होवे।

लेखक का अनुभव है कि सरसों के तैल से रुद्रसूक्त या पक्षिराज के स्तोत्र से अभिषेक किया जाय तो कठिन रोग तथा अभिचार पीड़ा दूर होती है।

सरसों के तैल से अभिषेक के बाद शान्ति हेतु पुनः दूग्ध, दही व सुगन्धित द्रव्य से भी अभिषेक करना चाहियें।

रुद्रसूक्त के अलावा अन्य सूक्तों का भी पठन करें -

श्रीसूक्तं घृतसूक्तं च भूसूक्तं पुरुषसूक्तम् ।
ब्रह्मसूक्तं विष्णुसूक्तं पञ्चरौद्रमत परम् ॥

पञ्चरौद्र का अर्थ ईशान, तत्पुरुष, सद्योजात, वामदेव अघोरादि देवों से है।

॥ अथ शरभ मन्त्रप्रयोगाः॥

विशेष मन्त्र प्रयोग आकाश भैरव कल्प, शरभार्चापरिजात, आशुगरुड़ इत्यादि तन्त्र ग्रन्थों में दिये गये है।

शरभप्रयोग हेतु कृष्णपक्ष की अष्टमी से कृष्णपक्ष की चतुर्दशी तक के लिये भी विशेष लिखा है। चतुर्दशी को यदि मंगलवार होवे तो विशेष ग्राह्य है।

अन्यत्र लिखा है '**भानुवारं समारम्भ मंगलान्तं जपेत् सुधी**' इसके दो अर्थ है प्रथम यह कि रविवार से प्रयोग प्रारंभ कर मंगलवार को समापन करे, दूसरा अर्थ है कि शुभवार (भानुवार) सिद्धियोग से प्रयोग प्रारंभ करे एवं मंगलकार्य सिद्धि (मंगलान्त) होने पर समापन करे।

एकाक्षरी मंत्र – '**खं**'। खं का अर्थ आकाश में विचरण करने से होता है। **खं** का अन्य अर्थ ग्रास करने से भी है तथा '**ख**' कारबीज मन्त्र भी है।

षडक्षर मन्त्र – **ॐ श्रीं आं क्रौं हुं अँ।**

विनियोगः – अस्य मन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः पक्षिरूपी शालुवो देवता, ॐ बीजं, हुं शक्तिः, क्रौं कीलकं, सर्वार्थ सिद्धये जपे विनियोग।

ध्यानम् –

उग्राकारोग्रदृष्टि प्रकटितभयदं दंभोलिघोषं
ज्वालामालापटाग्रे ज्वलदनल समं हारकेयूरभूषम् ।
हालाहल कलङ्करन्ध्रसहितं हंसात्मकं केशरम्
वंदेऽहं हरि पार्वती पति विरञ्चयात्मं चिरं शालुवम् ॥

इसका छः लक्ष का पुरश्चरण है, तिलादि से होम करें।

अष्टाक्षरी मन्त्रः – ॐ आं क्ष्रौं ह्रीं हुं हुं हुं फट्।

विनियोग – अस्य मन्त्रस्य ब्रह्माऋषिः, अनुष्टुप् छन्दः, पक्षिरूपी शालुव सदाशिवो देवता, हुं बीजं, ह्रीं शक्तिः, हुं कीलकं सर्वार्थसिद्धये जपे विनियोगः।

ध्यानम् :–

चन्द्रार्कयुत कोटिकान्तिसहितं चण्डीश संसेवितम् ।
खण्डेन्दूज्वल शारदापति-सदासंसेव्यमानम् ।
मुदाहृत्पद्मान्तर कर्णिकान्तरचरद्धासं भीषणम्,
संसेवे सकलार्थदं मुनिपतिं श्रीशालुवं सिद्धिदम् ॥

शरभमूलमन्त्र – शरभराज के प्रचलित में ३९, ४१, ४२ अक्षर के मन्त्र है वे इस प्रकार है–

एकोन चत्वारिंशाक्षर मन्त्र (३९ अक्षर) – (आकाश भैरव कल्पे) – **ॐ खें खें खें खं घ्रसौः घ्रसि हुं शरभ सर्वशत्रुसंहार कारिणे शरभ शालुवाय पक्षिराजाय हुं फट् स्वाहा।**

विनियोगः – **ॐ अस्य मन्त्रस्य वामदेवो ऋषिः, जगतीछन्दः, श्रीशरभेश्वर देवता, खं बीजं, स्वाहा शक्ति, फट् कीलकं सर्वार्थ सिद्धये जपे विनियोगः।**

षडङ्गन्यास – **ॐ खें खें खें हृदयाय नमः। खं घ्रासौः घ्रसि शिरसे स्वाहा। हुं शरभ सर्वसंहारकारिणे शिखायै वषट्। शरभ शालुवाय कवचाय हुं। पक्षिराजाय नेत्रत्रयाय वौषट्। हुं फट् स्वाहा अस्त्राय फट्।**

ध्यानम् –

अष्टांघ्रिश्च सहस्त्रबाहुरनल प्रख्यः शिरोयुग्मभृत्
विः त्र्यक्षोऽति जवो द्विपुच्छ उदितः साक्षान्नृसिंहापहा ।
अर्द्धेनापि मृगाकृतिः पुनरथाप्यर्द्धेन पक्ष्याकृतिः
श्री वीरः शरभः स पातु सुचिरं नीत्वा सदा मां हृदि ॥

(४१-४२ अक्षरात्मक मंत्र हेतु भी ध्यान कर सकते हैं।)

एकचत्वारिंशदक्षर मन्त्रः – (मन्त्रकोपे) – **ॐ खं खां खं फट् शत्रून् ग्रससि ग्रससि हुं फट् सर्वास्त्र संहारणाय शरभाय शान्ताय पक्षिराजाय हुं फट् स्वाहा नमः।**

वैसे यह मन्त्र उग्र है परन्तु तन्त्रों में कहा गया है कि जिस मन्त्र के अन्त में नमः युक्तपल्ल्व हो वह शान्त मन्त्र कहा जाता है।

विनियोगः – **ॐ अस्य मन्त्रस्य श्रीवासुदेव ऋषिः, जगतीछन्दः, कालाग्निरुद्र शरभ देवता, खं बीजं, स्वाहा शक्तिः, मम सर्वशत्रु क्षयार्थे सर्वोपद्रव शमनार्थे जपे विनियोगः।**

षडङ्गन्यासः – **ॐ खं खां खं हृदयायनमः। फट् शत्रून् ग्रससि ग्रससि शिरसे स्वाहा। हुं फट् सर्वास्त्र संहारणाय शिखायै वषट्। शरभाय शान्ताय कवचाय हुं। हुं फट् स्वाहा नमः अस्त्राय फट्।**

इसी तरह करन्यास करें।

ध्यानम् –

विद्युज्जिह्वं वज्र नखं वडवाग्न्युदरं तथा
व्याधिमृत्युरिपुघ्नं चण्डवातातिवेगिनम् ।
हृद् भैरव स्वरूपं च वैरिवृन्द निषूदनं
मृगेन्द्रत्वक्-छरीरेऽस्य पक्षाभ्यां चञ्चुनारवः ।
अधोवक्त्रश्चतुष्पाद उर्ध्व दृष्टिश्चतुर्भुजः
कालान्त-दहन-प्रख्यो नीलजीमूत-निःस्वनः ।
अरिर्यद् दर्शनादेव विनष्टबलविक्रमः
सटाक्षिप्त गृहक्षार्य पक्षविक्षिप्त-भूभृते ।
अष्टपादाय रुद्राय नमः शरभमूर्तये ॥

पुरश्चरण में एक सहस्त्र जप कर पायस से प्रतिदिन छः मास तक दशांश होम करे। अर्थात् १० माला नित्यकर छः मास तक दशांश होम नित्य करें।

द्वि-चत्वारिंशदक्षर मन्त्र – ॐ खें खां खं फट् प्राणग्रहासि प्राणग्रहासि हुं फट् सर्वशत्रु संहारणाय शरभशालुवाय पक्षिराजाय हुं फट् स्वाहा।

विनियोग – ॐ अस्य श्री शरभेश्वर मन्त्रस्य कालाग्निरुद्र ऋषिः, जगती छन्दः, श्रीशरभेश्वरो देवता, खं बीजं, स्वाहा शक्तिः, फट् कीलकं चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगः।

(मतान्तर में वामदेवाकालाग्निरुद्र ऋषिः, अतिजगती छन्दः, देवता सुपक्ष है।)

ऋष्यादिन्यास – कालाग्निरुद्राय ऋषये नमः शिरसि। जगतिछन्दसे नमः मुखे। भगवते श्री शरभ देवतायै नमः हृदये। खं बीजाय नमः गुह्ये। स्वाहा शक्तये नमः पादयोः। फट् कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

पञ्चाङ्गन्यास – ॐ खें खां खं फट् हृदयाय नमः। प्राणग्रहासि प्राणग्रहासि हुं फट् शिरसे स्वाहा। सर्वशत्रु संहारणाय शिखायै वषट्। शरभ शालुवाय पक्षिराजाय कवचाय हुं। हुं फट् स्वाहा अस्त्राय फट्।

इस न्यास में नेत्रन्यास का अभाव है, अतः द्वितीय प्रकार निम्न है – (मन्त्रकोषे)

ॐ खें खां अं कं खं.........ङं आं हृदयाय नमः। ॐ खं फट् इं चं......ञ ईं शिरसे स्वाहा। ॐ प्राणग्रहासि प्राणग्रहासि हुं फट् उं टं.....णं ऊं शिखायै वषट्। ॐ सर्वशत्रुसंहारणाय एं तं....नं ऐं कवचाय हुं। ॐ शरभशालुवाय ओं पं....मं औं नेत्रत्रयाय वौषट्। ॐ पक्षिराजाय हुं फट् स्वाहा अं यं.....हं लं

क्षं अः अस्त्राय फट्।

ध्यानम् –

चन्द्रार्काग्निस्त्रिदृष्टिः कुलिशवरनखश्चञ्चलोऽत्युग्र जिह्वः ।
काली दुर्गा च पक्षौ हृदय जठरगो भैरवो वाडवाग्निः ॥
ऊरूस्थौ-व्याधिमृत्यु शरभ वरखगरचश्चण्ड-वातातिवेगः ।
संहर्ता-सर्वशत्रून स जयति शरभः शालुवः पक्षिराजः ॥१ ॥
मृगस्त्वर्ध शरीरेण पक्षाभ्यां चंचुना द्विजः
अधोवक्त्रश्चतुष्पाद उर्ध्ववक्त्रश्चतुर्भुजः ।
कालाग्निदहनोपेतो नीलजीमूतसन्निभः
अरिस्तद् दर्शनादेव विनष्ट बलविक्रमः ॥२ ॥
सटाहृटोग्ररूपाय पक्ष विक्षिप्त भूभृते ।
अष्टपादाय रुद्राय नम : शरभमूर्तये ॥३ ॥

॥ अथ शरभार्चा प्रयोगविधिः ॥

भगवान शरभराज की पूजा यन्त्र में शिवलिङ्ग या शालिग्राम शिला पर करें यथा –

यन्त्रे शिवलिङ्गे शालिग्रामादा वा बाह्य पूजां कुर्यात् ।

शरभराज की भगवान शिव के समान षोडशोपचार पूजा व अभिषेक करें।

विशेष – **पाद्य पात्रे श्यामांकविष्णुक्रान्ता यव दूर्वाछित्या प्रक्षेपः ।अर्घ्यपात्रे दूर्वा तिल दर्भाग्र सर्षप पुष्पाक्षत युक्तं जलं गृहीत्वा । आचमने लवंग जाति केकोल युतं जलं गृहीत्वा। शतरुद्रियेण पुरुषसूक्तेन च स्नापयित्त्वा।**

चमकाध्याय से अभिषेक करें। अरिष्ट निवारण हेतु दूध दही से रोग व शत्रुनाश तथा अभिचार से मुक्ति हेतु सरसों के तेल से अभिषेक कर पुनः सुगन्धित द्रव्य से शांत्यार्थ अभिषेक करें।

शिव यन्त्रार्चन वा शरभयन्त्रार्चन कर शरभगायत्री स्मरण पूर्वक अर्घ प्रदान करें।

सन्ध्या समय सूर्यार्घ्य – **हंसः मार्तण्डभैरवाय प्रकाशशक्ति सहिताय श्रीसृर्याय इदमर्घ्यं समर्पयामि नमः स्वाहा।**

उपस्थात्मकंध्यानम्–

सूर्यमण्ड़ल मध्यस्थं ज्योतिर्मय मुखाम्बुजम् ।
चारुकुण्डलसंयुक्तं चन्द्रमालावतंसितम् ॥
दशबाहुं महाकायं सुवर्णसदृशप्रभम् ।
चक्रशूलगदा खड्ग–बाण कार्मुकखेटकै ॥
घण्टा कपाल शङ्खैश्च भासमान कराम्बुजम् ।
दिव्या भरण संयुक्तं दिव्यवासं त्रिलोचनम् ॥

शरभ गायत्री –

ॐ पक्षि शाल्वाय विद्महे वज्रतुण्डाय धीमहि तन्नः शरभ प्रचोदयात् ॥१॥

ॐ शालुवेशाय विद्महे पक्षिराजाय धीमहि तन्नोः रुद्रः प्रचोदयात् ॥२॥

॥ अथ शरभ यन्त्रार्चनम् ॥

श्री शरभ शालुवपक्षिराज यन्त्रम्

यन्त्रोद्धार - त्रिकोण के बाहर वृत्त बनाकर अष्टदल बनायें, उसके बाहर द्वादशदल पुनः उसके बाद षोड़शदल बनायें। षोड़श दल के बाद दो परिधि युक्त भूपूर बनायें।

प्रत्येक नामावलि के साथ **पादुकां पूजयामि तर्पयामि** कहते हुये गंधाक्षत पुष्प से पूजन एवं तर्पण करें।

यन्त्रमध्य में प्रधान देवता का आवाहन करें। ध्यान मन्त्र पूर्व में दिये जा चुके हैं। मूलमन्त्र सहित आवाहन करें।

प्रथमावरणम्- अपनी गुरु परम्परा के अनुसार गुरु चतुष्टय का आवाहन करें।

ॐ गुरवे नमः। ॐ परमगुरवे नमः। ॐ परात्परगुरवे नमः। ॐ परमेष्ठिगुरवे नमः। त्रिकोणे (पूर्वादिकोणेषु) - **ॐ चन्द्राय नमः। ॐ सूर्याय नमः। ॐ अग्नये नमः।** (त्रिकेणे वृत्तमध्ये चतुर्दिक्षु) - **ॐ भैरवाय नमः। ॐ वडवाग्नये नमः। ॐ दुर्गायै नमः। ॐ काल्यै नमः।**

पुष्पाञ्जलि देवें -

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

द्वितीयावरणम् - (अष्टदलेषु) - **लं इन्द्राय नमः। रं अग्नये नमः। यं यमाय नमः। छं निर्ऋतये नमः। वं वरुणाय नमः। यं वायवे नमः। सं सोमाय नमः। हं ईशानाय नमः।**

पुष्पाञ्जलि - ॐ अभीष्ट .... द्वितीयावरणार्चनम् ॥

तृतीयावरणम् - (अष्टदलपार्श्वे) - **ॐ व्यां व्याधये नमः दक्षपार्श्वे। ॐ मृं मृत्यवे नमः वामपार्श्वे।**

पुष्पाञ्जलि - ॐ अभीष्ट .... तृतीयावरणार्चनम् ॥

चतुर्थावरणम् - (द्वादशदले) पूर्वादि क्रमेण **मं मदनाय नमः। रं रक्तचामुण्डायै नमः। मं मोहिन्यै नमः। द्रां द्राविण्यै नमः।** शं शब्दाकर्षिण्यै **नमः। वां वाण्यै नमः। रं रमायै नमः। मां मान्यायै नमः। पु पुलिन्दियै नमः। शं शास्त्रे नमः। क्षं क्षोभिण्यै नमः। जं ज्यैष्ठायै नमः।**

पुष्पाञ्जलि ॐ अभीष्ट .... चतुर्थावरणार्चनम् ॥

पञ्चमावरणम् - (षोडशदले) अं आं इं ईं .... ईत्यादि षोडश स्वरों का या इनके अधिष्ठाता षोडश देवताओं का आवाहन करें।

शरभ तन्त्र में केवल स्वर देवताओ का **आवाहन अं आं...अः** से है परन्तु गीर्वाणतन्त्र में इन १६ स्वरों के देवताओं का विशेष आवाहन है यथा -

ॐ ब्रह्मणे नमः। परायै नमः। शक्त्यै नमः। विष्णवे नमः। मायायै नमः। वराहाय नमः। पृथिव्यै नमः। विधये नमः। शिवायै नमः। अश्विभ्यां नमः। वीरभद्राय नमः। भारत्यै नमः। शिवाय नमः। शंकराय नमः। रुद्राय नमः। कालरुद्राय नमः।

पुष्पाञ्जलि देवें - ॐ अभीष्ट .... पञ्चमावरणार्चनम् ॥

षष्ठमावरणम् - (प्रथम भूपूरे)- पूर्वादि दिक्षु - **ॐगणेशाय नमः। यमाय: नमः। स्कंदाय नमः। भैरवाय नमः।** वायव्यादि विदिक्षु - **ॐ त्वरितायै नमः। वीरभद्राय नमः। बडवानल भैरवाय नमः। महामायायै नमः।**

ॐ अभीष्ट सिद्धिं से पुष्पाञ्जलि प्रदान करे।

सप्तमावरणम् - (बाह्य भूपूरे) पूर्वादि क्रमेण **ॐ ब्राह्मयै नमः। माहेश्वर्यै नमः। कौमार्यै नमः। वैष्णव्यै नमः। वाराह्यै नमः। इन्द्राण्यै नमः। चामुण्डायै नमः। महालक्ष्म्यै नमः।**

ॐ अभीष्ट.... सिद्धिं, मे सप्तमावरणम् की पुष्पाञ्जलि प्रदान करे।

अष्टमावरणम् - (तद्बाह्ये भूपूरे) - **कं खं गं ....क्षं तक के वर्ण देवताओ का आह्वान करे।** गीर्वाणतन्त्रानुसार इन प्रत्येक वर्ण का उनके अधिष्ठाता देवता का आवाहन करें। जैसे **गं** के लिये **गणेश** है।

ॐ ब्रह्मणे नमः। जाह्नव्यै नमः। गणेशाय नमः। भैरवाय नमः। कालाय नमः। भद्रकाल्यै नमः। भीमकाल्यै नमः। जातवेदसे नमः। अर्द्धनारीश्वराय नमः। परमात्मने नमः। पृथिव्यै नमः। चन्द्राय नमः। शुक्राय नमः। विष्णवे नमः। बलभद्राय नमः। धनदाय नमः। पराशक्त्यै नमः। दुर्गायै नमः। धर्माय नमः। निर्विकल्पाय नमः। अग्नये नमः। भैरवाय नमः। अश्विभ्यां नमः। भार्गवाय नमः। ईश्वराय नमः। वायवे नमः। कृशानवे नमः। शक्ताय नमः। वरुणाय नमः। शंकराय नमः। द्वादशादित्येभ्यो नमः। भारत्यै नमः। सदाशिवाय नमः। पृथिव्यै नमः। नृसिंहाय नमः। (इत्थं ककारादि क्षकारान्ता वर्ण देवताः प्रोक्ता)

पुष्पाञ्जलिमादाय -

ॐ अभीष्ट सिद्धिं मे देहि शरणागत वत्सल।
भक्त्या समर्पये तुभ्य अष्टमावरणार्चनम् ॥

नवमावरणम् - (अन्यत्र में) भूपूर में अणिमादि अष्टसिद्धियों का पूजन करें। **अणिमायै नमः। लघिमायै नमः। महिमायै नमः। ईशित्व्यै नमः। वशित्व सिद्ध्यै नमः। प्राकाम्य सिद्ध्यै नमः। भुक्त्यै नमः। प्राप्त्यै नमः।**

धूप दीपौ नेवेद्यञ्च दद्यात्।

नित्य होम करे तो प्राणाय स्वाहा,व्यानाय स्वाहा ,अपानाय स्वाहा, समानाय स्वाहा, उदानाय स्वाहा, से पंचाहुति देवें। षडङ्ग मंत्रो मे षडाहुति देवें। मूल मंत्र की आहुति देवें।

बलिकर्म - ईशान अग्नि ,नैर्ऋति, एवं वायु कोण में बटुक, योगिनी, क्षेत्रपाल, एवं गणेश हेतु बलि प्रदान करें । सर्वभूतो के लियें नैऋति में या बाह्य जाकर बलि प्रदान करे

॥ द्वितीयप्रकारा यंत्र पूजा ॥

मध्य में प्रधान देवता का आह्वान करें। गुरुमण्डल देवताओं का पूजन करें। १.त्रिकोण - **सूर्य, चन्द्र, अग्नि का धां, धी, ऐं बीज मंत्रो से आह्वान करें।** २. वृत्तमध्ये - **भैरव, बडवाग्नि, दुर्गा, कालि का मं,मूं,दं,क्षं, बीज मंत्रो से आह्वान करें** । ३. पार्श्वे - **ह्रां व्याधियै नमः। ह्रैं मृत्यवे नमः।** ४. अष्टदलेषु- **ऐं, रं, लंभ्यां, क्षं, धं, यं, सं, क्रीं इत्यादि बीज मंत्रो से आह्वान करें।** ५. द्वादशदलेषु- **क्लीं, फ्रीं, हूं, क्रां, हैसं, श्रीं, डं, लूं, यूं, क्ष्म्यां, क्ष्मृं,मं बीज मंत्रो से आह्वान करें** । ६. षोडशदले- **अकारादि स्वराः अधिदेवता बीजाः - ओं, श्रौं, ह्रौं, धां, धैं, ज्मां, षं, चं, यूं , त्रैं, ऊं, ऐं, ओं, ह्यों, डं, हौं** । ७. प्रथम भूपूरे - (पूर्वादि चक्षुः दिक्षु) **गणेश, यम, स्कंद, भैरव तेषां बीजाः - गं, धं, स्कं, मं, आग्नेयादि चतुर्दिक्षु - त्रैं, धां, बं, ईं, । इति बीज मंत्राः।** ८. द्वितीय भूपूरे - **कं खं गं .... हं लं क्षं इत्यादि वर्णं बीजम्।**

इस तरह यंत्र में बीजाक्षरो से आह्वान कर पूजा करें ।

॥ होम द्रव्याणि ॥

सौम्य क्रमे- दुर्वा, गुडूची, चञ्चु, तिल, लाजा, दुग्ध, अपूप, यव, मधुत्रय, इत्यादि । **क्रूर क्रमे**- अपामार्ग, खदिर, कटिम, सैन्धव, सर्षप, कटुत्रय (निम्बपत्रादिभि) आज्य। ये द्रव्य विशेष कामना प्रयोगों में लिये जाते है अन्य द्रव्य यथा प्रयोग आवश्यक कामना हेतु तंत्रो में दिये गये है। यथा - **स्तंभन हेतु** हरताल व हरिद्रा, वशीकरण हेतु एला लवंग एवं राई। **प्रेतोउपद्रव हेतु** फूल प्रयंगु, अर्क धतूरादि का प्रयोग किया जाता है। **आयु वृध्दि हेतु** दुर्वा,श्री वृद्धि हेतु

बिल्व समिध पायस होम इस तरह कई प्रयोग द्रव्य है।

श्री भार्गवीर्नवरात्र होमैः प्रयान्ति शान्ति। उदुम्बराश्वत्थ समित्सहस्त्रैः कुर्याच्चतुर्थं ज्वरभूतशान्त्यैः॥ पलाशशाखाभिरभीष्ट सिद्धयै रक्षां हि कुर्याद थखादिरोत्थैः। कुर्यात् नवैर्बहुमित्रकामास्त्वनन्तरायाम शमीसमिद्भिः ॥ पुत्राय कुर्यादथ दीपिकाभिः प्रसाद सिद्ध्यै करवीरपुष्पै। वश्याय कुर्यान्मधुसिक्त पद्मैराकर्षणायस्मर पञ्चबाणैः। (अरविन्दमशोकञ्च चूतञ्च नवमल्लिकाः। नीलोत्पलञ्चपञ्चैते पञ्चबाणस्य सायकाः ॥ अर्थात् अरविन्द, अशोक, आम, नवमल्लिका, नीलपुष्प ये पाँच समिध हैं।)

विद्वेषनणायाथ द्विषांघ्रियोत्थैः स्तंभक्रियायै वि याप्रसूनैः। उच्चाटनाय स्तुहि बालपत्रैः संहरणायार्ककटु स्नुहीभिः॥ धतुरशाखा फल पत्रपुष्पैः उन्मादनायोश्च शिखां विमुक्त्यै। यद्धान्य होमं हुतमस्य शीघ्रं तद्धान्यराशेस्तनुते विवृद्धिम्॥ दीडिमीकुसुमजालकैर्नरा मन्मथत्वमुपयान्ति सुभ्रुवाः ऐवमेव नियतं रवेर्दिने कारयेदखिल काम्य सिद्धये॥ अन्नेन चात्रं पयसा पयश्च घृतेन भाग्यं मधुना च नादम्। तैलेन सारं दधिभिश्चपुष्टिं चूतप्रवालैरभि रूपवृद्धिम्। त्रिकटु सर्षप हिङ्ग्वजमोदा तुरगमौलि ससेंधव जीरकम्। सधृत पारद टङ्कण युक्तं शरभ होम परिक्षयमेतत्। दुर्वानावृताखण्डै गोधूमैश्च विशेषतः तिललाजैः सर्षपेश्च मिश्रीकृत्य हुनेत्ततेः। त्रिदिनाच्छत्रु संघाताः पलायन्ते न संशयः। भौमरात्रिमारम्य सप्तरात्रं प्रत्यहं धत्तूरपुष्पैर्द्विसहस्त्रं जुहुयात् स्तंभनं भवति। भौमरात्रो नग्नो भूत्वा वकुलतरोर्मूले दक्षिणाभिमुखो रक्तकमलासनो हरिद्रामालया भौमपर्यन्तं द्वादशसहस्त्र जपादाकर्षणम्।

जपेद्दशसहस्त्रं तु शतमष्टोत्तरं तु वा । कृष्णाष्टमीं समारम्यं यावत्कृष्ण चतुर्दशी॥ मासान्ते शत्रवस्तस्य पलायन्ते न संशयः।

॥ मोक्षप्राप्ति हेतु प्रयोग विधि ॥

भगवान शरभ के तीनों नेत्रों में सूर्य, अग्नि एवं सोम का निवास है। अतः **भूर्भुवः स्वः** इत्यादि लोकों पर दृष्टिनियन्त्रण कर्ता है। अग्नि व सोम के संयोजन से काम की उत्पत्ति मानी गई है, और काम से सृष्टि की उत्पत्ति है अतः सृष्टि स्थिति व संहार के कर्त्ता भी हैं। दोनों पक्षों (पङ्खों) में काली (काल कृष्णपक्ष) व दुर्गा (शुक्लपक्ष) का निवास होने से काल की गति का नियन्त्रण कर्ता है। कभी शान्त नहीं होने वाली [illegible] के प्रणेता है, बडवानल (पानी में अग्नि)

अर्थात् प्रेमरस में अश्रुपात के होने के समय हृदय में बसने वाली भक्ति (प्रेम व विरहाग्नि) को धारण किये हुये है जो भक्तों को आनन्द देने वाली है। व्याधि मृत्यु तथा अकारण विघ्नों एवं उत्पातों को वश में करने वाले हैं।

मन्त्र जाप करते समय भावना करे '**प्राण ग्रससि प्राणग्रससि**'। इसका अर्थ है मेरे प्राणमय शरीर पर आप अनुग्रह करिये उसको ग्रहण कर उसको अपने आत्मसाक्षात् द्वारा संचालित कारे, प्राण अपानादि वायु को स्तंभित कर अपनी आकाशगमन की शक्ति के द्वारा मेरे मन प्राण को उर्ध्वरेता बनाये जिससे कभी औज का क्षरण नहीं होवे, बिन्दु का पात नहीं होवे।

(**खं** इनका बीज मन्त्र है जो आकाश गमन-खेचर से संबंध रखता है)

अपनी उर्ध्व गति के द्वारा कुण्डली शक्ति का उत्थापन कर षट्चक्रों का भेदन कराते हुये सहस्त्रारचक्र तक गतिमान करें।

'**सर्वशत्रुसंहारणाय**' के जप के समय भावना करे कि काम, क्रोध, मद, लोभ, अहंकार, निद्रा, तन्द्रा, आलस्य, प्रमाद आदि शत्रुओं का दमन करें साधना के समय अन्तरिक्ष विघ्नों (भूत प्रेत बेताल क्षेत्रपाल लोकपालादि) का शमन कर साधना मार्ग में उत्तरोत्तर तीव्रगति प्रदान करने वाले हैं।

अत: शुद्ध विवेक से मन्त्र जप करने पर यह मन्त्र मोक्ष प्रदाता है। साधना के विघ्नों को दूर करता है।

॥ गीर्वाणतन्त्रानुसार शरभ मन्त्र: ॥

ॐ नमोऽष्टपादाय सहस्त्रबाहवे द्विशिखे त्रिनेत्राय द्विपक्षाय अग्निवर्णाय मृग विहंगरूपाय वीर शरभेश्वराय ॐ।

ऋष्यादिन्यास – (**पूर्ववत्**)

षडङ्गन्यास – **ॐ नमोष्टपादाय हृदयाय नम:। सहस्त्रबाह्वे द्विशिखे शिरसे स्वाहा। त्रिनेत्राय द्विपक्षाय शिखायै वषट्। अग्निवर्णाय कवचाय हुं। मृगविहंगरूपाय नेत्रत्रयाय वौषट्। वीर शरभेश्वराय ॐ अस्त्राय फट्।** इसी तरह कराङ्गन्यास करें।

ध्यानम् –

(त्रयोदशाष्ट चतु: पञ्चाष्ट नववर्णा अङ्गति)

अष्टांघ्रिश्च सहस्त्रबाहुरनल प्रख्य: शिरोयुग्मभृत्
वि: त्र्यक्षोऽति जवो द्विपुच्छ उदित: साक्षान्नृसिंहापहा ।

अर्द्धेनापि मृगाकृतिः पुनरथाप्यर्द्धेन पक्ष्याकृतिः
श्री वीरः शरभः स पातु सुचिरं नीत्वा सदा मां हृदि ॥

मन्त्र का पुरश्चरण करके क्षीर से होम करें।

॥ शत्तोत्तर षड्विंशद्वर्णात्मक मन्त्र ॥

विनियोगः - **ॐ अस्य मन्त्रस्य ब्रह्मा ऋषिः, पंक्ति छन्दः, शरभशालुव देवता, ॐ बीजं, स्वाहा शक्तिं, हुं त्रय कीलकं सवार्थ सिद्धये जपे विनियोगः।**

मन्त्र - **ॐ नमः भगवते खें खें खें घ्रसीं घ्रसौं शरभशालुवाय पक्षिराजाय सर्वशत्रु संहार कारिणे तत्पुरुषाय अघोर सद्योजात वामदेव ईशानकाल कालकण्ठाय गरं हुं हुं हुं प्रस्फुर प्रस्फुर उग्रोग्रतम चट चट प्रचट प्रचट बन्ध बन्ध घातय घातय विदारय विदारय शरभ शालुवाय पक्षिराजाय हुं फट् स्वाहा।**

विनियोगः - **अस्य मन्त्रस्य ब्रह्माऋषि, पंक्तिश्छन्दः, शरभ शालुवो देवता, प्रणवो बीजं, स्वाहा शक्तिः, हुं त्रय कीलकं सवार्थसिद्धये जपे विनियोगः।**

पञ्चाङ्गन्यास - **ॐ तत्पुरुषाय नमः हृदयाय नमः। अघोराय नमः शिरसे स्वाहा। सद्योजाताय शिखायै वषट्। वामदेवाय कवचाय हुं। ईशानाय अस्त्राय फट्।**

षडाङ्गन्यास - **द्रां, द्रीं, द्रूं, द्रें, द्रौं, दः से षडङ्गन्यास करें।**

ध्यानम् -

स्फटिकाभं चतुर्बाहुं ज्वालापद समन्वितं।
पञ्चवक्त्रं महाभीमं त्रिपञ्च नयनैर्युतम् ॥
प्रथमं शालुव वक्त्रं द्वितीय शङ्करस्य तु तृतीयं वैष्णवं वक्त्रं
चतुर्थ ब्रह्मसंभवं अघोरं पञ्चमं वक्त्रं महाशंभु स्वरूपिणम्।

इस मन्त्र की साधना से समस्त भूत-प्रेत उपद्रव नष्ट होते हैं।

॥ लक्ष्मीप्रद शरभ मन्त्रः (संजीवनार्थ) ॥

मन्त्र - ॐ श्रीं हूं स्वाहा शरभ शालुवाय स्वाहा हूं श्रीं हूं ह्रीं ॐ।

भूवाराह (हूं) की जगह ग्लौं भी हो सकता है।

इसके प्रयोग में न्यास ध्यान की विशेष आवश्यकता नहीं है। ध्यान करें तो

पूर्ववत् ध्यान मन्त्रों से कर सकते है। यथा –

एवं शावर शाल्वाख्यं महामन्त्रं कुलेश्वरी देवः शरभ शाल्वाख्यः साक्षाच्च त्रिपुरान्तकः। न्यास ध्यानादि रहितं सर्वसिद्धिप्रदस्तथा। पूर्वमेवायुते (दस हजार) जप्त्वा ततः सिद्धिर्भवेत् ध्रुवम्॥

॥ प्रयोग विधियाँ ॥

कृष्णाङ्गार चतुर्दश्यामारम्य भौमवार पर्यन्तं वृषशून्यशिवालये अयुतं जपः कार्य पुनः प्रयोग सिद्ध्यर्थमयुतं जपेत् अष्टोत्तर शतवारमभिमन्त्रित भस्म मिश्र शालिना शरीरे शत कृत्वः प्रक्षेपात् भूत प्रेतादिनाशः नद्यादिशुद्ध जलं ताम्रपत्रे गृहित्वा त्रिसप्त कृत्वो वाभिमन्त्र्य पानात् गुल्मोदरगत शूलादि व्याधिनाशः। ज्वरार्तं मूर्ध्नि हस्तं दत्त्वा अर्के भौमे भृगोर्वा त्रिसन्ध्या काले जपाज्जवरनाशः।

एकादश लवंग १०० बार अभिमन्त्रित कर चतुर्दशी से उष्णजल के साथ लेवें एक सप्ताह में वात रोग नष्ट होवें।

वृश्चक सर्पादि दंश होने पर बदरीकाष्ट से १००० बार अभिमन्त्रित कर स्पर्श करें, अभिमन्त्रित जल पिलावें भस्म लगावें।

किसी खजाने पर आत्मा का निवास होवे तो शरभ मन्त्र से अभिमन्त्रित भस्म व जल छिड़कें। ऋग्वेद की ''**यस्मन्नरो**'' ऋचा व ''**केतुकृण्वन्**'' ऋचा उस स्थान के समीप जपे तो वह आत्मा ''**स्वयमेव स सन्तुष्टौ तस्मै सर्वं ददाति च**'' स्वयं ही सन्तुष्ट हो जाती है।

राज चौरादि संकट, निर्जन वन में ''**अभिव्यये**'' ऋचा का जप करें। संग्राम में ''**बलंघेहि**'' ऋचा से संक्रंदन के समान बलवान होकर विजय होवे एवं ''**वयः सूपर्ण**'' इस ऋचा से शत्रु की माया का भेदन कर विजयी होवे। ''**विजिहोर्ष**'' सूक्त का जप करने से शीघ्र प्रसव होवे। ''**वृहत्साम**'' ऋचा से जङ्गम में रक्षा होवें। इस तरह से कई प्रयोग **है। कृपया उक्तसूक्त परिशिष्ट पेज नं० ६९१ पर देखें**

॥ बालासुन्दरी मन्त्रेण पुटित मन्त्र ॥

ॐ कारं पूर्वमुच्चार्य बालायास्त्र्यक्षरी तथा। वितरणीत्रयोवर्णा हुकाराणां त्रयं तथा॥ शालुवाय ततोच्चार्य हुंकारत्रयमेव च। वह्निजाया समायुस्थो मन्त्रो ज्वरहस्तथा।

अस्यार्थ – ॐ ऐं क्लीं सौः हुं हुं हुं शालुवाय हुं हुं हुं सौः क्लीं ऐं स्वाहा।

अस्यप्रयोगः – माष, मुद्ग, मसूर, कुलत्थ, चणक, शलि, गोधूम, कार्पाशमस्थि

(कपास वृक्ष की तने की लकड़ी) यावनाला (जौ की नाल की घास टुकड़ी) ये सब धान्य लेवें इनके बराबर भस्म लेवें उनके ताम्रपात्र में मिश्रण कर १०८ बार अभिमन्त्रित करें। ज्वर ग्रसित व्यक्ति पर डालें तो ज्वर शान्त होवें।

अगर प्रेतादिग्रस्त होवे तो एक ताम्रपात्र या भोजपत्र पर '**आवेशय आवेशय रुद्रोज्ञापय**' लिखकर रोगी को बैठाकर उसके आसन के नीचें रखें तो आवेश नष्ट होवें।

॥ अथ पुत्तल प्रयोगः ॥

पुत्तल प्रयोग की विधि में कुछ शब्दो का भावार्थ इस प्रकार जाने । **पुत्तल - पुतला। मायाबीजं- ह्रीं। पवनं= प्राणप्रतिष्ठा। वह्नि बीजं= रं। वह्निप्रिया= स्वाहा। पृथ्वीबीजं= लं। वाग्बीजं= ऐं। श्रीबीजं= श्रीं। चिन्तामणि= ऐं। कामराजं= क्लीं। हंसबीजं= हंसः। वायुंसम्यग्विधानेन, पवनं विदधीत दोनो का अर्थ= विधिपूर्वक प्राणप्रतिष्ठा।**

पुत्तलीं च विधायाथ कुलालकरमृणमयीम्। वायुंसम्यग्विधानेन (प्राणप्रतिष्ठा) **कृत्वास्थाप्यसमाहितः॥ स्नुहि क्षीरे तु संक्षिप्य- मृष्टस्तदयुतं जपेत्। उन्मत्तमूले** (आक धतुरे कि जड़में) **निखनेद्** (खोदकर रखें) **अपस्मारी भवेत्तदा॥ शालुवं शिवरूपं च ध्यात्वा सम्यक्समाहितः। निम्बचूर्णेन कृत्वा तु पुत्तलीं च यथा विधीम्॥ पुत्तल्यां वायुमारोग्य** (प्राणप्रतिष्ठा) **स्पष्ट्वा तामयुतं जपेत्। शमशाने निखनेद्देवि पुत्तलीं शत्रुं चालयेत्॥**

उन्मत्तमूले पुत्तल्यां वामारोप्यस्तु साधकः स्पष्ट्वातीवायुतं मंत्री ध्यात्वा शत्रुन्वितन्वतः॥ निक्षिपेच्छत्रुदेशे तु शत्रुणांचालनं भवेत्। शन्यर्काङ्गारवारे तु जपेदयुत संख्यया। त्रिदिनान्ते रिपून्वध्वा चालयेदाशु साधकः॥ विष्टेन पुत्तली कृत्वा मूलेनैव (मूल मंत्र से) **तु पूजयेत्। मांसयुक्तं तु नैवेद्यं ताम्बूलन्तु निवेदयेत्।। लाक्षारसेन संलिप्य बिम्बस्य च शिरोगले साध्य नाम** (शत्रू नाम) **च संयुक्तां लिखित्वा तां च पुत्तलीम्॥ सदापचेत् ततो वह्नौ समिद्धिः पिचुमन्दकैः** (अर्क समिध) **गणिकायाङ्गणे होमं कृत्वा चैव विधानतः। जपादयुतमात्रेण पलायन्ते न संशय॥ अर्कमूलं समादाय पुत्तलीं च यथा विधिम्। तस्य प्राणस्य पवनं विदधीत** (प्राणप्रतिष्ठा) **यथोदितम्॥**

तस्याश्च हृदिदेशे तु मायाबीजं (ह्रीं) **समालिखेत्। तस्याशिरसिमालिख्य व्रह्नि बीजं** (रं) **स बिन्दुकम्॥ पाददोश्च तथा लिख्य पृथ्वीबीजं** (लं) **स भैरवम्। उभयोस्कंधयौश्चैव वाग्बीजं** (ऐं) **चैव वाग्भवम्॥ भार्गवं वदने पृष्ठे**

श्रींबीजं (श्रीं) भुवनेश्वरीं। पूजां च विधिवत्कृत्वा नैवेद्यं च निवेदयेत्। निखनेदर्कमूले च पलायन्ते च शत्रवः। ततः शत्रु शरीरं च स्फोटयेत् पक्षिशालुवः॥ चतुरङ्गलि विस्तारं दशाङ्गुलि समायुतम्। श्मशान मृत्तिकायां तु पुत्तलीं कारयेद्बुधः (४ अङ्गुल चौडी १०अङ्गुल विस्तार की श्मशान मिट्टी से पुत्तली बनायें) श्मशानाग्निं समादाय उन्मत्तरस- संयुयम्। पुत्तल्युपरि खेंकारः पार्श्वे चिन्तमणिं लिखेत्।। मस्तके कामराजं (क्लीं) च हंसबीजं (हं सः) तु मूर्धनि। स्नुहिक्षीराभिषेकं च विधिवत्प्राणपूर्वकम्॥ स्नुहिवृक्षस्याधोभागे खनेत् प्रादेशमातृकम्। शुक्लप्रतिपदारम्य अष्टम्यतं जपेत् सुधीः॥ पराजिता पलायन्ते शत्रवो नात्र संशय॥ शालुवं पक्षिराजानं शरभं शिवरूपिणीम्। यो द्विजः सततं ध्यायेत् पलायन्ते च शत्रवः॥

खादरीं पुत्तलीं कृत्वा पवनञ्च (प्राणप्रतिष्ठा) यथा विधिम्। तत्स्पृष्टवां चायुतं मंत्रं मुच्यते राज्य तस्करैः॥ पुत्तली खादिरेमूले निक्षिपेत्तस्य शत्रवः। पुत्र मित्र कलत्रादीन् त्यक्त्वा देशान्तरं व्रजेत॥ राजवृक्षस्य( ) पुत्तल्यां भूबीजं (लं, हुं) स्मर खवह्निना (खं) वाग्भवं (ऐं) वायुबीजं (यं) च श्रीबीजं (श्रीं) भुवनेश्वरी॥ प्रादक्षिण्येन वेष्टव्यं पुत्तल्योपरि लेखितः। मूलेन राजवृक्षस्य समिद्धोमो विधीयते। अष्टोत्तरसहस्रं च शतमष्टोत्तर च वै॥ हुनेच्च विधिवन्मंत्रं चतुः कण्ठं विधानतः॥ त्रिदिनान्ते च विद्वेषः शत्रुणां च परस्परम्। रिपवः संशयं यान्ति पलायन्ते न संशयः॥

॥ इत्याकाश भैरव तन्त्रे अरिखण्डे शरभ प्रयोग विधि ॥

॥ प्रयोगान्तरे विविध ध्यानम् ॥

आकर्षणे ध्यानम्

रक्ताम्बर समालेप भूषणं रक्तलोचनं।
रक्तवर्णं लसद्ग्रीवं रक्तकुण्डल संयुतम् ॥१॥
रक्तकेयूर मुकुटं लसच्चन्द्रार्द्ध शेखरम्।
प्रसन्नममृतोन्मत्तं प्रणताभीष्ट सिद्धिदम् ॥२॥
इक्षुकोदण्ड पुष्पेषु पुण्ड्र चाप सहस्रकम्।
कार्मुकेन शरैर्दिव्यै पूरिताशावकाशकम् ॥३॥

मूलमंत्र को कामबीज से (क्लीं) संपुटित कर जप करें।

आकर्षणे तदा ध्यानं पाशबाहु सहस्रकम्।
तत्पाश पूरिताशेष आशाकुंभोक्षिताकुलम् ॥

ध्यात्वा जपेत्तथा मंत्रं साधकस्थिर मानसः ॥

आकर्षण में ध्यान करें कि साध्य व्यक्ति को भगवान शरभ ने हजार भुजाओं में पाशबद्ध कर लिया है एवं साध्य व्यक्ति मुझसे मिलने को आकुल है। "**आं**" मंत्र से संपुटित मंत्र को जपने से भी साध्य का आकर्षण होता है ।

स्तंभन विद्वेषणे ध्यानम्–

महाकालं घनश्यामं वक्रदन्तं मुखाम्बुजम् ।
कपिलाख्यं बृहत्स्कंधं करालं कृष्णवाससम् ॥१॥
गङ्गास्थित भालं चन्द्रार्धशेखरं विषमेक्षणम् ।
महाकायं महावेगं व्याल यज्ञोपवीतिनम् ॥२॥
वामहस्ते रिपोरास्यन्ताऽयन्तं प्रदक्षिणम् ।
सत्वरं दक्षहस्ताग्रे-ताडयन्तमुरस्थले ॥३॥

मूल मंत्र के आदि व अन्त में इन्द्रबीज (लं) या रुद्र मंत्र -**नमः शिवाय** ...... मूल मंत्र **शिवाय नमः** अथवा रुद्रबीज **क्षौं** या **हौं** से पुटित मंत्र को जपने से शत्रु का विद्वेषण होवें। मंत्र के अन्त में जो बीजाक्षर या ॐ **नमः**, **स्वाहा**, **ठः ठः ठः**, **हुं फट्** इत्यादि लगाते है **ये पल्लव कहलाते है**। **यथा** -

वासवं मूलमंत्रञ्च पुनरिन्द्रं सपल्लवम् ।
रुद्र मंत्रं पुना रूद्रं पल्लवद्वेषि सिद्धये ॥
वैरिणारैश्वर्य जालानां क्षयं कुर्वन्तमाशुवै ।
तयोर्दशदिनात् पश्चात् महद् युद्धं भवेद् ध्रुवम् ॥

निग्रहोच्चाटने ध्यानम्–

करालमुग्रदृक्दंष्ट्रं कालानलसमप्रभम् ।
अनेक कोटि बह्मास्थि मुण्डमाला-विभूषितम् ॥१॥
घोराट्टहास ब्रह्माण्ड गोलकं कृत्तिवाससम् ।
सहस्त्रमुख हस्तांघ्रिमुकुटं नागभूषितम् ॥२॥
सहस्त्रकोटि वेतालगण-संघसमावृतम् ।
नानाविध शिलाभेदैवर्षयन्तं स्वकिङ्करै ॥३॥
महावीरमतिक्रुद्धमतिभीम - पराक्रम ।
भक्षयन्तं निजैभूतैः परबंधि कुलं बहु ॥४॥

प्रयोग - मूल मंत्र को वायु बीज "**यं**" या "**हं**" कार मंत्र से संपुटित कर जप

करे । यथा -

वायुबीजं च मंत्रं च पुनर्वायुं सपल्लवम् ।
हुङ्कारञ्च ततो मंत्रं पुनुर्हुङ्कार पल्लव ॥
इति प्रयोग द्वितयं कुर्याद्यत्नेन चाम्बिके ।
सहसा लभते सिद्धिं संशयो नास्ति चाम्बिके ॥

मोक्ष प्राति च सरस्वती ध्यानम्—

स्फटिकाभं महादेवं प्रसन्नं वदनाम्बुजम् ।
अमृतां शुकलाचूडं अग्निसूर्येन्दुलोचनम् ॥
व्याघ्र चर्माम्बरधरं व्यालयज्ञोपवीतिमम् ।
वैडूर्यहार शोभाढ्यं मन्दस्मित मनोहरम् ॥
मुक्ता विद्रुमरत्नाङ्ग बद्धाङ्गद विभूषणम् ।
स्वर्णानूपुर पादाब्जं श्वेत कुण्डल मंडितम् ॥
वीणां व्याख्यान मुद्राञ्चपुस्तकं स्फटिक स्त्रजम् ।
पद्महस्तं गदापद्मं सुधाकुंभं कराम्बुजे ॥
विभूषणामल ब्रह्मज्ञानमुद्रा-स्वरूपिणम् ।
चन्द्रमण्डल मध्यस्थं सच्चिदानन्दमव्ययम् ॥

(भाषा)- सरस्वतीबीजं "ऐं" व चिन्तामणि बीज मंत्र ( ) से संपुटित कर जप करें। यथा- **भाषा मंत्रं पुनर्भाषां स्वाहान्ते मंत्रमुच्यते** (पहला मंत्र) मूल मंत्र को ऐं से संपुटित कर अंत में स्वाहा लगाकर जप करें। विद्या प्राप्त होवें। **चिंतामणिंततो मंत्रं पुनश्चिन्तामणिं नमः। मोक्षाय प्रणवाद्यन्तं धारणाय विशेषतः।** (दूसरा मंत्र)मोक्ष हेतु मूल मंत्र को चिन्तामणि मंत्र से संपुटित करें। अन्त में **नमः** कहे एवं इन सबके आदि अन्त में "ॐ" लगायें।

श्रियै श्रिया संपुटितं घृणिरारोग्य वर्द्धकः। "श्रीं" मंत्र के संपुट से मूल मंत्र जपने से आयु आरोग्य की वृद्धि होवें। तथा लृं बीजाक्षर के संपुट से रोग एवं "ठं " से विष का विनाश होवे यथा-

लृं लृं रोग विनाशय, विषनाशाय ठं युतम्॥ इति गुह्यतम् शास्त्रं लघुसिद्धि प्रदायकम्। यत्ने नापि जपेद्देवि सर्व कामार्थ सिद्धये।

॥ इति आकाश भैरव कल्पे षट्कर्म प्रयोग विधि॥

॥ अथ शरभ मालामन्त्रम् ॥

माला विनियोग मंत्र- अस्य मंत्रस्य कालाग्नि रुद्र ऋषिः अति जगती छन्दः श्री शरभेश्वरो देवता, खं बीजं, स्वाहा शक्तिः, फट् कीलकं चतुर्विध पुरूषार्थ सिद्ध्यर्थे जपे विनियोगः,।

ध्यानम् —

चन्द्रार्काग्निस्त्रिदृष्टिः कुलिशवरनखश्चञ्चलोऽत्युग्र जिह्वः ।
काली दुर्गा च पक्षौ हृदय जठरगो भैरवो वाडवाग्निः ॥
ऊरूस्थौ-व्याधिमृत्यु शरभ वरखगरचश्चण्ड-वातातिवेगः ।
संहर्ता-सर्वशत्रून स जयति शरभः शालुवः पक्षिराजः ॥१ ॥

॥ स्तोत्रम् ॥

ॐ नमः पक्षिराजाय निशित कुलिशनखवराय अनेक कोटि- ब्रह्माण्ड कपालमालांकृताय सकलकुल महानागभूषणाय सर्वभूतनिवारणाय नृसिंहगर्व-निर्वापकारणाय सकलरिपूणामटवी मोहनाय ह्योनिजाय शरभ शालुवाय ह्रां ह्रीं ह्रूं प्रवेशय-२ आवेशय-२ भाषय-२ मोहय-२ ह्रां स्तंभय-२ कंपय-२ घातय-२ बंधय-२ भूतग्रह बंधय-२ रोगग्रह बन्धय-२ बालग्रहं बन्धय-२ यक्षग्रहं बंधय-२ सूतिकाग्रहं बंधय-२ चातुर्थिकाग्रहं बंधय-२ भीमग्रहं बंधय-२ अपस्मारग्रहं बंधय-२ पिशाचग्रहं बंधय-२ आवेशग्रहं बंधय-२ अनावेशग्रहं बंधय-२ काम होम त्रोटय-२ प्रैं त्रैं ह्रैं माराय-२ मुञ्च-२ हुं फट्।

॥ श्रीआकाशभैरव चित्रमाला मंत्र ॥

आकाशभैरव से तात्पर्य रुद्रावतार भगवान् शरभ शालुव पक्षिराज से है। शत्रुनाश हेतु यह प्रयोग किया जाता है।

विनियोग:- ॐ श्रीआकाशभैरवरस्य चित्रमाला नाममंत्रस्य श्रीआनन्द-भैरव ऋषिः, गायत्री छन्दः, श्रीआकाशभैरव देवता, ह्रीं बीजं, हुं शक्तिः, सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यास: - ॐ श्रीआनन्दभैरव ऋषये नमः शिरसि, ॐ गायत्री छन्दसे नमः मुखे, ॐ आकाशभैरव देवतायै नमः हृदि, ॐ ह्रीं बीजाय नमः

गुह्ये , ॐ हुं शक्त्यै नमः पादयोः, ॐ सर्वाभीष्ट सिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्रां अंगुष्ठाभ्या नमः, ॐ ह्रीं तर्जनीभ्यां स्वाहा, ॐ ह्रूं मध्यमाभ्यां वषट्, ॐ ह्रैं अनामिकाभ्यां हुं, ॐ ह्रौं कनिष्ठकाभ्यां वौषट्, ॐ ह्रः करतल-कर-पृष्ठाभ्यां फट्।

अङ्गन्यास - ॐह्रां हृदयाय नमः। ॐह्रीं शिरसे स्वाह। ॐ ह्रूं शिखायै वषट्। ॐ ह्रैं कवचाय हुं। ॐ ह्रौं नेत्र-त्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्।

ध्यानम्–

सहस्त्रपाणि-पद्-वक्त्रं, सहस्त्र-त्रयलोचनम् ।
सर्वाभीष्टप्रदं देवं, स्मरेद् आकाश-भैरवम् ॥

॥ मानस पूजन ॥

ॐ लं पृथ्वीव्यात्मकं गन्धं श्रीआकाशभैरव पादुकाभ्यां नमः अनुकल्पयामि। ॐ हं आकाशात्मकं पुष्पं श्रीआकाशभैरव पादुकाभ्यां नमः अनुकल्पयामि। ॐ यं वाय्वात्मकं धूपं श्रीआकाशभैरव पादुकाभ्यां नमः अनुकल्पयामि। ॐ रं वह्न्यात्मकं दीपं श्रीआकाशभैरव पादुकाभ्यां नमः अनुकल्पयामि। ॐ वं जलात्मकं नैवेद्यं श्रीआकाशभैरव पादुकाभ्यां नमः अनुकल्पयामि। ॐ शं शक्त्यात्मकं ताम्बूलं श्रीआकाशभैरव पादुकाभ्यां नमःअनुकल्पयामि।

॥ मालामंत्र ॥

ॐ नमो भगवते आकाशभैरवाय निखिल-लोकप्रियाय प्रणतजन-परिताप-विमोचनाय सकलभूत-निवारणाय सर्वाभीष्टप्रदाय नित्याय सच्चिदानन्द-विग्रहाय सहस्त्रबाहवे सहस्त्रमुखाय सहस्त्र-त्रिलोचनाय सहस्त्र-चरणाय करालाय अखिलरिपुसंहार-कारणाय अनेककोटिब्रह्मकपाल-माला-अलंकृताय नररुधिरमांस-भक्षणाय महाबलपराक्रमाय महादन्तराय विष-मोचनाय पर-मंत्र-तंत्र-यंत्र-विद्या-विच्छेदनाय प्रसन्नवदनाम्बुजाय ऐह्येहि आगच्छागच्छ ममाभीष्टं आकर्षय-आकर्षय आवेशय-आवेशय मोहय-मोहय भ्रामय-भ्रामय द्रावय-द्रावय तापय-तापय सिद्धय-सिद्धय बन्धय-बन्धय भाषय-भाषय क्षोभय-क्षोभय भृतप्रेतादि-पिशाचान् मर्दय-मर्दय कुर्दम-कुर्दम पाटय-पाटय मोटय-मोटय गुम्फय-गुम्फय कम्पय-कम्पय ताडय-ताडय त्रोटय-त्रोटय भेदय-भेदय छेदय-छेदय चण्ड-वातोंति वेगाय सन्तत-

गम्भीर-विजृम्भणाय संकर्षय-संकर्षय संक्रामय-संक्रामय प्रवेशय-प्रवेशय स्तोभय-स्तोभय स्तंभय-स्तंभय तोदय-तोदय खेदय-खेदय तर्जय-तर्जय गर्जय-गर्जय नादय-नादय रोदय-रोदय घातय-घातय वेतय-वेतय सकल-रिपु-जनान्छिधि-भिन्धि भिन्दय-भिन्दय अन्धय-अन्धय रून्धय-रून्धय नर्दय-नर्दय बन्धय-बन्धय श्रीं ह्रीं क्लीं कल्याणकारणाय श्मशानानन्द-महाभोगप्रियाय देवदत्तं (अमुकं) आनय-आनय दूनय-दूनय केलय-केलय मेलय-मेलय प्रपन्न वत्सलाय प्रति वदन दहनामृत किरण नयनाय सहस्र कोटि वेताल परिवृताय मम रिपून उच्चाटय-उच्चाटय नेपय-नेपय तापय-तापय सेचय-सेचय मोचय-मोचय लोटय-लोटय स्फोटय-स्फोटय ग्रहण-ग्रहण अनन्त-वासुकि-तक्षक कर्कोटक-पद्म-महापद्म-शङ्ख-गुलिक-महानाग-भूषणाय स्थावर-जङ्गमानां विषं नाशय-नाशय प्राशय-प्राशय भस्मी-कुरु भस्मी-कुरु भक्तजन-वल्लभाय सर्ग-स्थिति-संहारकारणाय कथय-कथय सर्व-शत्रून् उद्रेकय-उद्रेकय विद्वेषय-विद्वेषय उत्सादय उत्सादय बाधय बाधय साधय-साधय दह-दह पच-पच शोषय-शोषय पोषय-पोषय दूरय-दूरय मारय-मारय भक्षय-भक्षय शिक्षय-शिक्षय समस्त-भूतं शिक्षय-शिक्षय श्रीं ह्रीं क्लीं क्ष्म्रयैं अनवरत-ताण्डवाय आपदुद्धारणाय साधुजनान् तोषय-तोषय भूषय-भूषय पालय-पालय शीलय-शीलय काम-क्रोध-लोभ-मोह-मद-मात्सर्यं शमय-शमय दमय-दमय त्रासय-त्रासय शासय-शासय क्षिति-जल-दहन-मरुत-गगन-तरणि-सोमात्म-शरीराय शम-दमोपरति-तितिक्षा-समाधान-श्रद्धां दापय-दापय प्रापय-प्रापय विघ्न-विच्छेदनं कुरु कुरु रक्ष-रक्ष क्ष्म्रयै क्लीं ह्रीं श्रीं ब्रह्मणे स्वाहा।

विधानम् - गुरु-स्मरण एवं इष्ट-देवता-पूजन कर उक्त मंत्र का १०० बार पाठ करें। इससे सभी कार्य सिद्ध होते हैं। साधारण कार्यों हेतु ३ पाठ ही पर्याप्त हैं। अपने गुरु की अनुमति से करें।

॥ शरभहृदय स्तोत्रम् ॥

किसी भी देवता का हृदय मित्र के समान कार्य करता है, शतनाम अंगरक्षक के समान एवं सहस्त्रनाम सेना के समान रखा करता है अतः इनका अलग-अलग महत्व है। भूमिका के अनुसार समुन्द्र मंथन के समय विष्णु ने शरभ हृदय की २१ आवृति ३ मास तक की तब शरभराज प्रकट होकर निर्विघ्नता पूर्वक अमृत पान

करने का आशीर्वाद दिया। शिव ने विष्णु को यह हृदयस्तोत्र बताया।

पुरा नारायणः श्री मान् क्षीराब्धौ मंथने कृते ।
तस्य प्रारंभ समये हृदयं शरभस्य च ॥
प्रातः काले पठेन्नित्यं विंशदावर्तिकं मुदा ।
एवं मासत्रयं कृत्वा प्रादुर्भवति शालुवः ।
ततश्च दण्डबद्भूमिं प्रणम्य च पुनः पुनः ।
तमुत्थाय महातेजा मुर्ध्नि चाघ्राय शालुव ।
संतुष्ट प्रत्युवाचैनं निर्विघ्ननामृतं भवेत् ॥

विनियोग – अस्य श्री शरभहृदय स्तोत्र मंत्रस्य कालाग्नि रुद्र ऋषिः, जगती छन्दः, शरभराज देवता, खां बीजं, महादेव शक्तिः स्वाहा कीलकं इष्टार्थे जपे विनियोगः।

इसके बाद मूल मंत्र के न्यास ध्यान करें।–

॥ स्तोत्रम् ॥

प्रथमं पक्षिराजं च द्वितीयं शरभं तथा ।
तृतीयं शालुवं प्रोक्तं चतुर्थं लोकनायकम् ॥१॥
पंचमं रेणुकानाथं षष्ठंकालाग्नि रुद्रकम् ।
सप्तमं नरसिंहघ्नं अष्टमं विश्वलोचनम् ॥२॥
श्रीं ह्रीं क्लीं नवमं चैव हुं हुं हुं दशमं तथा ।
क्लीं श्रीं क्लीं एकादशं च द्वादशं सर्वमंत्रवित् ॥३॥
त्रयोदशं तु यन्त्रेशं चतुर्दश महाबलम् ।
पञ्चदशं पापनाशं षोडशञ्च करालकम् ॥४॥
सप्तदशं महारौद्रं भीममष्टादशं तथा ।
एकोनविंशं साम्बं च विंशकं शंकरं तथा ॥५॥
विंशोत्तरेक सर्वेशं द्वाविंशं पार्वतीपतिः ।
हुं हुं हुं च त्रयोविंशं चतुर्विंशमनन्तकम् ॥६॥
पञ्चाविंशं वृषारूढं षड्विंशं विश्वलोचनम् ।
त्रिलोचनं सप्तविंशं अष्टाविशं खगेन्द्रकम् ॥७॥
पं पं पं नवविंशं च त्रिंशद्भुजग-भूषणम् ।
लं लं लमेक त्रिंशञ्च द्वात्रिंशं पञ्चवक्त्रकम् ॥८॥

त्रयस्त्रिंशञ्च नन्दञ्च चतुस्त्रिंशमतः परम् ।
भं भं भं भं पञ्चत्रिंशं षट्त्रिंशं षट्त्रिंशं शत्रुनाशनम् ॥९॥
सप्तत्रिंशं स्वयंभूञ्च विश्वेशमष्ट त्रिंशकम् ।
शूलपाणिं नवत्रिंशं चत्वारिंशत् कलाधरम् ॥१०॥
एक चत्वारिंशत् सं सं सं द्विचत्वारिंश हासकम् ।
एतं यशस्यमायुष्यं मंत्रं सर्वार्थदायकम् ॥११॥
अनेक रत्न लम्बानि जटामुकुट धारिणम् ।
अनेक रत्न संयुक्तं सुवर्णाञ्चित मौलिनम् ॥१२॥
तक्षकादि महानाग कुण्डलद्वय शोभितम् ।
कालीं लिखित दुर्गां च पक्षद्वय विराजितम् ॥१३॥
दशायुधधरं दीप्तं दशबाहुं त्रिलोचनम् ।
त्रिपञ्चनयनं पञ्चवक्त्रतुण्डधरं प्रभुम् ॥१४॥
नीलकण्ठामराभोग सर्थहारोपशोभितम् ।
विशालाक्षं च विश्वेशं विश्वमोहनमव्ययम् ॥१५॥
त्रिपुरारिं त्रिशूलादिं धारिणं मृगधारिणम् ।
करालभृकुटिं भीमं शंखतुल्य कपोलकम् ॥१६॥
व्याघ्रचर्माम्बरधरं वाडवाग्नि स्थितोदरम् ।
मृत्यु व्याधिस्थितोरूं च वज्र जानुप्रदेशकम् ॥१७॥
पादपङ्कज युग्मञ्च तीक्ष्णवज्र नखाग्रकम् ।
रणन्नूपुर मञ्जीर झणत्किं किणि कूजितम् ॥१८॥
वज्रतुण्डं महादीप्तं कालकालं कृपानिधिम् ।
एवं ध्यात्वा च हृदयं त्रिंशदावृत्तिकं क्रमात् ॥१९॥
नित्यं जप्त्वा शालुवेशं हृदयं सर्वकामदम् ।
सर्वपुण्यफलं श्रेष्ठं सर्वशत्रुविनाशनम् ॥२०॥
सर्वरोगहरं दिव्य भजतां पापनाशनम् ।
इहैव सकालान् भोगानन्ते शिवपद ब्रजेत ॥२१॥
इत्युक्त्वान्ते तदा देवः शरभपक्षिराजसौ ।
ततोनारायण ध्यात्वा दृष्ट्वा रूपञ्च विस्मितः ॥२२॥

एतत्ते सुभ्रु कथित हृदयं शरभस्य च ।
पठतां श्रृण्वताञ्चैव सर्वमंत्रादिसिद्धिम् ॥२३॥

॥ इति महाशैवतन्त्रे अति रहस्ये आकाशभैरव कल्पे प्रत्क्षसिद्धिप्रदे शरभशालुव पक्षिराज हृदय संपूर्णम् ॥

॥ अथ शरभेशाष्टक स्तोत्रम् ॥

कुण्डलिनी शक्तिका ध्यान करते हुये स्तोत्र का 3 बार पाठ करे।

तडित्कोटि प्रतीकाशां विषतन्तु तनीयसीं। इति कुण्डलिनी ध्यात्वा॥

विनियोगः **अस्य श्री शरभेष्टाक मंत्रस्य कालाग्निरुद्र ऋषिः, जगती छंदः, भगवान श्री शरभेश्वरो देवता, खं बीजं, स्वाहा शक्तिः, चतुर्विध पुरुषार्थ सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादिन्यासः - **कालाग्निरुद्राय ऋषये नमः शिरसि। जगती छन्दसे नमः मुखे। भगवते श्री शरभेश्वराय देवातयै नमः हृदये। खं बीजाय नमः गुह्ये। स्वाहा शक्तये नमः पादयोः। विनियोग नमः सर्वाङ्गे।**

मूलमंत्र से षडङ्गन्यास करे एवं ध्यान करें ।

ध्यानम्—

ज्वलन कुटिलकेशं सूर्यचन्द्राग्नि नेत्रम्,
निशित कर नरखाग्रैर्धूर्म होमादि देहम्
शरभमथ मुनीन्द्रैः स्तूयमानं सिताङ्गम्
प्रणतभय-विनाशं भावये पक्षिराजम् ॥

॥ स्तोत्रम् ॥

ॐ देवाधिदेवाय जगन्मयाय शिवायनालीक निभाननाय ।
शर्वाय भीमय शराधिपाय नमोऽस्तु तुभ्यं शरभेश्वराय ॥१॥
हराय भीमाय हरिप्रियाय भवाय शान्ताय परात्पराय।
मृडाय रुद्राय त्रिलोचनाय नमोऽस्तु तुभ्यं शरभेश्वराय ॥२॥
शीतांशु चूडाय दिगम्बराय सृष्टि स्थिति ध्वंसन कारणाय।
जटाकलापाय जितेन्द्रियाय नमोऽस्तु तुभ्यं शरभेश्वराय ॥३॥
कलंक कण्ठाय भवान्तकाय कपाल शूलाढ्य कराम्बुजाय।
भुजङ्ग भूषाय पुरान्तकाय नमोऽस्तु तुभ्यं शरभेश्वराय ॥४॥

शमादि षट्काय यमान्तकाय यमादि योगाष्टक सिद्धिदाय।
उमाधिनाथाय पुरातनाय नमोऽस्तु तुभ्यं शरभेश्वराय॥५॥
घृणादि पाशाष्टक वर्जिताय लेखी कृतास्मिन् पथिपुङ्गवाय।
गुणादिहीनाय गुणत्रयाय नमोऽस्तु तुभ्यं शरभेश्वराय॥६॥
कलादि वेदामृत कन्दलाय कल्याण कौतूहल कारणाय।
स्थूलाय सूक्ष्माय सूरूपकाय नमोऽस्तु तुभ्यं शरभेश्वराय॥७॥
पंचाननायखिल भासनाय पञ्चाशदर्णाय पराक्षराय।
पंचाक्षरेशाय जगद्धिताय नमोऽस्तु तुभ्यं शरभेश्वराय॥८॥
नीलकण्ठाय रुद्राय शिवाय शशिमौलिने।
भवाय भवनाशाय पक्षिराजाय ते नमः॥९॥
परात्पराय घोराय शंभवे परमात्मने।
शर्बाय निर्मलाङ्गाय शालुवाय नमो नमः॥१०॥
गङ्गाधराय साम्बाय परमानन्द तेजसे।
सर्वेश्वराय शान्ताय शरभाय नमो नमः॥११॥
वरदाय च गङ्गाय वामदेवाय शूलिने।
गिरिशाय गिरिशाय गिरिजापतये नमः॥१२॥
कनक जठर कोद्यद्रक्त पानोन्मेदन प्रथित निखिल पीड़ा
नारसिंहेन जाता। शरभ हर शिवेश त्राहि नः
सर्वपापा दनिशमिह कृपालो शालुवेश प्रभोत्वम्॥१३॥
शरभेश शर्वाधिक शान्तमूर्ते कृतापराधान मरानपायान्।
विनीत विश्व द्विविधायतेन नमोऽस्तु तुभ्यं शरभेश्वराय॥१४॥
दंष्ट्राननोग्रः शरभःसपक्षश्चतुर्भुजश्चाष्ट-भुजश्चर्तुर्विधः।
कोटीर गङ्गेन्दुधरो नृसिंहक्षोभाय ह्यास्मद्रिपुहास्तु शंभुः॥१५॥
हुंकारी शरभेश्वरोष्टचरणः पक्षीचतुर्बाहुकः
पादाकृष्ट निंसह विग्रहधर कालाग्नि कोटिद्युतिः।
विश्वक्षोभहरः सहेतिरनिशं ब्रह्मेन्द्र मुख्यैस्तुतो
गङ्गाचन्द्रधरः पुरत्रय हर सद्यो रिपुघ्नोस्तुमः॥१६॥
मृगङ्गलाङ्गल सुचञ्चुपक्षो दंष्ट्राभिरष्टांघ्रि भुजा सहस्त्रः
त्रिनेत्र गङ्गेन्दुधरः प्रभाढ्यः पायाद पायाच्छरभेश्वरो नः॥१७॥

नृसिंहमृत्युग्रमदिव्यतेजः प्रकाशिनं दानवभङ्गदक्षम्।
प्रशान्तमन्तंविदधाति यो ऽ मेसो ऽ व्यादपायाच्छरभेश्वरो नः ॥१८॥
योऽभृत् सहस्रांशु शतप्रकाशः सपक्ष सिंहाकृतिरष्टपादाः।
नृसिंह संक्षोभ शमात्तरूपः पायादपायाच्छरभेश्वरो नः ॥१९॥
त्वां मन्युमन्तं प्रवदन्ति वेदाः त्वां शांतिमन्तं मुनयो
गृणन्ति दृष्टे नृसिंहे जगदीश्वरेते सर्वापराधंशरभः क्षमस्व ॥२०॥

करचरणकृतं वा कायजं कर्मजं वा
श्रवण नयनजं वा मानसं वापराधम्।
विहितमविहितं वा सर्वमेतत् क्षमस्व,
शिव शिव करुणाब्धे श्रीमहादेव शंभो ॥२१॥

रुद्रः शङ्कर ईश्वरः पुरहरः स्थाणुः कपर्दी शिवो वागीशो
वृषभध्वज स्मरहरी भक्ति प्रियस्त्र्यम्बकः।
भूतेशो जगदीशश्वरश्च शरभो मृत्युंजय श्रीपतिरस्मान्काल
गलोऽवतात् पशुपतिः शंभुः पिनाकीः हरः ॥२२॥
योऽ स्मान्पाहि भगवन्त प्रसीद च पुनः पुनः।
इति स्तुतो महादेवः प्रसन्नो भक्तवत्सलः ॥२३॥
यतो नृसिंह हरसे हर इत्युच्यसे बुधैः।
यतो विभर्ति सकलं विभज्यतनुमष्टधा ॥२४॥
सुरान्नाह्लादयामास वरदानै-रभीप्सितैः।
प्रसन्नोऽस्मि स्तवेनाहमनेन विबुधेश्वराः ॥२५॥
मयिरुद्रे महादेवे भजध्वं भक्ति पूरिताः।
ममांशोऽयं नृसिंहोऽपि मयि भक्ततमोऽस्त्विह ॥२६॥
इयं स्तवं पठेद्यस्तु शरभेष्टाकं नरः।
तस्य नश्यन्ति पापानि रिपवश्चसुरोत्तमाः ॥२७॥
नश्यन्ति सर्वरोगाणि क्षयरोगादिकानि च।
अशेष ग्रह भूतानि कृत्रिमाणि च ज्वराणि च ॥२८॥
सर्व चौरादि शार्दूल गजपोत्रिमुखाणि च।
अन्यानि च वनस्थानि नास्ति भीतिर्न संशयः ॥२९॥

इत्युक्त्वान्तर्दधे देवा देवान्सर्व शालुवः।
ततस्ते स्वस्वधामानि गताश्चाह्लाद पूर्वकम्॥३०॥
एतच्छारभं स्तोत्रं मंत्रंभूतं जपेन्नरः।
सर्वान्कामान वाप्नोति शिवलोकञ्च गच्छति॥३१॥

॥ इति शरभार्चन पद्धति प्रयोगान्तरे शरभाष्टक स्तोत्रं॥

॥ अथ श्रीशरभ दिग्बंधनम् ॥

विनियोगः - अस्य श्रीशरभ दिग्बंधन महामंत्रस्य वामदेव ऋषिः, अति जगती छंदः, शरभशालुव पक्षिराजो देवता, खं बीजं, स्वाहा शक्तिः, क्रों कीलकं शरभ शालुव प्रसाद सिद्धि द्वारा दिग्बंधने विनियोगः।

न्यासः - ॐ खें खां वीर शरभाय- अंगुष्ठाभ्यां नमः।(हृदयाय नमः) खं फट् उग्रशरभाय- तर्जनीभ्यां नमः।(शिरसे स्वाहा) प्राणग्रहासि प्राणग्रहासि हुं फट् क्रूर शरभाय-मध्याभ्यां नमः।(शिखायै वषट्) सर्वशत्रु संहारणाय त्रिशूलशरभाय - अनामिकाभ्यां नमः।(कवचाय हुं) शरभ शालुवेशाय आनंद शरभाय-कनिष्ठिकाभ्यां नमः।(नेत्रत्रयाय वौषट्) पक्षिराज हुं फट् स्वाहा वज्रनख दंष्ट्र शरभाय-करतल.।(अस्त्राय फट्)

ॐ लं वीरशरभाय पूर्वद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥१॥
ॐ रं अग्निशरभाय आग्नेयद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥२॥
ॐ हुं प्रलयकालशरभाय दक्षिणद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥३॥
ॐ शं कपालशरभाय नैऋृत द्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥४॥
ॐ वं प्रचण्डशरभाय पश्चिमद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥५॥
ॐ यं चामुण्ड शरभाय वायव्यद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥६॥

ॐ शं आनंद शरभाय उत्तरद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥७॥
ॐ शं उग्र शरभाय ईशानद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥८॥
ॐ लं कल्याण शरभाय अंतरिक्षद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥९॥
ॐ क्षं प्रलयकालमहाताध्य शरभाय भूमिद्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥१०॥
ॐ फं दक्षाध्वर ध्वंसनशरभाय सर्वदिग्द्वारं बंधय-बंधय
मां रक्ष-रक्ष महायोगीश्वराय हुं फट् स्वाहा ॥११॥
भूतप्रेत पिशाचोच्चाटनाय महाशरभाय सालुव पक्षिराजाय हुं फट् स्वाहा ॥

॥ श्रीशरभ स्तोत्रम् ॥

(चित्तकलाकर्षण स्तोत्रम्)

विनियोग: - श्री गणेशाय नमः। ॐ अस्य श्री चित्कलाकर्षण मन्त्रस्य वामदेव ऋषिः, जगती छन्दः, वीरशरभो देवता, खें बीजं, ह्रीं शक्तिः, फट् कीलकं मम आत्मरक्षणार्थे मम सर्वशत्रुतेजाकर्षणार्थे श्रीवीरशरभेश्वर प्रीत्यर्थे जपे विनियोगः ॥

करन्यास - खां, खीं, खूं, खैं, खौं, खः से हृदयादिन्यास करें।

ध्यानम् :-

दूर्वा श्याम महोग्रं स्फुरदचल धरं चंद्र सूर्याग्नि नेत्रं ॥
चक्रं वज्रं त्रिशूलं शर मुशल गदा शक्त्यभीतिर्वहन्तम् ॥
शंखं खेटं कपालं सधनु हल फणि त्रोट दानादि हस्तं ।
सिंहारि सालुवेशं नमति रिपुजनं प्राण संहारदक्ष ।

पूजन :- पंचतत्त्व मुद्रा प्रदर्शन करें॥

॥ स्तोत्रम् ॥

ॐ नमो वीर शरभ रुद्रावताराय रौद्राति घूर्ण नेत्रत्रयाय खट्वांग परशु डमरु शूल धनुर्बाण शंख खड्ग चक्रहस्ताय ॐ वीर शरभ हरिहर मंत्रादि देवतानां नानाविध स्थावर देवतानां अष्टाष्ट कोटि भूतगणानां सर्व जन्तूनां

अभीष्ट तेजोविग्रहं मम सर्व शत्रून् व्योम केशेन गुरु शक्ति सहितं केशभारं बंधय बंधय ब्रह्मणा परमात्म शक्तिसहितं शिरस्थानं बंधय बंधय इन्द्रेण लक्ष्मीशक्ति सहितं कर्णद्वय बंधय बंधय सोम सूर्याग्निभिरिडा पिंगला शुषम्ना शक्ति सहितं नासापुटं बंधय बंधय यक्षसेन सरस्वति सहितं जिह्वां बंधय बंधय वरुणेन उदान शक्ति सहितं कंठ प्रदेशं बंधय बंधय वायुना प्राण शक्ति सहितं नाभि प्रदेशे बंधय बंधय ईशानेन आधार शक्ति सहितं कटिप्रदेशं बंधय बंधय कालाग्निरुद्रेण व्यानशक्ति सहितं सर्वाङ्गं बंधय बंधय विष्णुना मनोबुद्धिचित्तहंकारशक्ति सहितं अंतःकरण चतुष्टयं बंधय बंधय वसुभिरिच्छा शक्ति सहितं धातून् बंधय बंधय ॐ ऐं ह्रीं श्रीं हूँ फट् जानुद्वयं शृंखलयोपदद्वय बाहूद्वयं बंधय बंधय आकर्षय आकर्षय प्रहारय प्रहारय दाहय दाहय जलेनिमज्जय मज्जय पीड़य पीड़य घातय घातय मम इष्ट देवता पार्श्वे कुरु कुरु मम किं करो भूतं कुरु ॐ खं खें खें खें ह्रीं श्रीं वीरशरभाय फट् फट् फट् स्वाहा॥

॥ फलश्रुति ॥

सिद्ध मंत्रमिदं ख्यातं न जपेर्न च होमकैः॥ एकोच्चारण मात्रेण सर्व सिद्ध्यति तत्क्षणात्॥ वीरशरभ मंत्रेण मंत्रराज मिदं भुवि स्मरणात् वैरिवर्ग तु दाहयेत तृलराशिवत्॥२॥ पंचक्रोश प्रमाणेम परविद्या न भाषते॥ परप्रज्ञापहरणं परकृत्रिमनाशनम्॥ अघोरेषु च मंत्राणां प्रयोगं न भवेत् ततः॥ महाप्रयोग दमनं मेरु मंदार संन्निभम् वैष्णवेषु च मंत्राणां भैरवेषु च मंत्रकम्॥ शक्तिभेदेषु मंत्राणां नाना क्षुद्रादयस्तथा॥ सर्वप्रयोगहरणं एतन्मंत्रं च भूतले॥ नास्ति नास्ति पुर्नास्ति नास्ति तत्सदृशो मनु॥ अस्य मुख शकाशात्तु शापानुग्रह कारकं॥ स्वयं श्री शरभेशश्च वर्तते भूतलेनृणां॥ भूतानां च गणानां च देवतानां नरस्तथा॥ तस्य दर्शन मात्रेण भयं भवति निश्चितं॥ मंडूको भोगिनं दृष्ट्वा मार्जारो मूषकं तथा। पन्नगो गरुड़ं॥ दृष्ट्वा नात्र कार्या विचारणा॥ नित्यं षोडश वारंतु मंत्रं जप्त्वातु यत्नतः स्वयं श्री शरभेशस्यं सारूप लभते ध्रुवम्॥ पुरश्चरणं शोड़ष शतं ॥ एवं श्री आकाश भैरव कल्पे चित्कलाकर्षण मंत्रं शुभम्॥

क्रियाविधि :– पूर्व दिने आरम्भं कृत्वा तत्रस्थाने आसनं पुरश्चरण समाप्ति पर्यन्तं आस्तीर्य॥ यमदिशि मुखं कृत्वा उपविश्य शत्रु प्रतिमा प्रादेश मात्रं पुरुषाकृतिं विलिख्यते॥ प्रतिमा सन्मुखं स्थापयेत्॥ प्रतिमा शिरमध्ये शत्रुनामगोत्रसहितं लिख्यते॥ द्रव्य पुरेतान अक्षतान् साग्रं तण्डुलं गृहीत्वा समंत्रादि वर्णा यथा यथा मंत्र क्रम तत्र तत्र स्थानं ताडयेत्॥ प्रतिभि यथाधिकारे विजयादि बोधं कृत्वा तत्र पुरुश्चरण पाठं

कृत्वा (पादधूलि १) (भाड़धूलि २) (कलाल धूलि ३) (श्मशान धूलि ४) (अश्वशाला धूलि ५) (गजशाला धूलि ६) पुत्तली कृत्वा १६ पाठ कृत्वा। एक पाठ माने ऐसे १६ पाठ २५६ दिन १६ मंत्र, ४०९६ पाठ करें।

॥ निग्रहदारुण सप्तक शरभपक्षिराज स्तोत्रम् ॥

विनियोग: :- अस्य श्री निग्रह दारुण सप्तक माला मन्त्रस्य श्रीसदाशिव ऋषि: वृहती छन्द: श्रीशरभो देवता मम वैरिविनाशार्थे भगवन् श्रीशरभ सालुव पक्षिराज देवता प्रसन्नार्थे जपे विनियोग:।

॥ ध्यानम् ॥

चन्द्रार्काग्निस्त्रिदृष्टि: कुलिशवरनखश्चञ्चलोऽत्युग्र जिह्व:
काली दुर्गा च पक्षौ हृदय जठरगो भैरवो वाडवाग्नि: ।
ऊरूस्थौ व्याधि मृत्यु शरभवरखगश्चण्डवातातिवेग:
संहर्ता सर्वशत्रून् स जयतिशरभ: शालुव: पक्षिराज: ॥

॥ स्तोत्रम् ॥

कोपोद्रेकातिनिर्यन् निखिलपरिचरत् ताम्रभारप्रभूतं
ज्वालामालाग्र दग्धस्मरतनुसकलं त्वामहं शालुवेश
याचे त्वत्पाद पद्मप्रणिहितमनसं द्वेष्टिमां य: क्रियाभि:
तस्यप्राणप्रयाणं परशिवभवत: शूलभिन्नस्य तूर्णम् ॥१॥
शम्भो त्वद्धस्तकुन्तक्षत रिपुहृदयान्नि: स्रवल्लोहितौघं
पीत्वापीत्वाऽतिदीर्घा दिशिदिशि विचरास्त्वद्गणाश्चण्डमुख्या:।
गर्जन्तुक्षिप्रवेगा निखिलजयकरा भीकरा: खेललोला:
संत्रस्ताब्रह्मदेवा: शरभ खगपते त्राहि न: शालुवेश ॥२॥
सर्वाद्यं सर्वनिष्ठं सकलभयकरं त्वत्स्वरूपं हिरण्यं
याचेऽहं त्याममोघं परिकरसहितं द्वेष्टिमां य: क्रियाभि:।
श्रीशम्भो त्वत्कराब्जस्थित कुलिशकराघात वक्ष:स्थलस्य
प्राणा: प्रेतेशदूत ग्रहगणपरिखा: क्रोशपूर्वं प्रयान्तु ॥३॥
द्विष्म: क्षोण्यां वयं हि तव पदकमल ध्यान निर्धूतपापा:
कृत्याकृत्यैर्विमुक्ता विहग कुलपते खेलया बद्धमूर्ते।
तूर्णं त्वत्पादपद्म प्रधृतपरशुना तुण्डखण्डीकृताङ्ग:
सद्द्वेषी यातु याम्यं पुरमति कलुषं कालपाशाग्रबद्ध: ॥४॥

भीम श्रीशालुवेश प्रणतभयहर प्राणजिद् दुर्मदानां
याचेऽहं चास्य वर्ग प्रशमनमिह ते स्वेच्छया बद्धमूर्ते ।
त्वामेवाशु त्वदङ्घ्र्यष्टकनख विलसद्ग्रीवजिह्वोदरस्य
प्राणायान्तु प्रयाणं प्रकटित हृदयस्यायुरल्पायतेश ॥५॥

श्रीशूलं ते कराग्रस्थित - मुसलगदा वृत्तवात्याभिघातात्
यातायातारियूथं त्रिदश विघटनोद्भूतरक्तच्छटार्द्रम् ।सद्दृष्ट्वाऽऽयोधने
ज्यामखिलसुरगणाश्चाशु नंदन्तु-नाना
भूता-वेतालपूगः पिवतु तदखिलं प्रीतचित्तः प्रमत्तः ॥६॥

अल्पं दोर्दण्डबाहु प्रकटित विनमच्चण्ड कोदण्डमुक्तै .
र्बाणैर्दिव्यैरनेकैः शिथिलितवपुषः क्षीणकोलाहलस्य तस्य
प्राणावसानं परशरभ विभोऽहंत्वदिज्या प्रभावैः
तूर्णं पश्यामि यो मां परिहसति सदा त्वादिमध्यान्तहेतो ॥७॥

॥ फलश्रुति ॥

इतिनिशि प्रयतिस्तुनिरासनो यममुखः शिवभावमनुस्मरन् ।
प्रतिदिनं दशवार दिनत्रयं जपति निग्रह दारुणसप्तकम् ॥८॥

इति गुह्यं महाबीजं परमं रिपुनाशनम् ।
भानुवारं समारभ्य मङ्गलान्तं जपेत् सुधीः ॥९॥

[इति श्री आकाशभैरवकल्पे प्रत्यक्ष ।
सिद्धिप्रदे नरसिंहकृता शरभस्तुतिः समाप्ता ॥]

॥ निग्रह दारुण सप्तकम् ॥

(द्वितीय प्रकाराः)

विनियोगः- ॐ अस्य श्री दारुण सप्तक स्तोत्र महामंत्रस्य वामदेव ऋषिः, जगती छन्दः, शरभशालुव कालाग्नि रुद्रो देवता, खं बीजं, ह्रीं शक्तिः, हुं फट् कीलकम् मम ये ये प्रतिकूल कारिणः प्रकट अप्रकट शत्रूणां पलायनार्थे जपे विनियोगः ।

न्यासः- ॐ ह्रां खां अंगुष्ठाभ्यां नमः । ह्रीं खीं तर्जनीभ्या नमः ।ॐ ह्रूं खूं मध्यमाभ्यां नमः । ॐ ह्रैं खैं अनामिकाभ्यां नमः । ॐह्रौंखौं कनिष्ठिकाभ्या नमः । ॐह्रः खः करतल करपृष्ठाभ्यां नमः ।

इसी तरह हृदयादि न्यास करें ।

॥ ध्यानम् ॥

चन्द्रार्काग्निस्त्रिदृष्टिः कुलिशवरनखश्चञ्चलोऽत्युग्र जिह्वः ।
काली दुर्गा च पक्षौ हृदय जठरगो भैरवो वाडवाग्निः ॥
ऊरूस्थौ-व्याधिमृत्यु शरभ वरखगरचश्चण्ड-वातातिवेगः ।
संहर्ता-सर्वशत्रून स जयति शरभः शालुवः पक्षिराजः ॥१ ॥

॥ स्तोत्रम् ॥

॥ ईश्वर उवाच ॥

ॐ खें खां घ्रां घ्रं ह्रां हं फट् सर्वशत्रुसंहारणाय शरभ शालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्री दें खीं व खीं दं खं तममुकनामान शत्रुं नाशय, ॐ श्रीं पशुं हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फें फं घृणे हुं फट्।

कोपोद्रेकातिनिर्यन् निखिलपरिचरत् ताम्रभारप्रभृतं
ज्वालामालाग्र दग्धस्मरतनुसकलं त्वामहं शालुवेश
याचे त्वत्पाद पद्मप्रणिहितमनसं द्वेष्टिमां यः क्रियाभिः
तस्यप्राणप्रयाणं परशिवभवतः शूलभिन्नस्य तूर्णम् ॥

ॐ नमो भगवते वाडवनल भैरवाय ज्वल ज्वल वैरिकुलं दह दह वर्म वर्म ठः ठः सर्वशत्रूणामुच्चाटनं कुरु हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् ॥१ ॥

ॐ खें खां घ्रां घ्रं ह्रां हं फट् सर्वशत्रुसंहारणाय शरभ शालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्री दें खीं व खीं दं खं तममुकनामान शत्रुं नाशय, ॐ श्रीं पशुं हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फें फं घृणे हुं फट्।

शम्भो त्वद्धस्तकुन्तक्षत रिपुहृदयान्निः स्त्रवल्लोहितौघं
पीत्वापीत्वाऽतिदीर्घा दिशिदिशि विचरास्त्वद्गणाश्चण्डमुख्याः ।
गर्जन्तुक्षिप्रवेगा निखिलजयकरा भीकराः खेललोलाः
संत्रस्ताब्रह्मदेवाः शरभ खगपते त्राहि नः शालुवेश ॥

ॐ नमो भगवते वाडवनल भैरवाय ज्वल ज्वल वैरिकुलं दह दह वर्म वर्म ठः ठः सर्वशत्रूणामुच्चाटनं कुरु हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् ॥२ ॥

ॐ खें खां घ्रां घ्रं ह्रां हं फट् सर्वशत्रुसंहारणाय शरभ शालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्री दें खीं व खीं दं खं तममुकनामान शत्रुं नाशय, ॐ श्रीं पशुं हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फें फं घृणे हुं फट्।

सर्वाद्यं सर्वनिष्ठं सकलभयकरं त्वत्स्वरूपं हिरण्यं
याचेऽहं त्वाममोघं परिकरसहितं द्वेष्टिमां यः क्रियाभिः।
श्रीशम्भो त्वत्कराब्जस्थित कुलिशकराघात वक्षःस्थलस्य
प्राणाः प्रेतेशदूत ग्रहगणपरिखाः क्रोशपूर्वं प्रयान्तु ॥

ॐ नमो भगवते वाडवनल भैरवाय ज्वल ज्वल वैरिकुलं दह दह वर्म वर्म ठः ठः सर्वशत्रूणामुच्चाटनं कुरु हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् ॥३॥

ॐ खें खां घ्रां घ्रं ह्रां हं फट् सर्वशत्रुसंहारणाय शरभ शालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्री दें खीं व खीं दं खं तममुकनामान शत्रुं नाशय, ॐ श्रीं पशुं हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फें फं घृणे हुं फट्।

द्विष्मः क्षोण्यां वयं हि तव पदकमल ध्यान निर्धूतपापाः
कृत्याकृत्यैर्विमुक्ता विहग कुलपते खेलया बद्धमूर्ते।
तूर्णं त्वत्पादपद्म प्रधृतपरशुना तुण्डखण्डीकृताङ्गः
सद्द्वेषी यातु याम्यं पुरमति कलुषं कालपाशाग्रबद्धः ॥

ॐ नमो भगवते वाडवनल भैरवाय ज्वल ज्वल वैरिकुलं दह दह वर्म वर्म ठः ठः सर्वशत्रूणामुच्चाटनं कुरु हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् ॥४॥

ॐ खें खां घ्रां घ्रं ह्रां हं फट् सर्वशत्रुसंहारणाय शरभ शालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्री दें खीं व खीं दं खं तममुकनामान शत्रुं नाशय, ॐ श्रीं पशुं हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फें फं घृणे हुं फट्।

भीम श्रीशालुवेश प्रणतभयहर प्राणजिद् दुर्मदानां
याचेऽहं चास्य वर्ग प्रशमनमिह ते स्वेच्छया बद्धमूर्ते ।
त्वामेवाशु त्वदङ्घ्र्यष्टकनख विलसद्ग्रीवजिह्वोदरस्य
प्राणायान्तु प्रयाणं प्रकटित हृदयस्यायुरल्पायतेश ॥

ॐ नमो भगवते वाडवनल भैरवाय ज्वल ज्वल वैरिकुलं दह दह वर्म वर्म ठः ठः सर्वशत्रूणामुच्चाटनं कुरु हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् ।।५ ।।

ॐ खें खां घ्रां घ्रं ह्रां हं फट् सर्वशत्रुसंहारणाय शरभ शालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्री दें खीं व खीं दं खं तममुकनामान शत्रुं नाशय, ॐ श्लीं पशुं हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फें फं घृणे हुं फट्।

श्रीशूलं ते कराग्रस्थित - मुसलगदा वृत्तवात्याभिघातात्
यातायातारियूथं त्रिदश विघटनोद्भूतरक्तच्छटार्द्रम् ।सद्दष्ट्राऽऽयोधने
ज्यामखिलसुरगणाश्चाशु नंदन्तु-नाना
भूता-वेतालपूगः पिवतु तदखिलं प्रीतचित्तः प्रमत्तः ।।

ॐ नमो भगवते वाडवनल भैरवाय ज्वल ज्वल वैरिकुलं दह दह वर्म वर्म ठः ठः सर्वशत्रूणामुच्चाटनं कुरु हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् ।।६ ।।

ॐ खें खां घ्रां घ्रं ह्रां हं फट् सर्वशत्रुसंहारणाय शरभ शालुवाय कालाग्नि रुद्राय पक्षिराजाय हुं फट् स्वाहा ह्री दें खीं व खीं दं खं तममुकनामान शत्रुं नाशय, ॐ श्लीं पशुं हुं फट् घ्राण्येव हुं फट् तं शीघ्रं नाशय स्वाहा सर्वज्ञ ॐ ह्रीं खें खें फें फं घृणे हुं फट्।

अल्पं दोर्दण्डबाहु प्रकटित विनमच्चण्ड कोदण्डमुक्तै
र्बाणैर्दिव्यैरनेकैः शिथिलितवपुषः क्षीणकोलाहलस्य तस्य
प्राणावसानं परशरभ विभोऽहंत्वदिज्या प्रभावैः
तूर्णं पश्यामि यो मां परिहसति सदा त्वादिमध्यान्तहेतो ।।

ॐ नमो भगवते वाडवनल भैरवाय ज्वल ज्वल वैरिकुलं दह दह वर्म वर्म ठः ठः सर्वशत्रूणामुच्चाटनं कुरु हुं फट् सर्वज्ञ ॐ ह्रीं खें खें फं घृणे हुं फट् ।।७ ।।

॥ फलश्रुति ॥

इतिनिशि प्रयतिस्तुनिरासनो यममुखः शिवभावमनुस्मरन् ।
प्रतिदिनं दशवार दिनत्रयं जपति निग्रह दारुणसप्तकम् ।।८ ।।

इति गुह्यं महाबीजं परमं रिपुनाशनम् ।
भानुवारं समारभ्य मङ्गलान्तं जपेत् सुधीः ।।९ ।।

[इति श्री आकाशभैरवकल्पे प्रत्यक्ष ।
सिद्धिप्रदे नरसिंहकृता शरभस्तुतिः समाप्ता ॥]
॥ इति आकाश भैरव कल्पे प्रत्यक्ष सिद्धिप्रदे नृसिंहकृते शरभस्तुतिः समाप्ता ॥

॥ श्री शरभ कवचम् ॥

॥ श्रीदेव्युवाच ॥

सर्वज्ञ सर्वमंत्रस्य सर्वाचार्य शिव प्रभो ।
शरभं कवचं दिव्यं सर्व रक्षाकरं परम् ॥
वज्रपञ्जर नामाख्यं वद मे करुणाकर ।

॥ श्री ईश्वरोवाच ॥

वक्ष्यामि शृणु देवेशि सर्व लक्षणमद्भुतम् ।
शरभं कवचं नाम्ना चतुर्वर्ग फलप्रदम् ॥

विनियोगः - ॐ अस्य श्री शरभ शालुव पक्षिराजाख्य कवचस्य सदाशिव ऋषिः, बृहस्पति छन्दः, श्री शरभेश्वरो देवताः, प्रणवो बीजं, प्रकृतिः शक्तिः, अव्यक्तं कीलकं, चतुर्वर्ग फल प्राप्त्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - शिरसि सदाशिवाय ऋषये नमः। मुखे बृहस्पत्यै छन्दसे नमः। हृदि श्री शरभेश्वराय दैवतायै नमः। गुह्ये ॐ बीजाय नमः। पादयोः प्रकृत्यै शक्तये नमः। नाभौ अव्यक्त कीलकाय नमः। सर्वाङ्गे चतुर्वर्ग फल प्राप्त्यर्थे विनियोगाय नमः।

करन्यास एवं अंगन्यासः- खां खीं खूं खैं खौं खः से पूर्व की भाँति करे।

ध्यानम् :-

रत्नाभं सुप्रसन्नं त्रिनयनममृतोन्मत्त भूषाभिरामम् ।
कारुण्याम्बोधिमीशं वरदमभयदं चन्द्ररेखावतंशम् ॥
शंखाध्माताखिलाशा प्रतिहतविधिना भासमानात्मभासम् ।
सर्वेशं शालुवेशं प्रणतभयहरं पक्षिराजं नमामि ॥

मानस पूजन- पूर्व की भांति करें।

॥ श्री महारुद्राय नमः ॥

ॐ श्री शिवः पुरतः पातु मायाधीशस्तु पृष्ठतः ।
पिनाकी दक्षिणं पातु वामपार्श्वं महेश्वरः ॥१॥
शिखाग्रं पातु मे शम्भु निर्टिलं पातु शंकरः ।
ईश्वरो वदनं पातु भ्रुवोर्मध्यं पुरान्तकः ॥२॥
भ्रुवो पातु मम स्थाणुः कपर्दी पातु लोचने ।
शर्वो मे श्रोत्रयोः पातु वागीशः पातु लम्बिकाम् ॥३॥
नासायोर्मे वृषारूढो नासाग्रं वृषभध्वजः ।
स्मरारिः पातु मे ताल्वेरोष्ठयोर्भक्त वत्सलः ॥४॥
जिह्वां मम सदा पातु सर्व विद्या प्रदायकः ।
पातु मृत्युञ्जयोदन्ताश्चिबुकं पातु भूतराट् ॥५॥
परामेशः कपोलौ मे त्रिकं पातु कपालभृत् ।
कण्ठं पशुपतिः पातु शूली पातु हनू मम ॥६॥
स्कन्धद्वयं हरः पातु धूर्जटिः पातु मे भुजौ ।
भुजद्वयं महादेवं ईशानो मम कर्पूरम् ॥७॥
मुष्टिसन्धि जगन्नाथ प्रकोष्ठौ चन्द्रशेखरः ।
मणिबन्धं त्रिनेत्रो मे भीमः पातु करस्तलम् ॥८॥
करपृष्ठं मृडः पातु रुद्रोऽगुष्ठद्वयं मम ।
उमासहायस्तर्जन्यौ भर्गो मे पातु मध्यमे ॥९॥
अनामिके करालस्य कालकण्ठः कनिष्ठिके ।
गंगाधरोंऽगुलीपर्वाण्य प्रमेयो नखानि मे ॥१०॥
ईशानः पातुदोर्मूलं मेदो मे स्वस्तिदोऽवतु ।
वक्षस्तत्पुरुषः पातु कुक्षौ दक्षाध्वरान्तकः ॥११॥
अघोरो हृदयं पातु वामदेव स्तनद्वयम् ।
भालदृक् जठरं पातु नाभिं नारायण प्रियः ॥१२॥
कुक्षिं प्रजाकरः पातु कुक्षिं पार्श्वं महाबलः ।
सद्योजातः कटिं पातु पृष्ठ भागं तु भैरवः ॥१३॥
मोहनोजघनं पातु गुदं मम जितेन्द्रियः ।
ऊर्ध्वरेता लिंगदेशे वृषणं वृषभध्वजः ॥१४॥

ऊरुद्वयं भवः पातु जानुयुग्मं भवान्तकः ।
हुंकार पातु मे जंघे फट्कारो मम गुल्फके ॥१५॥
वषट्कारः पाद पृष्ठं वौषट्कारोंऽघ्रिणस्तले ।
स्वाहाकारोंऽगुलीर्पार्श्वे स्वधाकरोंऽगुली र्मम ॥१६॥
त्वरितः सर्व सन्धिन्मे रोमकूपे नृसिंहाजित् ।
त्वचं पातु मनोवेगः कालजिद् रुधिरं मम ॥१७॥
पुष्टिदः पातु मे मांस मेदो मे स्वस्तिदोऽवतु ।
सर्वात्मास्थिञ्चयं पातु मज्जां मम जगत्प्रभुः ॥१८॥
शुक्रं वृद्धिकरः पातु बुद्धिं वाचामधीश्वरः ।
मूलाधाराम्बुजं पातु भगवान् शरभेश्वरः ॥१९॥
स्वाधिष्ठानमजः पातु मणिपूरं हरिप्रियः ।
अनाहतं शालुवेशो विशुद्धं जीवनायकः ॥२०॥
सर्वज्ञानप्रदो देवो ललाटं मे सदाशिवः ।
ब्रह्मरन्ध्रं महादेवः पक्षिराजोऽखिलाकृतिम् ॥२१॥
सर्वलोक वशीकारः पातु मां खरगर्वजित् ।
वज्र-मुष्टि-वराभीति हस्तः कालाग्नि सन्निभः ॥२२॥
विजया सहितः पातु चैन्द्रीं ककुभमाग्निजित् ।
शक्ति-शूल-कपालासिहस्तः सौदामिनी प्रभः ॥२३॥
जयायुतो महा-भीमः पातु वैश्वानरीं दिशाम् ।
दण्डासि-शूल-मुसलं हाल पाशांकुश-कराम्बुजः ॥२४॥
यमान्तकोऽजितायुक्तोयाम्यीं पातु दिशं यमीम् ।
खड्ग-खेटाग्नि-परशु हस्तः शत्रु विमर्दनः ॥२५॥
अपराजितया युक्तः सदाव्यान्नैर्ऋतिं दिशम् ।
पाशांकुश-धनुर्बाण-पाणिः श्रेणी मुखाग्रगः ॥२६॥
हरिद्राभौऽनिशं पायाद्वारुणीं दिशमात्मजित् ।
ध्वजाग्र कवचोदार भुजो दुर्गायुतः खगः ॥२७॥
चण्डवेगः शिवः पायात्सततं मारुतीं दिशम् ।
गदाक्षस्त्रग्वराभीति करम्भोजः शिवायुतः ॥२८॥

कनकाभो महातेजाः पातु कौबेरकी दिशम् ।
त्रिशूलहि-कपालाग्रिदोः स्तलो विद्यायायुतः ॥२९॥
भस्मोद्धूलित सर्वांगो दिशं पात्वपराजिताम् ।
जपाक्ष-पुस्तकां भोज कमण्डलुं कराम्बुजः ॥३०॥
ऊर्ध्वं पातु गिरायुक्तः सर्वभूत हितेरतः ।
शंखं-चक्रं-गदाऽभीति-हस्तः पद्मायुतोऽव्ययः ॥३१॥
नीलाञ्जन समोनीलः पातालं पात्वनारतम् ।
अनुक्त विदिशः पातु शलवो नृसिंहजित् ॥३२॥
शरभः पातु संग्रामे युद्धे वैरिकुलान्तकः ।
सर्व सौभाग्यदः पातु जाग्रत्स्वप्न-सुषुप्तिषु ॥३३॥
सर्व सम्पत्प्रदः पातु धनाध्यक्षादिकं मम ।
सतानदः सुतान्पातु पुत्रानायुष्करोऽनिशम् ॥३४॥
बन्धुन्वृद्धिकरः पातु गृहं मम वशं करः ।
ग्रामं ग्रामेश्वरः पातु राज्यं मम दिगम्बरः ॥३६॥
राष्ट्रं शान्तिकरः पातु राजानं धर्मदायकः ।
मार्गं दुष्टहरः पातु मम कार्याणि भैरवः ॥३७॥
बटुकः पातु मे सर्वं त्र्यवस्थासु भयेषु च ।
स्पर्श-वीक्षण-संयुक्तः प्राणरक्षां मनोजवः ॥३८॥
प्रधानमूर्ति भावश्च प्रसादेष्वाशु सिद्धिकृत् ।
साधकः प्रणवं माया बीजं नमो भगवतेति च ॥
प्रतिनाम चतुर्थ्यतं स्पर्श इत्यभिधीयते ।
द्विर्ज्वल-प्रज्वले साध्यं साधय द्विर्द्विरक्ष तत् ॥३९॥
सर्वदुष्टेभ्यो हुं फट् स्वाहान्तं युग्-वीक्षणम् ।
स्पृशन् पश्यन् जपं कृत्वा प्रतिस्थानं समाहितः ॥४०॥
प्रार्थयेदखिलं स्वेष्टं हृदिस्थं शालुवेश्वरम् ।
ये ग्राम घातकाः क्रूराः कपटा दौष्टिका भटाः ॥४१॥
तस्कराः शत्रवो क्रुद्धा वधे सक्ताः पलाशनाः ।
छद्मचारः विदोभ्रष्टा दिवाचर-निशाचराः ॥४२॥

ते सर्वे पक्षिराजस्य पक्षवात पराहताः ।
स्त्री-बाल-सहिताः क्षिप्रं पितृ-मातृ कुलान्विताः ॥४३॥
भग्नचित्ता गतप्राणाः यान्तु देशान्तरं स्वयम् ।
ये च दुष्टग्रहाः शक्ताः पिशाचा देवयोनयः ॥४४॥
चतुः षष्टिगणाः सप्तसप्तत्युन्मादका ग्रहाः ।
अष्टाशीति महाभूताः सप्तकोटि महाग्रहाः ॥४५॥
नवति ज्वर भेदाश्च शत-भेदाश्च कृत्तिकाः ।
पञ्चाशद् गणनाथाश्च नियुताः कृत्रिम ग्रहाः ॥४६॥
प्रेतारूढास्त्रयस्त्रिंशत्पिण्डान परायणाः ।
अयुतं क्षुद्र-भेदाश्च चत्वारिंशच्छिवाह्वयाः ॥४७॥
द्वात्रिंशद्वह्निवक्त्राश्च विंशन्मार्जार वक्त्रकाः ।
चतुः षष्ट्याखुरूपाश्च ये चान्ये क्षुद्रयोनयः ॥४८॥
ते सर्वे शालुवेशस्य शंखं-निःस्वन-मोहिताः ।
विषण्णाः स्खलिताः शान्ताः प्राणः-त्राण-परायणाः ॥४९॥
गच्छन्तु सम्प्रयोत्कारो देशान्तरमनिच्छया ।
ये चान्येवनजा ग्राम्याः शुनकोरगवृश्चिकाः ॥५०॥
आशीविषाः शिवा व्याला व्याघ्र-ऋक्षेभ सूकराः ।
गृध्राः श्येनाः खगाः काकाः दंशका भ्रंशका मृगाः ॥५१॥
एते शरभहस्ताग्र-नख-क्षत-विमोक्षगाः ।
स्त्रवद्रक्त छटासिक्ताः शिलातल निताडिताः ॥५२॥
सम्भेदिता नखैः शीघ्रं नश्यंत्वखिल दुश्चराः ।
न दंशत्पुरगाः क्वापि वातोतिवक्षितु ॥५३॥
न दहत्वसवो वह्निरायात्वापो न चाधिकाः ।
न वर्षत्वतिवृष्टिश्च न पतत्व शनिः क्वचित् ॥५४॥
नाक्रामत्वपमृत्युश्च न रोगानाशुभं क्वचित् ।
न म्रियते भञ्जनो न भवत्वशुभं क्वचित् ॥५५॥
न वदन्त्वसहो वाक्यं जन्तवो मम देशके ।
नास्याद्वैरं च जन्तूनां अन्येषां राजके मम ॥५६॥

भवन्तु सुखिनः सर्वे-सर्वे सन्तु पतिव्रताः ।
सर्वाः सूयन्तां सत्पुत्रान्पुत्रीश्च शुभ लक्षणाः ॥५७॥
सर्वे सर्वाश्च नंदन्तु सन्तु सम्कल्याणकारकाः ।
राजन्वती मही चास्तु राजा भवतु धार्मिकः ॥५८॥
सम्स्त्रंवन्तु पयोगावः फलंत्वोषध्योऽधिकम् ।
भवन्तु फलदा वृक्षाः सिद्धिर्भवतु मेऽखिला ॥५९॥
ममास्तु तरसा नूनमात्माज्ञानं चञ्चलम् ।
काम-क्रोध-महा-मोह-लोभ सम्मोह मत्सराः ॥६०॥
न सन्तु भगवन्क्वापि सर्वेश करुणानिधे ।
श्रीशरभेश्वर विश्वेश पक्षिराज दयानिधे ॥६१॥
देहि मे निश्चलां भक्तिं प्रणतोऽस्मि पुनः पुनः ।
गौरी वल्लभ कामारे कालकूटविषादन ॥६२॥
मामुद्धरापदंभोधेस्त्रिपुरहनांतकान्तक ।
शालुवेश जगन्नाथ सर्वभूतहिते रत ॥६३॥
पाहि मां तरसा चौरान् दुष्टानाशय नाशय ।
कालभैरव विश्वेशं विश्व रक्षा परायण ॥६४॥
रक्ष मूषक-चौरेभ्यो धान्यराशिमिमं प्रभो ।
पक्षिराज महा-देवप्रणतार्ति विनाशन ॥६५॥
मदीयानि पदार्थानि नित्यं पालय-पालय ।
सर्वज्ञ सर्वलोकेश सर्वदुष्ट विनाशका ॥६६॥
तस्करेण हृतं वस्तु द्रुतं दापय दापय ।
ये च मे वादिनो दिक्ष क्षद्रोपद्रवकारकाः ॥६७॥
सर्वाचार-परिभ्रष्टा मानहीनाश्च रोधकाः ।
ते सर्वे शालुवेशस्य मुसलायुध चूर्णिताः ॥६८॥
नश्यन्तु निमिषार्धेन पावकावृत्ततूलवत् ।
ये जन द्रोहिणोल्पाश्च तत्कालेऽहित भाषिणः ॥६९॥
सत्कर्म विघ्नकर्तारः शान्त भक्षपरायाणाः ।
तु शालुवेश हस्ताग्र-खड्गनिर्भिन्नदेहिनः ॥
पतन्तु भूतले याम्यां प्राणास्तेषां प्रयांत्वलम्
[illegible] श्गन निर्दग्धान्यायत्केश्चार्थ मंत्रिणः

महां द्रुहांति ये तेषां विभवानि क्षयंत्वरम् ।
त्वदाचार परं भक्तं साधकानां विवेकिनम् ॥७२॥
ये चाक्रमन्ति संग्रामे ते गच्छन्तु पराहताः ।
त्वदीयेनैव मार्गेण संचरन्तं जपातुरम् ॥७३॥
ये वदन्ति परीवादं भ्रान्ताः शीघ्रं भवन्तु ते ।
त्वद्दसममलं वीरं ये मां तर्जते बलात् ॥७४॥
मनसा ये न मन्यन्ते तत्स्वान्तं भ्राम्यतु क्षणात् ।
मनसा कर्मणा वाचा ये इत्यंत्पतिदुःसहम् ॥७५॥
ते महारोग शोकाद्यैः पतंत्वाशु शिवाज्ञया ।
मदीयानि पदार्थानि गृहीन्तु योऽवलोकते ॥७६॥
तत्क्षणादेव नष्टार्थो भवत्वादीश्वराज्ञया ।
मदीयं द्रव्यमादय ये गच्छन्तिह तस्कराः ॥७७॥
सिंहारि-पाश-सम्बद्धास्ते गच्छन्तु प्रदक्षिणम् ।
सीमातीताश्च ये चौरा गृहीतद्रव्य संचयाः ॥७८॥
अवशावयवास्तेन तु आगच्छन्तु शिवाज्ञया ।
तस्करा निम्नगास्वान्त-धान्य-वस्त्र-धनादिकाः ॥७९॥
पक्षिराज पराकृष्टाः समागच्छन्तुतेद्रुतम् ।
समाहृत पदार्था ये देशातीताश्च तस्कराः ॥८०॥
शरभेश-हलाकृष्टा तस्यागच्छन्तु सानुगाः ।
चौरा गृहीतुमुद्युक्ताः समागच्छन्ति मां गृहे ॥८१॥
ते शालुवेशपक्षोत्थ वातैर्गच्छन्तु सत्वरम् ।
शान्तं विवेकिनं भक्तं त्वदांघ्रि ध्यानतत्परम् ॥८२॥
दुह्यन्ति ये सहप्राणास्तेसं यान्तु यमां पुरीम् ।
षट्त्रिंशत्कोष्ठके यन्त्रे रेखाशूलाग्र मध्यमे ॥८३॥
स्वेच्छा मंत्रं लिखित्वा तु जपेदाराध्य साधकः ।
मध्ये पाशांकुशे वह्नि साध्य नाम लिखित्क्रमात् ॥८४॥
उदङ्मुखः सहस्त्रन्तु रक्षणाय जपेन्निशि ।
नष्टाहरणके पञ्चरात्रं पश्चिमादिङ्मुखः ॥८५॥

मारणे सप्तरात्रं तु दक्षिणोभिमुखो जपेत् ।
रोगानिग्रहणे चाष्टरात्रमाग्नेयदिङ्मुखः ॥८६॥
इति गुह्यं महा-मंत्र परमं सर्वसिद्धिदम् ।
शरभेशाख्य-कवचं चतुर्वर्ग फलप्रदम् ॥८७॥
प्रत्यहं प्रतिपक्षं वा प्रतिमास मथापि वा ।
यो जपेत्प्रतिवर्ष वा वरेण्यः स शिवो भवेत् ॥८८॥
एवं हि जपतः पुंसः पातकं चोपातकम् ।
सर्व विलयमाप्नोति रविणा तिमिर यथा ॥८९॥
दशाब्दं यो जपेन्नित्यं प्रातरूत्थाय साधकः ।
सर्वसिद्धि समाश्रित्य देहान्ते स शिवो भवेत् ॥९०॥
त्रिकालं ध्यानपूर्वं तु जपेद् द्वादश-वार्षिकम् ।
कायेनानेन सो देवि जीवन्मुक्तो भवेन्नरः ॥९१॥
शतवारं जपेन्नित्यं मण्डलं यो वरानने ।
सोऽणिमादि गुणान् प्राप्य विचरेत्स्वेच्छया सदा ॥९२॥
अतलादिधरण्यादि भुवनानि चतुर्दश ।
विचरेत्कामवित्सर्वैः पूज्यमानो यथासुखम् ॥९३॥
त्रि-मासं यो जपन्नित्यमष्टोत्तर सहस्त्रकम् ।
सहसा शरभेशस्य स्वरूपं लभतेऽम्बिके ॥९४॥
षण्मासं यो जपेद्देवि प्रयतस्तु दृढव्रतः ।
मद्रूपधारकैर्मर्त्यैः सह सिद्धि प्रदायकैः ॥९५॥
मम लोके च सम्पूज्यो विष्णुलोके तथैव च ।
ब्रह्मलोके च रमते सर्वत्र न निवार्य्यते ॥९६॥
इन्द्राग्नियम रक्षेश जलेश पवनैः सदा ।
सोमेशानक लक्ष्मीशैर्द्दिशांपालैश्च पूज्यते ॥९७॥
आदित्य सोम-पृथ्वीश-बुध-श्रीगुरु-भार्गवैः ।
पूज्यते स ग्रहैः सर्वैः शनि-राहु-केतुभिः ॥९८॥
भृग्वंगिरः पुलस्त्यैश्च पुलहात्रि-मरीचिभिः ।
दक्ष-काश्यप-भृगवादियोगिभिश्च पूज्यते ॥९९॥

भैरवैर्वसुभी रूद्रैरादित्यैर्गाणपत्यकैः ।
दिग्गजैश्च महानागैर्दिव्यास्त्रै र्दिव्य वाहनैः ॥१००॥
माहेश्वरैर्महारत्नैः कामधेनु सुरद्रुमैः ।
सरिद्भिः सागरैः शैलैर्देवताभिस्तपोधनैः ॥१०१॥
दानवै राक्षसैः क्रूरैः सिद्ध-गन्धर्व-किन्नरैः ।
यक्षैर्विद्याधरैर्नागैरप्सरोभिः प्रपूज्यते ॥१०२॥
अपस्मार ग्रहैर्भीमैरून्मत्तैर्ब्रह्मराक्षसैः ।
वेतालैः खेचरैर्मर्त्यैः कूष्माण्डै राक्षस ग्रहैः ॥१०३॥
व्यालवत्क्रतमोहारैः स्त्रीग्रहैः पा [illegible]ग्रहैः ।
भूत-प्रेत-पिशाचाद्यैर्ग्रहैः सर्वत्र पूज्यते ॥१०४॥
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च जातिभिः ।
पशु-पक्षि-मृग-व्यालैः पूज्यते सर्वजन्तुभिः ॥१०५॥
किमत्र बहुना देविः तव वक्ष्ये यथा तथम् ।
मया च विष्णुना चैव विश्वकर्त्रा च पाल्यते ॥१०६॥
भवान्या च गिरा लक्ष्म्या ब्राह्मण्याद्यष्ट मातृभिः ।
प्राणेश्वरादि योगीन्द्रैर्योगिनीभिः स पाल्यते ॥१०७॥
य इदं पूजयेद्भक्त्या तस्यासाध्यं न विद्यते ।
कवचेन्द्रं महामंत्र जपेत्तस्मादनुत्तमम् ॥१०८॥
उच्चाटने मरुद्वक्त्रो विद्वेषे राक्षसाननः ।
प्रागाननोऽभिवृद्धौ तु सर्वेष्वीशानदिङ्मुखः ॥१०९॥
यो जपेत्कवचं नित्यं त्रिकाल ध्यान पूर्वकम् ।
सर्वसिद्धिमवाप्नोति सहसा साधकोत्तमः ॥११०॥

॥ श्रीदेव्युवाच ॥

देव-देव महा-देव शिव कारुण्यवारिधे ।
पाहि मां प्रणतं स्वामिन्प्रसीद परमेश्वर ॥१११॥
सर्वार्थसाधनोपाय सर्वेश्वर्य-प्रदायक ।
समस्तापत्प्रतीकार चन्द्रशेखर ते नमः ॥११२॥
यत्कृत्यं तन्न कृतं यद कृत्यं तत्कृत्य वदाचरितम् ।
उभयोः प्रायश्चितं शिव तव नामाक्षरोच्चरितम् ॥११३॥

॥ श्री शरभ-कवचं सम्पूर्णम् ॥

॥ श्री शरभेश्वर शतनाम–स्तोत्र ॥

विनियोग: ॐ अस्य श्री शरभेश्वर शतनाम-स्तोत्र मंत्रस्य, अघोर ऋषि:, अमृत गायत्रीछन्द:, महावीर शरभेश्वरो देवता, शरभेश्वर प्रीत्यर्थे जपे विनियोग:।

ऋष्यादिन्यास: - ॐ अघोर ऋषये नम: शिरसि। अमृत गायत्री छन्दसे नम: मुखे। महावीर शरभेश्वर देवतायै नम: हृदये। शरभेश्वर प्रीत्यर्थे जपे विनियोगाय नम: सर्वाङ्गे।

करन्यास एवं अंगन्यास: - खां, खीं, खूं, खैं, खौं, ख: से पूर्व की भाँति करे।

चन्द्रार्काग्निस्त्रि- दृष्टि....... से ध्यान व पूर्व की भाँति मानस पूजन भी करे।

॥ श्री नृसिंह उवाच ॥

ॐ नम: शिवाय शान्ताय शंकारयार्त्ति हारिणे ।
मयस्कराय पक्षीणाम्पतये शरभात्मने ॥१ ॥
अंबिकापतये तुभ्यमुमायापतये नम: ।
जाताय वहुधा लाके प्रभूताय नमो नम: ॥२ ॥
रूद्राय नीलरूद्राय वटुभद्राय चेतसे नम: ।
मीष्ढुष्टमाय देवाय शिपिविष्टायते नम: ॥३ ॥
नाराय च सुताराय तारणाय नमो नम: ।
हरिकेशाय देवाय शाम्भवेमदशत्रवे ॥४ ॥
देवानां शम्भवे तुभ्यं मन्यवे रुदरूपिणे ।
कपर्द्दिने नमस्तुभ्यं कालकण्ठाय ते नम: ॥५ ॥
हिरण्याय नमस्तुभ्यं श्रीकण्ठाय नमो नम: ।
नमो डमरू-त्रिशूलाय उग्राय च नमो नम: ॥६ ॥
भीमाय भीम रूपाय धर्मरूपाय ते नम: ।
भस्मदाय शरीराय कमण्डलु धराय च ॥७ ॥
नमो ह्स्वाय दीर्घाय वामनाय नमो नम: ।
अग्रेश्वराय वै तुभ्यं नमो दूरतराय च ॥८ ॥
धन्दिने शूलिने तुभ्यं दैत्यानां मर्म भेदिने ।
सद्योजाताय - वामाय - घोराय च नमो नम: ॥९ ॥

तत्पुरूषाय नमस्तुभ्यं ईशानाय नमो नमः ।
ब्रह्मणे-विष्णु रूपाय रूद्राय शिव रूपिणो ॥१०॥
नमो रूद्राय कल्पाय महाग्रासाय विद्मवे ।
नमो भवाय शर्वाय नमः पर शिवायते ॥११॥
काल-कालाय-कालाय महाकालाय मृत्यवे ।
वीराय वीरभद्राय क्षयकाराय शूलिने ॥१२॥
महादेवाय महते पशूनाम्पतये नमः ।
एकाय नीलकण्ठाय पिनाकिने ॥१३॥
नमोऽनंताय सूक्ष्माय नमस्ते मृत्यु-मृत्यवे ।
पराय च परमेशाय परात्परतरायते ॥१४॥
परात्पराय विश्वाय नमस्ते विश्वमूर्तये ।
नमो विष्णुकलत्राय विष्णुक्षेत्राय भावने ॥१५॥
कैवर्त्ताय किराताय महाव्याधाय शाश्वते ।
भैरवाय शरण्याय काम-कालपुरारये ॥१६॥
नमः पापौघ संहत्रे विष्णुकालान्त कारिणे ।
त्र्यम्बकाय त्र्यक्षराय शिपिविष्टाय मीढुषे ॥१७॥
निरालं च नित्याय शाम्भवे वायु सम्भवे ।
भवोद्भवाय शुद्धाय सर्वदेवोद्भवायते ॥१८॥
मृत्युञ्जयाय शर्वाय सर्वज्ञाय मखारये ।
मखेशाय वरेण्याय नमस्ते वह्निरूपिणे ॥१९॥
मेघवाहाय देवाय पार्वतीपतये नमः ।
अव्यक्ताय विकाराय स्थिराय स्थिरधन्विने ॥२०॥
स्थाणवे कृतिवासाय नमः पञ्चार्थ हेतवे ।
नमस्ते द्विजराजाय धनानाम्पतये नमः ॥२१॥
योगीश्वराय नित्याय सत्वाय परमेष्ठिने नमः ।
सर्वात्मने नमस्तुभ्यं नमः सर्वेश्वरायते ॥२२॥
एक-द्वि-त्रि-चतुः-पञ्च कृत्वास्तेऽस्तु नमो नमः ।
दशकृत्वः शतकृत्वः सहस्त्रकृत्वो नमो नमः ॥२३॥

नमोऽपरिमितिं कृत्वेऽनंतकृत्वे नमो नमः ।
ॐ नमः शालुवेशाय शरभेशायते नमः ॥२४॥

॥ श्री शरभशतनाम-स्तोत्रं सम्पूर्णम् ॥

॥ अथ शरभ यंत्रस्य आवरणदेवताया पृथक् पृथक् विशेष पूजा प्रयोगः ॥

(भैरव प्रपंचसार संग्रहे)

॥ उग्रभैरव मंत्र ॥

मन्त्र - ॐ नमो भगवते उग्रभैरवाय सर्वविघ्नान् नाशय ठः ठः स्वाहा।

विनियोग - **ॐ अस्य मंत्रस्य अघोर ऋषिः, विराट छंदः, भैरवो देवता, भं बीजं, फट् शक्तिः, सवार्थ सिद्धये जपे विनियोगः।**

ध्यानम्–

कालाम्बुद श्यामल मानतास्यं करालभव्याहतमप्रमेयम् ।
लोलालकं लोकविनाश हेतुं लुण्ठद्रिपुं नौमि धृताट्टहासम् ॥

षडङ्गन्यास - **भां, भीं, भूं, भैं, भौं, भं, भः** से न्यास करे।

॥ यंत्र पूजनम् ॥

उर्ध्वमुख त्रिकोण बनाये उसके मध्य में '**ह्रीं फट्** ' लिखे। उसके बाहर अष्टदल में प्रत्येक दल में '**खें खां खं** ' लिखे। बाहर चौकोर भूपूर बनाये।

त्रिकोण में मध्य में '**उग्रभैरवाय नमः**' से पूजन करे।

अष्टदल मध्ये **भैरव्यै नमः, अघोराय नमः, स्कन्दाय नमः, विष्णवे नमः, दक्षिणामूर्त्तये नमः, चण्द्रोदण्डाय नमः, गणेशाय नमः, आपदुद्धारणाय नमः।**

दलान्ते- **आठो दलों में ब्राह्मी आदि अष्टमातृका पूजन करें।**

भूपूरे पूर्वादि दिशाओं में - **नरान्तकाय नमः, भीमाय नमः विजयाय नमः रक्त भैरवाय नमः।** फिर इन्द्रादि दिक्पालों की पूजा करे।

॥ सिद्ध भैरव ॥

विनियोग - **ॐ अस्य श्री सिद्ध भैरव मंत्रस्य शंकर ऋषिः, संस्कृति छंदः, सिद्ध भैरवो देवता, भं बीजं, श्री शक्तिः, मोहने जपे विनियोगः।**

न्यास - पूर्व मंत्र की तरह **भां, भीं, भूं, भैं, भौं भः** से षडङ्ग न्यास करे।

ध्यानम्—

जलदपटलनीलं दीप्यमानोग्रकेशं त्रिशिख डमरुहस्तं ।
चन्द्रलेखावतसं विमलवृष निरूढं चित्रशार्दूलवासः ।
विजयमनिशमीडे विक्रमोद्दण्ड चण्डम् ॥

मंत्र - ॐ नमो भगवते विजय भैरवाय प्रलयान्तकाय महाभैरव्यै महाभैरवाय सर्वविघ्न निवारणाय शक्तिधराय चक्रपाणये वटमूलसन्निषण्णाय अखिल गणनायकाय आददुद्धारणाय आकर्षय२ आवेशय२ मोहय२ भ्रामय२ शीघ्रंभाषय ह्रां ह्रीं त्रिपुरताण्डवाय अष्टभैरवाय भाषय२ स्वाहा ।

यन्त्रोद्धार- **'शान्तं त्रिमुखमालिख्य तने संवेष्टचय सर्वतः।**

तंत्रो की भाषा अति गुप्त है। शान्तं का अर्थ- **ॐ, ह्रीं नमः** कोई भी हो सकता है। त्रिकोण अष्टदल एवं भूपुर बनायें।

त्रिमुख का अर्थ त्रिभुज है। त्रिमुख से तीन आवरण त्रिकोण, अष्टदल एवं भूपूर भी हो सकता है। संवेष्टचय सर्वतः अर्थात् परिधि (भूपूर)। यहाँ पूर्व मंत्र की तरह ही यंत्र त्रिकोण, अष्टदल भूपूर युक्त भस्म से बनाये। मध्य में "**ह्री** " लिखें।

यंत्र के दोनों ओर दो शूल पार्श्वो में बनायें। **अथ शूलं च द्विपार्श्वे च यंत्रं विजयमद्‌भुतम्। षं षं षं** शूल के मूलमध्य व अग्रभाग तक लिखें पूर्व मंत्र की तरह यंत्र पूजा करें। मंत्र जप कर भस्म को साध्य

पर डालने से आवेश आकर्षण होता है।

॥ वडवानल मन्त्रम् ॥

अस्य वडवानल मंत्रस्य भास्कर ऋषिः, अतिधृति छन्दः, वडवानलो देवता, रं बीजं, स्वाहा शक्तिः अभीष्ट सिद्धयर्थे जपे विनियोगः।

न्यासः - **रां, रीं, रूं, रैं, रौं, रः से** क्रमशः षडङ्गन्यास करें।

ध्यानम्–

त्रिनयनमरुणन्त्वा बद्धमौलीषु शुक्लां शुकमरुण
मनेका - कल्पमम्भोज संस्थम् ।
अभिमत वरशक्ति स्वस्तिकाभीति हस्तं
नमत कनकमालालंकृताङ्गं कृशानुम् ॥

इसके दो प्रयोग है। -

१. मंत्र- (४० अक्षरात्मक) - **त्वमग्ने द्युभिस्त्वमाशु शुक्षणिस्त्वमद्भ्यः। त्वं भस्म परित्वं वनेभ्यस्त्वं मौषधीभ्यस्त्वं नृणांपते जावसे शुचिः।**

यंत्रम् - पंचकोण के बाद अष्टकोण बनायें उसके बाहर वृत्त बनाकार नवकोण बनायें। नवकोण के प्रत्येक कोणों पर रेखा आगे बढ़ाकर शूल बनायें।

शूल के आगे गोलाकार रूप में चारों ओर शत्रु का नाम लिखें।

नवकोणों में अग्नि मंत्र लिखें - **(१) त्वमग्ने (२) द्युभिस्त्वामाशु (३) शुक्षणिस्त्वमद्भ्यः (४) त्वं भस्मपरि (५) त्वं वनेभ्यः (६) त्वमौषधीभ्यः (७) त्वं नृणांपते (८) जावसे (९) शुचिः।**

यंत्र को लोहे, ताम्ब्र, या शीशे पर लिखकर अग्नि की ओर रखें। अग्नि अभिमुख रखें अर्थात् अग्नि की ओर यंत्र को करके तपायें मूल मंत्र का जाप करें शत्रु नाश होवें।

२. मंत्र - शत्रवस्तान् संहाराग्ने त्वं तदगेहं दह सत्वरं फट् स्वाहा हुं।

(यहाँ हुं को पल्लव के रूप में जोड़ा गया है।)

पंचकोण उसके बाद अष्टकोण के बाहर ४० कोष्ठक (दल) युक्त यंत्र बनायें। ४० दलों में ऊपर लिखें ४० अक्षर मंत्र के १-१ वर्ण लिखें। बाहर शत्रु का नाम लिखें मंत्र के १००० या १०८ बार जप करें।

दग्ध योग में श्मशान में जाकर खनन करें। बलि देवें। पुनः १००० अथवा १०८ बार मंत्र जपें।

तत्पश्चाद्वैरिवेश्मानि निर्दग्धानि भवन्ति हि।

उपसंहार - उपसंहार के दो अर्थ है (१) अभिचार कर्म जनित पाप से मुक्ति हेतु (२) किसी पर ऐसा प्रयोग किया हुआ होतो उसका निस्तारण।

विनियोगः - **ॐ अस्य श्री जातवेदा पापदहन मंत्रस्य सविता ऋषिः, अत्यष्टि छन्दः, अग्निर्देवता, ह्रीं बीजं, स्वाहा शक्ति, उपसंहारे विनियोगः।**

ध्यानम्—

सशराय सशार्ङ्गाय शक्ति हस्ताय वह्नये ।
कपालिने नमस्तुभ्यं मत्पापं दहमुञ्चतम् ॥

मंत्रः- ॐ भूर्भुवः स्वः अग्निरस्मी जन्मना जातवेदा घृतं मे च क्षरमृतं म आसन् अर्कस्त्रिधानृजसो विमातो जस्रो धर्मो हविरस्मि नाम भूर्भुवः स्वः मत्पापदं दह मुञ्चतं स्वाहा।

१००८ जप व होम करके ब्राह्मण भोजन करायें।

॥ अथाग्नेयास्त्र मंत्र ॥

विनियोगः - **अस्य श्री आग्नेयास्त्र मंत्रस्य परब्रह्म ऋषिः, देवी गायत्री छन्दः, वड़वामुखोऽग्निर्देवता ॐ बीजं व्याहृति शक्तिः ममाभीष्ट सिद्धये जपे विनियोगः।**

न्यासः- भूः, भुवः, स्वः, स्वः भुवः, भूः से क्रमशः अङ्गन्यास करें।

ध्यानम्—

बाणाग्रकोणस्थितं एधमानं परान्दहन्तं स्वमरीचिकोणैः ।
शोणाम्बरं चन्द्रकलावतंसं नमामि देवं वड़वामुखाग्निम् ॥

मंत्र - शोचिष्केशाय विद्महे वड़वामुखाय धीमहि तन्नः शुक्रः प्रचोदयात्।

यंत्र - त्रिकोण में ''रं'' अग्नि बीज मंत्र लिखें।

अष्टदल में क्रमशः - **शोचिष्केशाय। विद्महे। वडवामुखाय। धीमहि। तन्नः। शुक्रः। प्रचो। दयात्।** लिखें

नीचे साध्य का नाम लिखें या मन में स्मरण कर प्राण प्रतिष्ठा करें। इसके बाद

मंत्र का जप करें। इससे शत्रु आग्नेयास्त्र मे पीड़ित होवें।

द्वितीय प्रकारा: - (विलोम गायत्री मंत्र)- **त्यादचोप्र नः यो योधि हिमधी स्यवदे गोर्भ ण्यरेव रतुविसत्त स्वः भुवः भूः।**

तृतीय प्रकारा: - (विलोम जातवेदाग्नि) **ग्नित्यंतारिदु धुंसि ववेनाश्वावि णिगार्दु तिदर्षप नः स। दर्वे तिहादनि तोयतीराममसो मवानसु सेदवेतजा।**

चतुर्थ मंत्र:- **विलोम गायत्री मंत्र**-(पश्चात्)-

ॐ जातवेदसे सुनवाम सोममरातियतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वानावेव सिंधुं दुरितात्यग्निः ॥

इसके बाद गायत्री मंत्र इस तरह यह मंत्र पूरा हुआ।

॥ व्याधि देवता ॥

(शुभाऽशुभ कार्ये प्रयोग विधि)

विनियोग - **अस्य श्रीव्याधि मंत्रस्य वीरभद्र ऋषिः, अनुष्टुप् छन्दः, शिवो देवता, व्यां बीजं, हुं शक्तिः, श्रीव्याधि देवता प्रसन्नार्थ द्वारा अमुकजनस्य जरापीड़ा व्याधि मुच्यते द्वारा आयु आरोग्यादि प्राप्ति हेतवे जपे विनियोगः।** (सर्व शत्रुक्षयार्थे जपे विनियोग:)

शुभ प्रयोग में रोग निवृत्ति हेतु प्रयोग में यह ध्यान करना चाहियें कि व्याधि देवता अपने अंग परिवार सहित रोगी के देह व स्थान को छोड़कर देशान्तर को गमन कर रहे है। (कभी पास आने का ध्यान नहीं करना चाहियें) एवं रोगी को आरोग्य लाभ हो रहा है।

दुर्गा सप्तशती में भी तो रहस्य खण्ड में आया है कि- **''कालमृत्यो च संपूज्यौ सर्वारिष्ट शांतये''**।

''शत्रुनाश'' हेतु प्रयोग में यह भावना करनी चाहिये कि मेरा शत्रु व्याधि द्वारा प्रताड़ित होकर कष्ट पा रहा है।

न्यास:- **व्यां, व्यीं, व्यूं, व्यैं, व्यौं, व्यः** से पृथक्-पृथक् अंगन्यास करें।

ध्यानम्—

त्रिपादं त्रिभुज भीमं त्रिमूर्द्धानं त्रिलोचनं
कपालाढ्यं ज्वालास्य वक्त्र दंष्ट्रकम् ।

सप्तश्रृङ्गं　वसामाली　　चर्माम्बर　धारिणम् ॥
अशेषाङ्गे　वृणोदभूत　कृमिजाले　समाकुलम्
वक्त्रानासं　वृहत्स्कंधं　　क्षुधया　पीडितोदरं　।
वैरिणां　देहमालिङ्ग्य　भक्षयन्तं　विकर्णकम्
कलाय　कुसुमानीलं　महाव्याधिकरं　शिवम् ॥

व्याधि नाश हेतु मंत्र - **ॐ नमो भगवते रुद्राय महाव्याधि कारिणे अमुकस्य सर्वपीड़ा निवारय निवारय स्वाहा।**

शत्रुनाश हेतु मंत्र - **ॐ नमो भगवते रुद्राय महाव्याधिकराय अमुकं पीड़य हुं फट् स्वाहा।**

यन्त्र - ७ रेखा आड़ी एवं ७ रेखा खड़ी खीचें (तिर्यगूर्ध्व चतुर्दश रेखा) बीच में व्याधि नाम मंत्र लिखें तथा रेखाओं के अग्रभाग में शूल बनायें। शूलाग्र के चारों ओर साध्य (शत्रु) का नाम लिखें।

अष्टगंध से यंत्र लिखें एवं प्राणप्रतिष्ठा करके जप करें, चौराहे या श्मशान में खनन करें एवं यंत्र को रखें व वहाँ बलिप्रदान कर पुनः जप करें तो शत्रु व्याधि ग्रसित होवें।

॥ मृत्यु देवता ॥

(शुभाऽशुभ प्रयोग)

इसका शांतिमय प्रयोग करने से अकाल मृत्यु तथा मारकेश योग दूर होवें, व्यक्ति मृत्युपाश से छूटे, शत्रु के लिये प्रयोग करे तो उसे व्याधि एवं मृत्यु प्राप्त होवें।

मारकेश काल प्रतीत होने पर प्रयोग समय भावना करें की अमुक जीव मृत्युपाश से छुटकर आरोग्य लाभ प्राप्त कर रहा है।

विनियोगः- **अस्य श्रीमृत्यु देवता मंत्रस्य नारायण ऋषिः, उष्णिक् छन्दः, मृत्युर्देवता, ङ बीजं, ह्रैं शक्तिः, अमुकजीव मृत्युपाशात् विमुञ्चन द्वारा तथा वराभय प्राप्ति द्वारा आयु आरोग्य प्राप्ति हेतवे मृत्यु देवता प्रसन्नार्थे जपे विनियोगः।**

मंत्र - **ॐ नमो भगवते मृत्यवे यमाय सर्वजीवहरण कारणाय उग्राय दण्ड हस्ताय ङ ह्रैं अमुक जीवं मृत्युपाशात् मुञ्चय मुञ्चय सर्वलोक भयङ्कराय**

वराभय प्रदय-प्रदय सर्वारिष्ट नाशय नाशय आरोग्य कुरु कुरु हैं हूं फट् स्वाहा।

शत्रुनाशार्थे मंत्र - ॐ नमो भगवते मृत्यवे यमाय सर्वजीव हरणाय उग्राय दण्ड हस्ताय ङं हैं अमुकस्य जीव गृह्ण सर्वलोक- भयंकराय नाशय-नाशय हैं हूं फट् स्वाहा।

न्यास:- डां, डीं, डूं, डें, डौं, डः से क्रमशः अंगन्यास करें।

ध्यानम्–

रक्तास्यं भीमदष्ट्रं प्रकटित वदनं वक्रनासं कराब्जैः ।
शूलं पाशं कपालं फणिमुसल हलं वज्र खेटं वहन्तम् ॥
भीमकालाभ्रनीलं भृकुटित नयनं सैरिभ स्कन्धरूढम् ।
नानाभूतैः करालैः परिवृतमखिलं प्राणिकालं भजामि ॥

इदं काल मंत्रं निशामध्ये प्रातः पुनः जप्त्वा जपेत् ततो मंत्रं सहस्त्रनाम पूर्वकं तज्जपस्या वषाने तु स रिपुर्मरणं लभेत्।

卐 इति श्रीशरभ तन्त्रम् सम्पूर्णम् 卐

॥ अथ हनुमान तन्त्रम् ॥

श्री रामभक्त हनुमानजी के प्रयोग सात्विक विधान से यत्न पूर्वक करना चाहिये, अति आवश्यकता में तामस प्रयोग सिद्ध पुरुष व गुरु की आज्ञा से ही करने चाहिये। भक्तों को अभय देने एवं शत्रु नाश में हनुमान उपासना अभीष्ट सिद्धिप्रद हैं।

॥ अथ हनुमद्द्वादशाक्षर मंत्र प्रयोगः ॥

मन्त्रः "हौं ह्स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्सौं हनुमते नमः"।

(उपरोक्त मंत्र के बीजाक्षर वीरभाव एवं ब्रह्मभावसदाशिव स्वरूप के द्योतक है।)

विनियोग :- ॐ अस्य श्री हनुमन्मन्त्रस्य रामचन्द्रः ऋषिः जगती छन्दः हनुमान देवता ह्सौं बीजं, ह्स्फ्रें शक्तिः, मनोऽभीष्ट सिद्धयर्थे जपे विनियोगः।

षडङ्गन्यास :- हौं हृदयाय नमः, ह्स्फ्रें शिरसे स्वाहा, ख्फ्रें शिखायै वषट्, ह्सौं कवचाय हुम्, ह्स्ख्फ्रें नेत्रत्रयाय वौषट्, ह्सौं अस्त्राय फट्।

वर्णन्यास - हौं नमः मूर्ध्नि, ह्स्फ्रें नमः ललाटे, ख्फ्रें नमः नेत्रयोः, ह्स्त्रौं नमः मुखे, ह्स्ख्फ्रें नमः कण्ठे, ह्सौं नमः बाहोः, हं नमः हृदि, नुं नमः कुक्षौ, मं नमः नाभौ, ते नमः लिङ्गे, नं नमः जान्वोः, मं नमः पादयोः।

पदन्यास हौं नमः मूर्ध्नि, ह्स्फ्रें नमः ललाटे, ख्फ्रें नमः मुखे, ह्स्त्रौं नमःहृदि, ह्स्ख्फ्रें नमः नाभौ, ह्सौं नमः ऊर्वोः, हनुमते नमः जंघयोः, नमः नमः पादयोः।

ध्यानम्—

बालार्कयुततेजसं त्रिभुवनप्रक्षोभकं सुन्दरं
सुग्रीवादि समस्तवानरगणैः संसेव्यपादाम्बुजम् ।
नादेनैव समस्तराक्षसगणान् संत्रासयन्तंप्रभुं
श्रीमद्रामपदाम्बुजस्मृतिरतं ध्यायामिवातात्मजम् ॥

॥ यंत्रार्चनम् ॥

पहले षट्कोण उसके बाहर अष्टदल एवं उसके चारों और भूपूर बनाकर मध्य में "**हौं ह्स्फ्रें ख्फ्रें**" बीजाक्षर लिखें। वैष्णव पीठ में कूर्म अनन्तादि पीठ देवताओं का पूजन करें पश्चात् विमलादि नव पीठ शक्तियों का पूजन करें

हनुमत्कूट द्वादशाक्षर यन्त्रम्

यथा- अष्टदले पूर्वादि क्रमेण- **ॐ विमलायै नमः, ॐ उत्कर्षिण्यै नमः, ॐ ज्ञानायै नमः, ॐ क्रियायै नमः, ॐ योगायै नमः, ॐ प्रह्वये नमः, ॐ सत्यायै नमः, ॐ ईशानाय नमः, मध्ये ॐ अनुग्रहायै नमः।**

तदनन्तर **"ॐ नमो भगवते विष्णवे सर्वभूतात्म संयोग पद्मपीठाय नमः"** से पीठ की पूजन कर प्रधान देव का पूजन करें। मूर्त्यादि पूजन उपरान्त यन्त्र के आवरण देवताओं के पूजन की आज्ञा मांगे।

ॐ सचिन्मय परोदेव परामृतरस प्रिये। अनुज्ञां मे देहि परिवारार्चनाय ते॥

प्रथमावरणम् - षट्कोण में आग्नेयादि चारों कोणों में मध्य में एवं सर्वत्र षडङ्ग पूजन करें - (केसरों मे) **हौं हृदयाय नमः, हस्फ्रें शिरसे स्वाहा, खफ्रें शिखायै वषट्, हस्त्रों कवचाय हुम्, हस्खफ्रें नेत्रत्रयाय वौषट्, हसौः अस्त्राय फट्।**

द्वितीयावरणम् - अष्टदले - पूर्वादिक्रमेण नाममंत्रों से आह्वान करें। **ॐ रामभक्ताय नमः, ॐ महातेजसे नमः, ॐ कपिराजाय नमः, ॐ महाबलाय नमः, ॐ द्रोणाद्रिहारकाय नमः, ॐ मेरुपीठार्चनकारकाय नमः, ॐ दक्षिणाशा भास्कराय नमः, ॐ सर्वविघ्न निवारकाय नमः।** अष्टदलाग्रभागे- **ॐ सुग्रीवाय नमः, ॐ अंगदाय नमः, ॐ नीलाय नमः, ओम् जाम्बवन्ताय नमः, ॐ नलाय नमः, ॐ सुषेणाय नमः, ॐ द्विगविदाय नमः, ॐ मयन्दाय नमः।**

तृतीयावरणम् -भूपूरे- पूर्वादि क्रमेण - **ॐ इन्द्राय नमः, ॐ अग्नये नमः, ॐ यमाय नमः, ॐ निर्ऋत्ये नमः, ॐ वरुणाय नमः, ॐ वायवे नमः, ॐ सोमाय नमः, ॐ ईशानाय नमः। ॐ ब्रह्मणे नमः पूर्वेशानयोर्मध्ये। ॐ अनन्ताय नमः पश्चिम नैऋत्योर्मध्ये।**

चतुर्थावरणम् – अस्त्र पूजनम् – इन्द्रादि लोकपालों के पास उनके आयुधों का पूजन करें। क्रमशः – **ॐ वज्राय नमः, ॐ शक्त्यये नमः, ॐ दण्डाय नमः, ॐ खड्गाय नमः, ॐ पाशाय नमः, ॐ अंकुशाय नमः, ॐ गदायै नमः, ॐ त्रिशूलाय नमः, ॐ पद्माय नमः, ॐ चक्राय नमः।**

पश्चात् हनुमानजी एवं यंत्रपरिवार देवताओं का पूजन अर्चन करें।

एकादशाक्षर मन्त्र – ॐ हें श्रीं ह्रां ह्रीं ह्रुं ह्स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्सौं।

यह मन्त्र सभी अभीष्ट की सिद्धि देने वाला है। इसके ऋषिन्यास ध्यान पूर्व मन्त्र वाले (१२ अक्षर वाले) है।

॥ अस्य काम्य प्रयोगः ॥

दश हजार जप करके तिलादि से दशांश होम करें। केला, बिजौरा एवं आम्रफलों से एक हजार आहुतियाँ देवे एवं २२ ब्रह्मचारी ब्राह्मणों को भोजन कराये इससे महाभूत, चोर, विषजन्य उपद्रव रोग शान्त होवे।

अभिचार एवं ज्वर पीड़ा में भस्म एवं अभिमन्त्रितजल से मार्जन अभिषेक करने से ३ दिन में रोगी रोग मुक्त हो जाता है। भस्म लगाने एवं अभिमन्त्रित जल पीकर युद्ध में जाने से शस्त्र भय नहीं होवे। भस्म व जल का चर्म रोग में भी प्रयोग लाभप्रद है। भस्म को खाद्यन्न एवं चन्दन युक्त अभिमन्त्रित जल को क्रूर जानवरों को खिलाये पिलायें तो वे भी वशीभूत हो जाते है तो मनुष्यों की तो बात ही क्या है? करञ्जवृक्ष के ईशान कोण की जड़ लाकर उसमें हनुमानजी की प्रतिमा का निर्माण कराकर, सिन्दूर लेपन कर प्रतिष्ठा पूर्वक पूजन करें एवं इस मन्त्र का जाप करे। इस प्रतिमा को घर के दरवाजे पर गाड़ देने से भूत ,पिशाच, अभिचार कर्म, विष, अग्नि, चौरभय व उपद्रव नष्ट हो जाते है।

शत्रुनाशक प्रयोगः – रात्रि में श्मशान भूमि की भस्म या मिट्टी लेकर उससे शत्रु की प्रतिमा बनाकर हृदय में उसका नाम लिखें। प्राण प्रतिष्ठा शत्रु का नाम लेते हुये करें।

फिर '**ह्रौं ह्स्फ्रें ख्फ्रें ह्सौं ह्स्ख्फ्रें ह्स्त्रौं हनुमते नमः अमुक नाम्ने मम शत्रून् छिन्दय-२ भिन्दय-२ मारय-२**' जप करते हुये शस्त्र के द्वारा शत्रु के पुतले के टुकड़े करें। क्रोध मुद्रा में होठों को दांतों के नीचें दबाते हुये हथेलियों से टुकड़ों को मसल देवें एवं उनको वहीं फेंक कर शुद्ध होकर घर आ जाना चाहिये।

७ दिनों तक ऐसा लगातार करने से शत्रु चाहे शिव द्वारा रक्षित हो मृत्यु को प्राप्त होता है।

श्मशान भूमि में अर्धचन्द्राकृति कुण्ड या वेदी बनावें, राई, नमक मिश्रित धत्तूर फल पुष्प, कौवा, उल्लू एवं गीद्ध के नाखून, रोम, एवं पंखों से, तथा विष से लिसोड़ा एवं बहेड़ा की समिधाओं से, क्रोध मुद्रा में केशों को खोलकर दक्षिणाभिमुख होकर एक सप्ताह पर्यन्त नित्य होम करें तो शत्रु मृत्यु को प्राप्त होवे।

मालीपन्ना सिन्दूर हनुमानजी के वस्त्र होते है अत: इनका होम करने से हनुमानजी आवेशित व क्रोधित होकर कार्य करते हैं।

एक पण्डित जी की किसी से शत्रुता हो गयी, उन्होंने गर्म गर्म तेल हनुमान जी की प्रतिमा पर उड़ेल दिया उग्र मन्त्र का जाप करने लगें शत्रु ३ दिन में ज्वर से पीड़ित होकर मृत्यु को प्राप्त हो गया।

सावधानी - उग्र प्रयोगों को करने से पहिले अपने घर एवं स्वयं का पूर्ण रक्षाबन्धन करें। हनुमानजी को कार्य सिद्धी के बाद पुन: शान्त करना चाहिये अत: मधुत्रय, घृतान्न, पायस से होम करें। श्रीराम के चरित्र का गुणगान करने से हनुमानजी क्रोध त्याग कर प्रसन्न हो जाते है।

बेतालसिद्धी - रात्रि के समय श्मशान में जाकर ३ दिन तक १०० मन्त्रमूल मन्त्र युत करें -

''ह्रौं ह्स्फ्रें ख्फ्रें ह्स्ख्फ्रें ह्सौं हनुमते नमःअमुक वेताल मे वशमानय स्वाहा''

कुल १८०० या २१०० मन्त्र जाप करने से बेताल दासवत होकर भूत भविष्य का दर्शन भी कराता है एवं साधक का कार्य भी करता है।

बन्दी विमोचन - हनुमानजी की प्रतिमा के सामने एक पट्टा बिछाकर उस पर सिन्दूर या कुंकुम बिछायें उस पर अनार की कलम से मूल मन्त्र लिखकर आगे अमुकान् विमोचय विमोचय लिखें फिर मिटाकर पुन: लिखे इस प्रकार बार बार करने से बंदी की हथकड़ी बेड़ी शीघ्र कट जाती है।

इसी तरह हनुमानजी के पैरों के नीचे अमुकं विद्वेषय-२ या अमुकं उच्चाटय २ अथवा अमुकं मारय -२ लिखने से शत्रु का विद्वेषण, उच्चाटन, एवं मारण हो जाता है परन्तु कार्य साध्य होने पर शान्तिपाठ, ब्राह्मण भोजन इत्यादि कर्म करना चाहिये।

अन्य काम्य प्रयोग - वश्य कर्म में सरसों से, विद्वेषण में कनेर पुष्प व काष्ठ समिध के साथ जीरा कालीमिर्च से हवन करें।

ज्वर में दूर्वा, गिलोय, दही, घृत, दूध तथा पोढर एवं रेड़ी की समिधाओं से

अथवा निर्गुण्डीकी समिधाओं को तेल में भिगोकर होम करे। धान्यवृद्धि हेतु धान्य से, सौभाग्य हेतु चन्दन, कपूर, गोरोचन, लौंग, इलायची, व सुगन्धित पुष्पों से होम करे। शत्रु के पैर की मिट्टी को राई, नमक के साथ होम करने से शत्रु का नाश होवे।

॥ द्वादशाक्षर मन्त्र प्रयोगः (गारुड़ी तन्त्रे) ॥

मन्त्र – हं हनुमते रुद्रात्मकाय हुं फट्।

षडङ्गन्यास – हं हृदयाय नमः, हनुमते शिरसे स्वाहा, रुद्रात्मकाय शिखायै वषट्। हुं कवचाय हुम्। फट् नेत्रत्रयाय वौषट्।

पुनः पूरा मूलमन्त्र बोलकर अस्त्राय फट्।

अन्य मन्त्र – **ॐ नमो भगवते हनुमते महारुद्राय हुं फट् स्वाहा।**

इस मन्त्र के प्रभाव से सभी भय बंधन से मुक्त होता है साधक की रक्षा होती है।

ध्यानम्–

महाशैलं समुत्पाटय धावन्तं रावणं प्रति ।
तिष्ठ तिष्ठ रणे दुष्ट घोररावं समुच्चरन् ॥१॥
लाक्षारसारुणं गात्रं कालान्तक यमोपमम् ।
ज्वलदग्निसन्नेत्रं सूर्यकोटिसमप्रभम् ।
अंगदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम् ॥२॥

इस मन्त्र को श्रीकृष्ण ने अर्जुन को शत्रुओं पर विजय के लिये बताया था। हनुमान यंत्र की रचना करें। मूर्ति की कल्पना कर हनुमान जी की पूजा करें। सीता सहित श्रीरामचन्द्रजी का भी पूजन कर ध्यान पूर्वक करते हुये पुष्पाञ्जलि प्रदान करें।

कुले रघूणां समवाप्य जन्म विधाय सेतुं जलधेर्जलान्तः ।
लंकेश्वरं यः शमयाचकार सीतापतिं तं प्रणमामि भक्त्या ॥

हनुमानजी के मूलमन्त्र से आठ बार पुष्पाञ्जलि देवे।

॥ यंत्र पूजनम् ॥

यंत्रार्चन सम्बन्ध में गारुड़ी तन्त्र में दो क्रम दिये गये है।

(१) यंत्र मध्य में दक्ष व वाम भाग १ २ में "**ॐ सुग्रीवाय नमः, ॐ लक्ष्मणाय नमः**" से अर्चन करें। अष्टदलों में (३ से १० तक) (३) ॐ अंगदाय नमः (४) ॐ नलाय नमः (५) ॐ नीलाय नमः (६) ॐ

द्वादशाक्षरी हनुमत् यन्त्रम्

जाम्बवते नमः (७) ॐ कुमुदाय नमः (८) ॐ केसरिणे नमः (९)ॐ पवनाय नमः (१०) ॐ अंजन्यै नम।

(२) द्वितीय प्रकारः यन्त्रम् - अष्टदल की कर्णिमा में मूल मन्त्र लिखे, हनुमानजी व सीता सहित श्रीरामचन्द्र जी का अर्चन करें।

पहले की तरह श्रीराम व हनुमानजी के पुष्पांजलि देवें। यंत्र के मध्य में दक्ष एवं वामभाग में "**ॐ पवनाय नमः, ॐ अंजन्यै नमः**" का पूजन करें।

अष्टदल में पूर्वादिक्रम से - **ॐ सुग्रीवाय नमः, ॐ लक्ष्मणाय नमः, ॐ अंगदाय नमः, ॐ नलाय नमः, ॐ नीलाय नमः, ॐ जाम्बवते नमः, ॐ कुमुदाय नमः, ॐ केसरिणे नमः।**

एक लक्ष जप करके दशांश होम करें। एवं यह भी कहा गया है कि जब तक दर्शन प्राप्त नहीं होवे तब तक प्रयोग करते रहना चाहिये दर्शन देकर हनुमान जी वर प्रदान करते है।

॥ वीरहनुमान मन्त्रः ॥

मन्त्र - हं पवननन्दनाय स्वाहा। ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से अङ्गन्यास करे।

प्राणायाम करें यथा- **अं आं ...... अं अः** से पूरक। **कं खं ......पं फं बं भं मं से कुम्भक एवं यं रं ...... हं लं क्षं से रेचक करें।** इस तरह तीन बार प्राणायाम करे।

मूल मन्त्र से ही अङ्गन्यास एवं व्यापक न्यास करें।

ध्यानम्–

ध्यायेद्रणे हनूमन्तं कपिकोटि समन्वितम् ।
धावंतं रावणं जेतुं दृष्ट्वासत्वरमुत्थितम् ॥
लक्ष्मणं च महावीरं पतितं रणभूतले ।
गुरुं च क्रोधमुत्पाद्य गृहीत्वा गुरुपर्वतम् ॥
हाहाकारैः सदर्पैश्च कम्पयन्तं जगत्त्रयम् ।
ब्रह्माण्डं स समावाप्य कृत्वा भीमं कलेवरम् ॥

सात दिन तक रात्रि व दिन को स्मरण करते रहें। ६ हजार जप नित्य करें। हनुमानजी महाभय को प्रकट करते है एवं रात्रि तीसरे पहर में साधक के पास आकर वर प्रदान करते है।

चतुर्दशाक्षर मन्त्र – **ॐ नमो हरिमर्कट मर्कटाय स्वाहा।**

यह मन्त्र भी पञ्चमुखी हनुमान कवच में आये मन्त्रों की तरह है एवं इसका प्रयोग सफल रहता है ऐसा कई व्यक्तियों का अनुभव है।

इस मन्त्र को आम्र के पत्ते पर गुलाल बिछाकर अनार की कलम से एक लाख बार लिखे तो मनोरथ सिद्ध होवे। राज्य लाभ होवे।

राज्य विरोध या शत्रु विरोध विशेष होवे तो निम्न मन्त्र का जप करे **ॐ नमो हरिमर्कट मर्कटाय अमुकं हरिमर्कट मर्कटाय स्वाहा।**

इस मन्त्र को सिन्दूर से कागज या भोजपत्र पर लिखकर हनुमानजी के मस्तक पर चिपका देवे, सरसों के तेल से सहस्त्रधारा अभिषेक (एक ताम्रपात्र जिसमें छोटे छोटे १०००छिद्र होवे) या छोटे पात्र में १,३,५ छिद्र वाले पात्र से अभिषेक होता रहे एवं १लाख जप का प्रयोग पूरा करें। ५ छिद्र में २१ हजार जाप करने पर भी कार्य सिद्ध हो जाता है। शत्रु का नाश होवे एवं वशीभूत होकर आपके पैरों में आन पड़े।

अष्टादशाक्षर मन्त्र – **नमो भगवते आञ्जनेयाय महाबलाय स्वाहा।**

विनियोग – **ॐ अस्य श्री मन्त्रस्य ईश्वर ऋषिः, अनुष्टुप छन्दः, हनुमान देवता, हुं बीजम्, स्वाहा शक्तिः, सर्वेष्ट सिद्धये जपे विनियोगः।**

षडङ्गन्यास विधि- **ॐ आञ्जनेयाय हृदयाय नमः। ॐ रुद्रमूर्त्तये शिरसे स्वाहा। ॐ वायुपुत्राय शिखायै वषट्। ॐ अग्निगर्भाय कवचाय हुम्। ॐ रामदूताय नेत्रत्रयाय वौषट्। ॐ ब्रह्मास्त्रनिवारणाय अस्त्राय फट्।**

ध्यानम्–

दहनतप्त सुवर्णसमप्रभं भयहरं हृदये विहितांजलिम् ।
श्रवणकुण्डल शोभिमुखाम्बुजं नमत वानरराजमिहाद्भुतम् ॥

यन्त्र पूजनम् – मध्य में ध्यान पूर्वक हनुमानजी का आवाहन करें। षट्कोण में षडङ्गविधि मन्त्रों से देवताओं का आवाहन करें तथा शेष अष्टदल व भुपूर के देवताओं की पूजा द्वादशाक्षर मन्त्र के समान है।

अष्टादशाक्षरी हनुमत् यन्त्रम्

॥ काम्य प्रयोगः॥

१. इस मन्त्र का १० हजार जप का पुरश्चरण है तिलादि से दशांश होम करें। अनुष्ठान समय में केवल रात्रि में भोजन करें यम नियम से रहे। इस मन्त्र के प्रभाव से भूत प्रेत पिशाचादि दूर भागते है असाध्य रोगों से मुक्ति के लिये प्रतिदिन एक हजार जप करें।

२. नियमित एक समय हविष्यान्न भोजन करें तथा राक्षस समूह को नष्ट करते हुये हनुमान जी का ध्यान कर नित्य १० हजार जप करने से शीघ्र ही शत्रु पर विजय प्राप्त करता है।

४. सुग्रीव के साथ राम की मित्रता कराते हुये कपीश्वर का ध्यान करने से शत्रु से संधि हो जाती है।

५. लंकादहन करते हुये का ध्यान करने से शत्रुओं का धन वैभव घर जलकर नष्ट हो जाता है।

६. इस मन्त्र का सोते समय जप करने से चोरों से रक्षा तथा यात्रा एवं प्रवेश समय जप स्मरण करने से मंगल होवे तस्करादि भय नष्ट होवे।

७. द्रोणगिरी धारण करते हुये का ध्यान करने से औषधी कारक होकर रोगी को रोग मुक्त करता है।

अष्टादशाक्षर अन्य मन्त्र - ॐ ह्रौं नमो हनुमते आवेशय आवेशय स्वाहा।

यह मन्त्र किसी महात्मा का प्रयोगिक एवं अनुभूत है।

विधान - रक्त चन्दन की हनुमानजी की प्रतिमा बनाये प्राण प्रतिष्ठा पूर्वक पूजन करें। जपकाल में रक्त वस्त्र धारण करें, रक्त वर्ण के आसन पर पूर्वाभिमुख होकर जप करें, रात्रि के समय हनुमानजी का पञ्चोपचार पूजन करें। गुड़ चूरमे का भोग लगावे जिसे आठों पहर हनुमानजी के सामने रखा रहने दे, दूसरे दिन

उसको अलग पात्र में इकट्ठा करें एवं पुनः नैवेद्य चढ़ावे, इस तरह आठ दिन का इकट्ठा नैवेद्य या तो किसी ब्राह्मण को दे देवे या भूमि में गाड़ देवे। रुद्राक्ष माला पर ११०० मन्त्र नित्य ११ दिन तक जपे तो हनुमानजी स्वप्न में आकर साधक के प्रश्न का उत्तर देते है।

इसके लक्षाधिक मन्त्र हवनादि करके प्रेतादि से आवेशित व्यक्ति पर मार्जन करे तो बाधा दूर होवे।

॥ सर्वसिद्धिप्रदहनुमत् मालामन्त्र ॥

सर्वप्रथम एक वृत बनाये साध्य व्यक्ति (रोगी, पीड़ित, या जिसकी रक्षा करनी हो) व्यक्ति का नाम **''देवदत्त''** की जगह लिखें। इसके बाहर पुच्छाकार के दो घेरे बनाये, एक में ८ या १२ बार पाश बीज **''आं''** लिखे। इनके बाहर अष्टदल बनाये,प्रत्येक दल में वर्मबीज **''हुं''** लिखे। इसके ऊपर वृत्त एवं भूपूर बनाये। भुपूर की रेखा के अग्रभागों में कोणों में त्रिशूल बनायें, भुपूर के आठों कोणों में **''ह्सौं''** बीज लिखें। चारों कोणों में अंकुशबीज **''क्रौं''** लिखना चाहिये।

इसके बाहर चारों ओर हनुमानजी का मालामन्त्र **ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं .....ज्वलदग्नि सूर्यकोटि समप्रभ** तक लिखकर बाद में स्वाहा भी लिखे।

हनुमत् पूजन यन्त्र

यदि यन्त्र का आधार बड़ा है तो पूरा माला मन्त्र लिखे। मालामन्त्र के बाहर तीन वृत और बनाये।

यंत्र को वस्त्र, शिला, काष्ठ की चौकोर पट्टी ताम्रपत्र, दीवार भोजपत्र या ताड़पत्र पर गोरोचन, कस्तुरी, एवं कुंकुम, केशर से लिखना चाहिये। ब्रह्मचर्य का पालन करते हुये

प्राणप्रतिष्ठा पूर्वक यंत्रार्चन करते हुये मंत्र जाप करना चाहिये। साधक यदि धारण करता है तो सभी प्रकार की विपत्तियों से छुटकारा मिलता है। शत्रुकृत समस्त अभिचार बाधा षड़यन्त्र नष्ट हो जाते है।

॥ माला मन्त्र ॥

ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह्स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्स्त्रौं ॐ नमो हनुमते प्रकटपराक्रम आक्रान्तदिङ्मण्डल यशोवितान धवलीकृतजगत्त्रितय वज्रदेह ज्वलदग्नि सूर्यकोटिसमप्रभतनूरुह रुद्रावतार लंकापुरी दहनोदधि-लंघन दशग्रीवशिरः कृतान्तक सीताश्वासन वायुसुत अञ्जनागर्भसंभूत श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकारा सुग्रीवसख्यकारण बालि-निबर्हणकारण द्रोणपर्वतोत्पाटन अशोकवनविदारण अक्षकुमारच्छेदन वनरक्षाकरसमूह विभञ्जन ब्रह्मास्त्रशक्तिग्रसन लक्ष्मणशक्तिभेदनिवारण विशल्योषधि समानयन बालोदितभानुमण्डलग्रसन मेघनाद होमविध्वंसन इन्द्रजिद्वधकारण सीतारक्षक राक्षसीसंघ विदारण कुम्भकर्णादिवधपरायण श्रीरामभक्तितत्पर समुद्रव्योमद्रुमलंघन महासामर्थ्य महातेजः पुञ्ज-विराजमान स्वामिवचन सम्पादित अर्जुनसंयुग सहाय कुमारब्रह्मचारिन् गम्भीरशब्दोदय दक्षिणाशामार्त्तण्ड मेरुपर्वत पीठकार्चन सकलमन्त्रा-गमाचार्य मम सर्वग्रहविनाशन सर्वज्वरोच्चाटन सर्वविषनाशन सर्वापति-निवारण सर्वदुष्टनिबर्हण सर्वव्याघ्रादिभयनिवारण सर्वशत्रुच्छेदन ममपरस्य च त्रिभुवन पुंस्त्रीनपुंसकात्मक सर्वजीवजातं वशय वशय मम आज्ञाकारकं सम्पादय सम्पादय नाना नाम धेयान् सर्वान् राज्ञः सपरिवारान् मम सेवकान् कुरु कुरु सर्वशस्त्रास्त्र विषाणि विध्वंसय विध्वंसय ह्रां ह्रीं ह्रूं ह्रां ह्रां एहि एहि ह्सौं ह्स्ख्फ्रें ह्स्त्रौं ख्फ्रें ह्स्फ्रें सर्वशत्रून् हन हन परदलानि परसैन्यानि क्षोभय क्षोभय मम सर्वकार्य जातं साधय साधय सर्वदुष्ट दुर्जनमुखानि कीलय कीलय घे घे घे हा हा हा हुं हुं हुं फट् फट् फट् स्वाहा।

॥ इदं मालामन्त्रोऽयमष्टाशीत्याधिक पञ्चशत वर्णः ॥

॥ प्लीहा एवं उदररोग नाशक मन्त्र ॥

मन्त्र ॐ यो यो हनूमन्तं फल फलित धग धगितायुराषपरुडाह।

इस मन्त्र के ऋषिन्यास "ॐ नमो भगवते ओजनेनाय महाबलाय स्वाहा" वत् है।

विधान – प्लीहा वाले रोगी पर पान रखें । पान के टुकड़े को उसके आठ गुणा कपड़े से आच्छादित कर देवे। उसके ऊपर हनुमानजी का ध्यान करते हुये बाँस का टुकड़ा रख देवे। जंगल के पत्थर पर उत्पन्न बेर की लकड़ियों को जलाये एवं उस कपड़े को मूल मन्त्र से सात बार तपाये। फिर कपड़े से पेट पर रखे हुये बाँस के टुकड़े को ७ बार ताडन करना चाहिये। इससे प्लीहा रोग शीघ्र दूर होवे।

॥ रक्षक यन्त्र ॥

अष्टदल बनाये उसके मध्य में जिसकी रक्षा करनी हो उसका नाम लिखे। अष्टदलों में अष्टबीजाक्षर लिखे एवं उसके बाहर माला मन्त्र चारों ओर लिखते हुये वेष्टन करे। अष्टाक्षर मन्त्र व मालामन्त्र के जाप करें इनके ऋषि न्यास पूर्ववत् ही हैं।

हनुमान रक्षक यन्त्र

अष्टाक्षर मन्त्र – ॐ हां हीं हूं हैं हौं हः ॐ

मालामंत्र – ॐ वज्रकाय वज्रतुण्डकपिल पिङ्गल उर्ध्वकेश महावर्णबल रक्तमुख तडिज्जिह्व महारौद्र द्रंष्ट्रोत्कटक ह ह करालिने महादृढ प्रहारिन् लंकेश्वर वधाय महासेतुबन्ध महाशैल प्रवाह गगनेचर एह्येहि भगवन् महाबल पराक्रम भैरवज्ञापय एह्येहि महारौद्र दीर्घपुच्छेन वेष्ट्य वैरिणं भञ्जय-२ हुं फट्।

यह मन्त्र रोगी को रोग मुक्त करता है एवं युद्ध में विजय देता है।

यंत्र में हनुमानजी का पूजन कर माला मंत्र का जप करके धारण करें पहले विशेष संख्या में जप करके मंत्र सिद्ध करना चाहिये।

॥ श्रीविचित्रवीरहनुमन्माला मन्त्रः॥

शत्रु विजय हेतु इस मंत्र के ११०० पाठ १० दिनों तक कर गुग्गुल से दशांश हवन करें।

विनियोग :- **ॐ अस्य श्रीविचित्र वीर हनुमन्माला मन्त्रस्य श्रीरामचन्द्रो भगवान् ऋषिः। अनुष्टुप् छन्दः। श्रीविचित्र वीर हनुमान् देवता। ममाभीष्ट सिद्ध्यर्थे माला मन्त्र जपे विनियोगः।**

ऋष्यादिन्यास :- **श्रीरामचन्द्र भगवान् ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीविचित्र वीर हनुमान् देवतायै नमः हृदि। ममाभीष्ट सिद्ध्यर्थे माला मन्त्र जपे विनियोगाय नमः सार्वाङ्गे।**

षडङ्गन्यास :- **ॐ ह्रां अंगुष्ठाभ्यां नमः (हृदयाय नमः)। ॐ ह्रीं तर्जनीभ्यां नमः (शिरसे स्वाहा)। ॐ ह्रूं मध्यमाभ्यां नमः (शिखायै वषट्)। ॐ ह्रैं अनामिकाभ्यां नमः (कवचाय हुं)। ॐ ह्रौं कनिष्ठाभ्यां नमः (नेत्रत्रयाय वौषट्)। ॐ ह्रः करतलकर पृष्ठाभ्यां नमः (अस्त्राय फट्)।**

ध्यानम् :-

वामे करे वैर वहं वहन्तम् शैलं परे शृङ्खला मालयाढ्यम् ।
दधानमाध्मातमुग्र वर्णम् भजे ज्वलत् कुण्डलमाञ्जनेयम् ।।

॥ माला मन्त्रः ॥

ॐ नमो भगवते, विचित्रवीर हनुमते, प्रलयकालानल प्रभा ज्वलत् प्रताप वज्रदेहाय, अञ्जनी गर्भ सम्भूताय, प्रकट विक्रम वीर दैत्य दानव यक्ष राक्षस ग्रहबन्धनाय भूतग्रह प्रेत ग्रह पिशाच ग्रह शाकिनी ग्रह डाकिनी ग्रह काकिनी

ग्रह कामिनी ग्रह ब्रह्म ग्रह ब्रह्मराक्षस ग्रहचोर ग्रह बन्धनाय एहि एहि आगच्छागच्छ आवेशयावेशय मम हृदयं प्रवेशय प्रवेशय स्फुट स्फुट प्रस्फुट प्रस्फुट सत्यं कथय कथय व्याघ्रमुखं बन्धय बन्धय सर्प मुखं बन्धय बन्धय राजमुखं बन्धय बन्धय सभामुखं बन्धय बन्धय शत्रुमुखं बन्धय बन्धय, सर्वमुखं बन्धय बन्धय, लङ्का प्रासाद भञ्जक सर्वजनं मे वशमानय श्रीं ह्रीं क्लीं श्रीं सर्वानाकर्षयाकर्षय शत्रून् मर्दय मर्दय मारय मारय चूर्णय चूर्णय खे खे श्रीरामचन्द्राज्ञया प्रज्ञया मम कार्यसिद्धिं कुरु कुरु मम शत्रून् भस्मी कुरु कुरु स्वाहा। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् श्री विचित्र वीर हनुमते! मम सर्वशत्रून् भस्मी कुरु कुरु हन हन हुं फट स्वाहा।

॥ इति श्रीविचित्रवीरहनुमन्माला मन्त्रः॥

॥ हनुमद्वडवानलस्तोत्रम् ॥

यह स्तोत्र सभी रोगों के निवारण में, शत्रुनाश, दूसरों के द्वारा किये गये पीड़ा कारक कृत्या अभिचार के निवारण, राजबंधन विमोचन आदि कई प्रयोगों में काम आता है। सरसों के तेल का दीपक जलाकर १०८ पाठ नित्य ४१ दिन तक करने पर सभी बाधाओं का शमन होकर अभीष्ट कार्य की सिद्धि होती है। अलग-अलग कार्यों हेतु तिलादि विशेष द्रव्य व समिधाओं के हवन से शीघ्र कार्य सिद्ध होवें।

विनियोग: - **ॐ अस्य श्री हनुमान् वडवानलस्तोत्रमंत्रस्य श्रीरामचन्द्र ऋषिः, श्रीहनुमान वडवानल देवता, ह्रां बीजम्, ह्रीं शक्तिं, सौं कीलकं, मम समस्त विघ्न दोष निवारणार्थे, सर्वशत्रुक्षयार्थे सकलराजकुलसंमोहनार्थे, मम समस्त रोग- प्रशमनार्थम् आयुरारोग्यैश्वर्याऽभिवृद्ध्यर्थं समस्तपापक्षयार्थं श्रीसीतारामचन्द्र- प्रीत्यर्थं च हनुमद् वडवानलस्तोत्र जपमहं करिष्ये।**

ध्यानम्–

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठं ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतम् शरणं प्रपद्ये ॥

ॐ ह्रां ह्रीं ॐ नमो भगवते श्रीमहाहनुमते प्रकटपराक्रम सकलदिङ्मण्डल- यशोवितानधवलीकृत- जगतत्रितय वज्रदेह रुद्रावतार लङ्कापुरीदहय उमा- अर्गलमंत्र उदधिबंधन दशशिरः कृतान्तक सीताश्वसन वायुपुत्र अञ्जनीगर्भसंभूत

श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार सुग्रीवसाह्यरण पर्वतोत्पाटन कुमारब्रह्मचारिन् गंभीरनाद सर्वपापग्रहवारण-सर्वज्वरोच्चाटन डाकिनी-विध्वंसन ॐ ह्रां ह्रीं ॐ नमो महावीरवीराव सर्वदुःख निवारणाय ग्रहमण्डल सर्वभूतमण्डल सर्वपिशाचमण्डलोच्चाटन भूतज्वर-एकाहिकज्वर-द्वयाहिकज्वर त्र्याहिकज्वर चातुर्थिकज्वर संतापज्वर विषमज्वर तापज्वर माहेश्वर वैष्णवज्वरान् छिन्दि छिन्दि यक्ष ब्रह्मराक्षस भूतप्रेत पिशाचान्उच्चाटय उच्चाटय स्वाहा।

ॐ ह्रां श्रीं ॐ नमो भगवते श्रीमहाहनुमते ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः आं हां हां हां हां ॐ सौं एहि एहि एहि ॐ हं ॐ हं ॐ हं ॐ नमो भगवते श्रीमहाहनुमते श्रवणचक्षुर्भूतानां शाकिनी डाकिनीनां विषमदुष्टानां सर्वविषं हर हर आकाशभुवनं भेदय भेदय छेदय छेदय मारय मारय शोषय शोषय मोहय मोहय ज्वालय ज्वालय प्रहारय प्रहारय शकलमायां भेदय भेदय स्वाहा।

ॐ ह्रां ह्रीं ॐ नमो भगवते महाहनुमते सर्वग्रहोच्चाटन परबलं क्षोभय क्षोभय सकलबंधन मोक्षणं कुरु कुरु शिरः शूल-गुल्मशूल सर्वशूलान्निर्मूलय निर्मूलय नागपाशानन्त-वासुकि-तक्षक-कर्कोटकालियान् यक्षकुलजगत-रात्रिञ्चर-दिवाचर- सर्पान्निर्विषं कुरु कुरु स्वाहा।

ॐ ह्रां ह्रीं ॐ नमो भगवते महाहनुमते राजभय चोरभय परमंत्र-परयंत्र-परतंत्र परविद्याश्छेदय छेदय स्वमंत्र-स्वयंत्र-स्वतंत्रकाविद्याः प्रकटय प्रकटय सर्वारिष्टन्नाशय नाशय सर्वशत्रून्नाशय नाशय असाध्यं साधय साधय हुं फट् स्वाहा।

॥ इति विभीषणकृतं हनुमद् वडवानलस्तोत्रं संपूर्णम् ॥

॥ अथ हनुमत्स्तोत्रम् ॥

॥ हनुमानुवाच ॥

तिरश्चामपि यो राजा समवायं समीयुषाम् ।
तथा सुग्रीवमुख्यानां यस्तं वन्द्यं नमाम्यहम् ॥१॥
सकृदेव प्रसन्नाय विशिष्टायैव राज्यदः ।
विभीषणाय यो देवस्तं वीरं प्रणमाम्यहम् ॥२॥

यो महापुरुषो व्यापी महाब्धौ कृतसेतुकः ।
स्तुतो येन जटायुश्च महाविष्णुं नमाम्यहम् ॥३॥
तेजसाप्यायिता यस्य ज्वलंति ज्वलनादयः ।
प्रकाशते स्वतंत्रो यस्तं ज्वलंतं नमाम्यहम् ॥४॥
सर्वतोमुखता येन लीलया दर्शिता रणे ।
राक्षसेश्वरयोधानां तं वंदे सर्वतोमुखम् ॥५॥
नृभावं तु प्रपन्नानां हि नस्ति च सदारुजम् ।
नृसिंहतनुमप्राप्तो यस्तं नृसिंहं नमाम्यहम् ॥६॥
यस्माद्बिभ्यति वातार्कज्वलनेन्द्राः समृत्यवः ।
भयं तनोति पापानां भीषणं तं नमाम्यहम् ॥७॥
परस्य योग्यतां वीक्ष्य हरते पापसन्ततिम् ।
पुरस्य योग्यतां वीक्ष्य तं भद्रं प्रणमाम्यहम् ॥८॥
यो मृत्युं निजदासानां मारयत्यतिचेष्टदः ।
तत्रापि निजदासार्थं मृत्युमृत्युं नमाम्यहम् ॥९॥
यत्पादपद्मप्रणतो भवत्युत्तमपूरुषः ।
तमीशं सर्वदेवानां नमनीयं नमाम्यहम् ॥१०॥
आत्मभावं समुत्क्षिप्य दास्यं चैव रघूत्तमम् ।
भजेऽहं प्रत्यहं रामं ससीतं सहलक्ष्मणम् ॥११॥
नित्यं श्रीरामभक्तस्य किंकरा यमकिंकराः ।
शिववत्यो दिशस्तस्य सिद्धयस्तस्य दासिकाः ॥१२॥
इदं हनुमता प्रोक्तं मंत्रराजात्मकं स्तवम् ।
पठेदनुदिनं यस्तु स रामे भक्तिमान्भवेत् ॥१३॥

॥ इति हनुमत्कल्पे श्रीहनुमन्मंत्रराजात्मकस्तवराजः समाप्तः ।॥

॥ श्रीहनुमत्सिद्धि स्तोत्रम् ॥

इस स्तोत्र के प्रत्येक मन्त्र के ११००० 'जप' एवं दशांश 'हवन' से सिद्धि होवे। हनुमान जी के मन्दिर में 'रुद्राक्ष' की माला से, ब्रह्मचर्य-पूर्वक 'जप' करें। नमक न खाए, तो उत्तम है। कठिन-से-कठिन कार्य इन मन्त्रों की सिद्धि से

सुचारु रूप से होते हैं।

(१) ॐ नमो हनुमते रुद्रावताराय, वायुसुताय, अञ्जनीगर्भसम्भूताय, अखण्ड ब्रह्मचर्यव्रतपालन-तत्पराय, धवलीकृत जगत् त्रितयाया, ज्वलदग्नि सूर्यकोटिसमप्रभाय, प्रकटपराक्रमाय, आक्रान्तदिग् मण्डलाय, यशोवितानाय, यशोऽलंकृताय, शोभिताननाय, महासामर्थ्याय, महातेजपुञ्जः विराजमानाय, श्रीरामभक्तितत्पराय, श्रीराम लक्ष्मणानन्दकारणाय, कपिसैन्यप्राकाराय, सुग्रीव सौख्यकारणाय, सुग्रीवसाहाय्यकारणाय, ब्रह्मास्त्र ब्रह्मशक्ति-ग्रसनाय, लक्ष्मणशक्ति-भेदनिवारणाय, शल्य-विशल्यौषधि-समानयनाय, बालोदित-भानुमण्डल-ग्रसनाय, अक्षयकुमार छेदनाय, वनरक्षाकर समूहविभञ्जनाय, द्रोणपर्वतोत्पाटनाय, स्वामिवचन-सम्पादितार्जुन-संयुग - संग्रामाय, गम्भीर-शब्दोदयाय, दक्षिणाशामार्तण्डाय, मेरूपर्वत - पीठिकार्चनाय, दावानल-कालाग्नि-रुद्राय, समुद्रलङ्घनाय, सीताऽऽश्वासनाय, सीतारक्षकाय, राक्षसी-सङ्घ-विदारणाय, अशोकवन-विदारणाय, लङ्कापुरी-दहनाय, दशग्रीव-शिरः कृन्त्तकाय, कुम्भकर्णादि-वधकारणाय, बालिनिवर्हण-कारणाय, मेघनाद - होमविध्वंसनाय, इन्द्रजीतवध-कारणाय, सर्वशास्त्रपारङ्गताय, सर्वग्रह-विनाशकाय, सर्वज्वर हराय, सर्वभय निवारणाय, सर्वकष्ट-निवारणाय, सर्वापत्ति-निवारणाय, सर्वदुष्टादि-निबर्हणाय, सर्वशत्रुच्छेदनाय, भूत-प्रेत-पिशाच - डाकिनी - शाकिनी-ध्वंसकाय, सर्वकार्य-साधकाय, प्राणिमात्र - रक्षकाय, रामदूताय स्वाहा।

(२) ॐ नमो हनुमते, रुद्रावताराय, विश्व-रूपाय, अमित-विक्रमाय, प्रकट-पराक्रमाय, महाबलाय, सूर्यकोटिसमप्रभाय, रामदूताय स्वाहा।

(३) ॐ नमो हनुमते रुद्रावताराय रामसेवकाय, रामभक्ति - तत्पराय, रामहृदयाय, लक्ष्मणशक्ति-भेद निवारणाय, लक्ष्मण-रक्षकाय, दुष्टनिबर्हणाय, रामदूताय स्वाहा।

(४) ॐ नमो हनुमते रुद्रावताराय, सर्वशत्रुसंहारणाय, सर्वरोग-हराय, सर्व-वशीकरणाय, रामदूताय स्वाहा।

(५) ॐ नमो हनुमते रुद्रावताराय, आध्यात्मिकाधि-दैविकाधि-भौतिक-तापत्रय-निवारणाय, रामदूताय स्वाहा।

(६) ॐ नमो हनुमते रुद्रावताराय, देव दानवर्षि-मुनि-वरदाय, रामदूताय स्वाहा।

(७) ॐ नमो हनुमते रुद्रावताराय, भक्तजनमनः कल्पना-कल्पद्रुमाय, दुष्टमनोरथ-स्तम्भनाय, प्रभञ्जन-प्राण प्रियाय, रामदूताय स्वाहा।

(८) ॐ नमो हनुमते रुद्रावताराय, वज्रदेहाय, वज्रनखाय, वज्रमुखाय, वज्र रोम्णे, वज्रनेत्राय, वज्रदन्ताय, वज्रकराय, वज्रभक्ताय, रामदूताय स्वाहा।

(९) ॐ नमो हनुमते रुद्रावताराय, परयन्त्र-मन्त्र-तन्त्र-त्राटक-नाशकाय, सर्वज्वरच्छेदकाय, सर्वव्याधि-निकृन्तकाय, सर्वभय-प्रशमनाय, सर्वदुष्ट-मुखस्तम्भनाय, सर्वकार्य-सिद्धिप्रदाय, रामदूताय स्वाहा।

(१०) ॐ नमो हनुमते रुद्रावताराय, देव - दानव - यक्ष-राक्षस-भूत-प्रेत-पिशाच-डाकिनी-शाकिनी-दुष्ट-ग्रह-बन्धनाय, रामदूताय स्वाहा।

(११) ॐ नमो हनुमते रुद्रावताराय, पञ्चवदनाय पूर्व-मुखे सकल-शत्रु-संहारकाय, रामदूताय स्वाहा।

(१२) ॐ नमो हनुमते रुद्रावताराय, पञ्चवदनाय दक्षिणमुखे कराल-वदनाय, नारसिंहाय, सकल-भूत-प्रेत-दमनाय, रामदूताय स्वाहा।

(१३) ॐ नमो हनुमते रुद्रावताराय, पञ्चवदनाय, पश्चिम-मुखे गरुडाय, सकलविष-निवारणाय, राम-दूताय स्वाहा।

(१४) ॐ नमो हनुमते रुद्रावताराय, पञ्चवदनाय उत्तर-मुखे आदि वराहाय, सकल-सम्पत्-कराय, रामदूताय स्वाहा।

(१५) ॐ नमो हनुमते रुद्रावताराय, ऊर्ध्व मुखे, हयग्रीवाय, सकल-जन-वशी-करणाय, रामदूताय स्वाहा।

(१६) ॐ नमो हनुमते रुद्रावताराय, सर्वग्रहान, भूत-भविष्य - वर्त्तमानान्, समीपस्थान् सर्वकाल-दुष्टबुद्धिनुच्चाटयोच्चाटय परबलानि क्षोभय-क्षोभय, मम सर्वकार्याणि साधय-साधय स्वाहा।

(१७) ॐ नमो हनुमते रुद्रावताराय, परकृत-यन्त्र-मन्त्र-पराहङ्कार-भूत-प्रेत-पिशाच-पर-दृष्टि-सर्व-विघ्न-तर्जन-चेटक-विद्या-सर्व-ग्रह-भयं निवारय निवारय स्वाहा।

(१८) ॐ नमो हनुमते रुद्रावताराय, डाकिनी-शाकिनी-ब्रह्म-राक्षस-कुल-पिशाचोरु भयं निवारय निवारय स्वाहा।

(१९) ॐ नमो हनुमते रुद्रावताराय, भूत-ज्वर-प्रेत-ज्वर-चातुर्थिकज्वर -विष्णु-ज्वर-महेश-ज्वर निवारय निवारय स्वाहा।

(२०) ॐ नमो हनुमते रुद्रावताराय, अक्षिशूल-पक्षशूल-शिरोऽभ्यन्तर-शूल-पित्त-शूल-ब्रह्मराक्षस-शूल-पिशाच-कुलच्छेदनं निवारय निवारय स्वाहा।

॥ लाङ्गूलास्त्र-शत्रुञ्जय हनुमत्स्तोत्रम् ॥

ॐ हनुमन्तं महावीरं वायुतुल्य पराक्रम् ।
मम कार्यार्थमागच्छ प्रणमामि मुहुर्मुहुः ॥

विनियोगः - ॐ अस्य श्री हनुमच्छत्रुञ्जय स्तोत्रमाला मंत्रस्य श्रीरामचन्द्र ऋषिः, नानाछन्दासि, श्रीमन्महावीरो हनुमान् देवता, मारुतात्मज इति ह्सौं बीजम्। अञ्जनीसूनुरिति ह्स्फ्रें शक्तिः ॐ हा हा हा इति कीलकम्, श्रीरामभक्त इति ह्रां प्राणः,श्रीरामलक्ष्मणानन्दकर इति ह्रां ह्रीं ह्रूं जीवः ममाऽराति-पराजयनिमित्त च उल्लास पूर्वक मम विजय प्राप्ति हेतुवे शत्रुञ्जयस्तोत्रमाला मंत्र जपे विनियोगः।

षडङ्गन्यास - ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें हसौं नमो हनुमते हृदयाय नमः। ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्स्त्रौं नमो रामदूताय शिरसे स्वाहा। ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्स्त्रौं नमो लक्ष्मण प्राणदात्रे शिखायै वषट्। ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्स्त्रौं नमो अञ्जनीसूनवे कवचाय हुं। ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें ह्स्त्रौं नमो सीताशोक विनाशनाय नेत्रत्रयाय वौषट्।ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्त्रौं ह्स्ख्फ्रें हस्त्रौं नमो लंकाप्रासादभञ्जनाय अस्त्राय फट्।

इसी तरह करन्यास करे।

ध्यानम् -

ध्यायेद बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुखैः प्रशस्तयशसं देदीप्यमानं रुचा ।
सुग्रीवादि समस्तवानरयुतं सुव्यक्त तत्वाप्रियं
संरक्ताऽरुणलोचनं पवनजं पीताम्बरालंकृतम् ॥१॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥२॥

वज्राङ्गं पिंगकेशाढ्यं स्वर्णकुण्डलमण्डितं ।
नियुद्धमुपसङ्कल्प- पारावरपराक्रमम् ॥३॥

गदायुक्तं वामहस्तं पाशहस्तं कमुण्डलुम् ।
उद्यद्दक्षिणदोर्दण्डं हनुमन्तं विचिन्तयेत् ॥४॥

हनुमानजी को प्रसन्न करने के लिये उन्हे सम्बोधन करते हुए कहे "अरे मल्ल

चटख'' अथवा कहे ''तोडरमल्ल चटख'' एवं कपि मुद्रा दिखावें।

कपिमुद्रा- करौ संपुटितौ कृत्वा समश्लिष्टाङ्गुली स्फुटा ।
तर्जन्यश्चाऽङ्गुली मूले कृत्वा द्वयङ्गुष्ठयोरपि ॥
अङ्गुल्यः पाणयोः सर्वा अन्तर्गर्भस्थिराः कुरु ।
हृदयोपरि स्थितास्तास्तु मुकुलाकृति संयुताः ।
स्ववाम पादे स्थिरा दृष्टिर्मुद्रास्याच्च स्थिराऽपितु ।
ज्ञेयेयं वानरी मुद्रा चैका मन्त्रपथे ध्रुवा ॥

॥ मालामंत्र ॥

ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं स्फ्रें ख्फ्रें ह्स्ख्फ्रें ह्सौं नमो हनुमते त्रैलोक्याक्रमण-पराक्रम श्रीरामभक्त। मम परस्य च सर्वशत्रून् चतुर्वर्णसम्भवान् पुं-स्त्री-नपुंसकान् भूत भविष्यद् वर्तमानान् नानादूरस्थ-समीपस्थान् नानानामध्येयान् नानासङ्करजातिजान् कलत्र पुत्र मित्र भृत्य बन्धु सुहृत् समेतान् प्रभुशक्तिसहितान् धनधान्यादि-संपत्तियुतान् राज्ञो राजपुत्र सेवकान् मंत्रि सचिवसखीन् अत्यन्तिकक्षणेन त्वरया एतद् दिनावधि नानोपायैमारय मारय शस्त्रैश्छेदय छेदय अग्निना ज्वालय ज्वालय दाहय दाहय अक्षयकुमारवत् पादतलाक्रमणेनाऽनेन शिलातले आत्रोटय आत्रोटय घातय घातय वध वध भूतसङ्घैः सह भक्षय भक्षय क्रुद्धचेतसा नखैर्विदारय विदारय देशादस्मा-दुच्चाटय उच्चाटय पिशाचवत् भ्रंशय भ्रंशय भ्रामय भ्रामय भयातुरान् विसंज्ञान् सद्यः कुरु कुरु भस्मीभूतान् उद्धूलय उद्धूलय भक्तजनवत्सल। सीताशोका-पहारक। सर्वत्र माम् एनं च रक्ष रक्ष हा हा हा हुं हुं हुं घे घे घे हुं फट् स्वाहा ॥१॥

ॐ नमो भगवते हनुमते महाबलपराक्रमाय महाविपत्ति-निवारिकाय भक्तजनमनः कामना-कल्पद्रुमाय दुष्टजनमनोरथ स्तंभनाय प्रभञ्जन-प्राणप्रियाय स्वाहा। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः मम शत्रून् शूलेन छेदय छेदय अग्निना ज्वालय ज्वालय दाहय दाहय उच्चाटय उच्चाटय हुं फट् स्वाहा ॥२॥

इनमें प्रथम मंत्र का राजकुल शत्रुकुलनाश हेतु एवं दूसरे का सर्वविपत्ति नाश हेतु प्रयोग कर सकते है।

॥ शत्रुञ्जय हनुमत्स्तोत्रम् ॥

श्रीमन्तं हनुमन्त-मार्तरिपुभिद्-भूभृतरुभ्राजितं
चाल्पद्-बालधि-बंधवैरिनिचयं चामीकराद्रि प्रभम् ।

अष्टौरक्तपिशङ्ग-नेत्रनलिनं भ्रूभङ्गमङ्ग-स्फुरत्
प्रोद्यच्चण्ड-मयूखमण्डलमुखं दुःखापहं दुःखिनाम् ॥१॥
कौपीनं कटिसूत्र-मौञ्ज्यजिनयुगदेहं विदेहात्मजा
प्राणाधीशपदारविन्दनिरतं स्वान्तं कृतान्तं द्विषाम् ।
ध्यात्वैवं समराङ्गणस्थितमथानीय स्व-हृत्पङ्कजे
संपूज्याऽखिल पूजनोक्त विधिना संप्रार्थयेत् प्रार्थितम् ॥२॥
हनुमन्नञ्जनीसूतो! महाबलपराक्रम ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥३॥
मर्कटाधिप! मार्तण्ड मण्डल-ग्रासकारक ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥४॥
अक्षयन्नपि पिङ्गाक्ष! क्षितिशोकक्षयङ्कर ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥५॥
रुद्रावतार! संसार-दुःख-भारापहारक ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥६॥
श्रीरामचरणाम्भोज- मधुपायतमानस ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥७॥
बालिकोदरद-क्लान्त सुग्रीवोन्मोचनप्रभो ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥८॥
सीताविरह-वारीशमग्न- सीतेशतारक ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥९॥
रक्षोराजप्रतापाग्नि-दह्यमान- जगद्धन ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१०॥
ग्रस्ताऽशेषजगत् स्वास्थ्य-राक्षसाम्भोधिमन्दर ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥११॥
पुच्छगुच्छ स्फुरद भूमि जगद्-दग्धारिपत्तन ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१२॥
जगन्मनो-दुरुल्लङ्घ्य- पारावार विलङ्घन ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१३॥

स्मृतमात्र- समस्तेष्टपूरक! प्रणतप्रिय ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१४॥
रात्रिञ्चर-चमूराशिकर्तनैक- विकर्तन ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१५॥
जानकी जानकीज्यानि प्रेमपात्र! परन्तप ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१६॥
भीमादिक- महावीर- वीरावेशावतारक ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१७॥
वैदेही- विरहक्लान्त- रामरोषैक- विग्रह ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१८॥
वज्राङ्ग- नख-दंष्ट्रेश। वज्रिवज्रावगुण्ठन ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥१९॥
अखर्वगर्व- गंधर्व पर्वतोभेदन स्वर ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२०॥
लक्ष्मणप्राण- संत्राणत्राता तीक्ष्णकरान्वय ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२१॥
रामाधिविप्रयोगार्त! भरताद्यार्तिनाशने ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२२॥
द्रोणाचल- समुत्क्षेप- समुत्क्षिप्तारिवैभव ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२३॥
सीताशीर्वादसंपन्न! समस्तावयवाक्षत ।
लोलल्लाङ्गूलपातेन ममाऽरातीन् निपातय ॥२४॥
इत्येवमश्वत्थतलोपविष्टः शत्रुञ्जयं नाम पठेत् स्वयं यः ।
स शीघ्रमेवास्तु-समस्तशत्रुः प्रमोदते मरुतज प्रसादात् ॥२५॥

॥ इति शत्रुञ्जयहनुमत् स्तोत्रम् ॥

॥ हनुमद्दीपदान विधिः॥

विशेष संकट में, ग्रहपीड़ा, राजभय में, आपत्ति विपत्ति में, दीपदानप्रयोग करना चाहिये। यह प्रयोग गणेश, दुर्गा, शिव, शालिग्राम, हनुमानजी की सन्निधि में अथवा चौराहे पर भी किया जा सकता है। वर्तिका १ से २१ सूत्र तक की बना सकते है दीपपात्र भी १, ११, २१, ५१ या अधिक जलाये जा सकते हैं।

यथा– सुदर्शनसंहितायाम्–

अथाऽतः संप्रवक्ष्यामि दीपदानं हनूमतः ।
येन विज्ञानमात्रेण सिद्धो भवति साधकः ॥१॥
दीपदानप्रमाणं तु सावधानादिदं शृणु ।
प्रमाणं तं तु वक्ष्यामि पञ्चमान मनुक्रमात् ॥२॥
स्थानं भेदं च मंत्रं च दीपदाने मनुं पृथक् ।
पुष्पवासिततैलं च सर्वकामफल प्रदम् ॥३॥
तिलतैलं श्रियो हेतुः पृथिकागमनाय च ।
अतसीतैलमुद्दिष्टं यशः कर्मणि निश्चितम् ॥४॥
सार्षपं रोगनाशाय सर्वव्याधि विनाशकम् ।
मारणे राजिकाजातं तथा वैभीतकादिकम् ॥५॥
उच्चाटे च करञ्जोत्थं विद्वेषे मधुवक्षजम् ।
अलाभे सर्वतैलं च तिलतैलमनुत्तमम् ॥६॥
गोधूमं च तिलं माषं मुग्दं वै तण्डुलं क्रमात् ।
पञ्चधान्यमिदं प्रोक्तं नित्यं दीप उदाहृतम् ॥७॥
पञ्चधान्यसमुद्भूत- पिष्टपात्रं सुशोभनम् ।
सर्वकाममिदं प्रोक्तं सर्वदा दीपदापने ॥८॥
वश्ये तण्डुलपिष्टं च मारणे माषपिष्टकम् ।
उच्चाटने तिलं कृष्णं यवपिष्टं प्रकीर्तितम् ॥९॥
पान्थस्यागमने प्रोक्तं गोधूमोत्थं स-तण्डलम् ।
मोहने तण्डुलं पिष्टमाकर्वे -मुग्दपिष्टकम् ॥१०॥
संग्रामे केवलं माषं कृत्वा दीपं च पात्रके ।
सन्धौ त्रिपलजं प्रोक्तं लक्ष्मीः कस्तूरिका मता ॥११॥

एला लवङ्ग कर्पूर -मृगनाभिसुसंयुता ।
कन्यकावरणे राजवश्ये सर्वं तथैव च ॥१२॥
अलाभे सर्ववस्तूनां पञ्चधान्यं परं मतम् ।
अष्टमुष्टि भवेत् किंचित् किंचित् पिष्टं तु पुष्कलम् ॥१३॥
सञ्च सप्त तथा रौद्रं प्रमाणं च यथा क्रमम् ।
सुगन्धं नैवमानं स्याद्यथारुचि समं मतम् ॥१४॥
नित्यं दीपः प्रकर्तव्यस्ताम्रपात्रे हनूमतः ।
सोमवारे तथा ध्यात्वा जलाप्लावं च कारयेत् ॥१५॥
पश्चात् प्रमाणतो ग्राह्यं क्रमशो ह्यमानकम् ।
तत् पिष्टं शुद्ध पात्रे तु नदीतोयेन् शोधितम् ॥१६॥
दीपपात्रं ततः कुर्याच्छुद्धो नियतमानसः ।
दीपपात्रे योज्यमाने मारुतेः कवचं पठेत् ॥१७॥

॥ इति पात्रविधिः ॥

मालानूनाश्च ये वर्णाः साध्यनाम समन्विताः ।
वर्तिकायाः प्रकर्तव्यास्तन्तवस्तत्प्रमाणतः ॥१८॥
त्रिंशांशेनैव सा रम्या गुरुकार्येऽखिले मताः ।
कूटतुल्या स्मृतानित्या सामान्यऽथ विशेषतः ॥१९॥
रुद्रकूटगुणा प्रोक्ता न पात्रं च विचालयेत् ।
एकविंशति-संख्यास्तन्तवो निर्मला मताः ॥२०॥
रक्तसूत्रं हनुमतो दीपदाने प्रकीर्तितम् ।
कृष्णमुच्चाटने प्रोक्तं द्वेषमारण कर्मणि ॥२१॥
कटुतुल्यपलं तैलं गुरुकार्येऽष्टसंगुणम् ।
नित्ये पञ्चपलं प्रोक्तमथवा मनसो रुचिः ॥२२॥
हनुमत्प्रतिमायास्तु सन्निधौ दीपदापनम् ।
प्रतिमा दीपसहिता ग्रहभूतग्रहेषु च ॥२३॥
चतुष्पथे तथा प्रोक्तं दीपदानमनन्तरम् ।
सन्निधौ स्फाटिके लिङ्गे शालग्रामस्य सन्निधौ ॥२४॥
नानाभोगाश्रयं प्रोक्तं दीपदानं हनूमतः ।
गणेश सन्निधौ विष्णोर्महासङ्कट नाशनम् ॥२५॥

विषव्याधि महाघोरे हनुमत् सन्निधौ कुरु ।
दुर्गायाः सन्निधौ प्रोक्तं संग्रामे घोर सङ्कटे ॥२६॥
द्यूते वृष्टिस्थले चैव विशेषान् मारणे तथा ।
व्याधिनाशे तुण्डबन्धे दुष्टदृष्टौ तथैव च ॥२७॥
राजद्वारे बन्धमुक्तौ गुरुकार्ये प्रयत्नतः ।
गजस्य मस्तके चैव राज्यलक्ष्मी समृद्धये ॥२८॥
स्त्रीवशीकरणे दीपो वापीतीरे सरोवरे ।
विप्र क्षत्रियविट् शूद्रवश्ये विप्रालये शुभम् ॥२९॥
जपे पूर्वमुखः कार्य उच्चाटे वायवः स्मृतः ।
सर्ववश्ये च कर्त्तव्यो दीपो याम्यदिशामुखः ॥३०॥

(यहाँ दक्षिण दिशा दीप ज्योति के मुख से है, साधक के मुँह की दिशा नही है)

मारणे भेदकार्ये च कर्त्तव्यो राक्षसीमुखः ।
शान्तिके पौष्टिके सन्धौ कन्यापुत्राप्तये तथा ॥३१॥
अभिचारार्थ सिद्ध्यर्थे दीपः कार्यो जलाश्रितः ।
स्तंभने भूतदमने शाकिनीनां च विग्रहे ॥३२॥
व्यन्तराणां च यक्षाणां पवनाभिमुखं कुरु ।
धानेशो धनधान्यादि राजलक्ष्मीसमृद्धये ॥३३॥
दीपः कार्यो महायोगे पान्थस्यागमनाय च ।
ईशानाभिमुखः कार्यः सर्वत्रऋद्धिविवृद्धये ॥३४॥
सर्वेषु गुरुकार्येषु राजपत्नीवशे तथा ।
वृष्टे समागमार्थाय देशस्योत्सादनाय ॥३५॥
देवतासम्मुखः कार्यो दीपः शून्ये प्रकल्पयेत् ।
वृष्टि वृक्षादि-निष्पत्तौ दुर्गे तोयप्रशोषणे ॥३६॥
विवरादि प्रवेशेषु भूमिस्थ धनकर्षणे ।
गण्डभेदेषु सर्वेषु शृङ्खलाबन्ध मोचने ॥३७॥
खातं कृत्वा करोन्मानं चतुरस्रं सुशोभनम् ।
तन्मध्ये स्थापयेद् दीपं दक्षिणाभिमुखं तथा ॥३८॥
पात्रधारण यंत्रं तु विशेषेण निशामय ।
स्वर्णो रूपोद्भवं ताम्रं त्रपुलाहाद्भवं तथा ॥३९॥

नागपात्रं विशेषेण वश्यादिषु च कर्मसु ।
पात्राधारे तु षट्कोणे तथा बीजानि विन्यसेत् ॥४०॥

हौं हौं हौं हां फ्रें हौं क्रमात्।

दीप की सुरक्षा के लिये भूमि में गड्ड़ा खोदकर रखें अथवा फर्श पर किसी काँच के गोले आदि द्वारा रक्षा करे। भूमि पर पट्कोण बनायें अग्निकोण से क्रम पूर्वक चारों कोणों में "**हौं हौं हौं ह्रां**" ये चार बीजमंत्र लिखें। अग्र एवं पृष्ठ दिशा में "**फ्रें** एवं "**ह्रौं**" लिखें। चतुरस्र बनाये तथा स्वर्ण चाँदी ताम्रपात्र या पीप्री से बना दीप पात्र रखें। वर्तिका का मुँह दक्षिण दिशा में रखें।

यंत्र मध्य में हनुमान गायत्री से पूजन करे-

अग्निकोणं समाश्रित्य कोणे कोणे यथा क्रमम् ।
मध्ये हनुमद् गायत्रीं तां शृणुष्व षडानन ॥

हनुमानगायत्री - ॐ रामदूताय विद्महे वायुपुत्रायधीमहि। तन्नो हनुमान् प्रचोदयात्॥

ततो मंत्रेण दीपपात्रं वेष्टयेत् (दीपरक्षा)

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः वज्रतुण्डकाय लङ्केश्वरवधाय महासेतुबन्धाय महाशैलप्रवाह- गगनेचर एह्येहि भगवन् महाबलपराक्रम भैरवायाऽऽज्ञा एहयेहि महारौद्र दीर्घपुच्छेन वेष्टय वैरिणो भञ्जय भञ्जय हुं फट्। (इति मंत्रं जपेत्)

५१ बार मंत्र जपते हुये पात्र एवं यंत्र का वेष्टन करें। चुटकी बजाते हुये या रक्षा सूत्र से वेष्टन करे। उसके आगे छुरि रखें कनेर के पुष्प से पूजा करें।

पञ्चाशदधिकं पात्रे यंत्रं मंत्रेण वेष्टयेत् ।
छुरिका अग्रतः स्थाप्या करवीरैश्च पूजयेत् ॥

ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रैं फ्रें हनुमान् प्रकट पराक्रम आक्रान्त-दिङ्मण्डल-यशोधवलीकृत जगत्रितय वज्रदेह

इसके बाद जब तक दीप जले तब तक निम्न मंत्र का जाप करे -

ज्वलत्सूर्यकोटिसमप्रभ तनुरुद्रावतार लङ्कापुरीदहन उदधिलंघन दशग्रीवशिरः कृतान्त सीतात्रासनिवारक वायुसुत अञ्जनिगर्भसंभूत श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार सुग्रीवसख्यकारण बालिनिर्वहण द्रोणपर्वतोत्पाटन अशोकवनविदारण अक्षकास्यच्छेदन वनरक्षाकरसमूह-भञ्जन ब्रह्मास्त्रब्रह्मशक्तिग्रसन लक्ष्मणशक्तिभेदन लक्ष्मणशक्तिभेदननिवारण

शिशुसमानपीनबालादित्यसानुग्रसन मेघनादहोमविध्वंसन इन्द्रजिद्वधकारण सीतारक्षकराक्षसविदारण कुम्भकर्णादिवधपरायण श्रीरामभक्ति तत्पर व्योमद्रुमोल्लंघन-महासामर्थ्य महातेजः पुञ्जविराजमानस्वामिवचनसंपादित अर्जुनसंयुगसहाय कुमारब्रह्मचारी गंभीरस्वर दक्षिणांशमार्त्तण्ड मेरुपर्वतोत् पाटकचरण सर्वदुष्टनिबर्हण व्याघ्रादिभयनिवारण सर्वशत्रुच्छेदनसमपरस्य त्रिभुवन स्त्री-पुं-नपुंसकात्मकं सर्वजीवजातं वशय वशय ममाज्ञाकारं संपादय संपादय नानानामधेयान् राज्ञः सपरिवारान्मम सेवकान् कुरु कुरु सर्ववश्य अविषाणविध्वंसय विध्वंसय परबलानि प्रबलानि परसैन्यानि क्षोभय क्षोभय संकार्यादिनादिति साधय साधय सर्वदुर्जनानां मुखानि स्तंभय स्तंभय कीलय कीलय घे घे घे हा हा हा हुं हुं हुं फट् स्वाहा।

मंत्रमेतत् पठेन्नित्यं यावद् दीपं समापयेत् ।
दीपाग्रे पठमानस्तु मनोवाञ्छितमाप्नुयात् ॥

॥ विधानम् ॥

भूमिशायी नक्तभोजी वर्णमाला समन्वितः ।
कपीश्वरं स्मेरन्नित्यमेकविंशति वासरान् ॥१॥
प्रमाणं दीपकरणे कार्यसिद्धिः प्रजायते ।
शकुनान् संप्रवक्ष्यामि आगमोक्तप्रमाणकान् ॥२॥
कार्यासं रसकुम्भं च विद्धाङ्गं चाऽङ्गवर्जितम् ।
अधिकाङ्गं दुष्टबुद्धिं दृष्ट्वा कार्यं न जायते ॥३॥
सुवासिनीं सुपुरुषं फलं गा वत्ससंयुताम् ।
तुरङ्गं गजखड्गं च दृष्ट्वा बाह्यं सुखप्रदम् ॥४॥
एवं दीपविधानं च मयोक्तं ते विशेषतः ।
हिताय जगतां पुत्र । तत्क्षणात् सिद्धि कारकम् ॥५॥
तस्मात् सर्वप्रयत्नेन देयं कृत्वा परीक्षणम् ।
देवानां च यथा विष्णुर्नदीनां जाह्नवी तथा ॥६॥
तक्षकः सर्वनागानां धेनूनां कामधुक् तथा ।
तथा सुदर्शनं चेयं संहिता परिकीर्तिता ॥७॥
विष्णुभक्ताय शान्ताय कान्ताय वशवर्तिने ।
सुभक्ताय सुशिष्याय व्रतज्ञाय प्रकाशयेत् ॥८॥
यथा माहिष्मतीनाथस्तथा वायुसुतः स्मृतः ।
उभयोरन्तरं नास्ति कृत्वा पापमवाप्नुयात् ॥९॥

॥ अथ एकमुखीहनुमत् कवचम् ॥

श्री ब्रह्माणपुराण में अगस्त्य नारद संवाद में हनुमत्कवच जो दिया गया है उसमें शरीर के अङ्गो व दिशा बंधन ही है तथा जो आनन्दरामायण में शिवपार्वति संवाद कवच कहा है उसमें कुछ रक्षा मंत्रों की अधिकता है दोनों ही कवच श्रीराम द्वारा कहे गये है।

॥ नारद उवाच ॥

एकदा सुखमासीनं शंकरं लोकशंकरम् ।
प्रपच्छ गिरिजा कान्तं कर्पूरधवलं शिवम् ॥१॥

॥ श्रीपार्वत्युवाच ॥

भगवन्देवदेवेश लोकनाथ जगत्प्रभो ।
शोकाकुलानां लोकानां केन रक्षा भवेद्ध्रुवम् ॥२॥
संग्रामे संकटे घोरे भूतप्रेतादिके भये ।
दुःखदावाग्नि संतप्तचेतसां दुःखभागिनाम् ॥३॥

॥ ईश्वर उवाच ॥

शृणु देवि प्रवक्ष्यामि लोकानां हितकाम्यया ।
विभीषणाय रामेण प्रेम्णा दत्तं च यत्पुरा ॥४॥
कवचं कपिनाथस्य वायुपुत्रस्य धीमतः ।
गुह्यं तत्ते प्रवक्ष्यामि विशेषाच्छृष्ट सुन्दरि ॥५॥

विनियोगः - ॐ अस्य श्री हनुमत्कवच स्तोत्र मंत्रस्य श्रीरामचन्द्र ऋषिः श्रीवीरोहनुमान् परमात्मादेवता, अनुष्टुप् छन्दः, मारुतात्मज इतिबीजम्, अंजनीसूनुरिति शक्तिः, लक्ष्मणप्राणदाता इतिजीवः, श्रीरामभक्तिरिति कवचम्, लङ्काप्रदाहक इतिकीलकम्, मम सकलकार्य सिद्ध्यर्थे जपे विनियोगः।

मंत्र - ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः।

करन्यास - ॐ ह्रां अङ्गुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां नमः। ॐ ह्रूं मध्यमाभ्यां नमः। ॐ ह्रैं अनामिकाभ्यां नमः। ॐ ह्रौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः करतल करपृष्ठाभ्यां नमः।

हृदयादिन्यासः - ॐ अञ्जनीसूनवे नमो हृदयाय नमः। ॐ रुद्रमूर्त्तये नमः शिरसे स्वाहा। ॐ वातात्मजाय नमः शिखायै वषट्। ॐश्रीरामभक्ताय

नमः कवचाय हुम्। ॐ वज्रकवचाय नमो नेत्रत्रयाय वौषट्। ॐ ब्रह्मास्त्रनिवारणाय नमः अस्त्राय फट्।

ध्यानम्–

ध्यायेद् बालदिवाकरद्युतिनिभं देवारिदर्पापहं
देवेन्द्रप्रमुख- प्रशस्तयशसं देदीप्यमानं रुचा।
सुग्रीवादि- समस्तवानरयुतं सुव्यक्ततत्वप्रियं
संरक्तारुणलोचनं पवनजं पीताम्बरालङ्कृतम् ॥१॥

उद्यन्मार्तण्डकोटि- प्रकटरुचियुतं चारुवीरासनस्थं
मौञ्जी यज्ञोपवीताऽऽभरण रुचि शिखा शोभितं
कुण्डलाढ्यम्भक्तानामिष्टदान-प्रणवमनुदिनं वेदनादप्रमोदं
ध्यायेद्देवं विधेयं प्लगकुलपतिं गोष्पदीभूतवार्धिम् ॥२॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ॥३॥

व्रजाङ्ग पिङ्गकेशाढ्यं स्वर्णकुण्डलमण्डितम्।
उद्यद्दक्षिण- दोर्दण्डं हनुमन्तं विचिन्तये ॥४॥

स्फटिकामं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम्।
कुण्डलद्वय- संशोभि- मुखाम्भोजं हरिं भजे ॥५॥

उद्यदादित्य सङ्काशमुदारभुज -विक्रमम्।
कंदर्पकोटिलावण्यं सर्वविद्याविशारदम् ॥७॥

श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम्।
अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥८॥

अपराजित! नमस्तेऽस्तु नमस्ते रामपूजित।
प्रस्थानं च करिष्यामि सिद्धिर्भवतु मे सदा ॥

यो वारान्निधिमल्प पल्लवमिवोल्लङ्घ्य प्रतापान्वितो।
वैदेही धनशोक-तापहरणो वैकुण्ठभक्तप्रियः।
अक्षाद्यूर्जित राक्षसेश्वरमहादर्पापहारी रणे।
सोऽयं वानरपुङ्गवोऽवतु सदा चाऽस्मान् समीरात्मजः ॥९॥

वज्राङ्ग पिङ्गनेत्रं कनकमयललित्-कुण्डलाक्रान्तगण्डं
सर्वाविद्याधिनाथं करतलविधृतं पूर्णकुम्भं दृढं च।

भक्ताभीष्टाधिकारं विदधति च सदा सुप्रसन्नं कपिन्द्रं
त्रैलोक्यत्राणकरं सकलभुवनगं रामदूतं नमामि ॥१०॥
उद्यल्लङ्गूलकेश- प्रचलजलधरं भीममूर्तिं कपीन्द्रम् ।
वन्दे रामाङ्घ्रिपद्म-भ्रमरपरिवृतं सत्वसारं प्रसन्नम् ॥११॥
वामेकरे वीरभयं वहन्तं शैलं च धत्तेनिजकण्ठलग्नम् ।
उद्यानमुत्थाय सुवर्णवर्णं भजे ज्वलत्कुण्डल रामदूतम् ॥१२॥
पद्मरागमणि-कुण्डलत्विषा पाटलीकृत कपोलमण्डलम् ।
दिव्यगेह कदलीवनान्तरे भावयामि पवमाननन्दनम् ॥१३॥
उल्लंघ्य सिंधोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लंकां नमामि तं प्राञ्जलिरांजनेयम् ॥१४॥

ये विविध प्रकार के ध्यान मंत्र दिये गये है, यह जरुरी नहीं है कि सभी ध्यान मंत्र पढ़े जायें।

ॐ नमो हनुमते यशोऽलंकृताय अञ्जनीगर्भसंभृताय रामलक्ष्मणानन्दकाय कपिसैन्यप्रकाशनाय पर्वतोत्पाटनाय सुग्रीवसाह्यकरण परोच्चाटन कुमार ब्रह्मचर्य गंभीरभीमशब्दोदयाय ॐ ह्रां ह्रीं ह्रूं सर्वदुष्टजन-दुष्टग्रह निवारणाय स्वाहा ॥१॥

ॐ नमो भगवते हनुमदारण्यरुद्राय सर्वदुष्टजन मुखस्तंभनं कुरु कुरु ह्रां ह्रीं ह्रूं ठं ठं ठं हुं फट् स्वाहा ॥२॥

ॐ नमो हनुमते सर्वग्रहान भूतभविष्यद् वर्तमानान् समीपस्थान् सर्वकाल दुष्टबुद्धिनुच्चाटयोच्चाटय परबलान् क्षोभय क्षोभय मम सर्वकार्याणि साधय साधय ॐ ह्रां ह्रीं ह्रूं फट् घे घे घे ॐ शिवसिद्धिं ॐ ह्रां ॐ ह्रीं ॐ ह्रूं ॐ ह्रैं ॐ ह्रौं ॐ ह्रः स्वाहा ॥३॥

ॐ ऐं ह्रीं हनुमते रामदूताय शाकिनी डाकिनी विध्वंसनाय किल किल वामकरेण निषण्णाय हनुमद्देवाय ॐ ह्रीं श्रीं ह्रौं ह्रां स्वाहा ॥४॥

ॐ नमो हनुमते परकृत्ययंत्रमंत्र पराहंकार-भूतप्रेतपिशाचदृष्टि- सर्वविघ्न दुर्जनचेष्टा कुविद्या चेटकविद्या सर्वग्रहभयं निवारय -२ बंध-२ लुंठ-२ विलुंच-२ किल-२ वध-२ पच-२ हन-२ सर्वकुयंत्राणि ॐ फट् स्वाहा ॥५॥

ॐ नमो हनुमते पाहि पाहि एहि एहि सर्वग्रहभूतानां शाकिनी डाकिनां विषमदुष्टानां सर्वेषामाकर्षयाकर्षय मर्दय मर्दय छेदय छेदय अपमृत्यं

ममोपशोषय मर्त्यान्मारय मारय शोषय शोषय प्रज्वल प्रज्वल भूतमण्डल पिशाचमण्डलनिरसनाय भूतज्वर प्रेतज्वर चातुर्थिकज्वर ब्रह्मराक्षसपिशाच च्छेदनक्रिया विष्णुज्वर महेशज्वरान् छिंधि-२ भिन्धि-२ अक्षिशूले शिरोऽभ्यंतरे ह्यक्षिशूले गुल्मशूले पित्तशूले ब्रह्मराक्षसकुल प्रबलनागकुलविषं -निर्विषं झटिति -२ ॐ ह्रीं फट् घे घे । सर्वदुष्टग्रहनिवारणाय स्वाहा ॥६॥

ॐ नमो हनुमते पवनपुत्राय वैश्वानरमुखाय पापदृष्टि घोरदृष्टि षोढादृष्टि हनुमदाज्ञा फुरे स्वाहा ॥७॥

ॐ नमो हनुमते स्वगृहे द्वारे पट्टके तिष्ठ तिष्ठेति तत्र रोगभयं राजकुलभयं नास्ति तस्योच्चारणमात्रेण सर्वे नश्यंति ॐ ह्रां ह्रीं ह्रूं घे घे स्वाहा ॥८॥

॥ श्रीरामचन्द्र उवाच ॥

हनुमान पूर्वतः पातु दक्षिणे पवनात्मजः ।
पातु प्रतीच्यां रक्षोघ्नः पातु सागर पारगः ॥९॥
उदीच्यामूर्ध्वगः पातु केसरीप्रिय नन्दनः ।
अधस्तु विष्णुभक्तश्च पातु मध्यं पावर्निः ॥२॥
अवान्तरदिशः पातु सीताशोकविनाशनः ।
लंकाविदाहकः पातु सर्वापद्भ्यो निरन्तरम् ॥३॥
सुग्रीवसचिवः पातु मस्तकं वायुनन्दनः ।
भालं पातु महावीरो भ्रुवोर्मध्ये निरन्तरम् ॥४॥
नेत्रे छायापहारी च पावनः प्लवगेश्वरः ।
कपोले कर्ण मूले च पातु श्रीरामकिंकरः ॥५॥
नासाग्रमंजनीसूनुः पातु वक्त्रं हरीश्वरः ।
वाचं रुद्रप्रियः पातु जिह्वां पिङ्गललोचनः ॥६॥
पातु दन्तान् फाल्गुनेष्टश्चुबकं दैत्यदर्पहा ।
पातुकण्ठं च दैत्यारिः स्कंधौ पातु सुरार्चितः ॥७॥
भुजौ पातु महातेजा करौ च चरणायुधः ।
नखान् नखायुधः पातु कुक्षिं पातु कपीश्वरः ॥८॥
वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुधः ।
लङ्काविभञ्जनः पातु पृष्ठदेशे निरन्तरम् ॥९॥

नाभिं च रामदूतस्तु कटिं पात्वनिलात्मजः ।
गुह्ये पातु महाप्राज्ञो लिङ्गं पातु शिवप्रियः ॥१०॥
ऊरू च जानुनी पातु लङ्काप्रासादभञ्जनः ।
जङ्घे पातु कपिश्रेष्ठो गुल्फो पातु महाबलः ॥११॥
अचलोद्धारकः पातु पादौ भास्करसन्निभः ।
अङ्गान्यमितसत्वाढ्यः पातु पादाङ्गुलीस्तथा ॥१२॥
सर्वाङ्गानि महाशूरः पातु रोमाणि चात्मवान् ।
हनुमत्कवचं यस्तु पठेद् विद्वान् विचक्षणः ॥१३॥
स एव पुरुष श्रेष्ठो भुक्तिं मुक्तिं च विन्दति ।
फलश्रुति- त्रिकालमेककालं वा पठेन्मात्रयं सदा ॥१४॥
सर्वान् रिपून् क्षणाज्जित्वा स पुमान् श्रियमाप्नुयात् ।
मध्यरात्रे जले स्थित्वा सप्तवारं पठेद् यदि ॥१५॥
क्षयाऽपस्मार- कुष्ठादि तापज्वर निवारणम् ।
अश्वत्थमूलेऽर्कवारे स्थित्वा पठति यः पुमान् ॥१६॥
अचलां श्रियमाप्नोति संग्रामे विजयं तथा ।
लिखित्वा पूजयेद् यस्तु सर्वत्र विजयी भवेत् ॥१७॥
यः करे ध्यारयेन्नित्यं स पुमान् श्रियमाप्नुयात् ।
विवादे द्यूतकाले च द्यूते राजकुले रणे ॥१८॥
दशवारं पठेद् रात्रौ मिताहारो जितेन्द्रियः ।
विजयं लभते लोके मानवेषु नराधिपः ॥१९॥
भूतप्रेत महादुर्गे रणे सागरसंप्लवे ।
सिंहव्याघ्रभये चोग्रे शरशस्त्रास्त्रपातने ॥२०॥
शृङ्खलाबन्धने चैव काराग्रहनियन्त्रणे ।
कायस्तोभे वह्निचक्रे क्षेत्रे घोरे सुदारुणे ॥२१॥
शोके महारणे चैव ब्रह्मग्रहविशानम् ।
सर्वदा तु पठेन्नित्यं जयमाप्नोत्य संशयम् ॥२२॥
भूर्जे वा वसने रक्ते क्षोभे वा तालपत्रके ।
त्रिगंधेनाथ मश्यैव विलिख्य धारयेन्नरः ॥२३॥

पञ्चसप्त त्रिलोहैर्वा गोपितं कवचं शुभम् ।
गले गट्यां बाहुमूले कण्ठे शिरसि धारितम् ।
सर्वान् कामानवाप्नोति सत्यं श्रीरामभाषितम् ॥२४॥

॥ द्वादशनामावलि॥

हनुमानंजनीसुनुर्वायुपुत्रो महाबलः ।
रामेष्ट फाल्गुनसखः पिंगाक्षोऽमित विक्रमः ॥१॥
उदधिक्रमणश्चैव सीताशोकविनाशनः ।
लक्ष्मण प्राणदाता च दशग्रीवस्य दर्पहा ॥२॥
एवं द्वादश नामानि कपीन्द्रस्य महात्मनः ।
स्वापकाले प्रबोधे च यात्राकाले च यः पठेत् ॥३॥
तस्य सर्वभयं नास्ति रणे च विजयी भवेत् ।
राजद्वारे गह्वरे च भयं नास्ति कदाचन ॥४॥

॥ अथ पञ्चमुखीहनुमत् कवचम् ॥

॥ श्रीपार्वत्युवाच ॥

सदाशिव वरस्वामिञ्ज्ञानद प्रियकारक ।
कवचादि मया सर्वं देवानां संश्रुतंप्रिय ॥१॥
इदानीं श्रोतुमिच्छामि कवचं करुणानिधे ।
वायुसूनोर्वरं येन नान्यदन्वेषितं भवेत् ।
साधकानां च सर्वस्वं हनुमत्प्रीतिवर्द्धनम् ॥२॥

॥ श्रीशिव उवाच ॥

देवेशि दीर्घनयने दीक्षादीप्तकलेवरे ।
मां पृच्छसि वरारोहे न कस्यापि मयोदितम् ॥३॥
कथं वाच्यं हनुमतः कवचं कल्पपादपम् ।
स्त्रीरूपा त्वमिदं नानाकूटमण्डित विग्रहम् ॥४॥
गह्वरं गुरुगम्यं च यत्र कुत्र वदिष्यसि ।
तेन प्रत्युत पापानि जायंते गजगामिनि ॥५॥
अत एव महेशानि नो वाच्यं कवचं प्रिये ॥६॥

॥ श्री पार्वत्युवाच ॥

वदान्यस्य वचोनेदं नादेयं जगतीतले ।
त्वं वदान्यावधिः प्राणनाथो मे प्रियकृत्सदा ॥७॥
मह्यं च किं न दत्तं ते तदिदानीं वदाम्यहम् ।
गणपं शाक्त सौरे च शैवं वैष्णवमुत्तमम् ॥८॥
मंत्रयंत्रादिजालं हि मह्यं सामान्यतस्त्वया ।
दत्तं विशेषतो यद्यत्तत्सर्वं कथयामि ते ॥९॥
श्रीरामतारको मंत्रः कोदण्डस्यापि मे प्रियः ।
नृहरेः सामराजो हि कालिकाद्याः प्रियंवद ॥१०॥
दशविद्या विशेषेण षोडशीमंत्र नायिकाः ।
दक्षिणामूर्ति संज्ञोऽन्यो मंत्रराजो धरापते ॥११॥
सहस्त्रार्जुन कस्यापि मंत्रा येऽन्ये हनूमतः ।
ये ते हयदेया देवेश तेऽपि मह्यं समर्पिताः ॥१२॥
किं बहूक्तेन गिरिश प्रेमयंत्रित चेतसा ।
अर्धाङ्गमपि मह्यं ते दत्तं किं ते वदाम्यहम् ।
स्त्रीरूपं मम जीवेश पूर्वं तु न विचारितम् ॥१३॥
शिव उवाच- सत्यं सत्यं वरारोहे सर्वं दत्तं मया तव ।
परं तु गिरिजे तुभ्यं कथ्यते श्रृणु सांप्रतम् ॥१४॥
कलौ पाखण्ड बहुला नानावेषधरा नराः ।
ज्ञानहीना लुब्धकाश्च वर्णाश्रम बहिष्कृताः ॥१५॥
वैष्णवत्वेन विख्याताः शैवत्वेन वरानने ।
शाक्तत्वेन च देवेशि सौरत्वेनेनरे जनाः ॥१६॥
गाणपत्येन गिरिजे शास्त्रज्ञानबहिष्कृता ।
गुरुत्वेन समाख्याता विचरिष्यन्ति भूतले ॥१७॥
ते शिष्य संग्रहं कर्तुमुद्युक्ता यत्र कुत्रचित् ।
मंत्राद्युच्चारणे तेषां नास्ति सामर्थ्यमम्बिके ॥१८॥
तच्छिष्याणां च गिरिजे तथापि जगतीतले ।
पठन्ति पाठयिष्यन्ति विप्रद्वेषपराः सदा ॥१९॥

द्विजद्वेषपराणां हि नरके पतनं ध्रुवम् ।
प्रकृतं वच्मि गिरिजे यन्मयापूर्वमीरितम् ॥२०॥
नानारूपमिदं नानाकूटमण्डितविग्रहम् ।
तत्रोत्तरं महेशानि श्रृणु यत्नेन सांप्रतम् ॥२१॥
तुभ्यं मया यदा देवि वक्तव्यं कवचं शुभम् ।
नानाकूटमयं पश्चात् त्वयाऽपि प्रेमतः प्रियम् ॥२२॥
वक्तव्यं कुत्रचित्तत्तु भुवने विचरिष्यति ।
विश्रांतः पातिनां भद्रे यदि पुण्यवतां सताम् ॥२३॥
सत्संप्रदाय शुद्धानां दीक्षामंत्रवतां प्रिये ।
ब्राह्मणाः क्षत्रिया वैश्या विशेषेण वरानने ॥२४॥
उच्चारणे समर्थानां शास्त्रनिष्ठावतां सदा ।
हस्तागतं भवेद्भद्रे तदा ते पुण्यमुत्तमम् ॥२५॥
अन्यथा शूद्र जातीनां पूर्वोक्तानां महेश्वरि ।
मुखशुद्धि विहीनानां दांभिकानां सुरेश्वरि ॥२६॥
यदा हस्तगतं तस्यात् तदा पापं महत्तव ।
तस्माद्विचार्य देवेशि ह्यधिकारिणमम्बिके ॥२७॥
वक्तव्यं नात्र संदहो ह्यन्यथा निरयं व्रजेत् ।
किं कर्त्तव्यं मया तुभ्यमुच्यते प्रेमतः प्रिये ॥२८॥
त्वयापीदं विशेषेण गोपनीयं स्वयोनिवत् ।

कवच प्रारंभते - ॐ पञ्चवदनायाञ्जनेयाय नमः।

विनियोग - ॐ अस्य श्री पंचमुखी हनुमद् मन्त्रस्य ब्रह्मा ऋर्षिः गायत्री छन्दः पंचमुखी हनुमान देवता ह्रीं बीजम्, श्रीं शक्तिम्, क्रौं किलकम्, क्रूं कवचं, क्रैं अस्त्राय फट्, इति दिग्वधः सर्वाऽभीष्ट सिद्धये आत्मनो रक्षणार्थे सर्वशत्रुक्षयार्थे जपे विनियोगः।

॥ श्री गरूड़ उवाच ॥

अथ ध्यानं प्रवक्ष्यामि श्रृणु सर्वाङ्गसुन्दरि ।
यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥

ध्यानम्–

पञ्चवक्त्रं महाभीमं त्रिपंचनयनैर्यतुम् ।
बाहुभिर्दशभियुक्तं सर्वकामार्थ सिद्धिदम् ॥
पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् ।
दष्ट्राकरालवदनं भृकुटिकुटिलेक्षणम् ॥१॥
अस्यवै दक्षिणं वक्त्रं नारसिंह महाद्भुतम् ।
अत्युग्रतेजोवपुषं भीषणं भय नाशनम् ॥२॥
पश्चिमं गारूडं पक्त्रं वक्रतुण्डं महाबलम् ।
सर्वनागप्रशमनं विषभूतादिकृंतनम् ॥३॥
उत्तरं सौकरं वक्त्रं कृष्णदीप्त नमोपमम् ।
पातालसिंह वेताल ज्वररोगादिकृंतनम् ॥४॥
उर्ध्वं हयाननं घोरं दावान्तकरं परम् ।
सेन वक्त्रेण विपेन्द्र तारकाख्यं महासुरम् ॥५॥
जघानशरणं तस्यात्सर्वशत्रुहरं परम् ।
ध्यायेत्पंचमुखं रूद्रं हनुमंतं दयानिधम् ॥६॥
खड्ग त्रिशुलं खट्वाङ्गं पाशमंकुशपर्वतम् ।
मुष्टिं कौमोदकीं वक्षं धारयंतं कमण्डुलम् ॥७॥
भिन्दिपालं ज्ञानमुद्रां दशभिमुनिपुंगव ।
एतान्यायुधजालानि धारयंतं भजाम्यहम् ॥८॥
प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् ।
दिव्यमालांबरधरं दिव्यगंधानुलेपनम् ॥९॥
सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम् ।
पंचास्यमच्युतमनेक विचित्रवर्णं वक्त्रं
शशांकशिखरं कपिराजवर्यम् ॥१०॥
पीताम्बरादिमुकुटैरूप शोभिताङ्गं
पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥११॥
मर्कटेश महोत्साह सर्वशत्रुहरः परः ।
शत्रुं संहर मां रक्ष श्रीमन्नापद उद्धर ॥१२॥

ॐ हरिमर्कट मर्कटमंत्रमियं परिलिख्यति लिख्यति वामतले।
यदि नश्यति नश्यति शत्रुकुलं यदि
मुञ्चति मुञ्चति वामलता ॥१३॥

इत ध्यात्वा कवचं पठेत् - ॐ हरिमर्कटमर्कटाय स्वाहा॥१॥ ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रु संहारणाय स्वाहा॥२॥ ॐ नमो भगवते पंचदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूत मथनाय स्वाहा॥३॥ ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गरूडाननाय सकलविषहराय स्वाहा॥४॥ ॐ नमो भगवते पंचवदनायोत्तर मुखायादि वराहाय सकलसंपतकराय स्वाहा॥५॥ ॐ नमो भगवते पंचवदनाय उर्ध्वमुखाय हयग्रीवाय सकलजन वशंकराय स्वाहा॥६॥

ये सभी मंत्र हनुमानजी के प्रत्येक स्वरूप के है इनका अलग अलग मंत्र जप प्रयोग भी हो सकता है।

विनियोगः - ॐ अस्य पंचमुख हनुमद्कवच मंत्रस्य श्रीरामचन्द्र ऋर्षिः, अनुष्टुप् छन्दः, पंचमुखवीरहनुमान्देवता, हनुमान बीजं, वायुपुत्र शक्ति, अंजनी सुत कीलकं, श्रीरामदूत हनुमत्प्रसाद सिद्धयर्थे जपे विनियोगः।

ऋषिन्यासः - ॐ रामचन्द्र ऋषये नमः शिरसि, अनुष्टुप छन्द से नमः मुखे, पंचमुखीवीरहनुमाद्देवतायै नमः हृदि, हनुमानिति बीजाय नमः गुह्ये, वायुपुत्र इति शक्तये नमः पादयोः, अंजनीसुत कीलकाय नमः नाभौ, विनियोगाय नमःसर्वाङ्गे।

षडङ्गन्यास - ॐ अंजनीसुताय अङ्गुष्ठाभ्यां नमः। ॐ रूद्र मूर्तय तर्जनीभ्यां नमः। ॐ वायुपुत्राय मध्यमाभ्यां नमः। ॐ अग्निगर्भाय अनामिकाभ्यां नमः। ॐ रामदूताय कनिष्ठाभ्यां नमः। ॐ पंचमुख हनुमते करतल कर पृष्ठाभ्यां नमः।

पुनः- ॐ अंजनी सुताय हृदयाय नमः। ॐ रूद्रमूर्तये शिरसे स्वाहा। ॐ वायुपुत्राय शिखायै वषट्। ॐ अग्नि गर्भाय कवचाय हुं। ॐ रामदुताय नेत्रत्रयाय वौषट्। ॐ पंचमुखहनुमतेऽस्त्राय फट्।

ध्यानम्-

वन्दे वानरनारसिंह - खगराट् क्रोडाश्ववक्त्रान्वितं
दिव्यालंकरणं त्रिपंचनयनं देदीप्यमानं रूचा ।

हस्ताब्जैरसिरखेटपुस्तक सुधाकुंभांकुशाद्रीन्हलम् ।
खट्वाङ्गं फणिभूरूहं दशभुजं सर्वारिवीरापहम् ॥

विनियोगः –ॐ रामदूतायञ्जनेयाय वायुपुत्राय महाबलपराक्रमाय सीतादुःखनिवारणाय लंकादहनकारणाय, महाबलप्रचण्डाय फाल्गुनसखाय कोलाहल सकलब्रह्माण्ड विश्वरूपाय सप्तसमुद्र नीरालंघनाय पिङ्गल नयनाया ऽमित विक्रमाय सूर्यबिम्बफलसेवनाय दुष्टनिबर्हणाय दृष्टिनिरालंकृताय संजीवनी संजीविताङ्गद लक्ष्मण-महाकपिसैन्यप्राणदाय दशकण्ठविध्वंसनाय रामेष्टाय फाल्गुनमहासखाय सीतासहित रामवरप्रदाय षट् प्रयोगागम पंचमुखवीरहनुमन्मंत्र जपे विनियोगः ।

द्वितीया वरणदेवतान्यासः - (ललाटे द्वादश दले) ॐ डां डाकिनीपुत्रेभ्यो नमः ॥ १ ॥ ॐ शां शाकिनीपुत्रेभ्यो नमः ॥ २ ॥ ॐ लां लाकिनीपुत्रेभ्यो नमः ॥ ३ ॥ ॐ कां काकिनीपुत्रेभ्यो नमः ॥ ४ ॥ ॐ सां साकिनीपुत्रेभ्यो नमः ॥ ५ ॥ ॐ हां हाकिनीपुत्रेम्यो नमः ॥ ६ ॥ ॐ मां मालिनीपुत्रेभ्यो नमः ॥ ७ ॥ ॐ दें देवीपुत्रेभ्यो नमः ॥ ८ ॥ ॐ मां मातृपुत्रेभ्यो नमः ॥ ९ ॥ ॐ रुं रुद्रपुत्रेभ्यो नमः॥ १० ॥ ॐ ऊं ऊर्ध्वमुखपुत्रेभ्यो नमः ॥ १२ ॥ तृतीयावरणदेवतान्यासः ॥

(कंठस्थानेअष्टदले) ॐ ब्रं ब्रह्माणीपुत्रबटुकाय नमः ॥ १ ॥ ॐ मां माहेश्वरीपुत्रबटुकाय नमः ॥ २ ॥ ॐ कौं कौमारीपुत्रबटुकाय नमः ॥ ३ ॥ ॐ वें वैष्णवीपुत्रबटुकाय नमः ॥ ४ ॥ ॐ इं इन्द्राणीपुत्रबटुकाय नमः ॥ ५ ॥ ॐ मं महालक्ष्मीपुत्रबटुकाय नमः ॥ ६ ॥ ॐ वां वाराहीपुत्रबटुकाय नमः ॥ ७ ॥ ॐ चां चामुण्डापुत्रबटुकाय नमः॥॥८ ॥ चतुर्थावरणदेवतान्यासः ॥

हृदयेदशदले ॐ हें हेतुकाय नमः ॥ १ ॥ ॐ त्रिं त्रिपुरांतकाय नमः ॥ २ ॥ ॐ वें वेतालाय नमः ॥ ३ ॥ ॐ अं अग्निजिह्वाय नमः ॥ ४ ॥ ॐ कां कालांतकाय नमः ॥ ५ ॥ ॐ कं करालाय नमः ॥ ६ ॥ ॐ एं एयालाय नमः ॥ ७ ॥ ॐ त्रीं त्रीमाय नमः ॥ ८ ॥ ॐ अं अचलाय नमः ॥ ९ ॥ ॐ हां हाटकेशाय नमः ॥ १० ॥ पंचमावरणदेवतान्यासः ॥ (नाभौ चतुर्दशकोणे) ॐ श्रीं श्रीकण्ठाय नमः ॥१ ॥ ॐ अं अनंतेशाय नमः ॥ २ ॥ ॐ सूं सूक्ष्मेशाय नमः ॥ ३ ॥ ॐ अं अर्मीशाय नमः ॥ ४ ॥ ॐ भां भारभूतीशाय नमः ॥ ५ ॥ ॐ अं अतिथीशाय नमः ॥ ६ ॥ ॐ स्थां स्थाणवीशाय नमः ॥ ७ ॥ ॐ हं हरेशाय नमः ॥ ८ ॥ ॐ झिं झिंटीशाय नमः ॥ ९ ॥ ॐ भौं भौतिकेशाय नमः ॥ १० ॥ ॐ स सद्योजातेशाय नमः ॥ ११ ॥ ॐ आं

अनुग्रहेशाय नमः ॥ १२ ॥ ॐ क्रूं क्रूरेशाय नमः ॥ १३ ॥ ॐ मं महासेनेशाय नमः ॥ १४ ॥ षष्ठमावरणदेवतान्यासः ॥

स्वाधिष्ठाने षोड़शदले ॐ क्रों क्रोधीशाय नमः ॥ १ ॥ ॐ चं चंडीशाय नमः ॥ २ ॥ ॐ पं पंचांतकेशाय नमः ॥ ३ ॥ ॐ शिं शिवोत्तमेशाय नमः ॥ ४ ॥ ॐ एं एकरुद्रेशाय नमः ॥ ५ ॥ ॐ कूं कूर्मेशाय नमः ॥ ६ ॥ ॐ एं एकनेत्रेशाय नमः ॥ ७ ॥ ॐ चं चतुराननेशाय नमः ॥८ ॥ ॐ अं अजेशाय नमः ॥ ९ ॥ ॐ सं सर्वेशाय नमः ॥ १० ॥ ॐ सों सोमेशाय नमः ॥ ११ ॥ ॐ लां लांगलीशाय नमः ॥ १२ ॥ ॐ दां दारुकेशाय नमः ॥ १३ ॥ ॐ अं अर्धनारीशाय नमः ॥ १४ ॥ ॐ उं उमाकांतेशाय नमः ॥ १५ ॥ ॐ आं आषाढीशाय नमः ॥ १६ ॥ सप्तमावरणदेवतान्यासः ॥

मूलाधारे चतुर्विंशति दले ॐ दं दंडीशाय नमः ॥ १ ॥ ॐ अं अत्रीशाय नमः ॥ २ ॥ ॐ मीं मीनेशाय नमः ॥ ३ ॥ ॐ में मेघेशाय नमः ॥ ४ ॥ ॐ लों लोहितेशाय नमः ॥ ५ ॥ ॐ शिं शिखीशाय नमः ॥ ६ ॥ ॐ छं छगलंडेशाय नमः ॥ ७ ॥ ॐ द्विं द्विरंडेशाय नमः ॥ ८ ॥ ॐ मं महाकालीशाय नमः ॥ ९ ॥ ॐ वां वालीशाय नमः ॥ १० ॥ ॐ भुं भुजंगेशाय नमः ११ ॥ ॐ पिं पिनाकीशाय नमः ॥ १२ ॥ खं खड्गीशाय नमः ॥ १३ ॥ ॐ व वकीशाय नमः ॥ १४ ॥ ॐ श्वें श्वेतेशय नमः ॥ १५ ॥ ॐ भृं भृग्वीशाय नमः ॥१६ ॥ ॐ नं नकलीशाय नमः ॥ १७ ॥ ॐ शिं शवेशाय नमः ॥ १८ ॥ ॐ सं संवर्तकेशाय नमः ॥ २१ ॥ ॐ दिं दिव्ययोगिन्यै नमः ॥ २० ॥ ॐ अं अंतरिक्षयोगिन्यै नमः ॥ २१ ॥ ॐ भूं भूमिष्ठयोगिन्यै नमः ॥ २२ ॥ ॐ सं संवर्तयोगिन्यै नमः ॥ २३ ॥ ॐ सर्वभूतदमनाय नमः ॥ २४ ॥ अष्टमावरणदेवतान्यासः ॥

पादयोः भूपूरे ॐ इं इंद्राय वज्रहस्ताय नमः ॥ १ ॥ ॐ अं अग्नये शक्तिहस्ताय नमः ॥ २ ॥ ॐ यं यमाय दंडहस्ताय नमः ॥ ३ ॥ ॐ क्षं निर्ऋतये खड्गहस्ताय नमः ॥ ४ ॥ ॐ वं वरुणाय पाशहस्ताय नमः ॥ ५ ॥ ॐ वां वायवे अंकुशहस्ताय नमः ॥ ६ ॥ ॐ सां सोमाय गदाहस्ताय नमः ॥ ७ ॥ ॐ ईशानाय त्रिशूल हस्ताय नमः ॥ ८ ॥ ॐ ब्रं ब्रह्मणे कमल हस्ताय नमः ॥ ९ ॥ ॐ आं अनंताय चक्रहस्ताय नमः ॥ १० ॥ इति अष्टम आवरण देवता न्यास।

इसके बाद ..न देवताओं की पूजा अर्चना करे।

॥ श्रीवटुकभैरव मन्त्रजप विधानम् ॥

विनियोगः - ॐ अस्य श्री आपदुद्धारण वटुकभैरव मन्त्रस्य वृहदारण्य ऋषिः, त्रिष्टुप्छन्दः, श्रीवटुकभैरवो देवता, ह्रीं बीजं, स्वाहा शक्ति, भैरव कीलकं अभीष्ट सिद्धर्थे जपे विनियोगः।

ऋषिन्यासः - वृहदारण्य ऋषि नमः शिरसि, त्रिष्टुप्छन्दसे नमः मुखे, श्रीवटुकभैरव देवतायै नमः हृदि, ह्रीं बीजाय नमः गुह्ये, स्वाहा शक्तये नमः पादयोः, भैरव कीलकाय नमः नाभौ, विनियोगाय नमः सर्वाङ्गे।

अङ्गादिन्यासः -

मन्त्रः	करन्यास	अङ्गन्यास
ॐ ह्रां वां	अंगुष्ठाभ्यां नमः।	ॐ ह्रां वां हृदयाय नमः।
ॐ ह्रीं वीं	तर्जनीभ्यां नमः।	ॐ ह्रीं वीं शिरसे स्वाहा।
ॐ ह्रूं वूं	मध्यमाभ्यां नमः।	ॐ ह्रूं वूं शिखायै वषट्।
ॐ ह्रैं वैं	अनामिकाभ्यां नमः।	ॐ ह्रैं वैं कवचाय हुँ।
ॐ ह्रौं वौं	कनिष्ठिकाभ्यां नमः।	ॐ ह्रौं वौं नेत्रत्रयाय वौषट्।
ॐ हः वः	करतलकरपृष्ठाभ्यां नमः।	ॐ हः वः अस्त्राय फट्।

मन्त्रन्यासः -

ॐ ह्रां ह्रीं	अगुष्ठाभ्यां नमः।	हृदयाय नमः।
ॐ ह्रीं वटुकाय	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ॐ ह्रं आपदुद्धारणाय	मध्यमाभ्यां नमः।	शिखायै वषट्।
ॐ ह्रैं कुरु कुरु	अनामिकाभ्यां नमः।	कवचाय हुँ।
ॐ ह्रौं वटुकाय	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
ॐ हः ह्रीं	करतलकरपृष्ठाभ्यां नमः	अस्त्राय फट्।

॥ साधारणध्यानम् ॥

करकलित कपालः कुण्डली दण्डपाणि-
स्तरुणतिमिरनीलो व्यालयज्ञोपवीती ।
क्रतु समयसपर्या-विघ्नविच्छेद हेतु-
र्जयति बटुकनाथः सिद्धिदः साधकानाम् ॥

मूलमन्त्र - ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ॐ।

कई जगह वटुक व कहीं बटुक का प्रयोग है, दौनों ही शब्द सही है। क्रूरकार्य

में तामस ध्यान तथा वशीकरण व स्तंभन में राजसध्यान एवं शुभकार्यों में सात्विकध्यान करें।

॥ सात्त्विकध्यानम् ॥

श्वेतवर्णं चतुर्बाहुं जटामुकुटधारिणम् ।
भुजङ्गपाशहस्तं च हस्ते दण्डकमण्डलुम् ॥
शुक्लयज्ञोपवीतं च शुक्लकौपीनवाससम् ।
शुक्ल वस्त्रपरीधानं श्वेतमालानुलेपनम् ॥
त्रिनेत्रं नीलकण्ठं च मुक्ताभरण भूषितम् ॥१ ॥
वन्दे बालं स्फटिकसदृशं कुण्डलोद्भासिताङ्गं
दिव्याकल्पै नवमणिमयैः किंकिणी नूपुराढ्यैः ।
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताग्राभ्यां वटुकसदृशं शूलदण्डोपधानम् ॥२ ॥

॥ राजसध्यानम् ॥

तुषारकर्णिकाभासं मायारूपमनंतकम् ।
मुर्ध्नि खण्डेन्दुशकलं त्रिनेत्रं शान्तछिन्नशीर्षा विभूषितम् ॥
सर्पमालासमायुक्तं हस्तोरुस्थूल जानुषु ।
अंत्रमालासमायुक्तं सर्वाभरणभूषितम् ॥१ ॥
उद्यद्भास्कर सन्निभं त्रिनयनं रक्तांग रागस्त्रजम् ।
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥
नीलग्रीवमुदारभूषणयुतं शीतांशु खण्डोज्वलम् ।
बन्धूकारणवाससं भयहरं देवं सदाभावये ॥२ ॥

॥ तामसध्यानम् ॥

ॐ त्रिनेत्रं रक्तवर्णं च वरदाभयहस्तकम् ।
सव्ये त्रिशूलमभयं कपालं वरमेव ॥
रक्तवस्त्रपरीधानं रक्तमाल्यानुलेपनम् ।
नीलग्रीवं च सौम्यं च सर्वाभरणभूषितम् ॥१ ॥
ध्यायेन्नीलादिकान्तं शशिशकलधरं मुण्डमालं महेशम् ।
दिग्वस्त्रं पिंगकेश डमरुमथसृणि खड्गपाशाऽभयानि ॥

नागं घण्टां कपालं करसरसिरुहैर्विभ्रतं भीमदंष्ट्रम् ।
दिव्यकल्पं त्रिनेत्रं मणिमयविलसत्किंकिणी नूपुराढ्यम् ॥२ ॥

मूलमन्त्र के एक लक्ष जप का पुरश्चरण कहा है। दशांश होम व दुग्धमिश्रित जल से तर्पण करें। तर्पण का दशांश मार्जन अपनी मूर्ध्नि पर करें।

(ॐ आत्मानमभिषिंचामि नमः, इति मूर्ध्नभिषेकः)

वैसे तो भैरव के लिये रविवार प्रधान माना जाता है, रुद्रयामल के अनुसार शुक्लपक्ष की द्वितीया शुक्रवार को भी प्रयोग का विधान लिखा गया है। अष्टदल पर आधातोला वचाचूर्ण, आधातोला घृतयुक्त अर्पण कर तीन हजार जप करें। तीन लक्ष जप करें तो वाणी गद्य-पद्यमयी होवे। कृष्णपक्ष में चतुर्दशी मंगलवार को रजत स्वर्ण पात्र में कपिला गौघृत से दीप जलाकर स्वर्णपात्र या नरकपाल में अञ्जन करें तो सभी का वशीकरण होवे तीन हजार से तीस हजार जप अवश्य करें। आधा तोला हल्दी व आधा तोला वचा चूर्ण गौमूत्र व गौघृत युक्त करें तथा देवता के आगे पद्मपत्र पर निवेदन करें इसको वंध्या भी ग्रहण करें तो आयुष्मान विद्यावान गुणवान पुत्र प्राप्त करें।

पुत्रजीवी के फलों के होम से सर्वसिद्धि प्राप्त होवे, अश्वत्थ समिध होम से पुत्र प्राप्त होवे। लवणघृत होम से शत्रू का उच्चाटन होवे। काक एवं उल्लु के माँस होम से शत्रु का मारण होवे।

श्मशान में तीनलाख जप करने से भैरव दर्शन देवे। वटवृक्ष के नीचे जपने से भूत वेताल का वशीकरण होवे।

रक्तोत्पल मधु रक्तपुष्प व दुग्धान्न के होम से वशीकरण होवे। पलाश के पुष्प के होम से वाक्‌सिद्धि होवे। कर्पूर अगर गुग्गल होम से ज्ञानवृद्धि तथा दूर्वा होम से आयुवृद्धि होवे। जायफल व बिल्वफल होम से तथा पुष्प एवं मधुत्रय होम से सबका वशीकरण होवे। सरसों के होम से शत्रुनाश होवे। पाटलीपुष्प, कुन्द, उत्पल, नागचम्पा के होम से श्रीवृद्धि होवे। लाजाहोम, दधिक्षीर घृतायुक्त होम से रोगनाश होवें।

तिलक – कर्पूर समभाग, चतुर्भाग जटामांसी, गोरोचन, दोभाग चन्दन, सातभाग कुंकुम, नवभाग अगर की पिष्टिका कन्याद्वारा बनवावें एवं उसका तिलक करें तो सभी का वशीकरण होवें।

उशीरं चन्दनं कुष्ठं घनसारं स कुंकुमम् । श्वेतार्कमूल वाराही लक्ष्मीक्षीर महीरुहाम्। त्वचो बिल्वतरोमूलं शोषयित्वा सुचूर्णयेत्। चूर्णं व्योम्नि गृहीतेन

गोमयेन् विमिश्रतम्। कृत्वा पिण्डं हि संशोष्य संस्कृते हव्यवाहने। मूलेन दग्ध्वा तद्भस्म शुद्धे पात्रे विनिःक्षिपेत्। केतकीमालतीपुष्पैर्वासयेद्भस्म शोधितम्। अयुतं प्रजपेन्मन्त्रं स्पृष्ट्वा भस्म सुपूजितम्। एतदादाय दिवसे प्रातः पुंड्रं करोति यः। तस्य रोगाः प्रणश्यंति कृत्याद्रोहमहाग्रहाः। रिपुचोरमृगादिभ्यो भयमस्य न जायते। वर्द्धते संपदः सर्वा पूज्यते सकलैर्जनैः॥

॥ विजयाभिषेकः ॥

राजा को विजय की कामना हेतु वटुकघटों के द्रव्य से अभिषेक कराना चाहिये। मध्य में कलश रखकर (प्रधानघट) उसके बाहर अष्टदिशाओं में अष्टकुंभ रखें। इस तरह हेमादिपात्र युक्त नव कलश रखें।

अष्टदल के बाहर १३ कलश, उनके बाहर १० कलश, उनके बाहर १६ कलश उनके बाहर ३५ कलश रखें।

कलशों का स्थापन व उनमें देव का आवाहन पूजन वटुक यंत्र पूजन की तरह ही होगा।

मध्य के ९ कलशों में नवरत्न डालें, अन्य सभी कलशों में -

संस्थाप्य विमलैस्तौयैरापूर्यान्विनिःक्षिपेत् ।
क्षीरद्रुमप्रवालानि लक्ष्मीदुर्वासमायुतम् ॥

कर्पूरं चंदनं विल्व मुशीरं कुंकुमं पुनः । कंकोलमगुरुं जाति मल्लिका चंपकोत्पलैः॥ गोमेद दाडिमं पश्चात् पट्टसूत्रेण वेष्टयेत्॥

लक्ष्मी – ऋद्दि वृद्दि नाम, कंद है जो कौशल पर्वत पर उगते हैं। वैसे हरड़ को श्रेयसी कहते हैं अभाव में इसका प्रक्षेप कर सकते हैं। कलशों को जल से पूरित कर उपरोक्त औषधियाँ व पत्ते ड़ालें। प्रधानघट में भैरव का राजसध्यान कर आवाहन करें। उसके बाहर अष्ट कलशों में असितांगादि अष्टभैरवों का आवाहन करें। उनके बाहर १३ कलशों में डाकिनी पुत्रादि १३ गणों का आवाहन करें। उनके बाहर १० कलशों में इन्द्रादि लोकपालों का पूजन करें। उनके बाहर १६ कलशों में श्रीकण्ठेश से महासेनेशादि का पूजन करें। उनके बाहर ३५ कलशों में **''ॐ ह्रीं कं क्रोधीश महाकालीभ्यां से लेकर ॐ ह्रीं क्षं क्रोधात्मभ्यां संवर्तकेश महामायाभ्यां नमः''** तक के देवताओं का आवाहन पूजन करें।

उपरोक्त देवताओं के नाम वटुकयन्त्र पूजन से अवलोकन कर लेवें।

घटों का स्पर्श (अन्वारब्ध) करके १० हजार जप करें। पायस, तिल, सरसों इत्यादि से दशांश हवन करे बलि प्रदान करें। उसके बाद नदी तीर पर मंगलध्वनि के साथ आचार्य राजा को **कवचमन्त्र, नाममन्त्र व रक्षोघ्न तथा पावमानसूक्त, शान्तिसूक्त** इत्यादि से अभिषेक करें।

आस्तिकं शुद्धवचनमभिषिंचेत्प्रसन्नधीः। अभिषिक्तो नरपतिः प्रणिपत्य गुरुं परम्॥ भूयसीं दक्षिणां दद्यात्प्रसीददति यथा गुरुः। राजाभिषिक्तो भवति साक्षाद्भूमिपुरंदरः॥ परान्विजयते भूपान्स्तूयते सकलैर्नरैः। भक्ष्यभौज्यैर्धनैर्धान्यैः पूजयंति यशस्विनः॥

॥ भैरव दीपदान प्रयोगः॥

पूजा अनुष्ठान कर्म में दीपदान का महत्व है। **दीपदान के दो प्रकार हैं।**

१. पूजापाठ प्रारंभ करने के समय - यह कर्मसाक्षीदीप है।

२. पूजापाठ पश्चात् - यह भैरव की प्रसन्नता हेतु बलिकर्म के साथ होता है।

कामना विशेष हेतु दीपदान का स्वतन्त्र विधान है जिसमें पात्र, द्रव्य, घृत व भार, वर्त्ति संख्या इत्यादि के भेद से कामनाफल का भेद है।

नदी तीर पर भैरवपूजन कर दीपों का पूजन कर नदी में विर्सजन का भी विशेष फल है।

शुभमुहुर्त्त में चन्द्रतारा अनुकूल होवे तथा रोहिणी, आर्द्रा, पुष्य, तीनों उत्तरा, हस्त, स्वाति, विशाखा, जेष्ठा और श्रवण नक्षत्रों में व्यतिपात, वैधृति सौभाग्य, शोभन, प्रीति, सुकर्म, धृति, वृद्धि, हर्षणादि योगों में प्रारम्भ करे।

विशेष - *सूर्यग्रहण, चन्द्रग्रहण, संक्रांति, कृष्णाष्टमी, नवरात्रि, ज्येष्ठशुक्ला दशमी व सभी देवी पर्वों में वटुक हेतु दीपदान प्रयोग करें।*

॥ पात्रस्य धातु मानम् ॥

सौवर्णं सिद्धिदं पात्रे वश्ये रोप्यं प्रकल्पयेत्।
विद्वेषणकरं लौहं मारणे मृण्मयं तथा॥
उच्चाटन कास्यं मोहे पित्तलजं स्मृतम्।
अत्रोक्तं सर्वकार्येषु सर्वाभावे तु ताम्रजम्॥

अधिकतर मृणमय पात्र काम में आता है परन्तु यहाँ अशुभ लिखा है अतः पात्र में चाँदी की अंगुठी इत्यादि डाल देवें। इसके अलावा अन्न की पिष्ठी का तैल पात्र

बनाया जाता है।

गोधूमाश्च तिला माषा (उड़द) मुद्गाश्च (मूंग) तंडुलाः क्रमात् ।
पञ्चधान्यमिदं प्रोक्तं सर्वदा दीप दापने ॥
वश्ये तण्डुलपिष्टोत्थं मारणे माषपिष्टजम् ।
तिलपिष्ट समुद्भूतमुच्चाटन विधौ स्मृतम् ॥
प्रियस्यागमने प्रोक्तं गोधूमोत्थं सतण्डुलम् ।
मोहने मुद्‌गजं प्रोक्तं पात्रद्रव्यमनुक्रमात् ॥

॥ सूत्रमानम् ॥

श्वेतशान्तौ तथा पीतं स्तंभेवश्ये तु रक्तकम् ।
मांजिष्ठ द्वेषणे प्रोक्तं मारणे कृष्णसूत्रकम् ॥
सर्वाभावे महादेवि श्वेतसूत्रं प्रशस्यते ॥

॥ वर्तिमानम् ॥

वर्तिका युग्म शिर की बनावें। वर्ति या तन्तु संख्या विषम होनी चाहिये।

एकापञ्च तथा सप्त एकविंशति संख्यया ।
अयुग्माथ प्रकर्त्तव्या युग्मां नैव तु कारयेत् ॥
वर्तिरिका प्रकर्त्तव्या त्रिस्त्रो वा वर्त्तस्य स्तथा ॥

॥ घृत तैल मानम् ॥

गोघृते सर्वसिद्धिः स्यान्माहिषं मारणे स्मृतम् ।
उष्ट्रीयं द्वेषणे प्रोक्तं गाडरं शान्तिकर्मणि ॥
अजामुच्चाटने कार्यं सर्वाभावे गोघृतम् ।
घृताभावे भवेत्तैलं दीपदाने विशेषतः ॥
तिल तैलं तथा नव्यं घृतं वश्ये प्रकल्पयेत् ।
कटुतैलं द्वेषणे च मारिणे राजिकं स्मृतम् ॥
बंदिबंधनमोक्षे च तथा भूत पिशाचके ।
सार्षपं तैलमापूर्य दीपदानं विधीयते ॥

तेल में वसा व मेदा नहीं होनी चाहिये।

वार परत्वेन बलिदानम्

प्रत्येक वार को बलिप्रदान करने के अलग अलग द्रव्य भी है, विनियोग बोलते हुये बलि प्रदान करें। देवता का सात्विक, राजस, तामस ध्यान कामना भेद से करें।

बलि के बाद तीन बार आचमन कर हस्त प्रक्षालन करें एवं प्रार्थना करें -

रविवारे पायसान्नं सोमवारे च मोदकम् ।
भौमे गुडाज्य गोधूमा बुधे च दधिशर्करः ॥
गोधूम पूरिका युक्ता घृतमध्ये सुपाचिताः ।
गुरौ चणक खण्डाज्यं केवलं चणकं भृगौ ॥
शनौ माषान्नतैलं च इतिवारबलिः क्रमात् ॥

॥ राजसध्यानम् ॥

उद्यत्सूर्य सहस्त्राभं त्रिनेत्र चन्द्रशेखरम् ।
रक्ताङ्गरागमारक्तं मालाम्बर विभूषितम् ॥
स्मेराननं नीलकण्ठं नानाभरण भूषितम् ।
दक्षिणोर्ध्वकरे शूलम् तदधो वरमद्रिजे ॥
वामोर्ध्वहस्ते देवेशि कपालं तदधोऽभयम् ।
दधानं संस्मरेद्देवि स्मृर्तणामभयंकरम् ॥

॥ तामसध्यानम् ॥

अञ्जनाचल संकाशं मुण्डमाला विभूषितम् ।
चन्द्रखण्ड लसत्पिंग केशभारं दिगम्बरम् ॥
त्रिनेत्रं दक्षिणैहस्तैडमरुं च सृणिं तथा ।
खड्गं शूलं च देवेशि दधानमपरैः करैः ॥
अभयं नागपाशं च घण्टां चैव कपालम् ।
उर्ध्वादिक्रमतो देवि भीमदंष्ट्रं भयानकम् ॥
सर्वाभरण संदीप्तं मणिनूपूर मण्डितम् ।
किंकिणी जाल संयुक्तं ध्यायेत्वटुकभैरवम् ॥

॥ कार्यपरत्वेन पात्र वितारे तैलमानम् ॥

विंशत्पलमिते पात्रे बुध्नोच्छ्राये षडङ्गुलम् ।
विस्तारे चाङ्गुलान्येव षोडश परिकीर्तितम् ॥१॥
पञ्चाशत्पलगव्यं च वश्ये चौर्यादिकर्मणि ।
त्रिंशद्दशपले पात्रे मानं तद्वत्प्रकीर्तितम् ॥२॥
षष्ठिपलमिते पात्रे बुध्नोच्छाये नवाङ्गुलम् ।
अङ्गुलानि चतुर्विंशदायामे परिकल्पयेत् ॥३॥

पञ्चसप्तमिते तैले सर्वशत्रुविनाशनम् ।
द्विपञ्चाशत्पले पात्रे बुध्नोच्छ्राये तु षष्ठिमत् ॥४॥
शतं पलमिते तैले द्वीपाद्वैरिविनाशनम् ।
शतं पलमिते पात्रे चोच्छ्रायो द्वादशाङ्गुलम् ॥५॥
द्वात्रिंशच्चैव ह्यायामे तन्मध्ये तु सहस्त्रकम् ।
सर्वकर्मणि सिद्धिः स्याद्दीपे पलसहस्त्रके ॥६॥
सपादशतपात्रे च पञ्चोत्तरशताधिके ।
पञ्चदशाङ्गुलोच्छ्रायं व्यायामे षट् च त्रिंशके ॥७॥
अयुतपलदीपश्च निगडाद्वंदिमुक्तये ।
सहस्त्रपलदीपे च वंदिमोक्षः प्रजायते ॥८॥
त्रिंशत्पलमिते पात्रे मान्यं चैव तु पूर्ववत् ।
त्रिंशत्पलमिते तैले दिनान्येकोनविंशतिः ॥९॥
कन्याभिकांक्षी तैलेन प्रत्यहं दीपमाचरेत् ।
इच्छितां लभते कन्यां भैरवस्य प्रसादतः ॥१०॥
नृकपालमिते पात्रे चोच्छ्रायं तु रसोंगुलम् ।
विंशत्पलमिते दीपं प्रत्यहं विंशतिर्दिने ॥११॥
सर्वरोग विनाशाय क्षयापस्मारदारुणे ।
दशपलमिते पात्रे बुध्नोच्छ्राये तु त्रिंशतम् ॥१२॥
दशपलमिते तैलं प्रत्यहं सप्तवासरे ।
राजवश्यकरं क्षिप्रं यदि साक्षाज्जगत्पतिः ॥१३॥
नित्य दीप प्रमाणे तु पात्रं पलत्रयं स्मृतम् ।
(तन्त्रांतरेऽपि) शतमष्टोत्तरं चाथ पलानि प्रथमेविधौ ।
अष्टाशीतिः द्वितीये च परेऽष्टाविंशतिः प्रिये ॥
सर्वकार्येषु देवेशि संख्या त्रिधाऽत्र वै ॥१४॥

दीपनाशे विचारः – दीपनाशे पुनर्दीपं कृत्वा शान्तिं तु कारयेत्।

अर्थात् दीप दोष होने पर दूसरी वर्तिका बनाकर दीप जलायें तथा शान्ति पाठ करें।

दीपदान विशेष – कपिलागोमयं चिंचाद्याम्लद्रव्यं यथा कामनया दीपपात्रं प्रयोक्तमाज्यं तैलं वा यथोक्त वर्तया शीघ्रकार्ये पात्रपल ६४, द्रव्यपल १०८,

तन्तु १०००।

द्वितीयपक्षे - पात्रपल ३२, द्रव्यपल ८८, तन्तु ३००।

मध्यमाने - पात्रपल १६, द्रव्यपल २८, तन्तु १००।

कनिष्ठपक्षे - पात्रपल ८, द्रव्यपल ८, तन्तु १६।

नित्यपक्षे - पात्रपल ३, द्रव्यपल १, तन्तु २१।

शुभकार्ये - दीपमुख उत्तरे, साधकः पूर्वाभिमुखः आधार यन्त्र मुख उत्तरे।

अशुभकार्ये - दीप, यन्त्र साधकानां मुखं दक्षिणे।

नित्य प्रयोग दीप रक्षा हेतु कील का प्रमाण ६ अङ्गुल। नैमित्तिक प्रयोग में दीप रक्षा हेतु कील का प्रमाण १२ अङ्गुल।

॥ अथ प्रयोगमाहः ॥

पूर्वदिन सामग्री का संग्रह करें एक समय भोजन करें या उस दिन उपवास रखें, भूमि शयन कर प्रातः काल जल्दी उठें।

शोधित स्थल पर कपिला गाय के गोमय से लेपन कर चार अङ्गुल की वेदी बनायें उस पर भैरव यन्त्र लिखें। दीप वेदिका के आगे चावल से अष्टदल बनाकर उस पर कलश स्थापित करें उस पर स्वर्णनिर्मित भैरव मूर्ति रखें।

सङ्कल्प - दीपदान प्रयोग ५, ७, १०, ११, १५, २१, २८, ४० दिन जैसी कामना होवे उतने दिन का सङ्कल्प करें।

अद्येत्यादि मम यजमानस्य वा सकलमनोरथ सिद्धये अमुककामनासिद्ध्यर्थे अमुक दिन पर्यन्तं अमुकसंख्यामानेन पात्रेण घृतेन तैलेन वा अमुक संख्याभिर्वर्तिकाभिः श्री बटुकभैरव प्रीत्यर्थं दीपदानं प्रयोगमहं करिष्ये।

गणेश अम्बिका का पूजन करे। आचार्य का वरण करे -

ममेप्सित फलावाप्त्यै आचार्य त्वामहं वृणे। द्रव्य दक्षिणा प्रदान करे।

भक्त्या समगतोऽहं ते पादयोर्भक्तवत्सल ।
दीपकार्यं च भक्त्या संपाद्यं वै नमो नमः ॥

आचार्य अपने सहाचार्यों के साथ पुण्याहवाचन नान्दीश्राद्धादि कर्म कराये।

सहाचार्यो व यजमान सहित भूतशुद्धि प्राणप्रतिष्ठा (स्वयं की) मातृका न्यास मंत्र के ऋष्यादि न्यास करन्यास, अङ्गन्यास, पदन्यास, अक्षरन्यास, एकादशन्यास, पीठन्यासादि करें।

मूर्ति का अग्न्युत्तारण कर कलश पर स्थापन करें तथा भैरव पूजन तथा आवरण

पूजन कर बलिदान आदि करे।

दीपदान विनियोगः- ॐ अस्य श्री वटुकभैरव दीपदान मालामंत्रस्य मन्मथ ऋषिः पंक्ति छन्दः आपदुद्धारक वटुकभैरव देवता बं बीजं ह्रीं शक्तिः मम सर्वमनोरथ सिद्धर्थे दीपदाने विनियोगः।

मंत्रन्यासः- मन्मथ ऋषये नमः शिरसि, पंक्तिश्छन्दसे नमः मुखे, वटुकभैरव देवतायै नमः हृदये, बं बीजाय नमः गुह्ये, ह्रीं शक्तये नमः पादयोः, विनियोगाय नमः सर्वाङ्गे।

बीजन्यासः-

ह्रां बां अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
ह्री बीं तर्जनीभ्यां नमः।	शिरसे स्वाहा।
ह्रूं बूं मध्यमाभ्यां नमः।	शिखायै वषट्।
ह्रैं बैं अनामिकाभ्यां नमः।	कवचाय हुं।
ह्रौं बौं कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
ह्रः बः करतलकर पृष्ठाभ्यां नमः।	अस्त्राय फट्।

- प्रयोगानुसार भैरव का राजस तामस ध्यान करे।

दीपवेदी पर यंत्र रखे चावल से पूरित करे (बिन्दु, त्रिकोण, षट्कोण, वृत्त, अष्टदल, षोडशदल एवं भूपूर युक्त यंत्र)

बिन्दु त्रिकोणं षट्कोणं वृत्ताष्टदलकं तथा।
दलानिषोडशान्येव चतुरस्त्रं ततः परम् ॥
एवं यंत्रं समालिख्य तत्र संपूज्य देवताः।
तस्योपरि दीपपात्रं च स्थापयेत् साधकोत्तमः।

उस पर घृत, तैल, वर्ति युक्त दीप स्थापन करे एवं मंत्र पढ़े-

ॐ नमो भगवते वटुकभैरवाय देवी ,य सर्वदुष्टजन मुखस्तंभं कुरु कुरु स्वाहा ॐ ह्रां ह्रीं ह्रूं ठः ठः ठः हुं फट् स्वाहा।

यह मंत्र आठ बार पढकर मूलमंत्र से दीप प्रज्वलित करे अथवा विस्तृत विधि के अनुसार करें। यथा-

दीपवेदी की रक्षा के लिये आठों दिशाओं में खादिर वृक्ष की ८ कीलें गाड़े (इनकी लम्बाई का प्रमाण पहले दिया जा चुका है) प्रत्येक दिशा में कीलों के पास में अष्टभैरवों के लिये बलि देवें। बलिपात्र के नीचे चंदन अथवा जल से त्रिकोण

षट्कोण चतुरस्र मंडल बनावें। प्रत्येक दिशा का अलग-अलग भैरव है उनके दीप जलाये,उनके नाम से वहाँ गंधाक्षत करे, रक्तचंदन व करवीर पुष्प चढ़ावें।

बलि अर्पण करते हुये मंत्र बोलकर जल निक्षेप करे।

पूर्वे - **ॐ ह्रीं जयन्त भैरवाय नमः। ॐ ह्रीं जयन्त भैरव एहि एहि इमं सदीपं मासान्न बलिं गृहण मां रक्ष रक्ष अभीष्टं कुरु कुरु स्वाहा।**

आग्नेये- **ॐ ह्रीं अघोर भैरवाय नमः। ॐ ह्रीं अघोर भैरवाय एहि एहि इमं सदीपं मासान्न बलिं गृहण मां रक्ष रक्ष अभीष्टं कुरु कुरु स्वाहा।**

दक्षिणे **ॐ ह्रीं चामीकर भैरवाय नमः। ॐ ह्रीं चामीकर भैरव एहि एहि इमं सदीपं मासान्न बलिं गृहण मां रक्ष रक्ष अभीष्टं कुरु कुरु स्वाहा।**

नैऋत्ये **ॐ ह्रीं असितांग भैरवाय नमः। ॐ ह्रीं असितांग भैरव एहि एहि इमं सदीपं मासान्न बलिं गृहण मां रक्ष रक्ष अभीष्टं कुरु कुरु स्वाहा।**

पश्चिमे - **ॐ ह्रीं भीषण भैरवाय नमः। ॐ ह्रीं भीषण भैरव एहि एहि इमं सदीपं मासान्न बलिं गृहण मां रक्ष रक्ष अभीष्टं कुरु कुरु स्वाहा।**

वायव्ये **ॐ ह्रीं प्रचण्ड भैरवाय नमः। ॐ ह्रीं प्रचण्ड भैरव एहि एहि इमं सदीपं मासान्न बलिं गृहण मां रक्ष रक्ष अभीष्टं कुरु कुरु स्वाहा।**

उत्तरे - **ॐ ह्रीं कराल भैरवाय नमः। ॐ ह्रीं कराल भैरव एहि एहि इमं सदीपं मासान्न बलिं गृहण मां रक्ष रक्ष अभीष्टं कुरू कुरू स्वाहा।**

ईशाने **ॐ ह्रीं कपाल भैरवाय नमः। ॐ ह्रीं कपाल भैरव एहि एहि इमं सदीपं मासान्न बलिं गृहण मां रक्ष रक्ष अभीष्टं कुरु कुरु स्वाहा।**

अपने कुल सम्प्रदाय के ४ गुरुवों को नमस्कार करें।

ॐ गुरुभ्यो नमः। ॐ परम गुरुभ्यो नमः। ॐ परात्पर गुरुभ्यो नमः। ॐ परमेष्ठि गुरुभ्यो नमः।

गणपति व क्षेत्रपाल का स्मरण करें।

ग्लौं गणपतये नमः। क्षौं स्थान क्षेत्रपालाय नमः।

तामपात्र पर त्रिकोण, षट्कोण, चतुरस्र, बना हुआ दीपयंत्र रखे। रक्तचंदन व अक्षतों से पात्र पूरित करे। यंत्र का पीठ पूजन करे। विस्तृत पूजन हेतु पीठ पूजा विधान अलग लिखा हुआ है वहाँ से "**ॐ मण्डूकाय नमः, कालाग्निरुद्राय नमः**" इत्यादि पूजन करे।

सामान्य पूजन हेतु ॐ मण्डूकादि पीठ देवताभ्यो नमः।

पीठ शक्तियों का पूजन करें-ॐ वामायै नमः, ॐ ज्यैष्ठायै नमः,ॐ रौद्रयै नमः, ॐ काल्यै नमः, ॐ कलविकरण्यै नमः, ॐ बलविकरण्यै नमः, ॐ बलप्रमथिन्यै नमः, ॐ सर्वभूतदमन्यै नमः, ॐ मनोन्मन्यै नमः। ॐनमो भगवते सकलगुणात्म-शक्तियुक्ताय अनन्ताय योग पीठात्मने नमः। इति पीठं संपूज्य।

त्रिकोण में पूजन करे-ॐ सं सत्वाय नमः, ॐ रं रजसे नमः, ॐ तं तमसे नमः।

षट्कोणे- ॐ ह्रां बां हृदयाय नमः, हृदयं पादुकां पूजयामि। ॐ ह्रीं बीं शिरसे नमः, शिरं पा. पू.। ॐ ह्रूं बूं शिखायै नमः, शिखां पा. पू.। ॐ ह्रैं बैं कवचाय नमः, कवचं पा. पू.। ॐ ह्रौं बौं नेत्रत्रयाय नमः, नेत्रत्रयं पा. पू.। ॐ ह्रः बः अस्त्राय नमः अस्त्रं पादुकां पूजयामि।

पात्र को घृत या तैल से पूरित करे। गायत्री मंत्र का स्मरण करते हुये वर्तिका (यथा कामना संख्यानुसारेण) रखें, दीपक के प्रमाण के अनुसार उसमें शलाका रखें अथवा रजत मुद्रिका रख देवें। पात्र के दक्षिण की ओर ''छुरिका'' रखे।

ॐ ह्रीं छीं छुरिके मम शत्रुच्छेदिनि रिपून् निर्दलय निर्दलय मां पाहि पाहि स्वाहा। इस मंत्र से छुरि का पूजन करें।

ॐ ह्रां ह्रीं सर्वाङ्ग सुन्दर्यै शलाकायै नमः। इस मंत्र से शलाका का पूजन करे।

अशुभ कामना में वर्ति का मुँह दक्षिण की ओर तथा शुभकामना में पूर्वोत्तर अथवा पश्चिम में करें।

मूल मंत्र या गायत्री मंत्र से दीप प्रज्वलित करें। पुनः दीपदान का ऋषि न्यास करे। जो पूर्व में दिये गये है। यथा मन्मथ ऋषये नमः शिरसि ......।

निम्न मंत्र से दीपक के गंधाक्षत करे पुष्प निक्षेप करे। ॐ ह्रीं ऐं श्रीं क्लीं ऐं ह्रीं श्रीं सर्वज्ञाय प्रचण्डपराक्रमाय बटुकाय इमं दीपं गृहाण सर्वकार्याणि साधय-२ सर्वदुष्टान्नाशय नाशय त्रासय त्रासय सर्वतो मम रक्षां कुरु कुरु हुं फट् स्वाहा।

दाहिने हाथ में जल लेकर निवेदन करे

गृहाण दीपं देवेश बटुकेश महाप्रभो ।
ममाभीष्टं कुरु क्षिप्रमापद्भ्यो मां समुद्धर ॥

मूल मंत्र पढे। पुनः बटुकाय इमं दीपं निवेदयामि नमः। कहकर जल भूमि

पर छोड़े।

दीपक की **प्राण प्रतिष्ठा करें**–

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षं ह्रां हंसः ह्रां अस्य दीपस्य प्राणाः इह प्राणाः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षं ह्रां हंसः ह्रां जीव इह स्थितः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षं ह्रां हंसः ह्रां सर्वेन्द्रियाणि स्थितानि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा।

इस प्रकार प्राण प्रतिष्ठा कर दीपक में बटुक का आवाहन सात्विक, राजस, तामस, ध्यान अपनी कामनानुसार करे। आवाहनादि मुद्रा दिखाये। यंत्र की आवरण पूजा करे। पूजा पूर्व में की जा चुकी है तो पंचोपचार पूजन करे। बलि प्रदान करें।

दीपक के वाम भाग में बलि मण्ड़ल बनायें। त्रिकोण, वृत, षट्कोण, बनाये गंधाक्षत करे– "**ॐ बलि मंड़लाय नमः**"।

क्षत्रियादिभिः समांसो बलिं देय।

शाल्योदन (धान की साठी, चूर्ण) शर्करा, लाजाचूर्ण, गुड़, अपूप, शष्कुलीसमूह, सूप, पायसन्नादिघृतलुप्तमनेक जातीयं बलिद्रव्यं त्रिमधुयुतं (घृत,मधुशर्करा) मोदक माषवटकानि विविध भक्ष्य द्रव्याणि वा यथा संभवं माष(उड़द) मुद्गान्नप्रधान(मूंग के द्रव्य) बलिद्रव्यं संस्थाप्य।

वहाँ पर पिष्टी का (गेंहू का आटा, या उड़द, मूंग का आटा) दीपक जलाये तथा संकल्प करें–

देशकालौ संकीर्त्य अमुकफलावाप्तये श्री वटुकभैरव प्रीतये अमुक द्रव्येण बलिदानमहं करिष्ये।

बायें हाथ के अंगुठे को बलिपात्र से स्पर्श करें। दाहिने हाथ में जल लेवें।

मूल मंत्र का जप करें पश्चात् "**ॐ एहि एहि विदुषि पुरं भंजय भंजय नर्तय नर्तय विग्रह विग्रह महाभैरव बटुक बलिं गृहण गृहण स्वाहा**"।

ॐ येह्येहि देवीपुत्र बटुकनाथ कपिलजटाभार-भासुर-त्रिनेत्र ज्वालामुख सर्वविघ्नान् नाशय नाशय सर्वोपचार सहितं बलिं गृहण गृहण स्वाहा। ऐसा उच्चारण करके जल छोड़े।

समांसबलि पक्षे– **ॐ पाशुपाशाय विद्महे शिरश्छेदाय धीमहि तन्नः पशु प्रचोदयात्।**

ॐ अलिपिशित मांसान्न बलिं गृहण गृहण मां रक्ष **रक्ष शत्रुपक्षस्य रुधिरं**

पिशितं पिशितं दिने दिने भक्षय भक्षय गणैः सार्द्धं सारमेय समन्वितः सर्वगणेभ्यो नमः आमिषं गृहण गृहण भक्षय भक्षय मां रक्ष रक्ष स्वाहा। इति **मंत्रेण जलमुत्सृजेत्।**

पश्चात् हस्तशुद्धि कर आचमन करें।

यथा कामनानुसार देव का ध्यान करें। अष्टोत्तरशतनाम की ११, २१, ५१, १०० आवृत्ति करें, स्तव स्तोत्र, कवच, सहस्रनाम का पाठ करें। मूलमन्त्र के जप करें दीप समाप्ति तक मन्त्र जप व कवचादि स्तोत्रों का पठन करते रहें। पाठ समाप्ति या प्रयोग समाप्ति पश्चात् कन्या, सुवासिनी एवं वटुक को पायसान्न मोदक चणक नाना भक्ष्य भौज्य से तृप्त करें।

आचार्य नित्य शान्तिस्तोत्र का पाठ करें, यजमान भी करें।

॥ शान्तिस्तोत्रम् ॥

यस्यार्चनेन विधिना किमपीह लोके
कर्मप्रसिद्धमिति नामफलं प्रसूते ।
तं सन्ततं सकल साधक वाञ्छितार्त्तिं
चिन्तामणि सुरगणाधिपतिं नमामि ॥
रक्ताम्बरं ज्वलन पिङ्गजटाकलापं
ज्वालावली कुटिलचन्द्रधरं त्रिनेत्रम् ।
बालार्क धूम फल काञ्चन तुल्य वर्णं
देवीसुतं वटुकनाथमहं नमामि ॥
हरतु कुल गणेशो विघ्न संघान शेषान्नयतु
कुल सपर्या पूर्णतां साधकानाम् ।
पिवतु वटुकनाथः शोणितं निन्दकानां
दिशतु सकल कामान् साधकानां गणेशः ॥
सतत वितत तेजश्चक्र भासा विनम्र
ग्रसमसमुदितो वै स्वाससन्दोहनाभिः ।
प्रलय नयननाभिः किन्तु चात्मोद्भवाभिः
भवतु भुवन गर्भो भैरवो नः पुनातुः ।
या काचिद्योगिनी रौद्रा सौम्या घोरतरा परा ।
[illegible] [illegible] सा मम व्याधिं व्यपोहतु ॥

नन्दन्तु साधकाः सर्वे विनश्यन्तु प्रदूषकाः ।
अवस्था शाम्भवी मेऽस्तु प्रसन्नोऽस्तु गुरुः सदा ॥

इति पठित्वा पश्चाज्जपदशांशेन होमादि ब्राह्मणभोजनान्तैः सन्तर्प्य ब्राह्मणाज्ञ-पानुसारेण दक्षिणादिभिः सन्तोष्य आचार्यं कार्यानुसारेण दक्षिणावस्त्रालंकारादिभिः संतोष्य प्रणमेत् ॥

॥ इति दीपदान प्रयोगः ॥

॥ वीरभैरव साधन प्रयोगः ॥

साधक नित्य क्रिया से निवृत्त होकर गंधाक्षत पुष्प धूप दीप ताम्बूल फल पूजा द्रव्यों का संग्रहण करें। सुपक्कान्, माषान्, मुग्दान्, मसूरान्, चणकान्, ओदनक्षीर, अपूपान्, सुहालीन भक्ष भोज्य द्रव्याणि संगृह्य। आठ दूधवाले वृक्ष की कीलें, एवं स्तंभन हेतु एक मोटी कील बनायें। कन्या से काते हुये कपाससूत्र का कुंकुम से चर्चित करें। पलाशपत्रों के पात्रों में सोलह जगह एवं २ २ पात्र अलग, इनमें पक्कानादि रखें। उत्तरसाधक (सहायक) को साथ लेकर श्मशान भूमि की ओर गमन करें।

आचम्य प्राणायामं कृत्वा। स्वेष्ट देवतां ध्यात्वा। करबद्ध होकर श्मशानी वासी देवताओं से प्रार्थना करें।

ॐ अत्र श्मशाने या काश्चिद्देवता निवसंति हि ।
ताः प्रयच्छंतु मे सिद्धिं प्रसन्ना संतु पांतु माम् ॥

सरसों व अक्षत लेकर दिग्रक्षण करें -

पूर्वे मां शङ्करः पातु तथाग्नेयां च शूल धृक् ।
कपाली दक्षिणे पातु नैर्ऋत्ये जटिलोऽवतु ॥१॥
पश्चिमे पार्वतीनाथो वायव्ये प्रमथाधिपः ।
उत्तरे मुण्डमालोऽव्यादीशान्ये वृषभध्वजः
उर्ध्वं पातु तथा शंभुरधस्ताद् धूलिधूसरः ॥२॥

हाथ जोड़ कर कहें -

अग्रतो भैरवः पातु पृष्ठतः पातु खेचरः ।
दक्षिणे भूधरः पातु वामे च पिशितासनः ॥१॥

केशान्पातु विशालाक्षो मूर्धानं च मरुत्प्रियः ।
मस्तकं पातु भृग्वीसो नेत्रे पातु महामनाः ।
कपोलौ पातु वीरेशो गण्डौ गण्डाभिमर्दनः ॥
उत्तरोष्ठे विरूपाक्षो ह्यधरे योगिनीप्रियः ।
अक्षेषु दक्षविध्वंसी चिबुके च कपालधृक् ॥
कण्ठे रक्षतु मां देवो नीलकण्ठो जगद्गुरुः ।
दक्षस्कंधे गिरीन्द्रेशो वामस्कन्धे वसुंजयः ॥
दक्षिणे च भुजे सर्वमंत्रनाथः सदावतु ।
वामेभुजे सार्वभौमो हृदयं पातु पाण्डुरः ॥
दक्षस्तने पशुपतिर्वामे पातु महेश्वरः ।
उदरे सर्वकल्याणकारकोऽवतु मां सदा ॥
नाभौ कामप्रविध्वंसी जंघे पातु दयामयः ।
जानुनी पातुजामित्रो गुल्फौ गौरीपतिः सदा ॥
पादपृष्ठे सार्मानधिस्तथा पादांगुलिर्हरः ।
पादाधः पातु सततं व्योमकेशो जगत्प्रियः ॥

इति रक्षा मंत्रान् पठित्वा पूर्वादिदिक्षु रक्षाबीज मंत्रान्पठन्नमस्कुर्यात्।

ॐ ह्रां ह्रीं ह्रूं ह्रः नमः पूर्वे, ॐ ह्रीं ह्रूं ह्रौं नमः आग्नेये, ॐ ह्रीं श्रीं नमः दक्षिणे, ॐ ग्लूं ग्लूं नग नग नमः नैर्ऋत्ये, ॐ यूं भ्रूं प्रूं सं सः नमः पश्चिमे, ॐ म्रां म्रां नमः वायव्ये, ॐ भ्रां भ्रां भैरवे नमः उत्तरे, ॐ ब्रूं ब्रूं भ्रूं फट् नमः ईशान्ये, ॐ ग्लों ब्लूं नमः ऊर्ध्वे, ॐ घ्रां घ्रं घ्रः नमः अधरे।

इन मंत्रों से रक्षा करें। आठों दिशाओं में आठ कीले दूध वाले वृक्ष की गाड़े एवं एक कील मोटी स्तंभन हेतु मध्य में रोपण करें।

मध्य स्तंभ के पास बैठकर भैरव से प्रार्थना करें।

ॐ भां भैरव भैरवाय नमः भां भैरव भैरव भयंकर भयं हर मां रक्ष रक्ष हुं फट् स्वाहा।

प्रत्येक कील के पास बलिपात्र रखें, बलिपात्र को त्रिकोण, षट्कोण, चतुरस्र मण्डल पर रखें। प्रत्येक दिशा में कील के पास पूजन कर बलि प्रदान करें दीपक भी जलावें।

पूर्वे- ॐ लं इन्द्र सांग सपरिवार इहागच्छेत्यावाह्य, ऐरावतारूढं वज्रहस्तं पीतवर्णं सहस्राक्षं सुरगणपरिवारं ध्यात्वा। ॐ लं इन्द्राय नमः आसन अर्घ्य पाद्य आचमन स्नान गंधपुष्प अक्षत धूप दीप उपचारैः सम्पूज्य तत्पुरतः चतुरस्त्रं मण्डलं जलेन कृत्वा तत्र माषपुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्-

ॐ ह्रां ह्रीं ह्रूं भो इन्द्र सुरनायक शीघ्रं मे प्रसन्नो भव सनातनीं सिद्धिं मे देहि देहि रक्ष मां इमं माष बलिं गृह्ण गृह्ण हुं फट् स्वाहा।

इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृजेत् ताम्बूलं च दत्वा प्रणमेत्।

आग्नये - ततः आग्नेय कोण गत कील समीपं गत्वा तत्र ॐ रं अग्ने सांग सपरिवार इहागच्छागच्छेत्यावाह्य। मेषारुढं शक्तिहस्तं त्रिनेत्रं तेजोनिधिं ध्यात्वा ॐ रं अग्नये नमः आसनादि दशोपचारैः संपूज्य तत्पुरतश्चतुरस्त्रं मंडलं जलेन कृत्वा तत्र मुद्ग भरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्-

ॐ ह्रीं ह्रूं ह्रौं अग्नेतेजोनायक शीघ्रं मे प्रसन्नो भव सनातनीं सिद्धिं मे देहि इमं मुद्गबलिं गृह्ण गृह्ण हुं फट्। इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य ताम्बूलं च दत्वा प्रणम्य।

ततः दक्षिण कील समीपं गत्वा तत्र ॐ टं यम सांग सपरिवार इहागच्छागच्छेत्यावाह्य।

महिषारूढं कृष्णवर्णं दण्डहस्तं प्रेतगणपरिवेष्टितं ध्यात्वा।

ॐ टं यमाय नमः आसनाद्युपचारैः पूर्वोक्तैः संपूज्य तत्पुरतः चतुरस्त्र मण्डलं जलेन कृत्वा तत्र मसूर भरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्-

ॐ प्रां प्रीं प्रूं भो यम प्रेताधिपते शीघ्रं मे प्रसन्नो भव इमं मसूरबलिं गृह्ण गृह्ण हुं फट्। इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य ताम्बूलं च दत्वा प्रणम्य।

नैर्ऋत्ये - ततः नैर्ऋत्यकोणगत कीलसमीपं गत्वा तत्र-

ॐ क्षं निर्ऋते सांग सपरिवार इहागच्छागच्छेत्यावाह्य- प्रेतारूढं धूम्रवर्णं खड्गहस्तं रक्षोभिः परिवृतं ध्यात्वा, ॐ क्षं निर्ऋते नमः पूर्वोक्तैः सम्पूज्य।

तत्पुरतश्चतुरस्त्रं मंडलं जलेन कृत्वा तत्र- चणकपूरितं पुटकं निधाय दक्षहस्ते

जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्- ॐ फ्रें फ्रें फ्रें हूं हूं खें खें खें ह्रों ह्रों भो भो रक्षोनाथ शीघ्रं मे प्रसन्नो भव इमं चणक बलिं गृह्ण गृह्ण हुं फट्।

इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य ताम्बूलं च दत्वा प्रणमेत्।

पश्चिमे - ततः पश्चिम दिग्गत कील समीपं गत्वा तत्र ॐ वं वरुण सांग सपरिवार इहागच्छ आगच्छ इति आवाह्य- मकरारूढं पाशहस्तं श्वेतवर्णं यादोगण परिवार सहितं ध्यात्वा।

ॐ वं वरुणाय जलनाथाय नमः पूर्वोक्तैः सम्पूज्य तत्पुरतश्चतुरस्त्रं मण्डलं जलेन कृत्वा तत्रौदन पूरित पात्रं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्-

ॐ व्रां व्रीं व्रूं भो भो वरुण जलनाथ शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इमं ओदनबलिं गृह्ण गृह्ण हुं फट्।

इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य ताम्बूलं च दत्वा प्रणमेत्।

वायुकोणे - ततो वायुकोणगत कील समीपं गत्वा तत्र ॐ यं वायो सांग सपरिवार इहागच्छागच्छेत्यावाह्य- मृगारूढं वृक्षायुधधरं मरुद्गण सहितं ध्यात्वा ॐ यं वायवे नमः पूर्वोक्तैः सम्पूज्य, तत्पुरतश्चतुरस्त्रं मण्डलं जलेन कृत्वा तत्र पायस पूरितं पात्रं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्-

ॐ वां वीं वूं ॐ ब्रां ब्रीं ब्रूं भो वायो भुवनपते शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इमं पायस बलिं गृह्ण गृह्ण हुं फट्।

इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य ताम्बूलं च दत्वा प्रणमेत्।

उत्तरे - ततः उत्तरदिग्गत कीलसमीपं गत्वा तत्र ॐ कुं कुबेर सांग सपरिवार इहागच्छागच्छेत्यावाह्य। नरवाहनं गदाहस्तं शुक्लवर्णं यक्षगण परिवेष्टितं ध्यात्वा ॐ कुं कुबेराय नमः पूर्ववत् सम्पूज्य, तत्पुरतश्चतुरस्त्रं मण्डलं जलेन कृत्वा तत्रापूप पूरितं पात्रं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्-

ॐ क्रूं क्रूं क्रूं ॐ क्रां क्रां क्रां भो भो यक्षनाथ शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इममपूपबलिं गृह्ण गृह्ण हुं फट्।

इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य ताम्बूलं च दत्वा प्रणमेत्।

ईशानकोणे - ततः ईशानकोणगत कीलसमीपं गत्वा तत्र ॐ हं ईशान

सांग सपरिवार इहागच्छागच्छेत्यावाह्य। वृषभारूढं शूलहस्तं श्वेतवर्णं विद्यागण सेवितं ईशानं ध्यात्वा।

ॐ हं ईशानाय नमः पूर्वोक्तैः सम्पूज्य, तत्पुरतश्चतुरस्त्रं मण्डलं जलेन कृत्वा सुहाली पूरित पात्रं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन्-

ॐ श्रीं श्रीं ॐ श्रां श्रां श्रां भो ईशान विद्याधिपते शीघ्रं मे प्रसन्नो भवं सिद्धिं मे देहि इमं शष्कुलि बलिं गृह्ण गृह्ण हुं फट्।

इति मंत्रेण तस्मिन्पात्रे जलं वलिं चोत्सृज्य ताम्बूलं च दत्वा प्रणमेत्।

इत्यष्ट दिक्पाल बलिं दत्वा मध्यस्तंभसमीपं गत्वा निर्भया सन् (मध्य कील के पास) **ॐ ह्रां ह्रीं ह्रूं स्तंभाय स्वाहा। इति मंत्रेण पूर्वोक्तैः सम्पूज्य मंत्रमयं कवचं पठेत्।**

तद्यथा- **ॐ ह्रां ह्रीं ह्रूं ह्रः क्षां क्षीं क्षूं क्षः ख्रां ख्रीं ख्रूं ख्रः घ्रां घ्रीं घ्रूं घ्रः म्रां म्रीं म्रूं म्रः म्रं म्रें म्रों म्रौं ह्रों ह्रों ह्रों ह्रों क्लों क्लों क्लों क्लों श्रों श्रों श्रों श्रों ज्रों ज्रों ज्रों ज्रों हुं हुं हुं हुं हुं हुं हुं फट् सर्वतो रक्ष रक्ष रक्ष रक्ष भैरवनाथ नाथ हुं फट्।**

अपने शरीर पर मूल मंत्र से व्यापक न्यास करें।

मध्य स्तंभ के पास पूर्वाभिमुख होकर अपना आसन गृहण करे भूमि पर अष्टदल उसके बाहर षोडशदल पुनः उसके बाहर चारद्वार युक्त परिधि (चतुरस्त्र) बनाये।

यंत्र मध्य में देव का आवाहन कर षोडशोपचार पूजन कर यंत्र का पूजन करें।

प्रथमावरणम् - षट्कोणे **ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।**

द्वितियावरणम् - अष्टदले -(पूर्वादिक्रमेण) **ॐ असितांग भैरवाय नमः। ॐ रुरुभैरवाय नमः। ॐ चण्डभैरवाय नमः। ॐ क्रोधभैरवाय नमः। ॐ उन्मत्तभैरवाय नमः। ॐ कपालभैरवाय नमः। ॐ भीषणभैरवाय नमः। ॐ संहारभैरवाय नमः।**

तृतीयावरणम् - षोडशदलेषु - श्री वटुकभैरव के षोडश मित्रों का पूजन करें (पूर्वादिक्रमेण) -**ॐ कुलिशाय नमः। ॐ सुकुलिशाय नमः। ॐ जामित्राय नमः। ॐ रामठाय नमः। ॐ अरिभाय नमः। ॐ प्रचण्डाय नमः। ॐ चण्डकेशाय नमः। ॐ चण्डात्मने नमः। ॐ चामराय नमः। ॐ चरित्राय**

वीरसाधना पूजन यन्त्र

नमः। ॐ चमत्काराय नमः। ॐ चञ्चलाय नमः। ॐ चारुभूषणाय नमः। ॐ चामीकराय नमः। ॐ चारुवाहाय नमः। ॐ कितवाय नमः।

चतुर्थावरणम् - उसके बाहर के अष्टदलों में - (पूर्वादिक्रमेण) ॐ ब्राह्मयै नमः। ॐ माहेश्वर्यै नमः। ॐ कौमार्यै नमः। ॐ वैष्णव्यै नमः। ॐ वाराही नमः। ॐ इन्द्राण्यै नमः। ॐ चामुण्डायै नमः। ॐ महालक्ष्म्यै नमः। इत्यादि मातृकाओं का पूजन करें।

पञ्चमावरणम् - बाहर के चतुरस्त्र में दिक्पालों का पूजन करें (पूर्वादिक्रमेण)- ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ निर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ कुबेराय नमः। ॐ ईशानाय नमः।

षष्ठमावरणम् - दिक्पालों के आयुधों का पूजन करें - ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ वृक्षायुधाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः।

आवाहित देवताओं का पञ्चोपचार से पूजन करें। पृथक पृथक पात्र में प्रत्येक आवरण हेतु एक पात्र में पायसनैवेद्य निवेदन करें। यन्त्र पर स्थापित देवताओं के

मण्डल पर वीरशान्ति पाठ करते हुये अक्षत छोड़े।

ॐ चण्ड आयाहि, ॐ प्रचण्ड आयाहि, ॐ ऊर्ध्वकेश आयाहि, ॐ भीषण आयाहि, ॐ प्रभीषण आयाहि, ॐ व्योमकेश आयाहि, ॐ व्योमवाहो आयाहि, ॐ व्योमव्यापक आयाहिः।

इस प्रकार आवाहन कर पृथक-पृथक गंधोपचार से पूजन कर नैवेद्य अर्पण करें। पश्चिमाभिमुख होकर ऋष्यादिन्यास करें।

भैरव के अष्टाक्षर मन्त्र "**भां भैरवनाथाय हुं फट्**" का जप करें। बायें हाथ से पायस पात्र गृहणकर देव को नैवेद्य अर्पण करें। प्रसन्नचित्त होकर जप करें।

प्रार्थना करें - **देवोवरं वरयेति**। दण्डवत् प्रणाम करें। कन्या वटुक सुवासिनी भोजन कराकर महोत्सव करें।

॥ इति वीरसाधन प्रयोगः॥

॥ अथ स्वर्णाकर्षणभैरव प्रयोगः॥

लक्ष्मी चंचल है अतः इसके साथ पुरुष देवता की उपासना जरुरी है। इसमे लक्ष्मी का निवास स्थिर होता है। वैष्णव संप्रदाय के अनुसार दधित्वामन की उपासना तथा तन्त्र मन्त्र में गणेश व स्वर्णाकर्षण की उपासना करनी चाहिये।

इसकी उपासना से आय के साधन बढते हैं तथा लक्ष्मी स्थिर रहती है। स्वर्णाकर्षण भैरव स्वप्न में शास्त्रगुरु की तरह मार्गप्रदर्शन भी करता है ऐसा अनुभव है। द्ररिद्रता नाश एवं धन प्राप्ति हेतु व बगलामुखी साधना में स्वर्णाकर्षण भैरव का विशेष महत्व हैं एवं लाभप्रद साधना है।

विनियोग - **ॐ अस्य श्री स्वर्णाकर्षण भैरव मंत्रस्य ब्रह्मा ऋषिः पंक्ति छन्दः हरिहरब्रह्मात्मक स्वर्णाकर्षण भैरवो देवता, ह्रीं बीजम्, सः शक्ति ओम् कीलकम् ममदारिद्रयनाशार्थे, स्वर्ण राशि प्राप्त्यर्थे स्वर्णाकर्षण भैरव प्रसन्नार्थे जपे विनियोगः।**

ऋष्यादिन्यासः **ब्रह्मऋषये नमः शिरसि, पंक्ति छन्द से नमः मुखे। स्वर्णाकर्षण दैवताया नमः हृदि। ह्रीं बीजाय नमः गुह्ये। सः शक्तिः नमः पादयोः ओम् कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।**

कराङ्गन्यास - **ओम् ऐं ह्रीं श्रीं आपदुद्धारणाय अंगुष्ठाभ्यां नमः।** (हृदायाय

नमः)। ॥१॥ ओम् ह्रां ह्रीं ह्रूं अजामिलबद्धाय तर्जनीभ्यां नमः । शिरसि स्वाहा। ॥२॥ ओम् लोकेश्वराय मध्यमाभ्यां नमः। (शिखायैवषट्)॥३॥ ओम् स्वर्णाकर्षण भैरवाय अनामिकाभ्यां नमः।(कवचाय हुम्)॥४॥ ओम् ममदारिद्रय विद्वेषणाय कनिष्ठकाभ्यां नमः।(नेत्रत्र याय वौषट्)॥५॥ ओम् महा भैरवाय नमः श्रीं ह्रीं ऐं करतल करपृष्ठाभ्यां नमः।(अस्त्राय फट्)॥६॥

ध्यानम्-

पीतवर्णं चतुर्बाहुं त्रिनेत्रं पीतवाससम् ।
अक्षयं स्वर्णमाणिक्यं-तडितपूरित पात्रकम् ॥

अभिलषितं महाशूलं चामरं तोमरोद्वहम् ।
सर्वाभरणसम्पन्नं मुक्ताहारोपशोभितम् ॥१॥

मदोन्मत्तं सुखासीनं भक्तानाम् च वर प्रदम् ।
सततं चिन्तये देवं भैरवं सर्वसिद्धिदम् ॥

पारिजात द्रुमुकान्तारस्थिते मणिमण्डपे ।
सिंहासनगतं ध्यायेद भैरवं स्वर्णदायकम् ॥२॥

गाङ्गेयपात्रं डमरुं त्रिशूलं वरं करैः संदधतं त्रिनेत्रं ।
देव्या युतं तप्तस्वर्णवर्ण स्वर्णाकृतिं भैरवमाश्रयामि ॥३॥

जप मन्त्र ''ओम् ऐं ह्रीं श्रीं आपदुद्धारणाय ह्रां ह्रीं ह्रूं अजामिलबद्धाय लोकेश्वराय स्वर्णाकर्षणभैरवाय ममदारिद्रय विद्वेषणाय महाभैरवाय नमः श्रीं ह्रीं ऐं।''

इस मन्त्र की तीन या पांच माला का नित्यजाप, हवन, तर्पण, मार्जन आदि करने से इक्तालीस दिन में वांछित लाभ मिलता है।

॥ यन्त्र पूजनम् ॥

बिन्दु, त्रिकोण, षट्कोण, अष्टकोण, पुनः अष्टकोण उसके बाहर पुनः अष्टकोण बनायें। उसके चारों ओर चारद्वार युक्त चतुरस्र बनायें। उपर्युक्त यन्त्र ताम्रपात्र पर बनायें अथवा तंडुलादि से बनायें।

सर्वतोभद्र या लिङ्गतोभद्र मण्डल बनायें। पीठ देवताओं का पूजन करें ॐ मं मण्डूकादि परतत्वांत पीठदेवताभ्यो नमः। पीठ शक्तियों का पूजन करें - (पूर्वादिक्रमेण) ॐ वामायै नमः। ॐ जैष्ठायै नमः। ॐ रौद्रये नमः। ॐ काल्यै नमः। ॐ कलविकरण्यै नमः। ॐ बलविकरण्यै नमः। ॐ

बलप्रमथिन्यै नमः। ॐ सर्वभूतदमन्यै नमः। मध्ये ॐ मनोन्मन्यै नमः।

पीठशक्तियों का पूजन करें। स्वर्ण निर्मित यन्त्र-मूर्ति का घी से अभ्यञ्जन करें दुग्ध धारा व जलधारा देवें। स्वच्छ वस्त्र से पोंछ कर भद्रपीठ पर आसीन करें।

प्राणप्रतिष्ठा करें। उसके बाद पूजन करें तथा यन्त्रार्चन करें। पुष्पाक्षत लेकर ध्यान करें। गंधाक्षत व पुष्पों से अर्चन करें तथा तर्पण भी करते रहें।

ॐ गांगेयपात्रं डमरुं त्रिशूलं वरं करैः संदधतं त्रिनेत्रम् ।
देव्यायुति तप्तसुवर्णवर्णं स्वर्णाकृतिं भैरवमाश्रयामि ॥१॥

मन्दारद्रुममूलभाजि सुमहामाणिक्यसिंहासने
संविष्टोदरभिन्नपङ्कजरुचा देव्या कृतालिङ्गनः ।
भक्तेभ्यः कररत्नपात्रभरितं स्वर्ण ददानोऽनिशं
स्वर्णाकर्षणभैरवो विजयते स्वर्गापवर्गैकभूः ॥२॥

पञ्चोपचार पूजन करें, आवरण पूजा के लिये आज्ञा माँगें।

पुष्पाञ्जलि प्रदान करें -

ॐ संविन्मयः परो देवः परामृतरसप्रियः ।
अनुज्ञां देहि वटुक परिवारार्चनाय मे ॥

स्वर्णाकर्षण भैरव यन्त्रम्

प्रथमावरणम् - (अङ्गपूजनम्) देव के साथ अष्टदलों में अष्टदिशा की कल्पना करते हुये अष्टदल में अङ्गपूजन करें।

पूर्वादिक्रमेण - **ॐ आकाशाय नमः। मूर्ध्नि पूजयामि ॥१॥ ॐ समीरणाय नमः। मुखे पूजयामि ॥२॥ ॐ दध्नाय नमः। बाह्वोः पूजयामि॥३॥ ॐ वैवर्त्ताय नमः। हृदि पूजयामि॥४॥ ॐ विश्वंभराय नमः। उदरे पूजयामि॥५॥ ॐ ब्रह्मणे नमः। कटौ पूजयामि॥६॥ ॐ जनार्द्दनाय नमः। जानुनोः पूजयामि॥७॥ ॐ इन्द्राय नमः। पादयोः पूजयामि॥८॥**

प्रत्येक आवरण पूजन पश्चात् पुष्पाञ्जलि देवें।

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

विशेषार्घ्य से जल छोड़ें - **ॐ सर्वे देवा पूजितास्तर्पिताः सन्तु।**

द्वितीयावरणम् - (त्रिकोणे) पूर्वकोणे - **ॐ वटुकभैरवाय नमः। वटुक श्री पादुकां पूजयामि तर्पयामि॥** ईशानकोणे - **ॐ कालभैवाय नमः। कालभैरव श्री पा. प. त.॥** अग्निकोणे - **ॐ क्षेत्रपालभैरवाय नमः। क्षेत्रपाल श्री पा. पू. त.॥**

पुष्पाञ्जलि देवें अभीष्टसिद्धिं........द्वितीयावरणार्चनम्॥ ॐ पूजितास्तर्पिता सन्तु से जल छोड़ें।

तृतीयावरणम् (षट्कोणे) अग्निकोणे **ॐ आपदुद्धारणाय नमः श्री पा.पू.त.।** नैऋत्यकोणे - **ॐ अजामलबद्धाय नमः श्री पा.पू.त.।** वायुकोणे - **ॐ लोकेश्वराय नमः श्री पा.पू.त.।** ऐशान्ये - **ॐ स्वर्णाकर्षण भैरवाय नमः श्री पा.पू.त.।** प्राच्याम् - **ॐ ममदारिद्र्यविद्वेषणाय नमः श्री पा.पू.त.।** पश्चिमे - **श्री महाभैरवाय नमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवें - अभीष्टसिद्धिं........ तृतीयावरणार्चनम्॥ ॐ पूजितास्तर्पिता सन्तु से जल छोड़ें।

चतुर्थावरणम् (अष्टदले) पूर्वादिक्रमेण - **ॐ असिताङ्ग भैरवाय ब्राह्मीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ रुरु भैरवाय माहेश्वरीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ चण्डभैरवाय कौमारीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ क्रोधभैरवाय वैष्णवीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ उन्मत्तभैरवाय वाराहीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ कपालभैरवाय नारसिंहीशक्ति सहिताय नमः श्री पा.पू.त.। ॐ भीषणभैरवाय चामुण्डाशक्ति सहिताय नमः श्री पा.पू.त.। ॐ संहारभैरवाय चण्डिकाशक्ति सहिताय नमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवे - अभीष्टसिद्धिं.........चतुर्थावरणार्चनम् ॥ ॐ पूजितास्तर्पिता सन्तु से जल छोड़ें।

पञ्चमावरणम् (अष्टदले) पूर्वे - **ॐ आदित्याय स्वशक्ति सहिताय नमः श्री पा.पू.त.। ॐ सोमाय स्वशक्ति सहिताय नमः श्री पा.पू.त.। ॐ भौमाय स्वशक्ति सहिताय नमः श्री पा.पू.त.। ॐ बुधाय स्वशक्ति सहिताय नमः श्री पा.पू.त.। ॐ जीवाय स्वशक्ति सहिताय नमः श्री पा.पू.त.। ॐ शुक्राय स्व स्वशक्ति सहिताय नमः श्री पा.पू.त.। ॐ शनैश्चराय स्वशक्ति सहिताय नमः श्री पा.पू.त.। ॐ राहवे केतवे स्वशक्ति सहिताय नमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवें - अभीष्टसिद्धिं........पञ्चमावरणाचर्नम् ॥ ॐ पूजितास्तर्पिता: सन्तु से जल छोड़ें।

षष्टमावरणम् - भूपूर के अन्दर देव के दक्षिण भाग में - **ॐ पूजाविधिसिद्ध्यै नमः श्री पा.पू.त.। ॐ रससिद्ध्यै नमः श्री पा.पू.त.। ॐ स्वर्णसिद्ध्यै नमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवें - ॐ अभीष्टसिद्धिं........षष्टमावरणार्चनम् ॥ ॐ पूजितास्तर्पिता: सन्तु से जल छोड़ें।

सप्तमावरणम् - भूपूर के बाहर देवता के वाम भाग में - **ॐ भूतप्रेतपिशाच वेतालासुरेभ्योनमः श्री पा.पू.त.।**

पुष्पाञ्जलि देवे - ॐ अभीष्टसिद्धिं........सप्तमावरणार्चनम् ॥ ॐ पूजितास्तर्पिता: सन्तु से जल छोड़ें।

अष्टमावरणम् - भूपूर में पूर्वादिक्रम से। पूर्वे - **वज्रसहित इन्द्र श्री पा.पू.त.।** आग्नेये - **शक्ति सहित अग्नि श्री पा.पू.त.।** दक्षिणे - **दण्ड सहित यम श्री पा.पू.त.।** नैऋत्ये - **खड्ग सहित नैऋति श्री पा.पू.त.।** पश्चिमे - **पाश सहित वरुण श्री पा.पू.त.।** वायव्ये - **अङ्कुश सहित वायव्ये श्री पा.पू.त.।** उत्तरे - **गदा सहित कुबेर श्री पा.पू.त.।** ईशाने - **त्रिशूल सहित ईशान श्री पा.पू.त.।** ईशानपूर्वमध्ये - **पद्म सहित ब्रह्मा श्री पा.पू.त.।** निऋति पश्चिममध्ये - **चक्र सहित अनन्त श्री पा.पू.त.।**

पुष्पाञ्जलि देवे - ॐ अभीष्टसिद्धिं........अष्टमावरणार्चनम् ॥ ॐ पूजितास्तर्पिता: सन्तु से जल छोड़ें।

धूप दीप नेवैद्यादि अर्पण कर नमस्कार करें। एक लक्ष जप कर पुरश्चरण करें। दशांश हवन करें। पायस होम करें।

ब्राह्मणान्भोजयेत्पश्चान्मन्त्र सिद्धिर्नसंशयः ।
एवं सिद्धे कृते मन्त्रे अयुतं प्रजपेन्मनुम् ॥
दारिद्र्यं दूरमुत्क्षिप्य जायते धनदोपमः ।
करवीरैर्जाति पुष्पैर्जपादाद्रिम संभवैः ॥
रक्तप्रसूनैर्जुहुयात्सौभाग्यं च समश्नुते ।
सिद्धद्रव्येण जुहुयाल्लभ्यते चाष्टसिद्धयः ॥
पायसेनापि जुहुयाल्लभ्यते सकलं फलम् ।
आज्यं च जुहुयाद्देवि ऐहिकामुष्मिकं फलम् ॥
मन्त्रसिद्धिं च लभते चन्दनादींधनैः क्रमात् ॥

॥ अथ स्वर्णाकर्षणस्तोत्रम् ॥

विनियोगः - ओम् अस्य श्री स्वर्णाकर्षण भैरव स्तोत्रमन्त्रस्य ब्रह्माऋषिः, अनुष्टुप् छन्दः, स्वर्णाकर्षण भैरवो देवता, ह्रीं बीजं, क्लीं शक्तिः, सः कीलकं ममदरिद्रयनाशार्थे सर्व कार्य सिद्ध्यर्थे पाठे विनियोगः।

ऋष्यादिन्यासः - ब्रह्मऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। स्वर्णाकर्षण भैरव देवताय नमः हृदि। ह्रीं बीजाय नमः गुह्ये। क्लीं शक्तये नमः पादयोः। सः कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

करन्यासः - ह्रां अंगुष्ठाभ्यां नमः, ह्रीं तर्जनीभ्यां नमः, ह्रूं मध्यमाभ्यां नमः, ह्रैं अनामिकाभ्यां नमः, ह्रौं कनिष्ठकाभ्यां नमः, ह्रः करतल कर पृष्ठाभ्यां नमः।

हृदयादिन्यासः - ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुम्। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।

॥ अथ स्तोत्रम् ॥

ओम् नमस्ते भैरवाय ब्रह्मविष्णु शिवात्मने ।
नमस्त्रैलोक्य वन्द्याय वरदाय वरात्मने ॥
रत्नसिंहासनस्थाय दिव्याभरण शोभिने ।
दिव्यमाल्य विभूषाय नमस्ते दिव्यमूर्तये ॥
नमस्तेऽनेकहस्ताय अनेक शिरसे नमः ।
नमस्तेऽनेकनेत्राय अनेक विभवे नमः ॥

नमस्तेऽनेक कण्ठाय अनेकांशाय ते नमः ।
नमस्तेऽनेक पार्श्वाय नमस्ते दिव्य तेजसे ॥
अनेकायुधयुक्ताय अनेक सुर सेविने ।
अनेकगुण युक्ताय महादेवाय ते नमः ॥
नमो दारिद्र्यकालाय महासम्पद् प्रदायिने ।
श्री भैरवी संयुक्ताय त्रिलोकेशाय ते नमः ॥
दिगम्बर नमस्तुभ्यं दिव्याङ्गाय नमो नमः ।
नमोऽस्तु दैत्यकालाय पापकालाय ते नमः ॥
सर्वज्ञाय नमस्तुभ्यं नमस्ते दिव्य चक्षुषे ।
अजिताय नमस्तुभ्यं जितामित्राय ते नमः ॥
नमस्ते रुद्ररूपाय महावीराय ते नमः ।
नमोऽस्त्वनन्तवीर्याय महाघोराय ते नमः ॥
नमस्ते घोर-घोराय विश्वघोराय ते नमः ।
नमः उग्रायशान्ताय भक्तानांशान्तिदायिने ॥
गुरवे सर्वलोकानां नमः प्रणवरूपिणे ।
नमस्ते वाग्भवाख्याय दीर्घकामाय ते नमः ॥
नमस्ते कामराजाययोषित कामाय ते नमः ।
दीर्घमायास्वरूपाय महामाया ते नमः ॥
सृष्टिमाया स्वरूपाय विसर्गसमयाय ते ।
सुरलोक-सुपूज्याय आपदुद्धारणाय च ॥
नमो-नमो भैरवाय महादारिद्र्य नाशिने ।
उन्मूलने कर्मठाय-अलक्ष्म्याः सर्वदा नमः ॥
नमो अजामिलबद्धाय नमो लोकेश्वराय ते ।
स्वर्णाकर्षणशीलाय भैरवाय नमो नमः ॥
ममदारिद्र्य विद्वेषणाय लक्ष्याय ते नमः ।
नमो लोकत्रयेशाय स्वानन्द निहिताय ते ॥
नमः श्रीबीजरूपाय सर्वकाम प्रदायिने ।
नमो महाभैरवाय श्रीभैरव नमो नमः ॥

धनाध्यक्ष नमस्तुभ्यं शरण्याय नमो नमः ।
नमः प्रसन्नरूपाय सुवर्णाय नमो नमः ॥
नमस्ते मन्त्ररूपाय नमस्ते मन्त्ररूपिणे ।
नमस्ते स्वर्णरूपाय सुवर्णाय नमो नमः ॥
नमः सुवर्णवर्णाय महापुण्याय ते नमः ।
नमः शुद्धाय बुद्धाय नमः संसार तारिणे ॥
नमो देवाय गुह्याय प्रचलाय नमो नमः ।
नमस्ते बालरूपाय परेशां बलनाशिने ॥
नमस्ते स्वर्ण संस्थाय नमो भूतलवासिने ।
नमः पातालवासाय अनाधाराय ते नमः ॥
नमो नमस्ते शान्ताय अनन्ताय नमो नमः ।
द्विभुजाय नमस्तुभ्यं भुजत्रयसुशोभिने ॥
नमोऽनमादि-सिद्धाय स्वर्णहस्ताय ते नमः ।
पूर्णचन्द्र-प्रतीकाशवदनाम्भोज शोभिने ॥
नमस्तेऽस्तु स्वरूपाय स्वर्णालङ्कार शोभिने ।
नमः स्वर्णाकर्षणाय स्वर्णाभाय नमो नमः ॥
नमस्ते स्वर्णकण्ठाय स्वर्णाभाम्बर धारिणे ।
स्वर्णसिंहासनस्थाय स्वर्णपादाय ते नमः ॥
नमः स्वर्णाभपादय स्वर्णकाञ्ची सुशोभिने ।
नमस्ते स्वर्णजङ्घाय भक्तकामदुधात्मने ॥
नमस्ते स्वर्णभक्ताय कल्पवृक्ष स्वरूपिणे ।
चिन्तामणि स्वरूपाय नमो ब्रह्मादि सेविने ॥
कल्पद्रुमाद्यः संस्थाय बहुस्वर्ण-प्रदायिने ।
नमो हेमाकर्षणाय भैरवाय नमो नमः ॥
स्तवेनान सन्तुष्टो भव लोकेश भैरव ।
पश्यमाम् करुणादृष्ट्या शरणागतवत्सल ॥

॥ फलश्रुतिः ॥

श्री महाभैरवस्येदं स्तोत्रमुक्तं सुदुर्लभम् ।
मन्त्रात्मकं महापुण्यं सर्वैश्वर्यप्रदायकम् ॥

य: पठेन्नित्यमेकाग्रं पातकै: स प्रमुच्यते ।
लभते महतीं लक्ष्मीमष्टैश्वर्यमवाप्नुयात् ॥
चिन्तामणिमवाप्नोति धेनुं कल्पतरुं ध्रुवम् ।
स्वर्णराशिं वाप्नोति शीघ्रमेव स मानव: ॥
त्रिसन्ध्यं य: पठेत् स्तोत्रं दशावृत्या नरोत्तम: ।
स्वप्ने श्रीभैरवस्तस्य साक्षाद् भूत्वा जगद्गुरु: ॥
स्वर्णाराशिं ददात्यस्मै तत्क्षणं नास्ति संशय: ।
अष्टावृत्या पठेत् यस्तु सन्ध्यायां वा नरोत्तम: ॥
सर्वदा य: पठेत् स्तोत्रं भैरवस्य महात्मन: ॥
लोकत्रयं वशीकुर्यादचलां श्रियमाप्नुयात् ।
न भयं विद्यते नवापि विषभूतादि-सम्भवम् ॥
अष्ट पञ्चाशद् वर्णाढ्यो मन्त्रराज: प्रकीर्तित: ।
दारिद्रय दु:ख शमन: स्वर्णाकर्षण कारक: ॥
य एन सञ्जपेद् धीमान स्तोत्रं वा प्रयठेत् सदा ।
महाभैरव सायुज्यं सो अन्तकाले लभेद् ध्रुवम् ॥

॥ इतिश्री रूद्रायमल तन्त्रे स्वर्णाकर्षण भैरव स्तोत्रं सम्पूर्ण ॥

॥ अथ श्रीवटुकभैरव ब्रह्मकवचम् ॥

(रुद्रयामले)

॥ श्रीदेव्युवाच ॥

भगवन्सर्ववेत्ता त्वं देवानां प्रीतिदायकम् ।
भैरवं कवचं ब्रूहि यदि चास्ति कृपा मयि ॥१॥
प्राणत्यागं करिष्यामि यदि नो कथयिष्यसि ।
सत्यं सत्यं पुन: सत्यं सत्यमेव न संशय: ॥२॥
इत्थं देव्या वच:श्रुत्वा प्रहस्यातिशयं प्रभु: ।
उवाच वचनं तत्र देवदेवो महेश्वर: ॥३॥

॥ ईश्वर उवाच ॥

वटुकं कवचं दिव्यं शृणु मत्प्राणवल्लभे ।
चण्डिकातन्त्रसर्वस्वं वटुकस्य विशेषतः ॥४॥
तत्र मंत्राद्यक्षरं तु वासुदेवस्वरूपकम् ।
शङ्खवर्णऽद्वयो ब्रह्मा वटुकश्चन्द्रशेखरः ॥५॥
आपदुद्धारणो देवो भैरवः परिकीर्तितः ।
प्रवक्ष्यामि समासेन चतुर्वर्गप्रसिद्धये ॥६॥
प्रणवः कामदं विद्याल्लज्जाबीजं च सिद्धिदम् ।
बटुकायेति विज्ञेयं महाप[illegible]कनाशनम् ॥७॥
आपदुद्धारणायेति त्वापदुद्धारणं नृणाम् ।
कुरुद्वयं महेशानि मोहने परिकीर्तितम् ॥८॥
वटुकाय महेशानि स्तम्भने परिकीर्तितम् ।
लज्जाबीजं तथा विधान्मुक्तिद परिकीर्तितम् ॥
द्वाविंशत्यक्षरो मन्त्रः क्रमेण जगदीश्वरि ॥९॥

॥ स्तोत्रम् ॥

विनियोगः – ॐ अस्य श्रीबटुकभैरव ब्रह्मकवचस्य भैरवऋषिः। अनुष्टुप् छन्दः। श्री बटुकभैरवो देवता। मम श्रीबटुकभैरव प्रसादसिद्ध्यर्थे जपे विनियोगः।

ॐ पातु नित्यं शिरसि पातु ह्रीं कंठदेशके ।
वटुकाय पातु नाभौ चापदुद्धारणाय च ॥
कुरुद्वयं लिंगमूले त्वाधारे वटुकाय च ।
सर्वदा पातु ह्रीं बीजं वाह्वोर्युगलमेव च ॥
षडङ्गसहितो देवो नित्यं रक्षतु भैरवः ।
ॐ ह्रीं वटुकाय सततं सर्वांगं मम सर्वदा ॥
ॐ ह्रीं पादौ महाकालः पातु वीरासनो हृदि ।
ॐ ह्रीं कालः शिरः पातु कंठदेशे तु भैरवः ॥
गणराट् पातु जिह्वायामष्टभिः शक्तिभिः सह ।
ॐ ह्रीं [illegible]डपाणिर्गुह्यमूले भैरवीसहितस्तथा ॥

ॐ ह्रीं विश्वनाथः सदा पातु सर्वांगं मम सर्वदाः ।
ॐ ह्रीं अन्नपूर्णा सदा पातु चांसौ रक्षतु चण्डिका ॥
असितांगः शिरः पातु ललाटं रुरुभैरवः ।
ॐ ह्रीं चण्डभैरवः पातु वक्त्रं कंठं श्रीक्रोधभैरवः ॥
उन्मत्तभैरवः पातु हृदयं मम सर्वदा ।
ॐ ह्रीं नाभिदेशे कपाली च लिंगे भीषणभैरवः ।
संहारभैरवः पातु मूलाधारं च सर्वदा ॥
ॐ ह्रीं बाहुयुग्मं सदा पातु भैरवो मम केवलम् ।
हंसबीजं पातु हृदि सोऽहं रक्षतु पादयोः ॥
ॐ ह्रीं प्राणापानौ समानं च उदानं व्यानमेव च ।
रक्षतु द्वारमूले च दश दिक्षु समंततः ॥
ॐ ह्रीं प्रणवः पातु सर्वाङ्गं लज्जाबीजं महाभये ।
इतिब्रह्मकवचं भैरवस्य प्रकीर्तितम् ॥
चतुवर्गप्रदं नित्यं स्वयं देव प्रकाशितम् ।
यः पठेच्छृणुयान्नित्यं धारयेत्कवचोत्तमम् ॥
सदानन्दमयो भूत्वा लभते परमं पदम् ।
य इदं कवचं देवि चिन्तयेन्मन्मुखोदितम् ॥
कोटिजन्मार्जितं पापं तस्यनश्यति च तत्क्षणात् ।
जलमध्येऽग्निमध्ये वा दुर्ग्रहे शत्रुसंकटे ।
कवचस्मरणाद्देवि सर्वत्र विजयी भवेत् ॥
भक्तियुक्तेन मनसा कवचं पूजयेद्यदि ।
कामतुल्यस्तु नारीणां रिपूणां च यमोपमः ॥
तस्य पादांबुजद्वंद्वं राज्ञां मुकुटभूषणम् ।
तस्य भूतिं विलोक्यैव कुबेरोऽपि तिरस्कृतः ॥
यस्य विज्ञान मात्रेण मन्त्रसिद्धिर्नसंशयः ।
इदं कवचमज्ञात्वा यो जपेद्बटुकं नरः ॥
न चाप्नोति फलं तस्य परं नरकमाप्नुयात् ।
मन्वंतरत्रयं स्थित्वा तिर्यग्योनिषु जायते ॥

इहलोके महारोगी दारिद्र्येणातिपीडितः ।
शत्रूणां वशगो भूत्वा करपात्री भवेज्जडः ॥
देयं पुत्राय शिष्याय शांताय प्रियवादिने ।
कार्पण्यरहितायालं बटुभक्तिरताय च ॥
योऽपरागे प्रदाता वै तस्य स्यादतिसत्वरम् ।
आयुर्विद्या यशो धर्मं बलं नश्यत्यसंशयम् ॥
इति ते कथितं देवि गोपनीयं स्वयोनिवत् ।

॥ इति श्रीरुद्रयामलोक्तं श्री वटुकभैरवब्रह्मकवचं संपूर्णम् ॥

॥ अथ श्रीवटुकभैरवसहस्रनामस्तोत्रम् ॥

विनियोगः – ॐ अस्य श्रीवटुकभैरव सहस्रनामात्मकस्तोत्रस्य दुर्वासा ऋषिः। अनुष्टुप् छन्दः। भैरवो वटुकनाथो देवता। मम सर्वकार्यसिद्ध्यर्थं सर्वशत्रुनिवारणार्थं वटुकसहस्रनामपाठे विनियोगः।

ॐ नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो भद्रस्वरूपाय जयदाय नमो नमः ॥१॥
नमः कल्पस्वरूपाय विकल्पाय नमो नमः ।
नमः शुद्धस्वरूपाय सुप्रकाशाय ते नमः ॥२॥
नमः कङ्कालरूपाय कालरूप नमोऽस्तु ते ।
नमस्त्र्यंबकरूपाय महाकालाय ते नमः ॥३॥
नमः संसारसाराय शारदाय नमो नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥४॥
नमः क्षेत्रनिवासाय क्षेत्रपालाय ते नमः ।
क्षेत्राक्षेत्रस्वरूपाय क्षेत्रकर्त्रे नमो नमः ॥५॥
नमो नामविनाशाय भैरवाय नमो नमः ।
नमो मातङ्गरूपाय भाररूप नमोस्तु ते ॥६॥
नमः सिद्धस्वरूपाय सिद्धिदाय नमो नमः ।
नमो बिन्दुस्वरूपाय बिन्दुसिन्धुप्रकाशिने ॥७॥
नमो मङ्गलरूपाय मङ्गलाय नमो नमः ।
नमः सङ्कटनाशाय शंकराय नमो नमः ॥८॥

नमो धर्मस्वरूपाय धर्मदाय नमो नमः ।
नमोऽनंतस्वरूपाय एकरूप नमोऽस्तु ते ॥९॥
नमो वृद्धिस्वरूपाय वृद्धिकामिन्नमोऽस्तु ते ।
नमो मोहनरूपाय मोक्षरूपाय ते नमः ॥१०॥
नमो जलदरूपाय सामरूप नमोऽस्तु ते ।
नमः स्थूलस्वरूपाय शुद्धरूपाय ते नमः ॥११॥
नमो नीलस्वरूपाय रंगरूपाय ते नमः ।
नमो मण्ड़लरूपाय मण्ड़लाय नमो नमः ॥१२॥
नमो रुद्रस्वरूपाय रुद्रनाथाय ते नमः ।
नमो ब्रह्मस्वरूपाय ब्रह्मवक्त्रे नमो नमः ॥१३॥
नमस्त्रिशूलधाराय धाराधारिन्नमोऽस्तु ते ।
नमः संसारबीजाय वीररूपाय ते नमः ॥१४॥
नमो विमलरूपाय भैरवाय नमो नमः ।
नमो जङ्गमरूपाय जलजाय नमो नमः ॥१५॥
नमः कालस्वरूपाय कालरुद्राय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥१६॥
नमः शत्रुविनाशाय भीषणाय नमो नमः ।
नमः शांताय दांताय भ्रमरूपिन्नमोऽस्तु ते ॥१७॥
न्यायगम्याय शुद्धाय योगिध्येयाय ते नमः ।
नमः कमलकांताय कालवृद्धाय ते नमः ॥१८॥
नमो ज्योतिःस्वरूपाय सुप्रकाशाय ते नमः ।
नमः कल्पस्वरूपाय भैरवाय नमो नमः ॥१९॥
नमो जयस्वरूपाय जगज्जाड्यनिवारिणे ।
महाभूताय भूताय भूतानां पतये नमः ॥२०॥
नमो नन्दाय वृन्दाय वादिने ब्रह्मवादिने ।
नमो वादस्वरूपाय न्यायगम्याय ते नमः ॥२१॥
नमो भवस्वरूपाय मायानिर्माणरूपिणे ।
विश्ववंद्याय वंद्याय नमो विश्वंभराय ते ॥२२॥

नमो नेत्रस्वरूपाय नेत्ररूपिन्नमोऽस्तु ते ।
नमो वरुणरूपाय भैरवाय नमो नमः ॥२३॥

नमो यमस्वरूपाय वृद्धरूपाय ते नमः ।
नमः कुबेररूपाय कालनाथाय ते नमः ॥२४॥

नमः ईशानरूपाय अग्निरूपाय ते नमः ।
नमो वायुस्वरूपाय विश्वरूपाय ते नमः ॥२५॥

नमः प्राणस्वरूपाय प्राणाधिपतये नमः ।
नमः संहाररूपाय पालकाय नमो नमः ॥२६॥

नमश्चन्द्रस्वरूपाय चण्डरूपाय ते नमः ।
नमो मन्दारवासाय वासिने सर्वयोगिनाम् ॥२७॥

योगिगम्याय योग्याय योगिनांपतये नमः ।
नमो जङ्गमवासाय वामदेवाय ते नमः ॥२८॥

नमः शत्रुविनाशाय नीलकण्ठाय ते नमः ।
नमो भक्तिविनोदाय दुर्भागाय नमो नमः ॥२९॥

नमो मान्यस्वरूपाय मानदाय नमो नमः ।
नमो भूतिविभूषाय भूषिताय नमो नमः ॥३०॥

नमो रजःस्वरूपाय सात्त्विकाय नमो नमः ।
नमस्तामसरूपाय तारणाय नमो नमः ॥३१॥

नमो गङ्गाविनोदाय जटासंधारिणे नमः ।
नमो भैरवरूपाय भयदाय नमो नमः ॥३२॥

नमः संग्रामरूपाय संग्रामजयदायिने ।
संग्रामसाररूपाय यौवनाय नमो नमः ॥३३॥

नमो वृद्धिस्वरूपाय वृद्धिदाय नमो नमः ।
नमस्त्रिशूलहस्ताय शूलसंहारिणे नमः ॥३४॥

नमो द्वंद्वस्वरूपाय रूपदाय नमो नमः ।
नमः शत्रुविनाशाय शत्रुबुद्धिविनाशिने ॥३५॥

महाकालाय कालाय कालनाथाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥३६॥

नमः शंभुस्वरूपाय शंभुरूपिन्नमोऽस्तु ते ।
नमः कमलहस्ताय डमरुहस्ताय ते नमः ॥३७॥
नमः कुक्कुरवाहाय वहनाय नमो नमः ।
नमो विमलनेत्राय त्रिनेत्राय नमो नमः ॥३८॥
नमः संसाररूपाय सारमेयाय वाहिने ।
संसारज्ञानरूपाय ज्ञाननाथाय ते नमः ॥३९॥
नमो मङ्गलरूपाय मङ्गलाय नमो नमः ।
नमो न्यायविशालाय मन्त्ररूपाय ते नमः ॥४०॥
नमो यंत्रस्वरूपाय यंत्रधारिन्नमोऽस्तु ते ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥४१॥
नमः कलंकरूपाय कलंकाय नमो नमः ।
नमः संसारपाराय भैरवाय नमो नमः ॥४२॥
रुण्डमालाविभूषाय भीषणाय नमो नमः ।
नमो दुःखनिवाराय विहाराय नमो नमः ॥४३॥
नमो दण्डस्वरूपाय क्षणरूपाय ते नमः ।
नमो मुहूर्तरूपाय सर्वरूपाय ते नमः ॥४४॥
नमो मोदस्वरूपाय श्रोणरूपाय ते नमः ।
नमो नक्षत्ररूपाय क्षेत्ररूपाय ते नमः ॥४५॥
नमो विष्णुस्वरूपाय बिन्दुरूपाय ते नमः ।
नमो ब्रह्मस्वरूपाय ब्रह्मचारिन्नमोऽस्तु ते ॥४६॥
नमः कंथानिवासाय पटवासाय ते नमः ।
नमो ज्वलनरूपाय ज्वलनाथ नमो नमः ॥४७॥
नमो वटुकरूपाय धूर्तरूपाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥४८॥
नमो वैद्यस्वरूपाय वैद्यरूपिन्नऽमोस्तु ते ।
नमः औषधरूपाय औषधाय नमो नमः ॥४९॥
नमो व्याधिनिवाराय व्याधिरूपिन्नमो नमः ।
नमो ज्वरनिवाराय ज्वररूपाय ते नमः ॥५०॥

नमो रुद्रस्वरूपाय रुद्राणां पतये नमः ।
विरूपाक्षाय देवाय भैरवाय नमो नमः ॥५१॥

नमो ग्रहस्वरूपाय ग्रहाणां पतये नमः ।
नमः पवित्रधाराय परशुधाराय ते नमः ॥५२॥

यज्ञोपवीतिदेवाय देवदेव नमोऽस्तु ते ।
नमो यज्ञस्वरूपाय यज्ञानां फलदायिने ॥५३॥

नमो रुद्रप्रतापाय तापनाय नमो नमः ।
नमो गणेशरूपाय गणरूपाय ते नमः ॥५४॥

नमो रश्मिस्वरूपाय रश्मिरूपाय ते नमः ।
नमो मलयरूपाय रश्मिरूपाय ते नमः ॥५५॥

नमो विभक्तिरूपाय विमलाय नमो नमः ।
नमो मधुररूपाय मधुपूर्णकलापिने ॥५६॥

कालेश्वराय कालाय कालनाथाय ते नमः ।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥५७॥

नमो योनिस्वरूपाय भ्रातृरूपाय ते नमः ।
नमो भगिनिरूपाय भैरवाय नमो नमः ॥५८॥

नमो वृषस्वरूपाय कर्मरूपाय ते नमः ।
नमो वेदान्तवेद्याय वेदसिद्धांतसारिणे ॥५९॥

नमः शाखाप्रकाशाय पुरुषाय नमो नमः ।
नमः प्रकृतिरूपाय भैरवाय नमो नमः ॥६०॥

नमो विश्वस्वरूपाय शिवरूपाय ते नमः ।
नमो ज्योतिःस्वरूपाय निर्गुणाय नमो नमः ॥६१॥

निरञ्जनाय शान्ताय निर्विकाराय ते नमः ।
निर्मायाय विमोहाय विश्वनाथाय ते नमः ॥६२॥

नमः कण्ठप्रकाशाय शत्रुनाशाय ते नमः ।
नमो आशाप्रकाशाय आशापूरकृते नमः ॥६३॥

नमो मत्स्यस्वरूपाय योगरूपाय ते नमः ।
नमो वाराहरूपाय वामनाय नमो नमः ॥६४॥

नमः आनन्दरूपाय आनन्दाय नमो नमः ।
नमोऽस्त्व अनर्घ्यकेशाय ज्वलत्केशाय ते नमः ॥६५॥
नमः पापविमोक्षाय मोक्षदाय नमो नमः ।
नमः कैलासनाथाय कालनाथाय ते नमः ॥६६॥
नमो बिन्ददबिन्दाय बिन्दुभाय नमो नमः ।
नमः प्रणवरूपाय भैरवाय नमो नमः ॥६७॥
नमो मेरुनिवासाय भक्तवासाय ते नमः ।
नमो मेरुस्वरूपाय भैरवाय नमो नमः ॥६८॥
नमो भद्रस्वरूपाय भद्ररूपाय ते नमः ।
नमो योगिस्वरूपाय योगिनां पतये नमः ॥६९॥
नमो मैत्रस्वरूपाय मित्ररूपाय ते नमः ।
नमो ब्रह्मनिवासाय काशीनाथाय ते नमः ॥७०॥
नमो ब्रह्माण्डवासाय ब्रह्मवासाय ते नमः ।
नमो मातङ्गवासाय सूक्ष्मवासाय ते नमः ॥७१॥
नमो मातृनिवासाय भ्रातृवासाय ते नमः ।
नमो जगन्निवासाय जलावासाय ते नमः ॥७२॥
नमः कौलनिवासाय नेत्रवासाय ते नमः ।
नमो भैरववासाय भैरवाय नमो नमः ॥७३॥
नमः समुद्रवासाय वह्निवासाय ते नमः ।
नमश्चन्द्रनिवासाय चन्द्रावासाय ते नमः ॥७४॥
नमः कलिङ्गवासाय कलिङ्गाय नमो नमः ।
नमः उत्कलवासाय शक्रवासाय ते नमः ॥७५॥
नमः कर्पूरवासाय सिद्धिवासाय ते नमः ।
नमः सुन्दरवासाय भैरवाय नमो नमः ॥७६॥
नमः आकाशवासाय वासिने सर्वयोगिनाम् ।
नमो ब्रह्मणवासाय शूद्रवासाय ते नमः ॥७७॥
नमः क्षत्रियवासाय वैश्यवासाय ते नमः ।
नमः पक्षिनिवासाय भैरवाय नमो नमः ॥७८॥

नमः पातालमूलाय मूलावासाय ते नमः ।
नमो रसातलस्थाय सर्वपातालवासिने ॥७९॥

नमः कङ्कालवासाय कङ्कवासाय ते नमः ।
नमो मन्त्रनिवासाय भैरवाय नमो नमः ॥८०॥

नमोऽहंकार रूपाय रजोरूपाय ते नमः ।
नमः सत्त्वनिवासाय भैरवाय नमो नमः ॥८१॥

नमो नलिनरूपाय नलिनाङ्गप्रकाशिने ।
नमः सूर्यस्वरूपाय भैरवाय नमो नमः ॥८२॥

नमो दुष्टनिवासाय साधूपायनरूपिणे ।
नमो नम्रस्वरूपाय स्तंभनाय नमो नमः ॥८३।

पञ्चयोनिप्रकाशाय चतुर्योनिप्रकाशिने ।
नवयोनि प्रकाशाय भैरवाय नमो नमः ॥८४॥

नमः षोडशरूपाय नमः षोडशधारिणे ।
चतुःषष्ठिप्रकाशाय भैरवाय नमो नमः ॥८५॥

नमो बिन्दुप्रकाशाय सुप्रकाशाय ते नमः ।
नमो गणस्वरूपाय मुखरूप नमोऽस्तुते ॥८६॥

नमश्चाम्बररूपाय भैरवाय नमो नमः ।
नमो नानास्वरूपाय सुखरूप नमोऽस्तुते ॥८७॥

नमो दुर्गस्वरूपाय दुःखहर्त्रे नमोऽस्तुते ।
नमो विशुद्धदेहाय दिव्यदेहाय ते नमः ॥८८॥

नमो भैरवरूपाय भैरवाय नमो नमः ।
नमः प्रेतनिवासाय पिशाचाय नमो नमः ॥८९॥

नमो निशाप्रकाशाय निशारूप नमोऽस्तुते ।
नमः सोमार्धरामाय धराधीशाय ते नमः ॥९०॥

नमः संसारभाराय भारकाय नमो नमः ।
नमो देहस्वरूपाय अहयदेहाय नमो नमः ॥९१॥

देवदेहाय देवाय भैरवाय नमो नमः ।
विश्वेश्वराय विश्वाय विश्वधारिन्नमोऽस्तुते ॥९२॥

स्वप्रकाशप्रकाशाय भैरवाय नमो नमः ।
स्थितिरूपाय नित्याय स्थितीनां पतये नमः ॥९३॥
सुस्थिराय सुकेशाय केशवाय नमो नमः ।
स्थविष्ठाय गरिष्ठाय प्रेष्ठाय परमात्मने ॥९४॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमः पारदरूपाय पवित्राय नमो नमः ॥९५॥
नमो वेधकरूपाय अनिंदाय नमो नमः ।
नमः शब्दस्वरूपाय शब्दातीताय ते नमः ॥९६॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो निंदास्वरूपाय अनिंदाय नमो नमः ॥९७॥
नमो विशदरूपाय भैरवाय नमो नमः ।
नमः शरणरूपाय शरण्यानां सुखाय ते ॥९८॥
नमः शरण्यरक्षाय भैरवाय नमो नमः ।
नमः स्वाहास्वरूपाय स्वधारूपाय ते नमः ॥९९॥
नमो वौषट्स्वरूपाय भैरवाय नमो नमः ।
अक्षराय नमस्तुभ्यं त्रिधा मात्रास्वरूपिणे ॥१००॥
नमोऽक्षराय शुद्धाय भैरवाय नमो नमः ।
अर्धमात्राय पूर्णाय संपूर्णाय नमो नमः ॥१०१॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमोऽष्टचक्ररूपाय ब्रह्मरूपाय ते नमः ॥१०२॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो भैरवरूपाय सृष्टिकर्त्रे महात्मने ॥१०३॥
नमः पाल्यस्वरूपाय भैरवाय नमो नमः ।
सनातनाय नित्याय निर्गुणाय गुणाय ते ॥१०४॥
नमः सिद्धाय शान्ताय भैरवाय नमो नमः ।
नमो धारास्वरूपाय स्वखड्गहस्ताय ते नमः ॥१०५॥
नमस्त्रिशूलहस्ताय भैरवाय नमो नमः ।
नमः कुण्डलवर्णाय शवमुण्डविभूषिणे ॥१०६॥

महाक्रुद्धाय चण्डाय भैरवाय नमो नमः ।
नमो वासुकिभूषाय सर्वभूषाय ते नमः ॥१०७॥
नमः कपालहस्ताय भैरवाय नमो नमः ।
पानपात्रप्रमत्ताय मत्तरूपाय ते नमः ॥१०८॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
माध्वाकारसुपर्णाय माधवाय नमो नमः ॥१०९॥
नमो माङ्गल्यरूपाय भैरवाय नमो नमः ।
नमः कुमाररूपाय स्त्रीरूपाय नमो नमः ॥११०॥
नमो गंधस्वरूपाय भैरवाय नमो नमः ।
नमो दुर्गंधरूपाय सुगन्धाय नमो नमः ॥१११॥
नमः पुष्पस्वरूपाय पुष्पभूषण ते नमः ।
नमः पुष्पप्रकाशाय भैरवाय नमो नमः ॥११२॥
नमः पुष्पविनोदाय पुष्पपूजाय ते नमः ।
नमो भक्तिनिवासाय भक्तदुःख निवारिणे ॥११३॥
भक्तप्रियाय शान्ताय भैरवाय नमो नमः ।
नमो भक्तिस्वरूपाय रूपदाय नमो नमः ॥११४॥
नमो भैरवरूपाय भैरवाय नमो नमः ।
नमो वासाय भद्राय वीरभद्राय ते नमः ॥११५॥
नमः संग्रामसाराय भैरवाय नमो नमः ।
नमः खट्वाङ्गहस्ताय कालहस्ताय ते नमः ॥११६॥
नमोऽघोराय घोराय घोराघोरस्वरूपिणे ।
घोरधर्माय घोराय भैरवाय नमो नमः ॥११७॥
घोरत्रिशूलहस्ताय घोरपानाय ते नमः ।
घोररूपाय नीलाय भैरवाय नमो नमः ॥११८॥
घोरवाहनगम्याय ह्यगम्याय नमो नमः ।
घोरब्रह्मस्वरूपाय भैरवाय नमो नमः ॥११९॥
घोरशब्दाय घोराय घोरदेहाय ते नमः ।
घोरद्रव्याय घोराय भैरवाय नमो नमः ॥१२०॥

घोरसंगाय सिंहाय सिद्धिसिंहाय ते नमः ।
नमः प्रचण्डसिंहाय सिंहरूपाय ते नमः ॥१२१॥
नमः सिंहप्रकाशाय सुप्रकाशाय ते नमः ।
नमो विजयरूपाय जयदाय नमो नमः ॥१२२॥
नमो भार्गवरूपाय गर्भरूपाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥१२३॥
नमो मेध्याय शुद्धाय मायाधीशाय ते नमः ।
नमो मेघप्रकाशाय भैरवाय नमो नमः ॥१२४॥
दुर्ज्ञेयाय दुरंताय दुर्लभाय दुरात्मने ।
भक्तिलभ्याय भव्याय भाविताय नमो नमः ॥१२५॥
नमो गौरवरूपाय गौरवाय नमो नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥१२६॥
नमो विघ्ननिवाराय विघ्नराशिन्नमोऽस्तु ते ।
नमो विघ्नविद्रावणायैव भैरवाय नमो नमः ॥१२७॥
नमः किंशुकरूपाय रजोरूपाय ते नमः ।
नमो नीलस्वरूपाय भैरवाय नमो नमः ॥१२८॥
नमो गणस्वरूपाय गणनाथाय ते नमः ।
नमो विश्वविकासाय भैरवाय नमो नमः ॥१२९॥
नमो योगिप्रकाशाय योगिगम्याय ते नमः ।
नमो हेरम्बरूपाय भैरवाय नमो नमः ॥१३०॥
नमस्त्रिधास्वरूपाय रूपदाय नमो नमः ।
नमः स्वरस्वरूपाय भैरवाय नमो नमः ॥१३१॥
नमः सरस्वतीरूप बुद्धिरूपाय ते नमः ।
नमो वैद्यस्वरूपाय भैरवाय नमो नमः ॥१३२॥
नमस्त्रिविक्रमरूपाय त्रिस्वरूपाय ते नमः ।
नमः शशाङ्करूपाय भैरवाय नमो नमः ॥१३३॥
नमो व्यापकरूपाय व्याप्यरूपाय ते नमः ।
नमो भैरवरूपाय भैरवाय नमो नमः ॥१३४॥

नमो विशदरूपाय भैरवाय नमो नमः ।
नमः सत्त्वस्वरूपाय भैरवाय नमो नमः ॥१३५॥
नमः सूक्तस्वरूपाय शिवदाय नमो नमः ।
नमो गङ्गास्वरूपाय यमुनारूपिणे नमः ॥१३६॥
नमो गौरीस्वरूपाय भैरवाय नमो नमः ।
नमो दुःख विनाशाय दुःखमोक्षणरूपिणे ॥१३७॥
महाचलाय वंद्याय भैरवाय नमो नमः ।
नमो नन्दस्वरूपाय भैरवाय नमो नमः ॥१३८॥
नमो नन्दिस्वरूपाय स्थिररूपाय ते नमः ।
नमः केलिस्वरूपाय भैरवाय नमो नमः ॥१३९॥
नमः क्षेत्रनिवासाय वासिने ब्रह्मवादिने ।
नमः शान्ताय शुद्धाय भैरवाय नमो नमः ॥१४०॥
नमो नर्मदरूपाय जलरूपाय ते नमः ।
नमो विश्वविनोदाय जयदाय नमो नमः ॥१४१॥
नमो महेन्द्ररूपाय महनीयाय ते नमः ।
नमः संसृतिरूपाय शरण्याय च ते नमः ॥१४२॥
नमस्त्रिबन्धुवासाय बालकाय नमो नमः ।
नमः संसारसाराय सरसां पतये नमः ॥१४३॥
नमस्तेजः स्वरूपाय भैरवाय नमो नमः ।
नमः कारुण्यरूपाय भैरवाय नमो नमः ॥१४४॥
नमो गोकर्णरूपाय ब्रह्मवर्णाय ते नमः ।
नमः शङ्करवर्णाय हस्तिकर्णाय ते नमः ॥१४५॥
नमो विष्टरकर्णाय यज्ञकर्णाय ते नमः ।
नमः शंबुककर्णाय भैरवाय नमो नमः ॥१४६॥
नमो दिव्यसुकर्णाय कालकर्णाय ते नमः ।
नमो भयदकर्णाय भैरवाय नमो नमः ॥१४७॥
नमः आकाशवर्णाय कालकर्णाय ते नमः ।
नमो दिग्रूपकर्णाय भैरवाय नमो नमः ॥१४८॥

नमो विशुद्धकर्णाय विमलाय नमो नमः ।
नमः सहस्रकर्णाय भैरवाय नमो नमः ॥१४९॥
नमो नेत्रप्रकाशाय सुनेत्राय नमो नमः ।
नमो वरदनेत्राय जयनेत्राय ते नमः ॥१५०॥
नमो विमलनेत्राय योगिनेत्राय ते नमः ।
नमः सहस्रनेत्राय भैरवाय नमो नमः ॥१५१॥
नमः कलिंदरूपाय कलिंदाय ते नमो नमः ।
नमो ज्योतिःस्वरूपाय ज्योतिषाय नमो नमः ॥१५२॥
नमस्तारप्रकाशाय ताररूपिन्नमोऽस्तु ते ।
नमो नक्षत्रनेत्राय भैरवाय नमो नमः ॥१५३॥
नमश्चन्द्रप्रकाशाय चन्द्ररूप नमोऽस्तु ते ।
नमो रश्मिस्वरूपाय भैरवाय नमो नमः ॥१५४॥
नमः आनन्दरूपाय जगदानन्दरूपिणे ।
नमो द्रविडरूपाय भैरवाय नमो नमः ॥१५५॥
नमः शङ्खनिवासाय शङ्कराय नमो नमः ।
नमो मुद्राप्रकाशाय भैरवाय नमो नमः ॥१५६॥
नमोन्यासस्वरूपाय न्यासरूप नमोऽस्तु ते ।
नमो बिन्दुस्वरूपाय भैरवाय नमो नमः ॥१५७॥
नमो विसर्गरूपाय प्रणवरूपाय ते नमः ।
नमो मन्त्रप्रकाशाय भैरवाय नमो नमः ॥१५८॥
नमो जंबुकरूपाय जंगमाय नमो नमः ।
नमो गरुडरूपाय भैरवाय नमो नमः ॥१५९॥
नमो लंबुकरूपाय लंबिकाय नमो नमः ।
नमो लक्ष्मीस्वरूपाय भैरवाय नमो नमः ॥१६०॥
नमो वीरस्वरूपाय वीरणाय नमो नमः ।
नमः प्रचण्डरूपाय भैरवाय नमो नमः ॥१६१॥
नमो डंबस्वरूपाय डमरुधारिन्नमोऽस्तु ते ।
नमः कलंकनाशाय कालनाथाय ते नमः ॥१६२॥

नमः ऋद्धिप्रकाशाय सिद्धिदाय नमो नमः ।
नमः सिद्धस्वरूपाय भैरवाय नमो नमः ॥१६३॥

नमो धर्मप्रकाशाय धर्मनाथाय ते नमः ।
धर्माय धर्मराजाय भैरवाय नमो नमः ॥१६४॥

नमो धर्माधिपतये धर्मध्येयाय ते नमः ।
नमो धर्मार्थसिद्धाय भैरवाय नमो नमः ॥१६५॥

नमो विरजरूपाय रूपारूपप्रकाशिने ।
नमो राजप्रकाशाय भैरवाय नमो नमः ॥१६६॥

नमः प्रतापसिंहाय प्रतापाय नमो नमः ।
नमः कोटिप्रतापाय भैरवाय नमो नमः ॥१६७॥

नमः सहस्त्ररूपाय कोटिरूपाय ते नमः ।
नमः आनन्दरूपाय भैरवाय नमो नमः ॥१६८॥

नमः संहारबन्धाय बंधकाय नमो नमः ।
नमो विमोक्षरूपाय मोक्षदाय नमो नमः ॥१६९॥

नमो विष्णुस्वरूपाय व्यापकाय नमो नमः ।
नमो माङ्गल्यनाथाय शिवनाथाय ते नमः ॥१७०॥

नमो व्यालाय व्याघ्राय व्याघ्ररूपिन्नमोऽस्तु ते ।
नमो व्यालविभूषाय भैरवाय नमो नमः ॥१७१॥

नमो विद्याप्रकाशाय विद्यानां पतये नमः ।
नमो योगिस्वरूपाय क्रूररूपाय ते नमः ॥१७२॥

नमः संहाररूपाय शत्रुनाशाय ते नमः ।
नमः पालकरूपाय भैरवाय नमो नमः ॥१७३॥

नमः कारुण्यदेवाय देवदेवाय ते नमः ।
नमो विश्वविलासाय भैरवाय नमो नमः ॥१७४॥

नमो नमः प्रकाशाय काशीवासिन्नमोऽस्तु ते ।
नमो भैरवक्षेत्राय क्षेत्रपालाय ते नमः ॥१७५॥

नमो भद्रस्वरूपाय भद्रकाय नमो नमः ।
नमो भद्राधिपतये भयहंतर्नमोऽस्तु ते ॥१७६॥

नमो मायाविनोदाय मायिने मदरूपिणे ।
नमो मत्ताय शांताय भैरवाय नमो नमः ॥१७७॥
नमो मलयवासाय कैलासाय नमो नमः ।
नमः कैलासवासाय कालिकातनयाय ते ॥१७८॥
नमः संसारपाराय भैरवाय नमो नमः ।
नमो मातृविनोदाय विमलाय नमो नमः ॥१७९॥
नमो यमप्रकाशाय नियमाय नमो नमः ।
नमः प्राणप्रकाशाय ध्यानाधिपतये नम ॥१८०॥
नमः समाधिरूपाय निर्गुणाय नमो नमः ।
नमो मन्त्रप्रकाशाय मन्त्ररूपाय ते नमः ॥१८१॥
नमो वृन्दविनोदाय वृन्दकाय नमो नमः ।
नमो बृंहितरूपाय भैरवाय नमो नमः ॥१८२॥
नमो मान्यस्वरूपाय मानदाय नमो नमः ।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥१८३॥
नमो वै स्थिरपीठाय सिद्धपीठाय ते नमः ।
नमो मण्डलपीठाय उत्तपीठाय ते नमः ॥१८४॥
नमो यशोदानाथाय कामनाथाय ते नमः ।
नमो विनोदनाथाय सिद्धिनाथाय ते नमः ॥१८५॥
नमो नाथाय नाथाय ज्ञाननाथाय ते नमः ।
नमः शङ्करनाथाय जयनाथाय ते नमः ॥१८६॥
नमो मुद्गलनाथाय नीलनाथाय ते नमः ।
नमो बालकनाथाय धर्मनाथाय ते नमः ॥१८७॥
विश्वनाथाय नाथाय कार्यनाथाय ते नमः ।
नमो भैरवनाथाय महानाथाय ते नमः ॥१८८॥
नमो ब्रह्मसनाथाय योगनाथाय ते नमः ।
नमो विश्वविहाराय विश्वभाराय ते नमः ॥१८९॥
नमो रंगसनाथाय रंगनाथाय ते नमः ।
नमो मोक्षसनाथाय भैरवाय नमो नमः ॥१९०॥

नमो गोरक्षनाथाय गोरक्षाय नमो नमः ।
नमो मन्दारनाथाय नन्दनाथाय ते नमः ॥१९१॥

नमो मङ्गलनाथाय चम्पानाथाय ते नमः ।
नमः सन्तोषनाथाय भैरवाय नमो नमः ॥१९२॥

नमोऽगरागनाथाय सुखनाथाय ते नमः ।
नमः कारुण्यनाथाय भैरवाय नमो नमः ॥१९३॥

नमो द्रविडनाथाय दरीनाथाय ते नमः ।
नमः संसारनाथाय जगन्नाथाय ते नमः ॥१९४॥

नमो माध्वीकनाथाय मन्त्रनाथाय ते नमः ।
नमो न्यासनाथाय ध्याननाथाय ते नमः ॥१९५॥

नमो गोकर्णनाथाय महानाथाय ते नमः ।
नमः शुभ्रसनाथाय भैरवाय नमो नमः ॥१९६॥

नमो विमलनाथाय मण्डलेशाय ते नमः ।
नमः सरोजनाथाय मत्स्यनाथाय ते नमः ॥१९७॥

नमो भक्तसनाथाय भक्तिनाथाय ते नमः ।
नमो मोहननाथाय वत्सनाथाय ते नमः ॥१९८॥

नमो मातृसनाथाय विश्वनाथाय ते नमः ।
नमो बिन्दुसनाथाय जयनाथाय ते नमः ॥१९९॥

नमो मङ्गलनाथाय धर्मनाथाय ते नमः ।
नमो गङ्गासनाथाय भूमिनाथाय ते नमः ॥२००॥

नमो धीरसनाथाय बिन्दुनाथाय ते नमः ।
नमः कंचुकिनाथाय श्रृंगिनाथाय ते नमः ॥२०१॥

नमः समुद्रनाथाय गिरिनाथाय ते नमः ।
नमो माङ्गल्यनाथाय कुट्टनाथाय ते नमः ॥२०२॥

नमो वेदान्तनाथाय श्रीनाथाय नमो नमः ।
नमो ब्रह्माण्डनाथाय भैरवाय नमो नमः ॥२०३॥

नमो गिरिशनाथाय वामनाथाय ते नमः ।
नमो बीजसनाथाय भैरवाय नमो नमः ॥२०४॥

नमो मन्दरनाथाय मन्दनाथाय ते नमः ।
नमो भैरवीनाथाय भैरवाय नमो नमः ॥२०५॥
अम्बानाथाय नाथाय जन्तुनाथाय ते नमः ।
नमः कालिसनाथाय भैरवाय नमो नमः ॥२०६॥
नमो मुकुन्दनाथाय कुन्दनाथाय ते नमः ।
नमः कुण्डलनाथाय भैरवाय नमो नमः ॥२०७॥
नमोऽष्टचक्रनाथाय चक्रनाथाय ते नमः ।
नमो विभूतिनाथाय शूलनाथाय ते नमः ॥२०८॥
नमो न्यायसनाथाय न्यायनाथाय ते नमः ।
नमो दयासनाथाय जंगमेशाय ते नमः ॥२०९॥
नमो विशदनाथाय जगन्नाथाय ते नमः ।
नमः कामिकनाथाय भैरवाय नमो नमः ॥२१०॥
नमः क्षेत्रसनाथाय जीवनाथाय ते नमः ।
नमः केवलनाथाय चैलनाथाय ते नमः ॥२११॥
नमो मात्रासनाथाय अमात्राय नमो नमः ।
नमो द्वंद्वसनाथाय भैरवाय नमो नमः ॥२१२॥
नमः शूरसनाथाय शूरनाथाय ते नमः ।
नमः सौजन्यनाथाय सौजन्याय नमो नमः ॥२१३॥
नमो दुष्टसनाथाय भैरवाय नमो नमः ।
नमो भयसनाथाय विंबनाथाय ते नमः ॥२१४॥
नमो मायासनाथाय भैरवाय नमो नमः ।
नमो विटंकनाथाय टंकनाथाय ते नमः ॥२१५॥
नमश्चर्मसनाथाय खड्गनाथाय ते नमः ।
नमः शक्तिसनाथाय धनुर्नाथाय ते नमः ॥२१६॥
नमो मानसनाथाय शापनाथाय ते नमः ।
नमो यन्त्रसनाथाय भैरवाय नमो नमः ॥२१७॥
नमो गंडूषनाथाय गंडूषाय नमो नमः ।
नमो डाकिनिनाथाय भैरवाय नमो नमः ॥२१८॥

नमो डामरनाथाय डारकाय नमो नमः ।
नमो डंकसनाथाय डंकनाथाय ते नमः ॥२१९॥
नमो मांडव्यनाथाय यज्ञनाथाय ते नमः ।
नमो यजुःसनाथाय क्रीडानाथाय ते नमः ॥२२०॥
नमः सामसनाथायाथर्वनाथाय ते नमः ।
नमः शून्याय नाथाय स्वर्गनाथाय ते नमः ॥२२१॥

॥ फलश्रुति ॥

इदं नामसहस्त्रं मे रुद्रेण परिकीर्तितम् ।
यः पठेत्पाठयेद्वापि स एव म ेसेवकः ॥२२२॥
यं यं चिंतयते कामं कारंकारं प्रियाकृतिम् ।
यः श्रृणोति दुरापं स तं तं प्राप्नोति मामकः ॥२२३॥
राजद्वारे श्मशाने तु पृथिव्यां जलसन्निधौ ।
यः पठेन्मानवो नित्यं स शूरः स्यान्न संशयः ॥२२४॥
एककालं द्विकालं वा त्रिकालं वा पठेन्नरः ।
स भवेद् बुद्धिमाँल्लोके सत्यमेव न संशयः ॥२२५॥
यः श्रृणोति नरो भक्त्या स एव गुणसागरः ।
यः श्रद्धया रात्रिकाले श्रृणोति पठतेऽपि वा ॥२२६॥
स एव साधकः प्रोक्तः सर्वदुष्टविनाशकः ।
अर्धरात्रे पठेद्यस्तु स एव पुरुषोत्तमः ॥२२७॥
त्रिसंध्ये वै देवगृहे श्मशाने च विशेषतः ।
वने च मार्गगमने बले दुर्जनसन्निधौ ॥२२८॥
यः पठेत्प्रयतो नित्यं स सुखी स्यान्न संशयः ।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥२२९॥
शौर्यार्थी लभते शौर्यं पुत्रार्थी पुत्रमाप्नुयात् ।
एवं विंशतिमन्त्रेण अक्षरेण सहैव मे ॥२३०॥
यः पठेत्प्रातरुत्थाय सर्वकाममवाप्नुयात् ।
रसार्थी पाठमात्रेण रसं प्राप्नोति नित्यशः ॥२३१॥

अन्नार्थी लभते चान्नं सुखार्थी सुखमाप्नुयात् ।
रोगी प्रमुच्यते रोगाद्बद्धो मुच्यते बंधनात् ॥२३२॥
शापार्थी लभते शापं सर्वशत्रुविनाशनम् ।
स्थावरं जङ्गमं वापि विषं सर्वं प्रणश्यति ॥२३३॥
सर्वलोकप्रियः शान्तो मातापितृप्रियंकरः ।
संग्रामे विजयस्तस्य यः पठेद्भक्तिसंयुतः ॥२३४॥
सर्वत्र जयदं देवि स्तोत्रमेतत्प्रकीर्तितम् ।
इदं स्तोत्रं महापुण्यं निन्दकाय न दर्शयेत् ॥२३५॥
असाधकाय दुष्टाय मातापितृविकारिणे ।
अधार्मिकाकुलीनाभ्यां नैतत्स्तोत्रं प्रकाशयेत् ॥२३६॥
साधकाय च भक्ताय योगिने धार्मिकाय च ।
गुरुभक्ताय शान्ताय दर्शयेत्साधकोत्तमः ॥२३७॥
अन्यथा पापलिप्तः स्यात्क्रोधनो भैरवोत्तमे ।
तस्मात्सर्वप्रयत्नेन गोपनीयं प्रयत्नतः ॥२३८॥
इदं स्तोत्रं च रुद्रेण रामस्यापि मुखेऽर्पितम् ।
तन्मुखान्निःसृतं लोके दरिद्रायापि साधवे ॥२३९॥
रामेण कथितं भ्रात्रे लक्ष्मणाय महात्मने ।
ततो दुर्वाससा प्राप्तं तेनैवोक्तं तु पांडवे ॥२४०॥
पाण्डुरप्यब्रवीत्कृष्णां कृष्णेनेह प्रकीर्तितम् ।
अस्य स्तोत्रस्य माहात्म्यं रामो जानाति तत्त्वतः ॥२४१॥
रामोऽपि राज्यं संप्राप्तो ह्यस्य स्तोत्रस्य पाठतः ।
पाण्डवोऽपि तथा राज्यं संप्राप्तो भैरवस्य च ॥२४२॥
अनेन स्तोत्रपाठेन किमलभ्यं भवेदिति ।
सर्वलोकस्य पूज्यस्तु जायते नात्र संशयः ॥२४३॥

॥इति रुद्रयामलोक्तश्री वटुकभैरवसहस्रनामस्तोत्रं सम्पूर्णम् ॥

॥ श्रीवटुकभैरवस्तवराज ॥

(१०८ नामावलि प्रयोगः)

मेरुपृष्ठे सुखासीन देवदेवं त्रिलोचनम् ।
शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥१॥

॥ पार्वत्युवाच ॥

य एष भैरवो नाम आपदुद्धारको मतः।
त्वया च कथितो देव भैरवः कल्प उत्तमः ।
तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च ॥२॥
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ।
यानि संकीर्त्तयन्मर्त्यः सर्वदुःखविवर्जितः ।
सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च ॥३॥

॥ ईश्वर उवाच ॥

श्रृणुदेवि प्रवक्ष्यामि भैरवस्य महात्मनः ।
आपदुद्धारंणस्येह नामाष्टशतमुत्तमम् ॥४॥
सर्वपापहरं पुण्यं सर्वापद्विनिवारणम् ।
सर्वकामार्थदं देवि साधकानां सुखावहम् ॥५॥
सर्वमङ्गलमांगल्यं सर्वोपद्रवनाशनम् ।
आयुष्करं पुष्टिकरं श्रीकरं च यशस्करम् ॥६॥
आद्यन्ते स्तोत्रपाठस्य मूलमन्त्रं जपेन्नरः ।
अष्टोत्तरशतं धीमान् यथासंख्यमथापि वा ।
जपांतेऽप्युत्तरन्यासाः कर्तव्या जपसिद्धये ॥७॥
आयुरारोग्यमैश्वर्यं सिद्धार्थे विनियोजयेत् ।
साधकः सर्वलोकेषु सत्यं सत्यं न संशयः ॥८॥

विनियोगः - ॐ अस्य श्री वटुकभैरवस्तोत्र मन्त्रस्य वृहदारण्यक ऋषिः। अनुष्टुप्छन्दः। श्री वटुकभैरवो देवता। अष्टबाहुमिति बीजम्। त्रिनयनमिति शक्तिः। प्रणवः कीलकम्। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यास - ॐ वृहदारण्यकऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमः मुखे। श्री वटुकभैरवदेवतायै नमः हृदये। अष्टबाहुमिति बीजाय नमः

गुह्ये। त्रिनयनेति शक्तये नमः पादयोः। ॐ कीलकाय नमः नाभौ। विनियोगाय नमः सर्वाङ्गे।

करन्यासः - ॐ ह्रां वां ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधि पतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्। अंगुष्ठाभ्यां नमः ॥१ ॥ ॐ ह्रीं वीं तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्। तर्जनीभ्यां नमः ॥२ ॥ ॐ ह्रूं वूं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। मध्यमाभ्यां नमः ॥३ ॥ ॐ ह्रैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः। अनामिकाभ्यां नमः ॥४ ॥ ॐ ह्रौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः। कनिष्ठिकाभ्यां नमः ॥५ ॥ ॐ ह्रः वः पञ्चवक्त्राय महादेवाय नमः। करतलकरपृष्ठाभ्यां नमः ॥६ ॥

हृदयादिषडङ्गन्यासः - ॐ ह्रां वां ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्। हृदयाय नमः ॥१ ॥ ॐ ह्रीं वीं तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्। शिरसे स्वाहा ॥२ ॥ ॐ ह्रूं वूं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। शिखायै वषट् ॥३ ॥ ॐ ह्रैं वैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः। कवचाय हुम् ॥४ ॥ ॐ ह्रौं वौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः। नेत्रत्रयाय वौषट् ॥५ ॥ ॐ ह्रः वः पञ्चवक्त्राय महादेवाय नमः अस्त्राय फट् ॥६ ॥

देहन्यासः - ॐ ह्रीं भैरवाय नमः मूर्ध्नि ॥१ ॥ ॐ ह्रीं भीमदर्शनाय नमः ललाटे ॥२ ॥ ॐ ह्रीं भूताश्रयाय नमः नेत्रयोः ॥३ ॥ ॐ ह्रीं भूतनायकाय नमः कर्णयोः ॥४ ॥ ॐ ह्रीं त्रिशूलाय नमः नासिकायाम् ॥५ ॥ ॐ ह्रीं रक्तपाय नमः जिह्वायाम् ॥६ ॥ ॐ ह्रीं नागहार नागयज्ञोपवीतिकाय नमः कण्ठे ॥७ ॥ ॐ ह्रीं क्षेत्रज्ञाय नमः करयोः ॥८ ॥ ॐ ह्रीं क्षेत्रपालाय नमः हृदये ॥९ ॥ ॐ ह्रीं क्षेत्रदाय नमः नाभौ ॥१० ॥ ॐ ह्रीं अबोधनाशनाय नमः कट्याम् ॥११ ॥

ॐ ह्रीं त्रिनेत्राय नमः ऊर्वोः ॥१२॥ ॐ ह्रीं रक्तपायिने नमः जंघयोः ॥१३॥ॐ ह्रीं देवदेदेशाय नमः सर्वाङ्गें ॥१४॥

करन्यासः - ॐ ह्रीं भैरवाय नमः अंगुष्ठाभ्यां नमः ॥१॥ ॐ ह्रीं भीमदर्शनाय नमः तर्जनीभ्यां नमः ॥२॥ ॐ ह्रीं भूतश्रेष्ठाय नमः मध्यमाभ्यां नमः ॥३॥ ॐ ह्रीं भूतनायकाय नमः अनामिकाभ्यां नमः ॥४॥ ॐ ह्रीं क्षत्रियाय नमः कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ह्रीं क्षेत्रपालाय नमः करतलकर पृष्ठाभ्यां नमः ॥६॥ ॐ ह्रीं क्षेत्रज्ञाय दिग्विदिशायाम् ॥७॥ ॐ भैरवाय नमः सर्वाङ्गे ॥

व्यापकन्यास ॐ ह्रीं भैरवाय नमः शिरसि ॥१॥ ॐ ह्रीं भीमदर्शनाय नमः ललाटे ॥२॥ ॐ ह्रीं भूतहननाय नमः नेत्रयोः ॥३॥ ॐ ह्रीं सारमेयानुगाय नमः भ्रुवोः ॥४॥ ॐ ह्रीं भूतनाथाय नमः कर्णयोः ॥५॥ ॐ ह्रीं प्रेतवाहनाथाय नमः कपोलयोः ॥६॥ ॐ ह्रीं भस्मांगाय नमः नासापुटे ॥७॥ ॐ ह्रीं सर्पभूषणाय नमः ओष्ठयोः ॥८॥ ॐ ह्रीं आदिनाथाय नमः मुखे ॥९॥ ॐ ह्रीं शक्तिहस्ताय नमः गले ॥१०॥ ॐ ह्रीं दैत्यशमनाय नमः स्कंधयोः ॥११॥ ॐ ह्रीं अतुलतेजसे नमः बाह्वोः ॥१२॥ ॐ ह्रीं कपालिने नमः करयोः ॥१३॥ ॐ ह्रीं मुण्डमालिने नमः हृदये ॥१४॥ ॐ ह्रीं शान्ताय नमः वक्षःस्थले ॥१५॥ ॐ ह्रीं कामचारिणे नमः स्तनयोः ॥१६॥ ॐ ह्रीं सदातुष्टाय नमः उदरे ॥१७॥ ॐ ह्रीं क्षेत्रेशाय नमः पार्श्वयोः ॥१८॥ ॐ ह्रीं क्षेत्रपालाय नमः पृष्ठे ॥१९॥ ॐ ह्रीं क्षेत्रज्ञाय नमः नाभौ ॥२०॥ ॐ ह्रीं पापौघनाशाय नमः कट्याम् ॥२१॥ ॐ ह्रीं वटुकाय नमः लिङ्गे ॥२२॥ ॐ ह्रीं रक्षाकराय नमः गुदे ॥२३॥ ॐ ह्रीं रक्तलोचनाय नमः ऊर्वोः ॥२४॥ ॐ ह्रीं घुर्घुराय नमः जानुनि ॥२५॥ ॐ ह्रीं रक्तपायिने नमः जंघयोः ॥२६॥ ॐ ह्रीं सिद्धपादुकाय नमः गुल्फयोः ॥२७॥ ॐ ह्रीं सुरेश्वराय नमः पादपृष्ठे ॥२८॥ ॐ ह्रीं आपदुद्धारकाय नमः आपादतलमस्तकपर्यन्तं न्यसेत् ॥२९॥ ॐ ह्रीं क्ष्म्रौं ब्लौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः ॥ अनेनं सर्वाङ्गे व्यापकं कुर्यात् ॥३०॥ इति व्यापक न्यासः।

दिङ्न्यासः - ॐ ह्रीं डमरुहस्ताय नमः पूर्वे ॥१॥ ह्रीं दण्डधारिणे नमः दक्षिणे ॥२॥ ॐ ह्रीं खड्गहस्ताय नमः पश्चिमे ॥३॥ ॐ ह्रीं घण्टावादिने नमः उत्तरे ॥४॥ ॐ ह्रीं अग्निवर्णाय नमः अग्नये ॥५॥ ॐ ह्रीं दिगम्बराय नमः नैर्ऋत्ये ॥६॥ ॐ ह्रीं सर्वभूतस्थाय नमः वायव्ये ॥७॥ ॐ ह्रीं अष्टसिद्धिदाय नमः ऐशान्याम् ॥८॥ ॐ ह्रीं खेचारिणे नमः उर्ध्वम् ॥९॥ ॐ ह्रीं रौद्ररूपिणे नमः पाताले ॥१०॥

विलोम करन्यासः - ॐ ह्रीं रुद्राय नमः अङ्गुष्ठयोः ॥१॥ ॐ ह्रीं शिखिसखाय नमः तर्जन्याम् ॥२॥ ॐ ह्रीं शिवाय नमः मध्यमायाम् ॥३॥ ॐ ह्रीं त्रिशूलिने नमः अनामिकायाम् ॥४॥ ॐ ह्रीं ब्रह्मणे नमः कनिष्ठिकायाम् ॥५॥ ॐ ह्रीं त्रिपुरांतकाय नमः करतलयोः ॥६॥ ॐ ह्रीं मांसाशिने नमः कराग्रेषु ॥७॥ ॐ ह्रीं दिगम्बराय नमः करपृष्ठयोः ॥८॥

हृदयादिषडङ्गन्यासः - ॐ ह्रीं भूतनाथाय नमः हृदयाय नमः ॥१॥ ॐ ह्रीं आदिनाथाय नमः शिरसे स्वाहा ॥२॥ ॐ ह्रीं आनन्दनाथाय नमः शिखायै वषट् ॥३॥ ॐ ह्रीं सिद्धशाबरनाथाय नमः कवचाय हुम् ॥४॥ ॐ ह्रीं सहजानन्दनाथाय नमः नेत्रत्रयाय वौषट् ॥५॥ ॐ ह्रीं श्रीआनन्दनाथाय नमः अस्त्राय फट् ॥६॥

एवं न्यासविधिं समाप्य कामनापरत्वेनोपयोगिरूपं ध्यायेत् ॥

॥ अथ सात्त्विक ध्यानम् ॥

वंदे बालं स्फटिकसदृशं कुण्डलोद्भासिताङ्गं
दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराढ्यैः ॥
दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताग्राभ्यां वटुक सदृशं शूलदण्डौ दधानम् ॥१॥

॥ अथ राजस ध्यानम् ॥

उद्यद्भास्क रसन्निभं त्रिनयनं रक्तांगरागस्रजं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥
नीलग्रीवमुदारभूषणयुतं शीतांशुखण्डोज्ज्वलं
बंधूकारुणवाससं भयहरं देवं सदा भावये ॥२॥

॥ अथ तामस ध्यानम् ॥

ध्यायेन्नीलादिकांतं शशिशकलधरं मुण्डमालं
महेशंदिग्वस्त्रंपिंगकेशं डमरुमथ सृणिंखड्गपाशाभयानि।
नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं
दिव्याकल्पंत्रिनेत्रं मणिमयविलसत्किंकिणीनूपुराढ्यम् ॥३॥

॥ अथ सकल मनोरथप्राप्त्यर्थमिदं त्रिगुणात्मकं ध्यानम् ॥

शुद्धःस्फटिकसंकाशं सहस्रादित्यवर्चसम् ।
नीलजीमूतसंकाशं नीलांजनसमप्रभम् ॥१॥

अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ।
दंष्ट्राकरालवदनं नूपुरारावसंकुलम् ॥२॥
भुजङ्गमेखलं देवमग्निवर्णं शिरोरुहम् ।
दिगंबरं कुमारेशं वटुकाख्यं महाबलम् ॥३॥
खट्वाङ्गमसिपाशं च शूलं दक्षिणभागतः ।
डमरुं च कपालं च वरदं भुजङ्गं तथा ।
अग्निवर्णसमोपेतं सारमेयसमन्वितम् ॥४॥

॥ अथ साधारण ध्यानम् ॥

करकलितकपालः कुण्डली दण्डपाणि-
स्तरुणतिमिर नीलो व्यालयज्ञोपवीती ।
क्रतुसमयसपर्याविघ्नविच्छेद हेतु-
र्जयति वटुकनाथः सिद्धिदः साधकानाम् ॥१॥
आनीलकुंतलमलक्तक रक्तवर्णं
मौनीकृतं कृत मनोज्ञमुखारविन्दम् ।
कल्याणकीर्ति कमनीय कपालपाणिं
वन्दे महावटुकनाथमभीष्टसिद्धये ॥२॥
आनम्र सर्वगीर्वाणशिरोभृंङ्गागसङ्गिनम् ।
भैरवस्य पदाम्भोजं भूयोऽहं नौमि भूतये ॥३॥

एवं यथारुचि ध्यात्वा भैरवं प्रार्थयेत्॥

तत्रमन्त्रः - ॐ ह्रीं भैरव भैरव भयकर हर मां रक्ष रक्ष हुँ फट् स्वाहा इति मन्त्रेण प्रार्थ्य पटलस्थ यन्त्रपीठे आवाहनादि प्राणं प्रतिष्ठाप्य षोडशोपचारैरभ्यर्च्य पुनः कामनापरत्वेन यथा रुचि ध्यात्वा।

इस प्रकार भैरव का ध्यान कर षोड़शोपचार पूजन कर भैरव को दीपदान व बलि प्रदान करें।

मन्त्र की संख्यानुसार तन्तुओं को एक वर्तिका बनाकर दीप जलायें।

दीप जलाकर प्रार्थना करें - **ॐ ह्रीं श्रीं क्लीं ह्रीं श्रीं वं सर्वज्ञाय महाबलपराक्रमाय वटुकाय नमः इमं दीपं गृहाण सर्व कार्यार्थसाधक, दुष्टान्नाशय नाशय त्रासय त्रासय सर्वतो मम रक्षां कुरु कुरु फट् स्वाहा॥**

तीन बार आचमन करके हस्तप्रक्षालन करें। उसके बाद बलि प्रदान करें।

देवता के आगे त्रिकोण उसके बाहर चतुरस्र मण्डल रक्तचन्दन कुंकुम इत्यादि से बनायें (गणेश, दुर्गा, वटुक की रक्तचन्दन, गंध पुष्पाक्षत से अर्चना करते हैं।) मण्ड़ल पर एक पात्र में बलिद्रव्य रखें।

तीन बार आचमन करें - ॐ ह्रां नमः ॥१॥ ॐ ह्रीं नमः ॥२॥ ॐ कुं नमः ॥३॥ देशकाल का उच्चारण करते हुये बलिदान हेतु सङ्कल्प करें।

मूलमन्त्र बोलते हुये बलि का पूजन करें - वटुक बलिरूपाय नमः।

ॐ एह्येहि देव वटुकनाथ कपिलजटाभारभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा एष बलिर्वटुकाय नमः।

पश्चात् मूलमन्त्र का जपकर स्तोत्र का पाठ करें।

मूलमन्त्र - ॐ ह्रीं वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ॐ॥

विनियोगः - श्रीवटुकभैरव शतनाम स्तोत्र मन्त्रस्य, अनुष्टुप् छन्दः, वृहदारण्य ऋषि, भैरवो देवता, अष्टबाहुत्रिनयन बीजशक्ति, ॐ कीलकं सर्वाभीष्ट सिद्धये जपे पाठे विनियोगः।

॥ अथ नामावलिस्तोत्रम् ॥

ॐ ह्रीं भैरवो भूतनाथश्च भूतात्मा भूतभावनः।
क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ॥१॥
श्मशानवासी मांसाशी खर्पराशीः स्मरांतकृत्।
रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः ॥२॥
कंकालः कालशमनः कलाकाष्ठातनुः कविः।
त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः ॥३॥
शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः।
अभीरुर्भैरवो नाथो भूतपो योगिनीपतिः ॥४॥
धनदो धनहारी च धनवान्प्रीतिभावनः।
नागहारो नागपाशो व्योमकेशः कपालभृत् ॥५॥
कालः कपालमाली च कमनीयः कलानिधिः।
त्रिलोचनोज्ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥६॥

त्रिनेत्रतनयो डिंभ : शांतः शान्तजनप्रियः ।
वटुको वटुवेषश्च खट्वाङ्गवरधारकः ॥७॥
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः ।
धूर्तो दिगंबरः शूरो हरिणः पाण्डुलोचनः ॥८॥
प्रशान्तः शान्तिदः सिद्धः शङ्करः प्रियबांधवः ।
अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥९॥
अष्टाधारः षडाधारः सर्पयुक्तशिखी सखः ।
भूधरो भूधराधीशो भूपतिर्भूधरात्मजः ॥१०॥
कंकालधारी मुण्डी च नागयज्ञोपवीतवान् ।
जृंभणो मोहनः स्तंभी मारणः क्षोभणस्तथा ॥११॥
शुद्धनीलाञ्जनप्रख्यो दैत्यहा मुण्डभूषितः ।
बलिभुग्बलिभुग्नाथो बालो बालपराक्रमः ॥१२॥
सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ।
कामी कलानिधिः कान्तः कामिनीवशकृद्वशी ॥१३॥
सर्वसिद्धिप्रदो वैद्यः प्रभुर्विष्णुरितीव हि ।
अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥१४॥

॥ फलश्रुति ॥

मया ते कथितं देवि रहस्यं सर्वकामदम् ।
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् ॥१५॥
न तस्य दुरितं किंचिन्न च भूतभयं तथा ।
न च मारीभयं तस्य ग्रहराजभयं तथा ॥१६॥
न शत्रुभ्यो भयं क्वापि प्राप्नुयान्मानवः क्वचित् ।
पातकानां भयं चैव पठेत्स्तोत्रमनुत्तमम् ॥१७॥
मारीभये राजभये तथा चोराग्निजे भये ।
औत्पत्तिके महाघोरे तथा दुःस्वप्नदर्शने ॥१८॥
बंधने च तथा घोरे पठेत्स्तोत्रमनन्यधीः ।
सर्वं प्रशमनं यातिभयं भैरवकर्तिनात् ॥१९॥
एकादशसहस्रं तु पुरश्चरणमुच्यते ।
यस्त्रिसंध्यं पठेद्देवि संवत्सरमतंद्रितः ॥२०॥

स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः ।
षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम् ॥२१॥
राजशत्रुविनाशार्थं जपेन्मासाष्टकं पुनः ।
रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान् ॥२२॥
जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत् ।
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ॥२३॥
जपेन्मासत्रयं देवि वारमेकं तथा निशि ।
धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः ॥२४॥
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ।
भीतो भयात्प्रमुच्येत देवी सत्यं न संशयः ॥२५॥
निगडैश्चापि बद्धौ यः कारागेहे निपातितः ।
शृङ्खलाबन्धनं प्राप्तं पठेच्चैव दिवानिशि ॥२६॥
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितम् ।
अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित् ॥२७॥
सुकुलीनाय शान्ताय ऋजवे दंभ वर्जिते ।
दद्यात्स्तोत्रमिमं पुण्यं सर्वकामफलप्रदम् ॥२८॥
इात श्रुत्वा ततो देवि नामाष्टशतमुत्तमम् ।
जजाप परया भक्त्या सदा सर्वेश्वरेश्वरी ॥२९॥
भैरवोऽपि प्रहृष्टोऽभूत्सर्वलोकमहेश्वरः ।
वरं ददाति भक्तेभ्यः पठेत्स्तोत्रमनन्यधीः ।
संतोषं परमं प्राप्य भैरवस्य महात्मनः ॥३०॥
वारं वारं भुवनजननि प्रोच्यते साधुवादः सत्यं सत्यं
जगति सकले भैरवो देव एकः ।
यां यां सिद्धिं भुवनजठरे कामयेन्मानवो यस्तांस्तां
सिद्धिं वितरति सदा भैरवः सुप्रसन्नः ॥३१॥
पाणिभ्यां परितः प्रपीड्य सुदृढं निश्चौत्य निश्चोत्य च
ब्रह्माण्डं सकलं प्रचालितरसालोच्चैः फलाभं मुहुः ।
पायं पायमपायय त्रिजगति ह्युन्मत्तवत्तै
रसैर्नृत्यंस्ताण्डवडंबरेण शिरसा पायान्महाभैरवः ॥३२॥

विभ्राणः शुभ्रवर्णं द्विगुणनवभुजं पञ्चवक्त्रं त्रिनेत्रं
ज्ञाने मुद्रेंद्रशास्त्रं सविषममृतकं शङ्खभैषज्यचापम् ।
शूलं खट्वाङ्गबाणान् डमरुमसिगदा वह्निमारोग्यमाला-
मिष्टाभीतिं च दोर्भिर्जयति खलु महाभैरवः सर्वसिद्ध्यै ॥३३॥

क्वाकाशः क्व समीरणः क्व दहनः क्वापश्च विश्वंभरा
क्व ब्रह्मा क्व जनार्दनः क्व तरणिः क्वेंदुश्च देवासुराः ।
कल्पान्ते दिगिभेशवत्प्रमुदितः श्रीसिद्धयोगीश्वरः
क्रीडानाटकनायको विजयते देवो महाभैरवः ॥३४॥

लिखित्वा परया भक्त्या भैरवस्तोत्रमुत्तमम् ।
अष्टानां ब्राह्मणानां च देयं पुस्तकमादरात् ॥३५॥
यान् यान् समीहते कामांस्तान्प्राप्नोत्यसंशयम् ।
इहलोके सुखं प्राप्य पुस्तकस्य प्रसादतः ॥३६॥
शिवलोकमनुप्राप्य शिवेन सह मोदते ।
लिखित्वा भूर्जपत्रे तु त्रिलोहपरिवेष्टितम् ॥३७॥
सौम्ये च वस्तुवसने कर्पटे च सुशोभने ।
करे बाह्वौ गले कट्यां मूर्ध्नि त्रिलोहगोपितम् ॥
यस्तु धारयते स्तोत्रं सर्वत्र जयमाप्नुयात् ॥३८॥

इस स्तोत्र का विशेष पुरश्चरण ११००० पाठ का है। अधिकांशतः ३-४ हजार आवृति पश्चात् ही भैरव आवाहन के लक्षण प्रकट होने लगते है जैसे - रात्रि में किसी का चलना, घुंघरु की आवाज या नाचने कूदने की ध्वनि या भ्रम पैदा होता है। इसके बाद साधक को समय व क्रिया संपादन के नियमों का विशेष ध्यान रखना चाहिये अन्यथा जिस प्रकार भैरव शीघ्र प्रसन्न होते हैं उसी प्रकार शीघ्र रुष्ट भी होते हैं।

॥ इति रुद्रयामल तंत्रोक्त भैरवाष्टोत्तर शतनाम् स्तोत्रं समाप्तम् ॥

॥ अथ वटुकभैरवाष्टोत्तरशतनाम स्तोत्रम् ॥

(कालसंकर्षण तन्त्रे)

विनियोगः - ॐ अस्य श्रीवटुकभैरवस्तोत्र मन्त्रस्य कालाग्निरुद्र ऋषिः। अनुष्टुप छन्दः। आपदुद्धारक वटुकभैरवो देवता। ह्रीं बीजम्। भैरवीवल्लभः शक्तिः। नीलवर्णो दण्डपाणिरिति कीलकम्। समस्तशत्रुदमने समस्तापन्निवारणे

सर्वाभीष्टप्रदाने च विनियोगः।

ऋष्यादिन्यासः – ॐ कालाग्निरुद्रऋषये नमः शिरसि ॥१॥ अनुष्टुपछन्दसे नमः मुखे ॥२॥ आपदुद्धारक वटुकभैरवदेवतायै नमः हृदये ॥३॥ ह्रीं बीजाय नमः गुह्ये ॥४॥ भैरवीवल्लभशक्तये नमः पादयोः ॥५॥ नीलवर्णो दण्डपाणिरिति कीलकाय नमः नाभौ ॥६॥ विनियोगाय नमः सर्वाङ्गे ॥७॥

मूलमन्त्रः – ॐ ह्रीं वां वटुकाय क्ष्रौं क्ष्रौं आपदुद्धारणाय कुरु कुरु वटुकाय ह्रां वटुकाय स्वाहा।

यह मंत्र प्रेतादि उपद्रव शांति व शत्रुदमन में विशेष काम में आता है

ध्यानम् –

नीलजीमूतसंकाशो जटिलो रक्तलोचनः।
दंष्ट्राकरालवदनः सर्पयज्ञोपवीतवान् ॥१॥
दंष्ट्रायुधालंकृतश्च कपालस्त्रग्विभूषितः॥
हस्तन्यस्तकरोटीको भस्मभूषितविग्रहः ॥२॥
नागराजकटीसूत्रो बालमूर्तिर्दिगंबरः।
मंजुसिंजानमंजरि - पादकंपितभूतलः ॥३॥
भूतप्रेतपिशाचैश्च सर्वतः परिवारितः।
योगिनीचक्रमध्यस्थो मातृमण्डलवेष्टितः ॥४॥
अट्टहासस्फुरद्वक्त्रो भृकुटीभीषणाननः।
भक्तसंरक्षणार्थाय दिक्षु भ्रमणतत्परः।
एवंभूतस्तु वटुको ध्यातव्यो भैरवीश्वरः ॥५॥
एवं ध्यात्वा स्तोत्रं पठेत्।
ॐ ह्रीं वटुको वरदः शूरो भैरवः कालभैरवः।
भैरवीवल्लभो भव्यो दण्डपाणिर्दयानिधिः ॥६॥
वेतालवाहनो रौद्रो रुद्रभ्रुकुटिसंभवः।
कपाललोचनः कांतः कामिनीवशकृद्वशी ॥७॥
आपदुद्धारणो धीरो हरिणांकशिरोमणिः।
दंष्ट्राकरालो दष्टौष्ठो धृष्टो दुष्टनिर्वहणः ॥८॥
सर्पहारः सर्पशिराः सर्पकुण्डलमण्डितः।
कपाली करुणापूर्णः कपालैकशिरोमणिः ॥९॥

श्मशानवासी मांसाशी मधुमत्तोऽट्टहासवान् ।
वाग्मी वामव्रतो वामो वामदेवप्रियंकरः ॥१०॥
वनेचरो रात्रिचरो वसुदो वायुवेगवान् ।
योगी योगव्रतधरो योगिनीवल्लभो युवा ॥११॥
वीरभद्रो विश्वनाथो विजेता वीरवंदितः ।
भूताध्यक्षो भूतिधरो भूतभीतिनिवारणः ॥१२॥
कलंकहीनः कंकाली क्रूरः कुक्कुरवाहनः ।
गाढो गहन गम्भीरो गणनाथसहोदरः ॥१३॥
देवीपुत्रो दिव्यमूर्तिर्दीप्तिमान् दीप्तिलोचनः ।
महासेनप्रियकरो मान्यो माधवमातुलः ॥१४॥
भद्रकालीपतिर्भद्रो भद्रदो भद्रवाहनः ।
पशूपहाररसिकः पाशी पशुपतिः पतिः ॥१५॥
चण्डः प्रचण्डचण्डेशश्चंडीहृदयनन्दनः ।
दक्षो दक्षाध्वरहरो दिग्वासा दीर्घलोचनः ॥१६॥
निरातंको निर्विकल्पः कल्पः कल्पांतभैरवः ।
मदतांण्डवकृन्मत्तो महादेवप्रियो महान् ॥१७॥
खट्वांगपाणिः खातीतः खरशूलः खरांतकृत् ।
ब्रह्माण्डभेदनो ब्रह्मज्ञानी ब्राह्मणपालकः ॥१८॥
दिक्चरो भूचरो भूष्णुः खचरः खेलनप्रियः ।
सर्वदुष्टप्रहर्ता च सर्वरोगनिषूदनः ॥१९॥
सर्वकामप्रदः शर्वः सर्वपापनिकृंतनः ।
इत्थमष्टोत्तरशतं नाम्नां सर्वसमृद्धिदम् ॥२०॥
आपदुद्धारजनकं वटुकस्य प्रकीर्तितम् ।
एतच्च श्रृणुयान्नित्यं लिखेद्वा स्थापयेद्-गृहे ॥२१॥
धारयेद्वा गले बाहौ तस्य सर्वाः समृद्धयः ।
न तस्य दुरितं किंचिन्न चोरनृपजं भयम् ॥२२॥
न चापस्मृतिरोगेभ्यो डाकिनीभ्यो भयं नहि ।
न कूष्माण्डग्रहादिभ्यो नापमृत्योर्न च ज्वरात् ॥२३॥

मासमेकं त्रिसंध्यं च शुचिर्भूत्वा पठेन्नरः ।
सर्वदारिद्र्यनिर्मुक्तो निधिं पश्यति भूतले ॥२४॥
मासद्वयमधीयानः पादुकासिद्धिमान् भवेत् ।
अञ्जनं गुटिका खड्गं धातुवादरसायनम् ॥२५॥
सारस्वतं च वेतालवाहनं बिलसाधनम् ।
कार्यसिद्धिं महासिद्धिं मन्त्रं चैव समीहितम् ॥२६॥
वर्षमात्रमधीयानः प्राप्नुयात्साधकोत्तमः ।
एतत्ते कथितं देवि गुह्याद्गुह्यतरं परम् ॥२७॥
कालसंकर्षणीतन्त्रे कलिकल्मषनाशनम् ।
नरनारीनृपाणां च वशीकरणमंबिके ॥२८॥

॥ इति कालसंकर्षणतन्त्रोक्तवटुकाष्टोत्तरशतनाम स्तोत्रं समाप्तं ॥

॥ वटुकभैरव कवचम् ॥

॥ देव्युवाच ॥

देव देव जगन्नाथ त्रिनाथ श्रीत्रिलोचनः ।
भवत्प्रसादाद्भगवन्भैरवस्य महात्मनः ॥
कवचं श्रोतुमिच्छामित्वत्स्नेहातिशयादहम् ॥

॥ शिवोवाचः ॥

प्राणिनां रक्षणार्थं च ब्रवीमि सुमुखे गुणान् ।
वर्मणो भैरवस्यास्य शिव ब्रह्मा ऋषिः स्मृतः ॥
छन्दोनुष्टुप् तथा देवो भैरवो वटुकात्मजा ।
ऐश्वर्यस्याभिवृद्ध्यर्थमिष्टार्थं च नियुज्यते ॥
शूलखड्ग डमरुलसत्करं सव्यहस्तमपरं करोज्वलम् ।
सन्ततं हृदि भजामि भैरवं स्वाधिरूढमधिकार सिद्धये ।
दिग्वाससं कमलपत्र विशालनेत्रं ।
भस्माङ्गरागमभयं प्रभुमादि देवम् ॥
ध्यायामि तं वटुकनाथमहर्निशं मे ।
सर्वार्थसिद्धिमतुल्नां कृपया दिशन्तम् ॥

एवं ध्यात्त्वा तु देवेशं वटुकाख्यं महाबलम् ।
उच्चरेत कवचं पश्चाद्देवताभीष्ट सिद्धिदम् ॥
शिरो मे भैरवः पातु भालं पुरनिषूदनः ।
दृशौ पातु त्रिनेत्रो मे श्रवणं नीलकण्ठकः ॥
दिग्वासा पातु मे कण्ठं नासिकांममनन्यभाक् ।
ओष्ठौ त्रिपुरघाती मे जिह्वां पातु कपालधृक् ॥
दन्तान्पातु क्रतुध्वंसी चिबुकं भूतवासकः ।
कपाली पातु मे ग्रीवां स्कन्धौ पातु गजान्तकः ॥
भुजौ मे पातु कौमारी हृदयं क्षेत्रपालकः ।
अभीरुर्मे स्तनौ पातु वक्षः पातु महेश्वरः ॥
कुक्षौ मे पातु संहर्ता नाभिं मे षण्मुखप्रियः ।
भूतनाथः कटिं पातु गुह्यं पातु जटाधरः ॥
ऊरू पातु वृषारूढो जानुनी भूतभावनः ।
श्मशानवासी मे पातु पातु सर्वाङ्गमीश्वरः ॥
य इदं कवचं देवि पठेत्प्रयत मानसः ।
तस्यैश्वर्याभिवृद्ध्यर्थमिष्टान्नं च ददाम्यहम् ॥
रोगार्त्तो मुच्यते रोगात्पुत्रार्थी लभते सुतम् ।
जपित्वा श्रद्धया कन्या आयुष्मन्तं पतिं लभेत् ॥
विद्या विनय सम्पन्नं सुकुलीनं सुरूपिणम् ।
जपित्वा विधवानारी वैधव्यं नाप्नुयात्क्वचित् ॥
जपित्वा कवचं प्रातर्मुच्यते नात्र संशयः ।
नास्ति तस्यापमृत्युश्चाकालमृत्युः कदाचन ॥
इहलोके सुखं भुक्त्वा पुत्र पौत्रै सबान्धवैः ।
अन्ते कैलाशमाविश्य मम पादतलं व्रजेत् ॥
तस्मात्सर्व प्रयत्नेन जपेन्नित्यमतंद्रितः ॥
ये भक्ति युक्ताः कवचं पठन्ति
ते वै कुले स्वे कुलिनो वसन्ति ॥

तेजोधिकं विंशतिसंख्यया दिने
कैलासमाप्नोति मम प्रसादात् ॥
एतत्ते कथितं देवि यन्मां त्वं परिपृच्छति ।
तव स्नेहातिशयादुक्तं कवचं भैरवात्मकम् ॥

॥ इति वटुकभैरव कवचम् ॥

॥ श्रीवटुकभैरवपञ्जर कवचम् ॥

॥ श्रीपार्वत्युवाच ॥

देव देव महादेव संसार प्रियकारक ।
पञ्जरं वटुकस्यास्य कथनीयं मम प्रभो ॥

॥ श्रीशिवोवाच ॥

पूर्वं भस्मासुर त्रासाद् भयविह्वलतां स्वयम् ।
पठनादेव मे प्राणा रक्षिताः परमेश्वरि ॥
सर्वदुष्ट विनाशाय सर्वरोग निवारणम् ।
दुःख शान्तिकरं देवि ह्यल्पमृत्यु भयापहम् ॥
राज्ञां वश्यकरं चैव त्रैलोक्य विजयप्रदम् ।
सर्वलोकेषु पूज्यश्च लक्ष्मीस्तस्य गृहे स्थिरा ॥
अनुष्ठानं कृतं देवि पूजनं च दिने दिने ।
विना पञ्जरपाठेन तत्सर्वं निष्फलं भवेत् ॥

विनियोगः - अस्य श्री वटुकभैरव पञ्जर कवच मन्त्रस्य कालाग्निरुद्र ऋषिः, अनुष्टुप् छन्दः, श्री वटुकभैरवो देवता, ह्रां बीजं ॐ भैरवीवल्लभ शक्तिः, ॐ दण्डपाणये नमः कीलकम् मम सकल कामना सिद्ध्यर्थे विनियोगः।

॥ कवचम् ॥

ॐ ह्रां प्राच्यां डमरुहस्तो रक्तवर्णो महाबलः ।
प्रत्यक्षमहमीशान वटुकाय नमो नमः ॥
ॐ ह्रीं दण्डधारी दक्षिणे च पश्चिमे खड्गधारिणे ।
ॐ ह्रूं घण्टाकाली [illegible] [illegible] दिशि तथा ॥

ॐ हैं अग्निरूपोह्याग्नेयां नैऋत्यां च दिगम्बरः ।
ॐ ह्रौं सर्वभूतस्थौ वायव्ये भूतानां हितकारकः ॥
ॐ हश्चाष्ट सिद्धिश्च ईशाने सर्वसिद्धिकरः परः ।
प्रत्यक्षमहमीशान वटुकाय नमो नमः ॥
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः स्वाहा ऊर्ध्वखेचरिणं न्यसेत् ।
रुद्ररूपस्तु पाताले वटुकाय नमो नमः ॥
ॐ ह्रीं बटुका य मूर्ध्नि ललाटे भीमरूपिणम् ।
आपदुद्धारणं नेत्रे मुखे च वटुकं न्यसेत् ।
कुरु कुरु सर्वसिद्धिर्देहे गेहे व्यवस्थितः ।
वटुकाय ह्रीं सर्वदेहे विश्वस्य सर्वतो दिशि ॥
आपदुद्धारकः पातु ह्यापादतल मस्तकम् ।
ह स क्ष म ल व र यूं पातु पूर्वे दण्ड हस्तस्तु दक्षिणे ।
ह स क्ष म ल व र यूं नैऋत्ये ह स क्ष म ल व र यूं पश्चिमेऽवतु ।
सर्वभूतस्थो वायव्ये ह स क्ष म ल व र यूं घण्टावादिन उत्तरे ॥
हंसः सोहं तु ईशाने चाष्टसिद्धिकरः परः ।
शं क्षेत्रपाल ऊर्ध्वे तु पाताले शिवसन्निभः ॥
एवं दशदिशो रक्षेद्वटुकाय नमो नमः ।
इति ते कथितं ह्रीं श्रीं क्लीं ऐं सदावतु ॥
ॐ फ्रें हुं फट् च सर्वत्र त्रैलोक्ये विजयी भवेत् ।
लक्ष्मीं ऐं श्रीं लं पृथिव्यां च आकारोहं ममावतु ॥
स्त्रौं प्रौं ज्रौं ॐ यं वायव्यां रं रं रं तेजोरूपिणम् ।
ॐ कं खं गं घं ङं वटुकं चं छं जं झं ञं कपालिनम् ॥
ॐ टं ठं डं ढं णं क्षेत्रेशं तं थं दं धं नं उमाप्रियम् ।
ॐ पं फं बं भं मं मम रक्ष यं रं लं भैरवोत्तमम् ॥
ॐ वं शं षं सं आदिनाथं लं क्षं वै क्षेत्रपालकम् ।
एवं पञ्जरमाख्यातं सर्वसिद्धिकरं भवेत् ॥
दुःख दारिद्र्य शमनं रक्षकं सर्वतो दिशः ।
अवश्यसर्वतोवश्यं सर्ववीजैश्च संपुटम् ॥

सर्वरोगहरं दिव्यं सर्वत्र सुखमाप्नुयात् ।
एवं रहस्यमाख्यातं देवानामपि दुर्लभम् ॥
वज्रपञ्जरनामेदं ये शृण्वन्ति वरानने ।
आयुरारोग्यमैश्वर्यं कीर्तिलाभः सुखं जयः ॥
लक्ष्मीमनोरमा वृद्धिस्तेषां गेहे व्यवस्थितः ।
सुशीलाय सुदाताय गुरुभक्तिपराय च ॥
तस्य शीघ्रं च दातव्यमन्यथा न कदाचन ।
गोपनीयं प्रयत्नेन सर्वगोप्यमयं भवेत् ॥
यस्मै कस्मै न दातव्यं न दातव्यं कदाचन ।
राज्यंदेयं शिरो देयं न देयं भैरवाक्षरम् ॥
एककालं द्विकालं वा त्रिकालं पठते नरः ।
सर्वपाप विनिर्मुक्तो शिवेन सह मोदते ॥

॥इति शक्ति रहस्योक्त श्रीवटुकभैरवपञ्जर कवचम्॥

॥ श्रीबटुकभैरव पञ्जरस्तोत्रम्॥

यह स्तोत्र कवच एवं किले के समान रक्षा करता है।

॥श्रीदेव्युवाच॥

देव देव महादेव भक्ताभीष्ट प्रदायक पूर्वं ।
मे सूचितं नाथ ब्रूहि मम कृपयाऽद्य ॥१॥
पञ्जरं बटुकत्यैव सर्वसिद्धि प्रदायकम् साधकानां ।
हितार्थाय प्रकाशं कुरु भैरव ॥२॥

॥श्रीभैरव उवाच॥

शृणु देवि! प्रवक्ष्यामि भैरवस्य पञ्जरम् ।
पञ्जरस्यास्य देवेशि वृहदारण्यको ऋषिः ॥३॥
छन्दश्चानुष्टुप् देवेशि वटुको नाम देवता ।
सर्वार्थ साधने देवि विनियोगः प्रकीर्तितः ॥४॥

॥ स्तोत्रम् ॥

बटुकोऽव्यात् शिरोदेशः ललाटे भैरवेश्वरः ।
कपोले क्षेत्रपालश्च भ्रूभागे चासिताङ्गक ॥१॥
खट्वाङ्गधारी नासायां नेत्रयोर्भूतनायकः ।
ऊर्ध्वोष्ठे रुरुनाथश्च अधरोष्ठे धनेश्वरः ॥२॥
चिबुके कुल नाथोऽव्यात् महेशो मुखमण्डले ।
क्षेत्रेशः कण्ठदेशेऽव्यात् स्कन्धयोर्विशिनी पतिः ॥३॥
हृदये मम नाथोऽव्यात् कामेशो भुजमण्डले ।
पाणौ रक्षेन् महाकालो मार्तण्डो चाङ्गुलीषु तु ॥४॥
उदरे कालकालोऽव्यात् सर्वज्ञो नाभिमण्डले ।
रक्ताक्षो लिङ्गदेशेऽव्यात् अण्डकोशे सुरेश्वरः ॥५॥
कट्यां शूलभृतः पातु-वस्तिदेशे अघान्तकः ।
घोरान्तकोऽव्यात् चोर्वो जघने शत्रुतापनः ॥६॥
पादयोः पातु कन्दर्पो कल्पान्तो चाङ्गुलीषु च ।
आकेशात् पादपर्यन्तं पातु मां भैरवेश्वरः ॥७॥
प्रतीच्यां पातु भूतेशो याम्ये बलिहरोऽवतु ।
प्राच्यां कलानिधिः पातु उदीच्यां मन्मथेश्वरः ॥८॥
आग्नेयां शिखिनो पातु नैर्ऋत्यां प्रतयोऽवतु ।
वायव्यां प्राणदः पातु ऐशान्यामीश्वरोऽवतु ॥९॥

॥ फलश्रुति ॥

इतीदं पञ्जरं देवि सर्वमन्त्र रहस्यकम् ।
पठनात् पाठनाद् देवि स्वयं सिद्धिश्वरो भवेत् ॥१॥
प्रातःकाले पठेद् यस्तु मुच्यते व्याधि बन्धनात् ।
भानुमध्यगतो यस्तु पठनात् धनवान भवेत् ॥२॥
सायंकाले प्रपठनात् मुच्यते नानासिद्धिमवाप्नुयात् ।
अर्धरात्रौ पठेद् यस्तु शुचिः तद्गतमानसः ॥३॥
साक्षाद् भैरवरूपोऽसौ जायते भुवि मानवः ।
पञ्जरं भूर्जपत्रेषु चाष्टगन्धेन लेखयेत् ॥४॥

धारयेत् कण्ठे च बाहौ शिरसि सदा यः पुमान् ।
तस्य सर्वार्थ सिद्धिः स्यात् नात्रकार्या विचारणा ॥५॥
तस्मात् पठेत् सदा भक्त्या पातकान्मुच्यते ध्रुवम् ।
शत्रुश्च स्तम्भनं याति भूतादि भय नाशनम् ॥६॥

॥ श्रीमहाकालभैरव कवचम् ॥

॥ श्रीदेव्युवाच ॥

देव देव महाबाहो भक्तानां सुखवर्द्धन ।
केन सिद्धिं ददात्याशु कालौ त्रैलोक्यमोहन ॥
तन्मे वद दयाधार! साधकाभीष्ट सिद्धये ।
कृपां कुरु जगन्नाथ! वद देव विदाम्बर ॥

॥ श्रीभैरवोवाच ॥

गोपनीयं प्रयत्नेन तत्वात्तत्वं परात्परम् ।
एष सिद्धिकरः सम्यक् किमथो कथयाम्यहम् ॥
महाकालमहं वन्दे सर्वसिद्धि प्रदायकम् ।
देव दानव गन्धर्व किन्नरैः परिसेवितम् ॥
कवचं तत्वदेवस्य पठनाद् घोर दर्शने ।
सत्यं भवति सान्निध्यं कवचस्तवनान्तरात् ॥
सिद्धिं ददाति सातुष्टा कृत्वा कवचमुत्तमम् ।
साम्राज्यत्वं प्रियं दत्त्वा पुत्रवत् परिपालयेत् ॥
कवचस्य ऋषिर्देवी कालिका दक्षिणा तथा ।
विराट् छन्दः सुविज्ञेयं महाकालस्तु देवता ॥
कालिका साधने चैव (इष्टसाधने) विनियोगः प्रकीर्तितः ।
ॐ श्मशानस्थो महारुद्रो महाकालो दिगम्बरः ॥
कपाल कर्तुका वामे शूलं खट्वाँग दक्षिणे ।
भुजङ्ग भूषिते देवि! भस्मास्थि मणिमण्डित ॥
ज्वलत्पावक मध्यस्थो भस्मशय्या व्यवस्थितः ।
विपरीतरतां तत्र कालिकां हृदयोपरि ॥

पेयं खाद्यं च चोष्यं च तौ कृत्वा तु परस्परम् ।
एवं भक्त्या यजेद्देवं सर्वसिद्धिः प्रजायते ॥
प्रणवं पूर्वमुच्चार्यं महाकालाय तत्पदम् ।
नमः पातु महामन्त्रः सर्वशास्त्रार्थ पारगः ॥
अष्टाक्षरो महामन्त्रः सर्वाशा परिपूरकः ।
सर्वपाप क्षयं याति ग्रहणं भक्त वत्सले ॥
कूर्च्चं द्वन्द्वं महाकाल प्रसीदेति पदद्वयम् ।
लज्जायुग्मं वह्निजाया स तु राजेश्वरी महान् ॥
मन्त्रग्रहण मात्रेण भवेत्सत्यं महाकविः ।
गद्य पद्यमयी वाणी गङ्गा निर्झरिता तथा ॥
तस्य नामतु देवेशि! देवाः गायन्ति भावुकाः ।
शक्तिबीज द्वयं दत्त्वा कूर्च्चं स्यात्त्तदनन्तरम् ॥
महाकालपदं दत्त्वा मायाबीज युगं तथा ।
कूर्चमेकं समुद्धृत्य महामन्त्रो दशाक्षरः ॥
राजस्थाने दुर्गमे च पातु मां सर्वतो मुदा ।
वेदादि वीजमादाय भगमान्तदनन्तरम् ॥
महाकालाय सम्प्रोच्य कूर्च्चं दत्त्वा च ठद्वयम् ।
ह्रींकार पूर्वमुद्धृत्य वेदादिस्तदनन्तरम् ॥
महाकालस्यान्त भागे स्वाहान्तमनुमुत्तमम् ।
धनं पुत्रं सदा पातु वन्धुदारा निकेतनम् ॥
पिंगलाक्षो मंजु युद्धे युद्धे नित्यं जयप्रदः ।
सम्भाव्यः सर्वदुष्टघ्नः पातु स्वस्थान वल्लभः ॥

॥ फलश्रुति ॥

इति ते कथितं तुभ्यं देवानामपि दुर्लभम् ।
अनेन पठनाद् देवी! विघ्ननाशो यथा भवेत् ॥
सम्पूजकः शुचिस्नातः भक्तियुक्तः समाहितः ।
सर्वव्याधि विनिर्मुक्तः वैरिमध्ये विशेषतः ।
महाभीमः सदापातु सर्वस्थान वल्लभम् ।
काली पार्श्वस्थितो देवः सर्वदा पातु मे मुखे ॥

पठनात् कालिका देवी पटेत् कवचमुत्तमम् ।
शृणुयाद्वा प्रयत्नेन सदानन्दमयो भवेत् ॥
श्रद्धयाऽश्रद्धयावापि पठनात् कवचस्य यत् ।
सर्वसिद्धिमवाप्नोति यद्यन्मनसि वर्तते ॥
बिल्वमूले पठेद्यस्तु पठनाद्कवचस्य यत् ।
त्रिसंध्यं पठनाद् देवि भवेन्नित्यं महाकविः ॥
कुमारीं पूजयित्वा तु यः पठेद् भावतत्परः ।
न किञ्चिद् दुर्लभं तस्य दिवि वा भुवि मोदते ॥
दुर्भिक्षे राजपीड़ायां ग्रामे वा वैरिमध्यके ।
यत्र यत्र भयं प्राप्तः सर्वत्र प्रपठेन्नरः ॥
तत्रतत्राभयं तस्य भवत्येव न संशयः ।
वामपार्श्वे समानीय शोभितांवर कामिनीम् ॥
श्रद्धयाऽश्रद्धया वापि पठनात्कवचस्य तु ।
प्रयत्नतः पठेद्यस्तु तस्य सिद्धिः करेस्थिता ॥
इदं कवचमज्ञात्वा कालं (कालीं) यो भजते नरः ।
नैव सिद्धिर्भवेत्तस्य विघ्नस्तस्य पदे पदे ॥
आदौ वर्मं पठित्वा तु तस्य सिद्धिर्भविष्यति ॥

इस कवच से पाँच मंत्रों का ज्ञान होता है - (१) ॐ महाकालाय नमः (२) हूं हूं महाकाल प्रसीद प्रसीद ह्रीं ह्रीं स्वाहा (३) ह्रीं ह्रीं हूं महाकाल ह्रीं ह्रीं हूं (४) ॐ भू र्भुवः स्वः ऐं महाकालाय हूं स्वाहा (५) ह्रीं भू र्भुवः स्वः महाकालाय स्वाहा

॥इति रुद्रयामले महातन्त्रे महाकालभैरव कवचं सम्पूर्णम् ॥

॥ महाकालभैरवाष्टकम् ॥

देवराज सेव्यमान पापनांघ्रि पङ्कजं व्याल यज्ञसूत्रमिन्दुशेखरं कृपाकरम् ।
नारदादि योगिवृन्द वन्दितं दिगम्बरं काशिकापुराधिनाथ कालभैरवं भजे ॥१॥
भानुकोटि भास्वरं भवाब्धि तारकं परं नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम् ।
काल कालमंबुजाक्षमक्षशूलमक्षरं काशिकापुराधिनाथ कालभैरवं भजे ॥२॥

शूलटंक पाशदण्ड पाणिमादि कारणं श्यामकायमादिदेवमक्षयं निरामयम् ।
भीमविक्रमप्रभुं विचित्र ताण्डव प्रियं काशिकापुराधिनाथ कालभैरवं भजे ॥३ ॥

भुक्ति मुक्ति दायकं प्रशस्त चारु विग्रह नितान्तभक्तवत्सलं समस्तलोकविग्रहम्।
विनिक्वणन्मनोज्ञहेम किंकिणीलसत्कटिं काशिकापुराधिनाथ कालभैरव भजे ॥४ ॥

धर्मसेतु पालकं त्वधर्ममार्ग नाशकं कर्मपाशमोचकं सुशर्मदायकं विभुम् ।
स्वर्णवर्ण शेषपाश शोभिताङ्ग मण्डलं काशिकापुराधिनाथ कालभैरवं भजे ॥५ ॥

रत्नपादुकाप्रभाभिराम पादयुग्मकं नित्यमद्वितीयमिष्ट दैवतं निरञ्जनम् ।
मृत्युदर्पनाशनं करालदंष्ट्र मोक्षणं काशिकापुराधिनाथ कालभैरवं भजे ॥६ ॥

अट्टहास भिन्नपद्मजाण्डकोश सन्ततिं, दृष्टिपात नष्टपापजालमुग्रशाशनम् ।
अष्टसिद्धिदायकं कपालमालिकन्धरं काशिकापुराधिनाथ कालभैरवं भजे ॥७ ॥

भूतसंघ-नायकं विशाल कीर्तिदायकं काशिवास लोकपुण्य पापशोधकं विभुम्।
नीतिमार्ग कोविन्दं पुरातनं जगत्पतिं काशिकापुराधिनाथ कालभैरवं भजे ॥८ ॥

कालभैरवाष्टकं पठन्ति ये मनोहरं ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्द्धनम् ।
शोकमोह दैन्यलोभ-कोपतापनाशनं ये प्रयान्ति कालभैरवांघ्रि सन्निधिं ध्रुवम्॥९ ॥

॥इति श्रीमच्छंकराचार्य विरचितं कालभैरवाष्टकं सम्पूर्णम्॥

॥ श्री तीक्ष्णदंष्ट्रकालभैरवाष्टकम् ॥

यं यं यं यक्षरूपं दशदिशि विदितं भूमिकम्पायमानं ।
सं सं संहारमूर्ति शिरमुकुटजटा शेखरं चन्द्रबिम्बम् ॥
दं दं दं दीर्घ कायं विकृतनख मुखं त्यूर्ध्वरोमं करालं ।
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥१ ॥
रं रं रं रक्तवर्ण कटकटिततनुं तीक्ष्णदंष्ट्राकरालं ।
घं घं घं घोष घोषं घघघघ घटितं घर्घरं घोरनादम् ॥
कं कं कं कालपाशं धृकधृकधृकितं ज्वालितं कामदाहं ।
तं तं तं दिव्यदेहं प्रणमत सततं भैरवक्षेत्रपालम् ॥२ ॥
लं लं लं लं वदन्तं ललललल ललितं दीर्घजिह्वाकरालं ।
धुं धुं धुं धूम्रवर्ण स्फुट विकट मुखं भास्करं भीमरूपम् ॥
रुं रुं रुं रुण्डमालं रवितम नियतं ताम्रनेत्रं करालं ।

नं नं नं नग्नरूपं प्रणमत सततं भैरवं क्षेत्रपालम् ॥३॥
वं वं वं वायुवेगं नतजनदमिनं ब्रह्मवारंपरं तं।
खं खं खं खड्गहस्तं त्रिभुवन निलयं भास्करं भीरु रूपम् ॥
चं चं चं चं चलित्वा चलचल चलित च्चालितं भूमिचक्रम्।
मं मं मं मायिरूपं प्रणमत सततं भैरवं क्षेत्रपालम् ॥४॥
शं शं शं शङ्खहस्तं शशिकरधवलं मोक्ष सम्पूर्णतेजं।
,मं मं मं मं महान्तं कुलमकुलकुलं मन्त्रगुप्तं सुनित्यम् ॥
यं यं यं भूतनाथं किलकिलकिलितं बालकेलिप्रधानं।
अं अं अं अन्तरिक्षं प्रणमेत सततं भैरवं क्षेत्रपालम् ॥५॥
खं खं खं खड्गभेदं विषममृतमयं कालकालं करालं।
क्षं क्षं क्षं क्षिप्रवेगं दहदहदहनं तप्तसन्दीप्यमानम् ॥
हौं हौं हौंकार नादं प्रकटित गहणं गर्जितैर्भूमिकम्पं।
वं वं वं बाललीलं प्रणयत सततं भैरवं क्षेत्रपालम् ॥६॥
सं सं सं सिद्धियोगं सकल गुणधनं देव देवं प्रसन्नं।
पं पं पं पद्मनाभं हरिहर नयनं चन्द्रसूर्याग्निनेत्रम् ॥
ऐं ऐं ऐश्वर्यनाथं सततभयहर पूर्वदेव स्वरूपं।
रौं रौं रौं रौद्ररूपं प्रणमत सततं भैरव क्षेत्रपालम् ॥७॥
हं हं हं हंसहासं हसितकलहकं मुक्तयोगाट्टहास।
धं धं धं येत्र रूपं शिरमुकुटजटा बन्ध बन्धागृहस्तम्।
टं टं टङ्कारनादं त्रिदशलटलटं कामगर्वापहारं।
भृं भृं भृं भूतनाथं प्रणमत सततं भैरवं क्षेत्रपालम् ॥८॥
इत्येवं कामयुक्तं प्रपठति नियतं चाष्टकं भैरवस्य।
निर्विघ्नं दुःखनाशं सुरभयहरणं डाकिनी शाकिनीनाम् ॥
नश्येद्धि व्याघ्रसर्प वहवहसलिलेराज्यशं सस्य शून्यं।
सर्वानश्यन्ति दूरं विपदइति भृशं चिन्तमात्सर्व सिद्धम् ॥९॥
भैरवस्याष्टकमिदं षडमासं यः पठेन्नरः।
स याति परमं स्थानं यत्र देवो महेश्वरः ॥
सिन्दूरारुणगात्रं च सर्वजन्म विनिर्मितम्।
मुकुटाग्रचधरं देवं भैरवं प्रणमाम्यहम् ॥

॥ इति श्री तीक्ष्णदंष्ट्रकालभैरवाष्टकम् समाप्तम् ॥

॥ अथ कालभैरव वटुकभैरव प्रयोगः॥

यह प्रयोग भैरव की प्रसन्नता व शत्रूनाश एवं दिग्बंधन हेतु विशेष है अतः भैरव का पूजन, बलिप्रदान कर्म पूजा पूर्णरूप से विधिवत् करें।

विनियोगः - **अथ वटुकभैरव स्तोत्रस्य सप्तऋषिः मात्रिका छन्दः श्री वटुक -काल भैरवो देवता ममेप्सित सिद्ध्यर्थं जपे विनियोगः।**

ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्। शोकदुःख क्षयकरं निरंजनं निराकारं नारायणं भक्तिपूर्ण त्वं महेशं सर्वकाम सिद्धिर्भवेत्। कालभैरव भूषण वाहनं कालहंता रूपं च भैरव गुनी महात्मनः योगीनां महादेव स्वरूपं सर्व सिद्धयेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरो महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ त्वं ज्ञानं त्वं ध्यानं त्वं योगं त्वं तत्वं त्वं वीजं महात्मानं त्वं शक्ति शक्तिधारणं त्वं महादेव स्वरूपं सर्वसिद्धिर्भवेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरो महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं नागेश्वरं नागहारं च त्वं वन्दे परमेश्वरं, ब्रह्मज्ञानं ब्रह्मध्यानं ब्रह्मयोगं ब्रह्मतत्वं ब्रह्मवीजं महात्मनः। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

त्रिशूलचक्र गदापाणिं शूलपाणि पिनाकधृक्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं विनागन्धं विनाधूपं विनादीपं सर्वशत्रुविनाशनं सर्वसिद्धिर्भवेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धर्भवेत्।

विभूति भूति नाशाय दुष्टक्षयकारकं महाभैरवे नमः सर्वदुष्ट विनाशनं सेवक सर्वसिद्धिं कुरु। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं महाज्ञानी महाध्यानी महायोगी महाबली तपेश्वरी देहि मे सिद्धिं सर्वं त्वं भैरवं भीमनादं च नादनम्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं ह्रीं ह्रीं अमुकं मारय मारय उच्चाटय उच्चाटय मोहय मोहय वशं कुरु कुरु सर्वार्थकस्य सिद्धिरूपं त्वं महाकाल काल भक्षणं महादेव स्वरूप त्वं सर्व सिद्धियेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव

महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं गोविन्द गोकुलानन्द गोपालं गोवर्द्धनम् धारणं त्वं वन्दे परमेश्वरं नारायणं नमस्कृत्य त्वं धामशिवरूपं च साधकं सर्व सिद्धयेत्॥ ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं राम लक्ष्मणं त्वं श्रीपति सुन्दरं त्वं गरुड वाहनं त्वं शत्रुहंता च त्वं यमस्य रूपं सर्वकार्य सिद्धिं कुरु। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं ब्रह्मा विष्णु महेश्वरं त्वं जगत्कारणं सृष्टि स्थिति संहारकारकं रक्तबीज महासैन्यं महाविद्या महाभयविनाशनम्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं आहार मद्य मांसं च सर्व दुष्ट विनाशनं साधकं सर्वसिद्धप्रदा। ॐ आं ह्रीं ह्रीं ह्रीं अघोर अघोर महाअघोर सर्वअघोर भैरव काल। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं ह्रीं ह्रीं ॐ आं क्लीं क्लीं क्लीं ॐ आं क्रीं क्रीं क्रीं ॐ ह्रीं ह्रीं ह्रीं रुं रुं रुं क्रूं क्रूं क्रूं मोहन सर्व सिद्धिं कुरु कुरु ॐ आं ह्रीं ह्रीं ह्रीं अमुकं उच्चाटय उच्चाटय मारय मारय प्रूं प्रूं प्रें प्रें खं खं दुष्टान् हन हन अमुकं फट् स्वाहा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ वटुक वटुक योगं च वटुकनाथ महेश्वरः वटुकं वटवृक्षै वटुकं प्रत्यक्ष सिद्धियेत्। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ कालभैरव श्मशान भैरव कालरूप कालभैरव मेरो वैरी तेरो आहार रे काढि करेजा चखन करो कटकट। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ नमो हंकारी वीर ज्वालामुखी तूं दुष्टन वधकरो विना अपराध जो मोहि सतावे तेकर करेजा छिदिपरै मुखवाट लोहू आवे को जाने चन्द्र सूर्य जाने की आदि पुरुष जाने कामरूप कामाक्षा देवी त्रिवाचा सत्यफुरो मन्त्र ईश्वरो वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता

सर्वसिद्धिर्भवेत्।

ॐ कालभैरव त्वं डाकिनी शाकिनी भूत पिशाचश्च सर्वदुष्ट निवारणं कुरु कुरु साधकानां रक्ष रक्ष देहि मे हृदये सर्व सिद्धिं त्वं भैरव भैरवीभ्यो त्वं महाभय विनाशनं कुरु। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

ॐ आं ह्रीं पच्छिम दिशा में सोने का मठ सोने का किवाड सोने का ताला सोने की कुंजी सोने का घण्टा सोने की सांकुली पहिली सांकुली अठारह कुल नाग के बाँधों दूसरी साँकुली अठारह कुल जाति के बौधों तीसरी सांकुली वैरि दुष्टन को बाँधों चौथी साँकुली डाकिनी शाकिनी के बाँधों पाँचवी सांकुली भूतप्रेत को बाँधो जरती अगिन बाँधों जरता मसान बांधों थल जल बांधो बांधो अम्मरताई जहां भेजूं तहां जाई जेहि का वांधि लावो वो तेहि का वांध लावो वाचा चूकै उमा सूखे श्री बावन वीर ले जाय सात समुन्दर तीर त्रिवाचा सत्य मन्त्र फुरो ईश्वरो वाचा। ॐ कालभैरौ वटुकभैरौ भूतभैरौ महाभैरव महाभयविनाशनं देवता सर्वसिद्धिर्भवेत्।

अथ गोचर वशात् गर्भप्रदगुरु भ्रमणं ज्ञात्वा ऋतुकालात्पञ्चदिनोत्तरं सप्तदश दिनादर्वाक् शुभे समेऽह्नि भार्यया सह प्रार्याश्चनस्नानपूर्वक कृतमङ्गलस्नानाभ्यङ्गो यजमानोऽलङ्कृतः पूजाहोमकर्म प्रकरणोक्तस्वस्त्यनादिकं पठित्वा दम्पत्योरुत्तरीय वस्त्रम्यान्ते **ॐ शुक्लाम्बरधरेति मन्त्रेण सफलाक्षतग्रन्थिबन्धनं कुर्यात्ततः।**

ॐ अद्येत्यादिदेशकालौ सङ्कीर्त्य- अमुकगोत्रोऽमुकशर्म्माहं (वर्म्माहं गुप्तोऽहं) झटिति चिरञ्जीविपुत्रकामः पुत्रकामेष्टिं करिष्ये। तदङ्गत्वेन श्रीगणपत्यादि पूजनं नान्दीश्राद्धमाचार्यादिवरणञ्च करिष्ये। इति सङ्कल्प्य।

श्रीगणपत्याद्यावाहनपूर्वक पूजनम्-आचार्यादिवरणं नान्दीश्राद्धञ्च कृत्वा स्थण्डिलाद्यग्निप्रतिष्ठान्तं विधाय श्वेतवत्सगोक्षीरेण पायसचरुं पक्त्वा ततः - आघारादारभ्य पञ्चवारुणनवग्रहाधिदेवता प्रत्यधिदेवनादीनाञ्च होमं कृत्वा भार्ययाऽन्वारब्धः प्रधानाऽहुतीर्जुहुयात्।

॥ अथ प्रधानदेवताज्यहोमः॥

विनियोगः - **ॐ प्रधानाज्यहोममन्त्राणां याज्ञवल्क्य बृहदारण्यकावृषी अनुष्टुप्छन्दः सन्तानदाता परमात्मा देवता प्रधानाज्यहोमे विनियोगः।**

ॐ यावन्तो देवास्त्वयि जातवेदस्तिर्यञ्चो घ्नन्ति पुरुषस्य कामान्। तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वकामैस्तर्पयन्तु स्वाहा। इदमग्नये ॥१ ॥ ॐ या तिरश्चीनि पद्यतेऽहं विधरणी इति तां त्वा घृतस्य धारया यजे संराधनीमहं स्वाहा। इदमग्नये ॥२॥ ॐ ज्येष्ठाय स्वाहा। इदं ज्येष्ठाय ॥३॥ ॐ श्रेष्ठाय स्वाहा। इदं श्रेष्ठाय ॥४॥ ॐ प्राणाय स्वाहा। इदं प्राणाय ॥५ ॥ ॐ अवशिष्टाय स्वाहा। इदमवशिष्टाय ॥६ ॥ ॐ चक्षुषे स्वाहा। इदं चक्षुषे ॥७॥ ॐ सम्पदे

स्वाहा। इदं सम्पदे ॥८॥ ॐ श्रोत्राय स्वाहा। इदं श्रोत्राय ॥९॥ ॐ यतनाय स्वाहा। इदं यतनाय ॥१०॥ ॐ मनसे स्वाहा। इदं मनसे ॥११॥ ॐ प्रजायै स्वाहा। इदं प्रजायै ॥१२॥ ॐ रेतसे स्वाहा। इदं रेतसे ॥१३॥ ॐ अग्नये स्वाहा। इदमग्नये ॥१४॥ ॐ सोमाय स्वाहा। इदं सोमाय ॥१५॥ ॐ भूः स्वाहा। इदं भूः ॥१६॥ ॐ भुवः स्वाहा। इदं भुवः ॥१७॥ ॐ स्वः स्वाहा। इदं स्वः ॥१८॥ ॐ भूर्भुवः स्वः स्वाहा। इदं भूर्भुवः स्वः ॥१९॥ ॐ ब्रह्मणे स्वाहा। इदं ब्रह्मणे ॥२०॥ ॐ क्षत्राय स्वाहा। इदं क्षत्राय ॥२१॥ ॐ भूताय स्वाहा। इदं भूताय ॥२२॥ ॐ भविष्यते स्वाहा। इदं भविष्यते ॥२३॥ ॐ विश्वाय। स्वाहा इदं विश्वाय ॥२४॥ ॐ सर्वाय स्वाहा। इदं सर्वाय ॥२५॥ ॐ प्रजापतये स्वाहा। इदं प्रजापतये ॥२६॥

अथ स्थालीपाकाहुतयः - ॐ अग्नये स्वाहा। इदमग्नये ॥१॥ ॐ अनुमतये स्वाहा। इदमनुमतये ॥२॥ ॐ देवाय स्वाहा। इदं देवाय ॥३॥ ॐ सवित्रे स्वाहा। इदं सवित्रे ॥४॥ ॐ सत्यप्रसवाय स्वाहा। इदं सत्यप्रसवाय ॥५॥

विनियोगः - ॐ अग्नीषोमाविति सूक्तस्य राहूगणो गौतमऋषिः, अग्निषोमौ देवते अनुष्टुप्त्रिष्टुब्जगती छन्दांसि पायसचरुहोमे विनियोगः।

ॐ अग्नीषोमाविमं सु मे शृणुतं हवम्। प्रतिसूक्तानि हर्यतं भवतं दाशुषे मयः स्वाहा ॥१॥ ॐ अग्नीषोमा यो अद्य वामिदं वचः सपर्यति तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यं स्वाहा ॥२॥ ॐ अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम्। स प्रजया सुवीर्यं विश्वमायुर्व्यशनवत् स्वाहा ॥३॥ ॐ अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिगाः। अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः स्वाहा ॥४॥ ॐ युवमेतानि दिवि रोचनान्यग्नि[illegible] सोमसक्रतू अधत्तम्। युवं सिन्धूँरभिशस्तर वद्यादग्नीषोमावमुञ्चतं गृभी[illegible] स्वाहा ॥५॥ ॐ आन्यं दिवो मातरिश्वा जभारामथ्न्यादन्यं परिश्येनो अ[illegible] अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरुलोकं स्वाहा ॥६॥ ॐ अग्नीषो[illegible] हविषः प्रस्थितस्य वीतं हर्यतं वृषणाजुषेथाम्। सुशर्माणा स्ववसा [illegible] भूतमथाधत्तं यजमानाय शं योः स्वाहा ॥७॥ ॐ अग्निषोमा हविषा सपर्याद्देवद्रीचा मनसा यो घृतेन। तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम् स्वाहा ॥८॥ ॐ अग्नीषोमा सवेदसा सहूती वनतं गिरः। सं देवत्रा बभूवथुः स्वाहा ॥९॥ ॐ अग्नीषोमावनेन वां यो वां घृतेन दाशति। तस्मै दीदयतं बृहत् स्वाहा ॥१०॥ ॐ अग्नीषोमाविमानि नो युवं हव्या

जुजोषतम्। आयातमुप नः सचा स्वाहा ॥११॥ ॐ अग्नीषोमा पिपृतमर्वतो न आप्यायन्तामुस्त्रिया हव्यसूदः। अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तं स्वाहा॥१२॥

विनियोगः - ॐ आ ते गर्भ इति पञ्चर्चसूक्तस्य हिरण्यगर्भ ऋषिः, अग्निर्देवता, अनुष्टुप्छन्दः, पायसचरु होमे विनियोगः। (गर्भकामना हेतु)

ॐ आ ते गर्भो योनिमैतु पुमान् बाणइवेषुधिम्। आवीरोऽत्र जायतां पुत्रस्ते दशमास्यः स्वाहा। अग्नये इदम् ॥१॥ ॐ करोमि ते प्राजापत्यैषा गर्भो योनिमैतु ते। अनूनः पूर्णो जायतामश्लोणो पिशाचधीतः स्वाहा। अग्नये इदम्॥२॥ ॐ पुमांस्ते पुत्रो नारितं पुमाननुजायताम्। यानि भद्राणि बीजान्यृषभा जनयन्तु नौ स्वाहा। अग्नये इदम् ॥३॥ ॐ यानि भद्राणि बीजान्यृषभा जनयन्तु नौ स्वाहा। अग्नये इदम्॥४॥ ॐ यानि भद्राणि बीजान्यृषमा जनयन्ति नः तैस्त्वं पुत्रान् विन्दस्व सा प्रसूर्धेनुकाभव स्वाहा अग्नये इदम् ॐ कामः समृद्धयतां मह्यमपराजित मेव मे कामये देव तं मे वायो समर्धय स्वाहा अग्नये इदम्॥५॥

विनियोगः ॐ अग्निरिति पञ्चर्चसूक्तस्य हिरण्यगर्भऋषिर्वरुणो देवता जगतीछन्दः पायसचरु होमे विनियोगः। (संतान की दीर्घायु हेतु)

ॐ अग्निरेतु प्रथमो देवतानां सोऽस्यै प्रजा मुञ्चतु मृत्युपाशात्। तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्रीपौत्रमघं न रोदात् स्वाहा॥१॥ वरुणायेदम्। ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिबुध्यतामियम् स्वाहा॥२॥ वरुणायेदम्। ॐ मा ते गृहे निशिघोष उत्थादन्यत्रत्यद्रवत्यः संविशन्तु। मा त्वं विकेश्युर आवधिष्ठाजीवत्पत्नी पतिलोके विराज। पश्यन्ति प्रजां सुमनस्यमानां स्वाहा॥३॥ वरुणायेदम्। ॐ अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाऽधम शीर्ष्णस्त्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पापं स्वाहा॥४॥ वरुणायेदम्॥ ॐ देवकृतं ब्राह्मण कल्पमानं तेन हन्मि यो निषदः पिशाचान्। क्रव्यादो मृत्यूनधरान्पातयामि दीर्घमायुस्तव जीवन्तु पुत्राः स्वाहा॥५॥ वरुणायेदम्।

विनियोगः - ॐ नेजमेषेति तिसृणां विष्णुस्त्वष्टा गर्भकर्त्तर्षिः विष्णुपृथिवी विष्णवो यथासंख्यं देवता। अनुष्टुप् छन्दः पायसहोमे विनियोगः। (पुत्र कामना हेतु)

ॐ नेजमेष परापतः सुपुत्रः पुनरापत अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् स्वाहा। विष्णवे इदम्॥१॥ ॐ यथेमं पृथिवीमह्युत्ताना गर्भमादवे

एवन्तं गर्भमाधेहि दशमे मासि सूतवे स्वाहा। पृथिव्यै इदम् ॥२॥ ॐ विष्णो श्रेष्ठेन रूपेणास्यां नार्यां गर्भिण्यां पुमासं पुत्रमाधेहि दशमे मासि सूतवे स्वाहा। विष्णवे इदम् ॥३॥

विनियोगः - ॐ सोमो धेनुमिति राहूगणो गौतम ऋषिः सोमो देवता त्रिष्टुप्छन्दः पुत्रकामसिद्ध्ये पायसहोमे विनियोगः।

ॐ सोमो धेनु ठँ सोमो अवन्तमाशु ठँ सोमो वीरं कर्मण्यं ददाति। सादन्यं विदत्थ्य ठँ सभेयं पितृश्रवणं यो ददाशदस्मै स्वाहा। सोमायेदम् ॥१॥ ॐ इहैव स्तम्मा वि यौष्टं विश्वमायुर्व्यश्रुतम्। क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे स्वाहा। सूर्यासावित्र्यै इदं ॥२॥

विनियोगः - ॐ इमात्वमित्यस्य सूर्यासावित्री ऋषिः अनुष्टुप्छन्दः पायसहोमे विनियोगः।

ॐ इमां त्वमिन्द्रमीढ्वः सुपुगां सुभगां कृणु दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि स्वाहा। सूर्यासावित्र्यै इदम् ॥१॥

विनियोगः - ॐ तां पूषन्निति सूर्यासावित्री ऋषिः सूर्या देवता त्रिष्टुप्छन्दः पायसहोमे विनियोगः।

ॐ तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या उवपन्ति। या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपं स्वाहा। इदं सूर्यासावित्र्यै ॥२॥

आते योनिं गर्भ एतु पुमान् बाण इवेषुधिम्। आवीरोऽत्र जायतां पुत्रस्ते दशमास्यः स्वाहा ॥१॥ ॐ पुमांसं पुत्रं जनयतं पुमाननुजायताम्। भवासि पुत्राणां माता जातानां जनयाश्च यान् स्वाहा ॥२॥ ॐ यानि भद्राणिबीजान्यृषभा जनयन्ति च तैस्त्वं पुत्रं विन्दस्व सा प्रसूर्धेनुका भव स्वाहा। अग्नये इदं ॥३॥ ॐ कृणोमि ते प्राजापत्यमायोनिं गर्भ एतु ते विन्दस्व त्वं पुत्रनारि। यस्तुभ्यं शमसच्छमु तस्मै त्वं भव स्वाहा ॥४॥ ॐ यासां द्यौः पिता पृथिवी माता समुद्रो मूलं वीरुधां बभूव। तास्त्वा पुत्रविद्यायै दैवीः प्रावन्त्वोषधयः स्वाहा ॥५॥ ॐ पर्वताद्दिवो योनेरङ्गादङ्गात्समा भृतम्। शेपो गर्भस्य रेतोधाः सरो पर्णमिवादधत् स्वाहा ॥१॥ ॐ यथेयं पृथिवी महीभूतानां गर्भमादधे। एवादधामि ते गर्भस्तस्मै त्वामवसे हुवे स्वाहा ॥२॥ ॐ गर्भ धेहिसिनीवालि! गर्भं धेहि सरस्वति! गर्भ ते अश्विनोभावाधत्तां पुष्करस्त्रजा स्वाहा ॥३॥ गर्भन्ते मित्रावरुणौ गर्भं देवो बृहस्पतिः। गर्भ त इन्द्रश्चाग्निश्च गर्भ धाता दधातु ते स्वाह ॥४॥ ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिञ्चतु

प्रजापतिर्धाता गर्भं दधातु ते स्वाहा ॥५ ॥

ॐ यद्वेद राजा वरुणो यद्वा देवी सरस्वती। यदिन्द्रो वृत्रहा वेद तद्गर्भकरणं पिव स्वाहा ॥६ ॥ ॐ गर्भो अस्यौषधीनां गर्भो वनस्पतीनाम्। गर्भो विश्वस्य भूतस्य सो अग्रे गर्भमेहधाः स्वाहा ॥७ ॥ ॐ अधिस्कन्द वीरयस्व गर्भमाधेहि योन्याम्। वृषाऽसि वृष्णयावन्। प्रजायै त्वा नयामसि स्वाहा ॥८ ॥ ॐ विजिहीष्व वार्हत्सामे गर्भस्ते योनिमाशयाम्। अदुष्टे देवा पुत्रं सोमया उभया विनम् स्वाहा ॥९ ॥ ॐ धातः श्रेष्ठेन रूपेणास्यां नार्या गवीन्योः। पुमांसं पुत्रामाधेहि दशमे मासि सूतवे स्वाहा। धात्रे इदम् ॥१० ॥ ॐ त्वष्टः! श्रेष्ठेन रूपेणास्यां भार्यां गवीन्योः। पुमांसं पुत्रमाधेहि दशमे मासि सूतवे स्वाहा। त्वष्ट्रे इदम् ॥११ ॥ ॐ सवितः श्रेष्ठेन रूपेणास्यां नार्यां गवीन्योः। पुत्रमाधेहि दशमे मासि सूतवे स्वाहा ॥ इदं सवितायै ॥१२ ॥ ॐ प्रजापते! श्रेष्ठेन रूपेणास्यां नार्यां गवीन्योः पुमांसं पुत्रं जनयतं पुमाननु जायतां भवासि पुत्राणां माता जातानां जयनांश्च यान्त्स्वाहा। यज्ञेश्वरायेदम् ॥१३ ॥ ॐ यज्ञपुरुषाय स्वाहा। इदं यज्ञपुरुषाय ॥१४॥ ओं यदस्य कर्मणो त्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत्स्विष्टकृद्विद्यात्सर्वं स्विष्टं सुहुतं करोतु मे। अग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्द्धयित्रे सर्वान्नः कामान्त्समर्द्धयः स्वाहा। इदमग्नये स्विष्टकृते ॥१५ ॥ इति स्विष्टकृद्धोमं कृत्वा -

विनियोगः ॐ अपश्यन्त्वेति द्वयोः प्रजावान्प्राजापत्य ऋषिः, प्रजापतिर्देवता, त्रिष्टुप्छन्दः, हुतशेषपायस चरुप्राशने विनियोगः।

आचार्यः शेषहविष्यांशं गृहीत्वा - ॐ अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम्। इह प्रजामिह रयिंरराणः प्रजायस्व प्रजया पुत्रकाम ॥१ ॥ इति पठित्वा यजमानं भोजयेत्। हविष्यांशस्यार्धेन ॐ अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानाम्। उपमामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे ॥२ ॥ इति पठित्वा यजमानपत्नीं भोजयेत्।

ततः हस्तौ प्रक्षाल्याचामेत्। ॐ पिशंगभृष्टिमित्यस्य दैवोदासिः परुच्छेपमृषिः, इन्द्रोः देवता, गायत्रीछन्दः, नाभ्यालम्भने विनियोगः।

ॐ पिशङ्गभृष्टि सम्भृणं पिशाचिमिन्द्र सम्भृण सर्वं रक्षो निबर्हय। इति मन्त्रेण पतिपत्नि स्वस्वनाभ्यालम्भनं कुर्याताम्। (इस मन्त्र से पति पत्नि एक दूसरे को ग्रास देवें)

आज्याहुतिः ॐ ब्रह्मणाग्निः साम्विदानो रक्षोहा बाधबामितः। अमीवा

यस्ते गर्भं दुर्णामायोनिमाशये स्वाहा ॥१ ॥ ॐ यस्ते गर्भममीवा दुर्णामायोनि माशये। अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् स्वाहा ॥२ ॥ ॐ यस्ते हन्ति पतयन्तं निपत्सुं यः सरीसृपम्। जातं यस्ते जिघांसति तमितो नाशयामसि स्वाहा ॥३ ॥ ॐ यस्त ऊरूविहरन्त्यन्तरा दम्पतीशये! योनिं यो अन्तरारेदि तमितो नाशयामसि स्वाहा ॥४ ॥ ॐ यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते। प्रजां यस्ते जिघांसति तमितो नाशयामसि स्वाहा ॥५ ॥ ॐ यस्त्वा स्वप्नेन तमसा मीहयित्वा निपद्यते! प्रजां यस्ते जिघांसति तमितो नाशयामसि स्वाहा ॥६ ॥ ॐ अग्ने! प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपजहि स्वाहा ॥७ ॥ ॐ वायो! प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपजहि स्वाहा ॥८ ॥ ॐ चन्द्र! प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपजहि स्वाहा ॥९ ॥ ॐ सूर्य! प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपजहि स्वाहा ॥१० ॥ ॐ अग्निवायुचन्द्रसूर्याः! प्रायश्चित्तयोयूयं देवानां प्रायश्चित्तयःस्थ ब्राह्मणो वो नाथकाम उपधावामि यास्या अपुत्र्यास्तनूस्तामस्या अपहत स्वाहा ॥११ ॥ ॐ मा नो महान्तमुतमानो अर्भकं मा न उक्षन्तमुतमा न उक्षितम्। मा नो वधीः पितरम्मोतमातरं मा नः प्रियास्तन्वो रुद्र! रीरिषः स्वाहा ॥१२ ॥

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतां दोग्ध्रीधेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्तां योगक्षोमो न कल्पतां स्वाहा ॥१ ॥ ॐ अहो मुचे प्रभरे मनीषामसुत्राव्णे सुमतिमावृणानः। इदमिन्द्रं प्रतिहव्यं गृभाय सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥२ ॥ ॐ पुनस्त्वादित्या रुद्रावसवः समिन्धता, पुनर्ब्रह्माणो वसुनीथ! यज्ञः घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥२ ॥ ततो भूराद्या नवाहुतयः। (इमे नव मंत्राः पूजा होम प्रकरणे द्रष्टव्याः)

पश्चात् प्रायश्चित होम करके नवाहुति देकर पूर्णाहुति देवें।

एवं प्रायश्चित्तहोमान्तं कृत्वोक्तक्रमेण विधिवत्सर्वं समाप्य विप्रेभ्योगां सुवर्णादि दक्षिणाञ्च दत्वा अत्यम्लं तिक्तादिकं विहाय केशरादिसंयुक्तं पायसादिवृष्यान्नं भक्षयेत् स्त्री तु लघ्वाहारं तैलपकवटकादीन्सह खादयेत् ।

तस्यामेव निशायां दम्पती दर्भास्तरणे प्राक्शिरसौ शयीयातां पश्चाद् गर्भाधानं कुर्यात्,

गर्भाधान मन्त्रः - **ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणिपि ठँ शतु। आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते।**

॥ इति कर्मठगुरौ पुत्रकामेष्टिविधिः ॥

॥ पुत्रप्राप्ति के अन्यप्रयोगः ॥

द्वादशाक्षरमन्त्रोः - ॐ ह्रां ह्रीं ह्रूं पुत्रं कुरु कुरु स्वाहा।

चूतवृक्षसमारूढो जपेदेकाग्रमानसः।
अपुत्रो लभते पुत्रं नान्यथा शंकरोदितम्।

॥ पुत्रोत्पत्तिकारकयन्त्रम् ॥

शंकरमातुशंकरपितु

४०	४२	४	५
१	३	४८	४३
४६	४७	५	४
२	७	४७	४४

कौरवरनलक्ष्मीपति

शंकरराह्वैं चारों दीप

इस यन्त्र को अच्छे नक्षत्र और शुभ दिन में गोरोचन से भोजपत्र पर लिखकर, गूगल की धूप देकर सोना या चाँदी से मढा कर वंध्या स्त्री के कण्ठ में बाँधे तो जिस स्त्री के लड़का न होता हो अथवा होकर मर जाता हो उसके निश्चय पूर्वक पुत्र उत्पन्न होकर जीता है। इस में संदेह नहीं है।

॥ अथशीघ्रप्रसवोपायः ॥ (संस्कार भास्करे)

हिमवत्युत्तरे पार्श्वे शवरी नाम यक्षिणी।
तस्या नूपुरशब्देन विशल्या स्यात्तु गर्भिणी स्वाहा ॥१॥

इति मंत्रेणैकविंशतिदूर्वांकुरैरेकपलं तिलतैलं प्रदक्षिणमावर्तयन्नष्टशतं मन्त्रयित्वा तत्तैलं किञ्चित्पाययेच्छेषमुदरे लेपयेदिति।

८	३	४
१	५	९
६	७	२

यन्त्रप्रकारः - पहले ८, ३, ४। १,५,९। ६,७,२। इस क्रम से यन्त्र लिखें। **गजाग्निवेदा उडुराट्शरांकार सर्पिपक्षा इति हि क्रमेण। लिखेत्प्रसूतेः समये गृहे वै सुखेन नार्यः सुवते हि शीघ्रमिति।**

॥ अथ मृत्वत्सा हेतु प्रयोगः॥

मृत्वत्सा वह कहलाती है जिसके पुत्र पैदा होकर एक पक्ष, मास, या एक दो वर्ष में मर जाते है।

लक्षणं यत्रेश्च -

अत्र योगः प्रकर्तव्यः यथाशंकरभाषितम् ।
मार्गशीर्षेऽथवा ज्येष्ठे पूर्णायां लेपिते गृहे ॥
नूतनं कलशं पूर्णं गन्धतोयेन कारयेत् ।
शाखाफलसमायुक्तं नवरत्नसमन्वितम् ॥
सुवर्णमुद्रिकायुक्तं षट्कोणमण्डलस्थितम् ।
तन्मध्ये पूजयेद्देवीमेकांतीं नाम विश्रुताम् ॥
गंधपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्य संयुतैः ।
अर्चयेद्भक्तिभावेन मधुना दुग्धमाषकैः ॥
वाराही च तथाचान्द्री ब्राह्मी माहेश्वरी तथा ।
कौमारी वैष्णवी देवी षट्सु पत्रेषु मातरः ॥
पूजयेन्मन्त्रभावेन दधिपिंडानि कारयेत् ।
सप्तसंख्याप्रमाणानि षट्संख्या मातृषट्कतः ॥
सप्तमं तुपृथग्धृत्वा शुचिस्थाने विशेषतः ।
तद्भुक्त्वा गृहमागच्छेत् कन्या वा वटुकस्त्रियः ॥
भोजयेद्दक्षिणां दत्त्वा प्रमाणं कारयेत्ततः ।
विसृज्य देवतां चाथ नद्यां तत्कलशोदकम् ॥
सुकुलं वीक्षयेद्धीमाञ्शुभेन शुभमादिशेत् ।
विपरीतं पुनः कुर्याद्यागं तावत्सुसिद्धिदम् ॥
प्रतिवर्षमिदं कुर्याद्दीर्घजीवी सुतो भवेत् ।
सिद्धियोगमिदं ज्ञानं नान्यथा शंकरोदितम् ॥

अस्य मन्त्रः - ॐ नमः परब्रह्मपरमात्मने अमुके गृहे गर्भजीवितं सुतान् कुरु कुरु स्वाहा ॥ इति मन्त्रमयुतं जपेत् सिद्धिः॥

षट्कोण मध्य में कांतीदेवी का पूजन करें। षट्कोणों में वाराही, ऐन्द्री, ब्राह्मी, माहेश्वरी, कौमारी एवं वैष्णवी का पूजन करें। इनको दधिपिण्ड प्रदान करें।

सातवाँ पिण्ड शुचि स्थान पर रखें। कन्या वटुक भोजन करायें।

॥ काकवन्ध्या हेतु प्रयोगः॥

अथ काकवन्ध्या लक्षणम् -

पूर्वं पुत्रवती या सा क्वचिद्वन्ध्या भवेद्यदि ।
काकवन्ध्या तु सा ज्ञेया चिकित्सा तत्र कथ्यते ॥
विष्णुक्रांतां समूलां तु पिट्वा महिषिदुग्धके ।
महिषी नवनीतेन ऋतुकाले तु भोजयेत् ॥
एवं सप्तदिनं कुर्यात् पुनर्गर्भश्च लभ्यते ।

तत्रमन्त्रः - ॐ नमः शक्तिरूपाय अमुकगृहे पुत्रं कुरु कुरु स्वाहा। अष्टोत्तरशतं जपेत् सिद्धिः॥

औषधीप्रयोगो यथा - तत्रादौ वन्ध्याशुद्धि प्रयोगः। (तन्त्रसारे) एकविंशत्यहं यावद्दुग्धेन सह मेथिकाम्। मेथीतोलकमेकं च खंडकं तोलकद्वयम् । घृतं तोलकमेकं च पिवेद्दुग्धेन मिश्रितम्। मृतवत्सा मृतगर्भा काकवंध्या तथैव च ॥ पुत्रहीना च वन्ध्या च पंच चैव प्रकीर्तिताः । संहरेत्सर्व-दोषांश्च मेथीभक्षणमुत्तमम॥ नाडीशुद्धायां स्त्रियामुपरि ऋतुकालमिदमौषधं देयम् ।पलाशपत्रयोगः (दत्तात्रेयतन्त्रे) - पत्रमेकं पलाशस्य गर्भिणीपयसान्वितम्। ऋत्वंते तानि पीतानि वंध्या भवति गर्भिणी ॥

तत्रमन्त्रः - ॐ नमः सिद्धिरूपाय अमुकी पुत्रं कुरु कुरु स्वाहा॥ अष्टोत्तरशतं जपेत् सिद्धिः॥

॥ गर्भ स्तम्भन मन्त्र॥

ॐ ऐं ह्रीं क्लीं वं वटुकाय आपदुद्धारणाय श्रीमते वीर वटुकाय ते नमः। कष्टं नाशय गर्भ-पक्षात् सौख्यं वितर सर्वान् कामान् पूरय पूरय वं क्लीं ह्रीं ऐं ॐ।

यह मंत्र १००० जप करने से सिद्धि प्रदान करता है।

अथानेकयोगाः (चिकित्साशास्त्रे)

समूलपत्रां सर्पाक्षीं रविवारे समुद्धरेत्। एकवर्णगवां क्षीरैः कन्याहस्तेन पेषयेत्॥ ऋतुकाले पिबेद्वंध्या पलार्द्ध तद्दिने दिने। क्षीरशाल्यन्नमुद्गांश्च लध्वाहारं

प्रदापयेत्॥ एवं सप्तदिनं कुर्याद्वंध्याऽपि लभते सुतम्॥ श्वेतायाः कंटकार्याश्च मूलं तद्वच्च गर्भकृत्। न कर्म कारयेत् किंचिद्वर्जयेच्छीतमातपम्॥ शिफावहि-शिखायास्तु क्षीरेण परितोषितम्। पिबेदृतुमती नारीगर्भधारणहेतवे॥ अश्वगंधाकषायेण सिद्धं दुग्धं घृतान्वितम्। ऋतुस्नातांगना प्रातः पीत्वा गर्भं दधाति॥

॥ सर्वरोगप्रशमनोपायः ॥

कर्मदोष के उद्भव के कारण रोग शोक महाव्याधि की प्राप्ति होती है। जहाँ कर्मदोष का प्रभाव विशेष है वहाँ औषधी से व्याधि शमन नहीं होती

पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते।
महारुद्रविधानेनासाध्यो रोगोऽपि शाम्यति॥
अपामार्जनसंज्ञेन मालामन्त्रेण मार्जयेत्।
मार्जनाद्रोगिणः सर्वे रोगा नश्यंत्यसंशयम्॥१॥
अच्युतानन्तगोविन्देत्येवं नामत्रयं हरेः।
सर्वरोगोपशात्यर्थं सततं व्याधिमान् जपेत्।
सर्वेषु ज्ञातरोगेषु प्रदद्यात्सततं नरः॥२॥
पानीयं पायसं मुद्गाः शकरां घृतसंयुताम्।
प्रतिकूलग्रहाणां च जपं होमं च पूजनम्॥३॥
प्रायश्चित्तं तु तत्कृत्वा चिकित्सामारभेत्ततः।
प्रदद्यात्सर्वरोगघ्नं छायापात्रं विधानतः॥४॥

रुद्रार्चन अभिषेक मृत्युञ्जय मन्त्र जाप अपामार्ज़न स्तोत्र मन्त्र के मार्जन से व्याधिदूर होवें। '**अच्युतानन्तगोविन्दम्**' इन तीन नामों का स्मरण करें। छाया पात्र का दान व ग्रहों की शान्ति करायें। काँसी का छायापात्र होवे उसे घृत से पूर्ण करे, स्वर्ण उसमें रखें। संकल्प पूर्वक दान करें।

॥ दानमन्त्रः ॥

आयुर्बलं यशो वर्च्च आज्य स्वर्ण तथाऽमृतम्।
आधारं तेजसा यस्मादतः शान्तिं प्रयच्छ मे॥
मन्त्रेणानेन विप्राय सर्वरोगोपशान्तये।
पात्रं सुवर्णसहितं दद्यात्संकल्पपूर्वकम्॥

॥ अथकुष्ठरोगोपशमनविधानम् ॥

तत्र जन्तुघातकः कुष्ठरोगी वस्त्रहारी श्वेतकुष्ठी भवति सांतपनं कुर्य्यात्। तदुक्तम् (महार्णवे)-

''यो नरो हन्ति वै जन्तून्कुष्ठरोगी भवतु सः। स च सांतपनं कुर्याद्भगवानाह शंकरः''। इति॥

अन्यायदंण्डकारी च मुखकृष्णो भवति। असौ कृच्छ्रातिकृच्छ्रचांद्रायणं कुर्य्यात्। क्षुद्रप्राणिहिंसको विवर्णमुखः स चांद्रायणमतिकृच्छ्रं च कृत्वा राजतवृषभदानं कुर्य्यात्। ब्रह्महा नरकस्यांते पाण्डुकुष्ठी प्रजायते। प्रायश्चित्तं प्रकुर्वीत यथोक्तमृषिभाषितम्।

(महाभारते) हिरण्यं रक्तवासांसि पञ्चाशद्विप्रभोजनम्। सहस्त्रकलशस्नानं तस्य रोगोपशांतये। इति अत्र सहस्त्रकलशस्नानं शालग्रामोपरिकार्यम्। पुरुषसूक्तं सहस्त्रनामस्तोत्रम्। उद्यन्नद्येत्यृचो जपेत्प्रत्यष्टोत्तरायुतं चरुघृताभ्यां जुहुयात्। अथवा सूर्याराधनम्। आदित्य हृदयजपं महाभारतश्रवणं च कुर्य्यात्।

॥ ग्रहबाधा, ज्वर नाशक विघ्नेश मंत्र ॥

ॐ नमो गणपतये महावीर! दशभुज! मदनकाल विनाशन! मृत्युं हन हन धम धम मथ मथ कालं संहर संहर, सर्वग्रहांश्चूर्णय चूर्णय नागान् मोटय मोटय रुद्ररूप त्रिभुवनेश्वर सर्वतोमुख! हुँ फट् स्वाहा॥

॥ अथ ज्वरशमन प्रयोगाः ॥

ज्वर के कई प्रकार पौराणिक ग्रन्थों में आये हैं। ज्वर, महाज्वर, तृतीयाहिक ज्वर, चातुर्थिकज्वर, ब्रह्मज्वर, विष्णुज्वर, रुद्रज्वर, माहेश्वरज्वर, शीतज्वर, तीक्ष्णज्वर, दारुणज्वर, इत्यादि के प्रकोप शमन हेतु शिवरुद्रानुष्ठान, अपामार्जन प्रयोग, जातवेद दुर्गा मन्त्र प्रयोग प्रचलित है। बाणासुर वध के अन्तर्गत शिव कृष्ण युद्ध में ज्वर शान्ति स्तोत्र है उसका पाठ करना भी ठीक है।

जातवेद दुर्गामन्त्र-

ॐ जातवेदसे सुनवा सोममरातीयतो निदहातिवेदः ।
सनः पर्षदति दुर्गाणि विश्वानावेवसिंधुं दुरितात्यग्निः ॥

विनियोगः - ॐ जातवेदसः इति मन्त्रस्य मारीचः काश्यप ऋषिः।

त्रिष्टुप्छन्दः। जातवेदोग्निदुर्गा देवता। रोगशमने विनियोगः।

ऋषिन्यासः - ॐ मारीचकाश्यपऋषये नमः शिरसि। त्रिष्टुप् छन्दसे नमः मुखे। ॐ जातवेदोग्निदुर्गादेवताभ्यां नमः हृदये। विनियोगाय नमः सर्वाङ्गे।

करन्यासः - ॐ जातवेदसेसुनवाम अंगुष्ठाभ्यां नमः। ॐ सोममरातीयतो तर्जनीभ्यां नमः। निदहाति वेदः मध्यमाभ्यां नमः। सनः पर्षदति अनामिकाभ्यां नमः। दुर्गाणिविश्वानावेव कनिष्ठिकाभ्यां नमः। सिन्धुं दुरितात्यग्निः करतलकरपृष्ठाभ्यां नमः।

इसी तरह हृदयादि षडङ्गन्यास करें।

मंत्रवर्णसहस्राणि (४४०००) जपेन्मन्त्रं विशालधीः।

तदंते तिलसिद्धार्थ चित्रमूलेः समिद्वैः।
क्षीरद्रुमाणामाज्येन हविषान्नैघृतान्वितै॥

ज्वरशमन मन्त्रः -

त्रिपाद्भस्म प्रहरणस्त्रिशिराश्च त्रिलोचनः।
स मे प्रीतः सुखं दद्यात्यसर्वामयपतिर्ज्वरः॥

विनियोगः - अस्य श्री ज्वर मन्त्रस्य कालाग्निरुद्र ऋषिः। अनुष्टुप् छन्दः। महादेवो देवता। सकलज्वर शान्त्यर्थे जपे विनियोगः।

ऋष्यादिन्यासः - कालाग्निरुद्र ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। महादेवो देवता हृदि। विनियोगाय नमः सर्वाङ्गे।

ज्वरगायत्री - ॐ भस्मायुधाय विद्महे ऐं क्रीं एकदंष्ट्राय धीमहि। तन्नो ज्वरः प्रचोदयात्।

॥ अथ ज्वरहरण अपामार्जन स्तोत्रम् ॥

(सर्वरोगप्रशमनार्थे)

पद्मपुराण में उत्तरखण्ड में शिव पार्वती संवाद अन्तर्गत दालभ्य द्वारा पुलस्त्य ऋषि से पूछने पर बताये गये विष्णु अपामार्जन स्तोत्र का वर्णन है।

स्तोत्र में श्लोक १ से १६ तक ज्ञानखण्ड है। श्लोक १७ से श्लोक २९ तक विष्णुन्यास है मन्त्र बोलते हुये उक्त अंगों में न्यास करें।

नमः श्री परमार्थाय से वामनं च सुखप्रदम् इन नामों का स्मरण कर ॐ

विष्णवे नमः से सर्वाङ्ग न्यास करें। ३५ वें श्लोक में **ॐ निष्कल्मषाय** से स्तोत्र प्रारंभ होगा जो ८८ श्लोक तक है। बार बार पाठ करने पर ३५ से ८८ श्लोक की ही आवृत्तियाँ करनी चाहिये। ८९ से १०७ श्लोक महात्म्य खण्ड के है इन्हें उत्तरार्ध में पढ़ें।

पाठ करते समय कुशा के द्वारा जल अभिमन्त्रित करते रहे उत्तरार्ध में स्तोत्र मन्त्रों से रोगी का मार्जन करें।

॥ महादेव उवाच ॥

अथातः संप्रवक्ष्यामि अपामार्जनमुत्तमम् ।
पुलस्त्येन यथोक्तं तु दालभ्याय महात्मने ॥१॥
सर्वेषां रोगदोषाणां नाशनं मङ्गलप्रदम् ।
तत्तेहं तु प्रवक्ष्यामि शृणु त्वं नगनंदिनि ॥२॥

॥ श्रीदालभ्यउवाच ॥

भगवन्प्राणिनः सर्वे विषरोगाद्युपद्रवैः ।
कुष्ठग्रहाभिभूताश्च सर्वकाले ह्युपद्रुताः ॥३॥
अभिचारिक कृत्याद्या बहुरोगाश्च दारुणाः ।
न भवंति मुनिश्रेष्ठ तन्मे त्वं वक्तुमर्हसि ॥४॥

॥ पुलस्त्य उवाच ॥

व्रतोपवासनियमैर्विष्णुर्वै तोषितस्तु यैः ।
ते नरा नैव रोगार्ता जायन्ते मुनिसत्तम ॥५॥
यैर्न कृतं व्रतं पुण्यं न दानं न तपस्तदा ।
न तीर्थे देवपूजा च नान्नं दत्तं तु भूरिशः ॥६॥
ते वै लोकास्तदा ज्ञेया रोगदोषैः प्रपीड़िताः ।
आरोग्यं परमामृद्धिं मनसा यद्यदिच्छति ॥७॥
तत्तदाप्नोत्य संदिग्धं विष्णोः सेवी विशेषतः ।
नाधिं प्राप्नोति न व्याधिं न विषग्रहबन्धनम् ॥८॥
कृत्यास्पर्शभयं नापि तोषिते मधुसूदने ।
समस्तदोषनाशश्च सर्वदा च शुभा ग्रहाः ॥९॥
देवानामप्यधृष्योऽसो तोषिते च जनार्दने ।
यः सर्वेषु च भूतेषु यथात्मनि तथा परे ॥१०॥

उपवासादिना तेन तोषितो मधुसूदनः ।
तोषिते तत्र जायन्ते नराः पूर्णमनोरथाः ॥११॥
अरोगाः सुखिनो भोग भोक्तारो मुनिसत्तम ।
तेषां च शत्रवो नैव न च रोगाभिचारिकम् ॥१२॥
ग्रहरोगादिकं चैव पापकार्यं न जायते ।
अव्याहतानि कृष्णस्य चक्रादीन्यायुधानि वै ॥१३॥
रक्षंति सकलापद्भ्यो येन विष्णुरुपासितः ।

॥ श्रीदालभ्यउवाच ॥

अनाराधितगोविन्दा ये नरा दुःखभागिनः ।
तेषां दुखाभिभूतानां यत्कर्तव्यं दयालुभिः ॥१४॥
पश्यद्भिः सर्वभूतस्थं वासुदेवं सनातनम् ।
समदृष्टिभिरप्यत्र तन्मे ब्रूहि विशेषतः ॥१५॥

॥ श्रीपुलस्त्य उवाच ॥

तद्वक्ष्यामि मुनिश्रेष्ठ समाहितमनाः शृणु ।
रोगदोषाशुभ हरं विज्वरादिविनाशनम् ॥१६॥

॥ अथविष्णुन्यासः ॥

शिखायां श्रीधरं न्यस्य शखाधः श्रीकरं तथा ।
हृषीकेशं तु केशेषु मूर्ध्नि नारायणं परम् ॥१७॥
ऊर्ध्वश्रोत्रे न्यसेद्विष्णुं ललाटे जलशायिनम् ।
विभुं वै भ्रूयुगे न्यस्य भ्रूमध्ये हरिमेव च ॥१८॥
नरसिंहं नासिकाग्रे कर्णयोरर्णवेशयम् ।
चक्षुषोः पुण्डरीकाक्षं तदधो भूधरं न्यसेत् ॥१९॥
कपोलयोः कल्किनाथं वामनं कर्णमूलयोः ।
शङ्खिनं शङ्खयोर्न्यस्य गोविन्दं वदने तथा ॥२०॥
मुकुन्दं दन्तपङ्क्तौ तु जिह्वायां वाक्पतिं तथा ।
रामं हनौ तु विन्यस्य कंठे वैकुण्ठमेव च ॥२१॥
बलघ्नं बाहुमूलाधश्चांसयोः कंसघातिनम् ।
अजं भुजद्वये न्यस्य शार्ङ्गपाणिं करद्वये ॥२२॥

संकर्षणं कराङ्गुष्ठे गोपमंगुलिपंक्तिषु ।
वक्षस्यधोक्षजं न्यस्य श्रीवत्सं तस्य मध्यतः ॥२३॥
स्तनयोस्त्वनिरुद्धं च दामोदरमथोदरे ।
पद्मनाभं तथा नाभौ नाभ्यधश्चापि केशवम् ॥२४॥
मेढ्रे धराधरं देवं गुदे चैव गदाग्रजम् ।
पीताम्बरधरं कट्यामूरुयुग्मे मधोर्द्विषम् ॥२५॥
मुरद्विषं पिण्डिकयोर्जानुयुग्मे जनार्दनम् ।
फणीशं गुल्फयोर्न्यस्य पादयोश्च त्रिविक्रमम् ॥२६॥
पादांगुष्ठे श्रीपतिं च पादाधो धरणीधरम् ।
रोमकूपेषु सर्वेषु विष्वक्सेनं न्यसेद्बुधः ॥२७॥
मत्स्यं मांसे तु विन्यस्य कूर्मं मेदसि विन्यसेत् ।
वाराहं तु वसामध्ये सर्वास्थिषु तथाच्युतम् ॥२८॥
द्विजप्रियं तु मज्जायां शुक्रे श्वेतपतिं तथा ।
सर्वाङ्गे यज्ञपुरुषं परमात्मानमात्मनि ॥२९॥

॥ मार्जन प्रयोग विधानम् ॥

एवं न्यासविधिं कृत्वा साक्षान्नारायणो भवेत् ।
यावन्न व्याहरेत्किंचित्तावद्विष्णुमयः स्थितः ॥३०॥
गृहीत्वा तु समूलाग्रान्कुशाञ्शुद्धान्समाहितः ।
मार्जयेत्सर्वगात्राणि कुशाग्रैरिह शान्तिकृत् ॥३१॥
विष्णुभक्तो विशेषेण रोगग्रहविषार्दिते ।
विषार्तानां रोगिणां च कुर्याच्छांतिमिमां शुभाम् ।
जायते तेन भो विप्र सर्वरोगप्रणाशनम् ॥३२॥

निम्न नामों का स्मरण कर ॐ विष्णवे नमः से सर्वाङ्ग न्यास करें -

नमः श्री परमार्थाय पुरुषाय महात्मने ।
अरूप बहुरूपाय व्यापिने परमात्मने ॥३३॥
वाराहं नारसिंहं च वामनं च सुखप्रदम् ।
ध्यात्वा कृत्वा नमो विष्णोर्नामान्यंगेषु विन्यसेत् ॥३४॥

॥ अथ स्तोत्रम् ॥

ॐ निष्कल्मषाय शुद्धाय व्याधिपापहराय वै ।
गोविन्दपद्मनाभाय वासुदेवाय भूभृते ॥३५॥
नमस्कृत्वा प्रवक्ष्यामि यत्तत्सिध्यतु मे वचः ।
त्रिविक्रमाय रामाय वैकुण्ठाय नराय च ॥३६॥
श्रीवाराहनृसिंहाय वामनाय महात्मने ।
हयग्रीवाय शुभ्राय हृषीकेश हराशुभम् ॥३७॥
परोपतामहितं प्रमुक्तं चाभिचारिकम् ।
गरस्पर्शमहारोगप्रयोगं जरया जर ॥३८॥
नमोस्तु वासुदेवाय नमः कृष्णाय खड्गिने ।
नमः पुष्करनेत्राय केशवायादिचक्रिणे ॥३९॥
नमः किंजल्कवर्णाग्रयपीतनिर्मलवाससे ।
महादेववपुष्कंधधृतचक्राय चक्रिणे ॥४०॥
दंष्ट्रोदधृतक्षितितल त्रिमूर्तिपतये नमः ।
महायज्ञवराहाय श्रीवल्लभ नमोस्तु ते ॥४१॥
तप्तहाटक केशांत ज्वलत्पावकलोचन ।
वज्राधिक नखस्पर्शदिव्यसिंह नमोस्तु ते ॥४२॥
कश्यपायातिह्लस्वाय ऋग्यजुःसामलक्षणः ।
तुभ्यं वामनरूपाय क्रमते गां नमोनमः ॥४३॥
वाराहाशेषदुःखानि सर्वपापफलानि च ।
मर्दमर्द महादंष्ट्र मर्दमर्द च तत्फलम् ॥४४॥
नृसिंह कुलिशस्पर्शदंतप्रांत नखोज्ज्वल ।
भंजभंज निनादेन दुःखान्यस्यार्त्तिनाशन ॥४५॥
ऋग्यजुः सामभिर्वाग्भिः कामरूपधराद्रिधृक् ।
प्रशमं सर्वदुखानि नय त्वस्य जनार्दन ॥४६॥
ऐकाहिकं द्वाहिकं च तथा त्रिदिवसज्वरम् ।
चातुर्थिकं तथात्युग्रं तथा वै सततज्वरम् ॥४७॥
दोषोत्थं सन्निपातोत्थ तथैवाङ्गतुकज्वरम् ।
शमं नयत गोविन्दो भित्त्वा छित्त्वास्य वेदनाम् ॥४८॥

नेत्रदुःखं शिरोदुःखं दुःखं तूदरसंभवम् ।
अनुच्छ्वासं महाश्वासं परितापं सवेपथुम् ॥४९॥
गुदघ्राणांघ्रिरोगांश्च कुष्ठरोगं तथा क्षयम् ।
कामलादींस्तथा रोगान्प्रमेहादींश्च दारुणान् ॥५०॥
ये वातप्रभवा रोगा लूताविस्फोटकादयः ।
ते सर्वे विलयं यान्तु वासुदेवापमार्जिताः ॥५१॥
विलयं यांति ते सर्वे विष्णोरुच्चारणेन वा ।
क्षयं गच्छंतु चाशेषास्ते चक्राभिहता हरेः ॥५२॥
अच्युतानंतगोविन्दनामोचारण - भेषजात् ।
नश्यति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥५३॥
स्थावरं जंगमं यच्च कृत्रिमं चापि यद्विषम् ।
दंतोद्भवं नखोद्भूतमाकाशप्रभव च यत् ॥५४॥
भूतादिप्रभवं यच्च विषमत्यंतदुःसहम् ।
शमंमयतु तत्सर्वे कीर्तितोस्य जनार्दनः ॥५५॥
ग्रहान्प्रेतग्रहांश्चैव तथान्याञ्छाकिनीग्रहान् ।
मुखमण्डलिकान् क्रूरान् रेवतीं वृद्धिरेवतीम् ॥५६॥
वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथा मातृग्रहानपि ।
बालस्य विष्णोश्चरितं हंतुं बालग्रहानपि ॥५७॥
वृद्धानां ये ग्रहा केचिद्-बालानां चापि ये ग्रहाः ।
नृसिंहदर्शनादेव नश्यंते तत्क्षणादपि ॥५८॥
दंष्ट्राकरालवदनो नृसिंहो दैत्यभीषणः ।
तं दृष्ट्वा ते ग्रहाः सर्वे दूरं यांति विशेषतः ॥५९॥
श्रीनृसिंह महासिंह ज्वालामालोज्ज्वलानन ।
ग्रहानशेषान्सर्वेश नुद स्वास्यविलोचन ॥६०॥
ये रोगा ये महोत्पाता ये द्विषो ये महाग्रहाः ।
यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः ॥६१॥
शस्त्रक्षतेषु ये रोगा ज्वालगर्दभिकादयः ।
विस्फोटकादयो ये च ग्रहा गात्रेषु संस्थिताः ॥६२॥

त्रैलोक्यरक्षाकर्त्तस्त्वं दुष्टदानववारण ।
सुदर्शनमहातेजश्छिंधि छिंधि महाज्वरम् ॥६३॥
छिन्धि वातं च लूतां च छिंधि घोरं महाविषम् ।
उद्दंडामरशूलं च विषज्वालासगर्दभम् ॥६४॥
ॐ ह्लां ह्लां ह्लूं ह्लूं प्रधारेण कुठारेण हन द्विषः ।
ॐ नमो भगवते सुदर्शनाय दुःखदारण विग्रह ॥६५॥
यानि चान्यानि दुष्टानि प्राणिपीडाकराणि वै ।
तानि सर्वाणि सर्वात्मा परमात्मा जनार्दनः ॥६६॥
किंचिद्रूपं समास्थाय वासुदेव नमोस्तु ते ।
क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालाविभीषणम् ॥६७॥
सर्वदुष्टो पशमनं कुरु देववराच्युत ।
सुदर्शन महाचक्र गोविन्दस्य वरायुध ॥६८॥
तीक्ष्णधार महावेग सूर्यकोटिसमद्युते ।
सुदर्शन महाज्वाल छिंधि छिंधि महारव ॥६९॥
सर्वदुःखानि रक्षांसि पापानि च विभीषण ।
दुरितं हन चारोग्यं कुरु त्वं भो सुदर्शन ॥७०॥
प्राच्यां चैव प्रतीच्यां च दक्षिणोत्तरतस्तथा ।
रक्षां करोतु विश्वात्मा नरसिंहः स्वगर्जितैः ॥७१॥
भूम्यंतरिक्षे च तथा पृष्ठतः पार्श्वतोग्रतः ।
रक्षां करोतु भगवान् बहुरूपी जनार्दनः ॥७२॥
यथा विष्णु मयं सर्वं सदेवासुरमानुषम् ।
तेन सत्येन सकलं दुःखमस्य प्रणश्यतु ॥७३॥
यथा योगेश्वरो विष्णुः सर्ववेदेषु गीयते ।
तेन सत्येन सकलं दुःखमस्य प्रणश्यतु ॥७४॥
परमात्मा यथा विष्णुर्वेदांगेषु च गीयते ।
तेन सत्येन विश्वात्मा सुखदोऽस्त्वस्य केशवः ॥७५॥
शान्तिरस्तु शिवं चास्तु प्रणाशं यातु चासुखम् ।
वासुदेवशरीरोत्थैः कुशैः संमार्जितं मया ॥७६॥

अपामार्जित गोविन्द नमो नारायणस्तथा ।
तथापि सर्वदुःखानां प्रशमो वचनाद्धरेः ॥७७॥
शान्ताः समस्तदोषास्ते ग्रहाः सर्वे विषाणि च ।
भूतानि च प्रशाम्यंति संस्मृते मधुसूदने ॥७८॥
एते कुशा विष्णुशरीरसंभवा जनार्दनोऽहं स्वयमेव चाग्रतः ।
हतं मया दुःखमशेषमस्य वै स्वस्थो भवत्वेष वचो यथा हरेः ॥७९॥
शांतिरस्तु शिवं चास्तु दुःखं च यत् प्रणश्यतु ।
यदस्य दुरितं किंचित्क्षिप्तं तल्लवणांभसि ॥८०॥
स्वास्थ्यमस्य सदैवास्तु हृषीकेशस्य कीर्त्तनात् ।
यद्योतोत्रागतं पापं तत्तु तत्र प्रगच्छतु ॥८१॥
एतद्रोगेषु पीडासु जंतूनां हितमिच्छुभिः ।
विष्णुभक्तैश्च कर्तव्यमपामार्जनकं परम् ॥८२॥
अनेक सर्वदुःखानि विलयं यांत्यशेषतः ।
सर्वपापविशुद्ध्यर्थं विष्णोश्चैवापमार्जनम् ॥८३॥
आर्द्रेशुष्कं लघु स्थूलं ब्रह्महत्यादिकं तु यत् ।
तत्सर्वे नश्यते तूर्णं तमोवद्र विदर्शनात् ॥८४॥
नश्यंति रोगदोषाश्च सिंहात्क्षुद्रमृगा यथा ।
ग्रहभूतपिशाचादिः श्रवणादेव नश्यतु ॥८५॥
द्रव्यार्थं लोभपरमैर्न कर्तव्यं कदाचन ।
कृतेऽपामार्जने किंचिन्न ग्राह्यं हितकाम्यया ॥८६॥
निरपेक्षैः प्रकर्तव्यमादिमध्यांतबोधकैः ।
विष्णुभक्तैः सदाशांतैरन्यथा सिद्धिदं भवेत् ॥८७॥
अतुलेयं नृणां सिद्धिरियं रक्षा परा नृणाम् ।
भेषजं परमं ह्येतद्विष्णोर्यदपमार्जनम् ॥८८॥

॥ महात्स्य ॥

उक्तं हि ब्रह्मणा पूर्वं पुलस्त्याय सुताय वै ।
एतत्पुलस्त्यो हि मुनिर्दालभ्यायोक्तवान्स्वयम् ॥८९॥
सर्वभूतहितार्थाय दालभ्येन प्रकाशितम् ।
त्रैलोक्ये तदिदं विष्णोः समास्तं चापमार्जनम् ॥९०॥

तवाग्रे कथितं देवि यतो भक्तासि मे सदा ।
श्रुत्वा तुसर्वे भक्त्या च रोगान्दोषान्व्यपोहति ॥९१॥

॥ महादेव उवाच ॥

अपामार्जनकं दिव्यं परमाद्भुतमेव च ।
पठितव्यं विशेषेण पुत्रकामार्थसिद्धये ॥९२॥
एतत्स्तोत्रं पठेत्प्राज्ञः सर्वकामार्थ सिद्धये ।
एककालं द्विकालं वा ये पठंति द्विजातयः ॥९३॥
आयुश्च श्रीर्बलं तस्य वर्द्धयंति दिने दिने ।
ब्राह्मणो लभते विद्यां क्षत्रियो राज्यमेव वा ॥९४॥
वैश्यो धनसमृद्धिं च शूद्रो भक्तिं च विन्दति ।
अन्यैश्च लभ्यते भक्तिः पठनाच्छ्रवणाज्जपात् ॥९५॥
सामवेदफलं तस्य जायते नगनन्दिनि ।
अखिलं पापसंघातं तत्क्षणादेव नश्यति ॥९६॥
इति ज्ञात्वा तु भो देवि पठितव्यं समाहितैः ।
पुत्राश्चैव तथा लक्ष्मीः संपूर्णा भवति ध्रुवम् ॥९७॥
लिखित्वा भूर्जपत्रे तु यो धारयति वैष्णवः ।
इहलोके सुखं भुक्त्वा याति विष्णोः परं पदम् ॥९८॥
पठित्वा श्लोकमेकं तु तुलसीं यः समर्पयेत् ।
सर्व तीर्थं कृतं तेन तुलस्या पूजने कृते ॥९९॥
एतत्स्तोत्रं तु परमं वैष्णवं मुक्तिदायकम् ।
पृथ्वीदानसमं पाठाद्विष्णुलोकं तु गच्छति ॥१००॥
जपेत्स्तोत्रं विशेषेण विष्णुलोकस्य वांछया ।
बालानां जीवनार्थाय पठितव्यं समाहितैः ॥१०१॥
रोगग्रहाभिभूतानां बालानां शान्तिकारकम् ।
भूतग्रहविषं चैव पठनादेव नश्यति ॥१०२॥
कंठे तुलसिजां मालां धृत्वा विप्रो हि यः पठेत् ।
स च वै वैष्णवो ज्ञेयो विष्णुलोकं स गच्छति ॥१०३॥
कंठे माला धृता येन शङ्खचक्रादि [illegible]ह्नितः ।
[illegible]: प्रोच्यते विप्रः स्तोत्रं चैतत्[illegible]न्सदा ॥१०४॥

इमं लोकं परित्यज्य विष्णुलोकं स गच्छति ।
मोहमायापरित्यक्तो दम्भ तृष्णाविवर्जितः ॥१०५॥
एतत्स्तोत्रं पठेद्दिव्यं परं निर्वाणमाप्नुयात् ।
ते धन्याः संति भूर्लोके ये विप्रा वैष्णवाः स्मृताः ॥१०६॥
स्वात्मा वै तारितस्तैस्तु सकुलो नात्र संशयः ।
ते वै धन्यतमा लोके नारायणपरायणाः ॥१०७॥
तैर्भक्तिश्च सदा कार्या ते वै भागवता नराः ।

इति श्रीपाद्मे महापुराणे उत्तरखण्डे शिवपार्वती संवादे अपामार्जनस्तोत्र सम्पूर्णम् ॥

॥ रोगी बचेगा या नहीं ॥

किसी रोगी के बचने या न बचने की परीक्षा करनी हो तो उड़द की दाल की पिठीका चौकोना बड़ा भल्ला बनाकर सरसों के तेल में तलकर उस पर स्याही से ॐ ह्रीं लिखकर रोगी के सिरहाने रात्रि में रख देवें तो प्रातः उस बड़े को देखे यदि मन्त्र लिखा बड़ा हो तो रोगी बचेगा और मन्त्र मिटा मिले तो रोगी नहीं बचेगा ऐसा निश्चय जाने।

॥ रक्षा मन्त्र ॥

ॐ तारा तारा गारुड मन्त्र विस्से खाय ब्राह्मण कंपन नागे डोल, चल विस्से हमारा बोल॥

किसी ने जादू टोना अभिचार चलाया हो तो इस मन्त्र से उस व्यक्ति को मोर पंख या लोहे के चीमटे से झाड़े तो आराम होगा। यह पहाड़ी गद्दी लोगों का सिद्ध मन्त्र है।

॥ सर्व कष्टहर मन्त्र ॥

जब संकट के समय विवेक काम नहीं दे तो मुक्ति के लिये इस मन्त्र का जप करें। सिद्ध के लिये सूर्य, चन्द्र ग्रहण के समय गायत्री मन्त्र से संपुटित कर कम से कम एक माला जप करें।

मन्त्र –

ॐ महेशाय त्रिनेत्राय नमस्ते शूलपाणये ।
प्रणतः क्लेशनाशाय महादेवाय ते नमः ॥

वैष्णवों के लिये -

ॐ कृष्णाय वासुदेवाय हरये परमात्मने प्रणतः क्लेशनाशाय गोविन्दाय नमो नमः ॥

॥ अथ व्याधिप्रतिरूप दान विधानम् ॥

(काल एवं मृत्यु के मंत्र शरभ तंत्र में देखें)

दुर्गासप्तशति में रहस्य त्रय में लिखा है कि - **कालमृत्यु तौ संपूज्यौ सर्वारिष्टप्रशांतये।**

परन्तु कालमृत्यु का आवाहन पूजन के बाद उनका विसर्जन करें या विसर्जन की भावना करें कि कालमृत्यु प्रसन्न होकर हमारे समस्त रोग व्याधि अनिष्टों को लेकर हमारे घर से विदा हो गये हैं। कालमृत्यु की स्वर्ण की प्रतिमा बनाकर चावलों पर रखें उनकी पूजा करें।

ॐ कालाय नमः, ॐ मृतवे नमः, ॐ रोगाय नमः, ॐ व्याधवे नमः।

गंधादि से पूजन कर वस्त्र अलंकार समर्पण कर उन्हे विप्र को दान करें - रोगी पुनः उसका मुँह नहीं देखे।

मन्त्रः –

ये मां रोगाः प्रबाधन्ते देहस्थाः सततं मम ।
गृह्णीष्व प्रतिरूपेण तान्-रोगान्द्विजसत्तम ॥१॥
बाढमित्येव तद्रूपं गृह्णीयाद्-ब्राह्मणस्तदा ।
ततो रोगप्रदातासौ दीर्घमायुः प्रपद्यते ॥२॥
तण्डुलानां तु यत्पात्रं मुख्यं तत्कांस्य संभवम् ।
दत्त्वा दानं तु तत्काले द्विजास्यं नावलोकयेत् ॥३॥

॥ सर्वारिष्टनिवारण स्तोत्रम् ॥

ॐ गं गणपतये नमः। सर्व-विघ्न विनाशनाय, सर्वारिष्टनिवारणाय, सर्वसौख्यप्रदाय, बालानां बुद्धिप्रदाय, नानाप्रकार धन वाहन भूमिप्रदाय, मनोवाञ्छित फलप्रदाय रक्षां कुरु कुरु स्वाहा।

ॐ गुरवे नमः, ॐ श्रीकृष्णाय नमः, ॐबलभद्राय नमः, ॐ श्रीरामाय नमः, ॐ हनुमते नमः, ॐ शिवाय नमः, ॐ जगन्नाथाय नमः, ॐ

बदरीनारायणाय नमः, ॐ श्रीदुर्गादेव्यै नमः ॥

ॐ सूर्याय नमः, ॐ चन्द्राय नमः, ॐभौमाय नमः, ॐ बुधाय नमः, ॐ गुरवे नमः, ॐ भृगवे नमः, ॐ शनिश्चराय नमः, ॐ राहवे नमः, ॐ पुच्छानयकाय नमः, ॐ नवग्रह! रक्षां कुरु कुरु नमः ॥

ॐ मन्येवरं हरिहरादय एव दृष्ट्वा द्रष्टेषु येषु हृदयस्थं त्वयं तोषमेति विविक्षते न भवता भुवि येन नान्य कश्चिन्मनो हरति नाथ भवान्तरेऽपि। ॐ नमो मणिभद्रे! जयविजयपराजिते! भद्रे! लभ्यं कुरु कुरु स्वाहा ॥

ॐ भूर्भुवः स्वः तत्-सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्। सर्वविघ्नं शान्तं कुरु कुरु स्वाहा।

ॐ ऐं ह्रीं क्लीं श्रीबटुकभैरवाय आपदुद्धारणाय महान्श्याम-स्वरूपाय दीर्घारिष्ट विनाशाय नानाप्रकार भोगप्रदाय मम (यजमानस्य वा) सर्वारिष्टं हन हन, पच पच, हर हर, कच कच, राज-द्वारे जयं कुरु कुरु, व्यवहारे लाभं वृद्धिं वृद्धिं, रणे शत्रून् विनाशय विनाशय, पूर्णां आयुः कुरु कुरु, स्त्री-प्राप्तिं कुरु कुरु, हुम् फट् स्वाहा।

ॐ नमो भगवते वासुदेवाय नमः। ॐ नमो भगवते, विश्व-मूर्तये , नारायणाय, श्रीपुरुषोत्तमाय। रक्ष रक्ष, युग्मदधिकं प्रत्यक्षं परोक्षं वा अजीर्णं पच पच, विश्वमूर्तिकान् हन् हन्, ऐकाह्निकं द्वाह्निकं त्राह्निकं चतुरह्निकं ज्वरं नाशय नाशय, चतुरग्निवातान् अष्टादशक्षयान् रोगान्, अष्टादशकुष्ठान् हन् हन्, सर्वदोषं भञ्जय-भञ्जय, तत्सर्व नाशय-नाशय, शोषय-शोषय, आकर्षय-आकर्षय, मम शत्रुं मारय-मारय, उच्चाटय-उच्चाटय, विद्वेषय-विद्वेषय, स्तंभय-स्तंभय, निवारय-निवारय, विघ्नं हन-हन, दह-दह, पच-पच, मथ-मथ, विध्वंसय-विध्वंसय, विद्रावय-विद्रावय, चक्रं गृहीत्वा शीघ्रमागच्छागच्छ, चक्रेण हन हन, पर-विद्यां छेदय-छेदय, चौरासी-चेटकान् विस्फोटान् नाशय नाशय, वात-शुष्क-दृष्टि-सर्प-सिंह-व्याघ्र-द्विपद-चतुष्पद अपरे बाह्यं ताराभिः भव्यन्तरिक्षं अन्यान्य-व्यापि-केचिद् देश-काल-स्थान सर्वान् हन हन, विद्युन्मेघ-नदी-पर्वत, अष्टव्याधि, सर्वस्थानानि, रात्रि-दिनं, चौरान् वशय-वशय, सर्वोपद्रव-नाशनाय, पर-सैन्यं विदारय-विदारय, पर-चक्रं निवारय-निवारय, दह-दह, रक्षां कुरु-कुरु, ॐ नमो भगवते, ॐ नमो नारायणाय, हुं फट् स्वाहा।

ठः ठः ॐ ह्रीं ह्रीं। ॐ ह्रीं क्लीं भुवनेश्वर्याः श्रीं ॐभैरवाय नमः। हरि ॐ

उच्छिष्ट-देव्यै नमः। डाकिनी-सुमुखी-देव्यै, महा-पिशाचिनी ॐ ऐं ठः ठः। ॐ चक्रिण्या अहं रक्षां कुरु कुरु, सर्वव्याधिहरणीदेव्यै नमो नमः। सर्वप्रकारबाधा शमनमरिष्ट निवारणं कुरु कुरु फट्। श्रीं ॐ कुब्जिका, देव्यै ह्रीं ठः स्वाहा।

शीघ्रमरिष्ट निवारणं कुरु कुरु देवी शाम्बरी क्रीं ठः स्वाहा।

शारिकाभेदा महामाया पूर्ण आयुः कुरु। हेमवती मूलं रक्षा कुरु। चामुण्डायै देव्यै शीघ्रं विघ्नं सर्वं वायु कफ पित्त रक्षां कुरु। मंत्र तंत्र यंत्र कवच ग्रहपीड़ा नडतर, पूर्वजन्मदोष नडतर, यस्य जन्मदोष नडतर, मातृदोष नडतर, पितृदोष नडतर, मारण-मोहन-उच्चाटन-वशीकरण-स्तंभन-उन्मूलनं भूत-प्रेत-पिशाच-जात-जादू-टोना-शमनं कुरु। सन्ति सरस्वत्यै कण्ठिका-देव्यै-गल-विस्फोटकायै विक्षिप्त-शमनं महान्-ज्वर-क्षयं कुरु स्वाहा ।

सर्वसामग्री भोगं सप्तदिवसं देहि-देहि, रक्षां कुरु, क्षण-क्षण, अरिष्ट निवारणं, दिवस-प्रति-दिवस दुःखहरणं मङ्गलकरणं कार्यसिद्धिं कुरु कुरु। हरि ॐ श्रीरामचन्द्राय नमः हरि ॐ भूर्भुवः स्वः चन्द्र-तारा-नवग्रह-शेष-नाग-पृथ्वी-देव्यै आकाशस्य सर्वारिष्ट निवारणं कुरु कुरु स्वाहा।

१.ॐ ऐं ह्रीं श्रीं बटुकभैरवाय आपदुद्धारणाय सर्वविघ्न निवारणाय मम रक्षां कुरु कुरु स्वाहा।

२. ॐ ऐं ह्रीं क्लीं श्रीवासुदेवाय नमः, बटुकभैरवाय आपदुद्धारणाय मम रक्षां कुरु कुरु स्वाहा।

३. ॐ ऐं ह्रीं क्लीं श्रीविष्णु भगवान् मम अपराधक्षमा कुरु कुरु,सर्वविघ्नं विनाशाय मम कामना पूर्ण कुरु कुरु स्वाहा।

४. ॐ ऐं ह्रीं क्लीं श्रीबटुक-भैरवाय आपदुद्धारणाय सर्वविघ्न निवारणाय मम रक्षां कुरु कुरु स्वाहा।

५. ॐ ऐं ह्रीं क्लीं श्रीं ॐ श्रीदुर्गादेवी रुद्राणीसहिता, रुद्रदेवता कालभैरव सह, बटुकभैरवाय, हनुमान सह मकरध्वजाय,आपदुद्धारणाय मम सर्वदोष क्षमाय कुरु कुरु सकल विघ्न-विनाशाय मम शुभमांगलिक कार्य सिद्धिं कुरु कुरु स्वाहा।

एष विद्यामाहात्म्यं च, पुरा मया प्रोक्तं ध्रुवं।
शतक्रतो तु हन्त्येतान् , सर्वांश्च बलिदानवाः ॥१ ॥

य पुमान् पठते नित्यं, एतत् स्तोत्रं नित्यात्मना ।
तस्य सर्वान् हि सन्ति, यत्र दृष्टिगतंविषं ॥२॥
अन्य दृष्टि-विषं चैव, न देयं संक्रमे ध्रुवम् ।
संग्रामे धारयेत्यम्बे, उत्पाता च विसंशयः ॥३॥
सौभाग्यं जायते तस्य, परमं नात्र संशयः ।
द्रुतं सद्यं जयस्तस्य, विघ्नस्तस्य न जायते ॥४॥
किमत्र बहुनोक्तेन, सर्वसौभाग्य सम्पदा ।
लभते नात्र सन्देहो, नान्यथा वचनं भवेत् ॥५॥
ग्रहीतो यदि वा यत्नं, बालानां विविधैरपि ।
शीतं समुष्णतां याति, उष्णः शीतमयो भवेत् ॥६॥
नान्यथा श्रुतये विद्या, पठति कथितं मया ।
भोज-पत्रे लिखेद् यंत्र, गोरोचनमयेन च ॥७॥
इमां विद्यां शिरो बध्वा, सर्वरक्षाकरोतु मे ।
पुरुषस्याथवा नारी, हस्ते बध्वा विचक्षणः ॥८॥
विद्रवन्ति प्रणश्यन्ति, धर्मस्तिष्ठति नित्यशः ।
सर्वशत्रुरधो यान्ति, शीघ्रं ते च पलायनम् ॥९॥

''**श्रीभृगु-संहिता**'' के ''**सर्वाष्टि-निवारण-खण्ड** '' में इस अनुभृत स्तोत्र के ४० पाठ करने की विधि बताई गई है। इस पाठ के फल स्वरूप पुत्रहीन को पुत्र की प्राप्ति होती है और जिसका विवाह नही होता है उसका विवाह हो जाता है। इसके अतिरिक्त इस स्तोत्र के पाठ के प्रभाव से सभी प्रकार के दोषों- ज्वर, क्षय, कुष्ठ, वात-पित्त-कफ की पीड़ाओं और भूतादिक सभी बाधाओं का निवारण होता है ।

इस स्तोत्र का पाठ यदि स्वयं अपने लिए करना हो तो '**मम**' या '**मम स-कुटुम्बस्य**' शब्द का उच्चारण करे और यदि किसी **अन्य (यजमान)** के लिए पाठ करना हो तो स्तोत्र में जहाँ **यजमान** शब्द लिखा है वहाँ उसके **नाम, गोत्रादि** का उच्चारण करना चाहिये।

किसी भी देवता या देवी की **प्रतिमा या यंत्र** के सामने बैठकर धूप दीपादि से उसका पूजन कर इस स्तोत्र का पाठ करना चाहिये। विशेष लाभ की इच्छा हो तो **स्वाहा और नमः** का उच्चारण करते हुये **घृत-मिश्रित गुग्गुल** से आहुतियाँ दे

सकते हैं। ऐसा करने से अभीष्ट कामना की पूर्ति शीघ्र और अवश्य होती है। इसके पाठ से निर्धन को धन और बेरोजगार को जीविका का साधन-नौकरी, व्यापार आदि की सुविधा प्राप्त होती है। यह अनुभूत प्रयोग है।

॥ सर्वग्रह पीड़ा निवारण तांन्त्रिक प्रयोगः॥

आक, धतूरा, अपामार्ग, दूर्वा, वट इन सब की जड़ें, खेजड़ी, आम, गूलर के पत्ते इन सबको एक मिट्टि के बर्तन में रखकर दूध, घृत, चावल, चना, मूंग, गेंहू, तिल, गौमूत्र, सरसों, चन्दन, शहद और छाछ उसी पात्र में एकत्र कर शनिवार को सायंकाल के समय पीपल के वृक्ष की जड़ में गड्ढा खोदकर गाड़ देवें और उसी समय पीपल के वृक्ष के नीचे या देवालय में जाकर निम्न मन्त्र का सहस्त्र जप करें-

ॐ नमो भगवते भास्कराय अस्माकं सर्व ग्रहाणां पीड़ा नाशनं कुरु कुरु स्वाहा॥

इस मंत्र का दश सहस्त्र जप करे तो ग्रहों का उपद्रव नष्ट हो जाते हैं और महादरिद्रीयोग भी मिट जाते हैं। दत्तात्रेय तंत्र में इस प्रयोग का मूल पाठ लिखा है।

॥ बन्दीमोचन मंत्रप्रयोगः॥

विनियोगः- **ॐ अस्य श्री बन्दीमोचन स्तोत्रमंत्रस्य श्रीकण्व ऋषिः, त्रिष्टुप् छन्दः, श्रीबन्दी देवीदेवता, ह्रीं बीजं, हूं कीलकं, मम बन्दीमोचनार्थे जपे विनियोगः।**

ऋष्यादिन्यासः- **श्रीकण्व ऋषये नमः शिरसि, त्रिष्टुप् छन्दसे नमः मुखे, श्रीबन्दी देवीदेवतायै नमः हृदि, ह्रीं बीजाय नमः गुह्ये, हूं कीलकाय नमः पादयोः, मम बन्दीमोचनार्थे जपे विनियोगाय नमः सर्वाङ्गे।**

मंत्र- **ॐ ह्रीं हूं बन्दीदेव्यै नमः। अष्टोत्तरशतं जपः।**

बन्दी देव्यै नमस्कृत्य वरदाभय-शोभिनीम् ।
तदाज्ञां शरणं गच्छत् शीघ्रं मोचं ददातु मे ॥
बन्दी कमल-पत्राक्षी लौहशृङ्खला-भञ्जिनीम् ।
प्रसादं कुरु मे देवि! शीघ्रं मोचं ददातु मे ॥
त्वं बन्दी त्वं महामाया त्वं दुर्गा त्वं सरस्वती ।
त्वं देवी रजनी चैव शीघ्रं मोचं ददातु मे ॥

संसार-तारिणी बन्दी सर्वकामप्रदायिनी ।
सर्वलोकेश्वरी देवि शीघ्रं मोचं ददातु मे ॥
त्वं ह्रीं त्वमीश्वरी देवि ब्रह्माणी ब्रह्मवादिनी ।
त्वं वै कल्पक्षयं कर्त्री शीघ्रं मोचं ददातु मे ॥
देवी धात्री धरित्री च धर्म शास्त्रार्थ-भाषिणी,
दुःश्वासाम्ब-रागिणी देवी शीघ्रं मोचं ददातु मे ॥
नमोऽस्तुते महालक्ष्मी रत्नकुण्डलभूषिता ।
शिवस्यार्धाङ्गिनी चैव शीघ्रं मोचं ददातु मे ॥
नमस्कृत्य महादुर्गा भयात्तु तारिणीं शिवां ।
महादुःखहरां चैव शीघ्रं मोचं ददातु मे ॥
इदं स्तोत्रं महापुण्यं यः पठेन्नित्यमेव च ।
सर्वबन्धविनिर्मुक्तो मोक्षं च लभते क्षणात् ॥

हवन विधि : कमल-गट्टा, गाय का घी, शुद्ध शहद, मिश्री, हल्दी एवं लाल चन्दन के चूर्ण को मिश्रित कर उससे जप संख्या का दशांश हवन करना चाहिए।

॥ सर्पभयनाशक मनसा स्तोत्रम् ॥

जिस स्थान में सर्पभय अधिक रहता है वहाँ पर इस स्तोत्र का पाठ करके निवास करना चाहिये।

ध्यानम्–

चारु-चम्पकवर्णाभां सर्वाङ्गसुमनोहराम् ।
नागेन्द्रवाहिनीं देवीं सर्वविद्याविशारदाम् ॥

॥ श्रीनारायण उवाच ॥

नमः सिद्धिस्वरूपायै वरदायै नमो नमः ।
नमः कश्यपकन्यायै शङ्करायै नमो नमः ।
बालानां रक्षणकर्त्र्यै नागदेव्यै नमो नमः ।
नमः आस्तीकमात्रे ते जरत्कार्व्यै नमो नमः ।
तपस्विन्यै च योगिन्यै नागस्वस्त्रे नमो नमः ।
साध्व्यै तपस्यारूपायै शम्भुशिष्ये च ते नमः ॥

॥ फलश्रुति ॥

इति ते कथितं लक्ष्मी! मनसाया स्तवं महत् ।
यः पठति नित्यमिदं, श्रावयेद् वापि भक्तितः ।
न तस्य सर्पभीतिर्वै विषोऽप्यमृतं भवति ।
वंशजानां नागभयं नास्ति श्रवणमात्रतः ॥

॥ सर्प भयनिवारण मन्त्र ॥

ॐ जरले नृसिंह करले दूत कालू कालू नृसिंह बैरी खैंरदारी तुकमाही नहीं बांधे छः बांधे छः हाकूवाल डाकूवाल बड़ेलबडियाल सांप चोर कांटा गज्जा वाघमूल तुकमाही नहीं बांधे छः राम लक्ष्मण सीतामाता हनुमान नृसिंह से परे हंकार।

यह मन्त्र जहाँ सर्प हो या सर्प का भय हो वहाँ तीन-चार बार ऊँचे स्वर में पढ़ने पर सर्प नहीं आ सकेगा। जहाँ तक मंत्र का स्वर जायेगा वहाँ तक उस सीमा में सर्प नहीं आयेगा। यदि कोई सर्प आवाज की सीमा के अन्दर रह जायेगा तो वह अन्धा हो जायेगा। जब वह स्थान छोड़ देवें तो '**बांधे छः बांधे छः**' के स्थान पर '**खोले छः खोले छः**' लगाकर उसी प्रकार तीन बार मन्त्र उच्चारण करें तो सर्पों के आवागमन का मार्ग खुल जायेगा। यह अनुभूत प्रयोग है।

॥ दुःस्वप्न–नाशक प्रयोग ॥

१. विष्णुं नारायणं कृष्णं रामं च श्रीहरिं शिवम् ।
श्रियं लक्ष्मीं राधिकां जानकीं प्रभां च पार्वतीम् ॥
जपन् द्वादश दुःस्वप्नः सत्फलदः प्रजायते ॥

विधि– दुःस्वप्न दिखने पर उक्त बारह नामों का १२ बार स्मरण करने से दुःस्वप्न शुभ फलदायक हो जाता है।

२. **ॐ ह्रीं श्रीं क्लीं दुःख-हन्त्यै दुर्गायै ते नमः स्वाहा।**

विधि– उक्त श्रीदुर्गा मंत्र का दस बार जप करने से दुःस्वप्न भी शुभ फल देते है।

॥ शत्रुनाशक हनुमत् शाबरमन्त्र ॥

ॐ नमो आदेश गुरु को अंजनी बृहमानी तेजवन्ती वृजवन्ती हीया मोड़ संखला तोड़ आओ हनुमन्त वीर बाजंता गाजंता घडघडता अंजनी का पुत्र श्रीराम का बाण सीता सति का जण छेली पलराम की इठ्यासी कालया की

चोसठ जोगणी की हुँकार बाजे मारकर रार दुश्मन गले लगे गीत फांस नारसिंह कालका काल रावण को लागे मेरा हूंकारिया काल सदा फिरे नहीं फिरे तो माता अंजनी का दूध पिया हराम करे, सीता माता की सेज पर पाँव धरे राम के सिर गाम घाले मेरी भक्ति गुरु की शक्ति चलो मन्त्र ईश्वरो वाच:।

रविवार, मंगलवार, शुक्रवार, शनिवार, हनुमानजी के सामने बैठकर साधना करें, खासकर नवरात्रि में त्रिकाल साधना करनी चाहिये। १२१ गोली गुग्गल की होमे। अगर तीन दिन में हनुमानजी दर्शन नहीं देवें तो सिन्दुर मालीपन्ना का होम करना चाहिये। किन्तु स्मरण रहे मालीपन्ना हनुमानजी के वस्त्र हैं अत: इससे वे क्रोधित हो सकते हैं, इस हेतु जप शुरु करने से पहले और पश्चात् चोला चढ़ाना चाहिये। हनुमानजी जब उग्र होते हैं तो श्रीराम का कीर्त्तन करने से शांत हो जाते हैं।

॥ ऋणमुक्ति और लक्ष्मी प्राप्ती प्रयोग ॥

मन्त्र: - ॐ ह्रीं श्रीं क्लीं चिरचिर गणपतिवर वरदेयं मम वांछितार्थ कुरु कुरु स्वाहा।

अंगार की चतुर्थी के दिन नित्यकर्म से निवृत्त हो विधिवत् श्रीगणपति का पूजन कर उपर्युक्त मन्त्र का दश सहस्र जप करें,पश्चात् हवन करें। हवन में गुग्गल डालें १०१ रक्त करबीर पुष्प १०१ लड्डू (चूरमा) ये तीनों वस्तुयें एकत्रित कर उपर्युक्त मन्त्र से १०८ आहुति देवें। पूर्णाहुति सुपारी से देवें। पुन: श्रीगणपति का विधिवत गन्ध पुष्पादि द्वारा पूजन करें और २१ लड्डूओं का नैवेद्य करें। पश्चात् दक्षिणा आरती मन्त्र पुष्पांजलि की प्रणामादि करके लड्डूओं का भोजन करें और शुद्ध आचमन करके उपर्युक्त मन्त्र का पुन: १०८ बार जप करके आसन से उठें। जपारंभ से लेकर अंतिम १०८ बार जप करने तक एक ही आसन पर बैठे रहें तो विशेष लाभप्रद है। हवन में केवल पलाश की समिधा लेना, कार्यारम्भ से अन्त तक घृत दीप प्रज्जवलित रहना चाहियें। इस प्रकार तीन पुरश्चरण करने पर लक्ष्मी प्राप्ति, इष्ट सिद्धि धन धान्य वृद्धि अवश्य होती है। ऋणग्रस्त हो तो ऋणमुक्त होवें।

॥ व्यापार व धनप्राप्ति का मन्त्र ॥

ॐ नमो ह्रीं श्रीं क्रीं श्रीं क्लीं क्लीं श्रीं लक्ष्मी मम गृहे धनचिंता दूर करोति स्वाहा।

विधानम् - प्रात:काल बिना किसी से बोले मुँह धोकर १०८ मंत्र बार जप करें तो धनधान्य की वृद्धि हो।

॥ अभिष्ट धनप्राप्ति के लिये ॥

ॐ ह्रीं श्रीं त्रिभुवन स्वामिनि महादेवि महालक्ष्मी ल ल ल ल हं हः महाप्रभुत्वमर्थ कुरु कुरु ह्रीं नमः।

विधानम् - प्रतिदिन पंचोपचार से लक्ष्मी का पूजन कर १०८ बार जप करने से अभीष्ट लाभ होगा। शुभमुहुर्त्त में जप करें अर्द्धरात्रि में जप करें तो ३ मास में इसका चमत्कार प्रत्यक्ष दिखाई देगा।

॥ भाग्योदय यंत्र ॥

इस यंत्र को अष्टगंध से भोजपत्र पर अनार की कलम से लिखकर धूपदीप नैवेद्य लगाकर ताबीज में भर लें दाहिनी भुजा में बांधें।

ऐसे व्यक्ति जिनका भाग्य सो गया हो जो कार्य करे उसी में असफलता मिलती हो तथा जीवन निराशामय हो गया हो उन्हें यह यन्त्र अवश्य धारण करना चाहिये। इससे सभी कार्यो में सफलता मिलेगी इसमें संदेह नहीं है।

इस यंत्र को सिद्ध करने के लिये दीपावली, होली की रात्रि तथा ग्रहण समय भोजपत्र पर अष्टगंध से १०८ बार लिखें। वैसे एक बार ही लिखकर बाँधने से फल मिलता है पर न्यून।

॥ लक्ष्मीदाता सिद्ध मन्त्र ॥

यह प्रयोग भगवान शंकर का है। श्रावण कृष्णा प्रतिप्रदा से प्रारंभ करें। भृशय्या एवं नक्त भोजनादि पुरश्चरण नियमों के पालन कर पूर्णिमा पर्यन्त शिवलिङ्ग मन्दिर में ११, २१, ४१, ५१, १०१, १११ आदि निश्चित संख्या में अर्क पुष्पों से पंचाक्षरी मन्त्र (नमः शिवाय) द्वारा अर्चन करें पुनः अखण्ड १०८ विल्वपत्रों पर तीनों पर अलग अलग रक्त चंदन से मालती पर दाड़िम की लेखनी से निम्नांकित यंत्र अंकित कर प्रत्येक विल्व पत्र को उसी पंचाक्षरी मंत्र द्वारा शिवलिङ्ग पर अर्पित करें। तीसदिन के प्रयोग से निश्चय धनागमन होना पुनः प्रारंभ होगा। इसमें संदेह नहीं आज तक यह प्रयोग असफल

वं	वं	वं	वं
पं	पं	पं	पं
दं	दं	दं	दं
लं	लं	लं	लं

नहीं हुआ है। परन्तु ध्यान रखें कि अर्क पुष्पों की संख्या व विल्वपत्रों की संख्या में व समय में मास पर्यन्त कोई परिवर्तन नहीं हो।

॥ धनप्राप्ती हेतु हनुमत् प्रयोगः॥

मन्त्र - **ॐ श्रीं ह्रीं क्लीं अंजनी सुताय विद्महे वायुपुत्राय धीमहि तन्नो हनुमत् प्रचोदयात्॥**

विधानम् - साधक मंगल या शनिवार को अपना चन्द्र बल शुभ मुहुर्त में देखकर इस प्रयोग को प्रारंभ करें। इस मन्त्र का २१ दिन में सवा लाख जप करें। साधक पूर्वाभिमुख होकर ६० माला प्रतिदिन करें। मालपूवे का भोग लगावें उसी भोग का स्वयं पावे और कुछ नहीं खावें। एक समय भोजन करें। जपारंभ में मूर्ति पर चोला चढ़ावें, ब्रह्मचर्य से रहें। शुद्ध आचरण से जप करने पर एक नाग के दर्शन होंगे जो कार्य संपन्न होने का प्रतीक है। दर्शन होने के बाद साधक को धन का अभाव नहीं रहता, इस में संदेह नहीं है।

॥ ऋणमोचन प्रयोगः॥

खेर (कत्था) की लकड़ी के कोयले से तीन आड़ी रेखायें भूमि पर खीचें। फिर नीचे लिखें मन्त्रों को पढ़ते हुये बायें पैर की एडी से मिटा दें।

मन्त्र -

दुःखदौर्भाग्यनाशाय पुत्रसंतान हेतवे ।
कृतरेखात्रयं वामपादेनैतत्प्रमाज्मर्यहम् ॥१॥
ऋण दुख विनाशाय मनोभीष्टार्थ सिद्धये ।
मार्जयाम्या सिता रेखातिस्त्रो जन्मत्रयोदयभवा ॥२॥

इतना कर लेने के बाद मंगल के चरण कमलों का ध्यान करते हुये स्तुति करें-

धरणीगर्भसंभूतं विद्युत्तेजः समप्रभम् ।
कुमारं शक्तिहस्तं च मंगल प्रणमाम्यहम् ॥१॥
ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ।
नमामि द्योतमानाय सर्वकल्याणकारिणे ॥२॥
देव दानव गंधर्व यक्ष राक्षसपन्नगा ।
सुखं यान्ति यतस्तस्मै नमो धरणिसूनवे ॥३॥

यो वक्रगति मायन्त्रो नृणां विघ्नं प्रयच्छति ।
पूजितः सुखसौभाग्य तस्मै क्ष्मासूनवे नमः ॥४॥
प्रसादं कुरु मे नाथ मंगलप्रद ।
मंगल मेषवाहन रुद्रात्मन। पुत्रान् देहि धनं यश ॥५॥

विधानम् - प्रतिदिन या केवल मंगलवार को ही यह विधान करने से शीघ्र ऋण मुक्ति होवें।

॥ ऋणहर–धनप्रद मंगल स्तोत्रम्॥

विनियोगः - ॐ अस्य श्री भौम-स्तोत्रस्य श्रीगर्ग ऋषिः। त्रिष्टुप् छन्दः। मंगलो देवता। ऋण-हरणे धन-प्राप्त्यर्थे च विनियोगः।

ऋष्यादिन्यासः - ॐ श्रीगर्ग-ऋषये नमः शिरसि। त्रिष्टुप् छन्दसे नमः मुखे। मंगल देवतायै नमः हृदि। ऋण-हरणे धन-प्राप्त्यर्थे च विनियोगाय नमः अञ्जलौ।

ध्यानम्–

रक्ताम्बरो रक्तवपुः किरीटी चतुर्भुजो मेषगदो गदाभृत् ।
धराम्,ः शक्तिधरश्च शूली सदा मम स्याद् वरदः प्रशान्तः ।

॥ स्तोत्रम् ॥

ॐ मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रदः ।
स्थिरात्मजो महाकायः सर्वकामार्थसाधकः ॥१॥
लोहितो लोहिताङ्गश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूमिदो भूमिनन्दनः ॥२॥
अङ्गारको यमश्चैव सर्वरोगापहारकः ।
वृष्टिकर्त्ताऽपहर्त्ता च सर्वकाम फलप्रदः ॥३॥

॥ फलश्रुति ॥

एतानि कुजनामानि प्रातरुत्थाय यः पठेत् ।
ऋणं न जायते तस्य धनं प्राप्नोति असंशयः ॥४॥
अङ्गारकोऽति बलवानपि यो ग्रहाणां
स्वेदोद्भवः त्रि-नयनस्य पिनाकपाणेः ।

आरक्त-चन्दन-सुशीतलवारिणा यः ।
अभ्यर्चितोऽथ विपुलां प्रददाति सिद्धिम् ॥५॥

॥ पुष्पाञ्जलि ॥

ॐ धरणीगर्भ सम्भूतं विद्युत्कान्ति समप्रभम् ।
कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥१॥
ऋणहर्त्रे नमस्तुभ्यं दुःखदारिद्र्यनाशिने ।
नभसि द्योतमानाय सर्वकल्याणकारिणे ॥२॥
देव-दानव-गंधर्व यक्ष-राक्षस-पन्नगाः ।
सुखं यान्ति यतस्तस्मै नमः धरणिसूनवे ॥३॥
यो वक्रगतिमापन्नो नृणां दुःखं प्रयच्छति ।
पूजितः सुखसौभाग्यं तस्मै क्ष्मासूनवे नमः ॥४॥
प्रसादं कुरु मे नाथ! मङ्गलप्रद मङ्गल !
मेषवाहन रुद्रात्मन्! सुखं देहि धनं यशः ॥५॥
स्तोत्रमङ्गारक स्येतत्पठनीयं सदा नृभिः ।
न तेषां भौमजा पीड़ा स्वल्पाऽपि भवति क्वचित् ॥६॥
अङ्गारक महाभाग भगवन्भक्त वत्सलं ।
त्वां नमामि ममाशेषमृणमाशु विनाशय ॥७॥
ऋणरोगादि दारिद्रयं ये चान्ये ह्यल्पमृत्यु
भयक्लेश-मनस्तापा नश्यन्तु मम सर्वदा ॥८॥
अतिवक्रदुराध्य भोगमुक्तजितात्मनः ।
दुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥९॥
विरिञ्च शक्र विष्णुनां मनुष्याणां तु स्त्रिस्तथा ।
तेन सर्वसहजेन ग्रहराजो महाबलः ॥१०॥
पुत्रान् देहि धनं देहि त्वमामि शरणं गतः ।
ऋणदारिद्रय दुःखश्च शत्रुणां तु व्यपोहतो ॥११॥

॥ अभिषेक के २१ मंत्र ॥

१.ॐ मङ्गलाय नमः। २.ॐ भूमिपुत्राय नमः। ३.ॐ ऋणहर्त्रे नमः। ४.ॐ धनप्रदाय नमः। ५.ॐ स्थिरात्मजाय नमः। ६.ॐ महाकायाय नमः। ७.ॐ सर्वकामार्थ साधकाय नमः। ८.ॐ लोहिताङ्गाय नमः। ९.ॐ लोहिताक्षाय

नमः। १०. ॐ सामगानां कृपाकराय नमः। ११.ॐ धरात्मजाय नमः। १२.ॐ कुजाय नमः। १३.ॐभौमाय नमः। १४.ॐ भूमिदाय नमः। १५.ॐ भूमिनन्दनाय नमः। १६.ॐ अङ्गारकाय नमः। १७.ॐ यमाय नमः। १८.ॐ सर्वरोगापहारकाय नमः। १९.ॐ वृष्टिकर्त्रे नमः। २०.ॐ वृष्ट्यपहर्त्रे नमः। २१.ॐ सर्वकाम-फलप्रदाय नमः।

॥ भण्डारवृद्धि मंत्र ॥

मन्त्र - ॐ ह्रीं श्रीं आं ऐं लक्ष्मी स्वाहा

इस मन्त्र से सर्वधान्य २१ बार अभिमन्त्रित कर पोटली बाँधकर अन्न भण्डार कोठार या बड़े बर्त्तन में रख दें तो वह अपना फल दिखायेगा।

॥ वैभवायुर्दाता मंत्रम् ॥

ॐ सं मा सिञ्जन्त्वादित्याः सं मा सिञ्जन्त्वग्न्यः ।
इन्द्रः समस्यान् सिञ्चतु प्रजया च धनेन च ।
दीर्घमायुः कृणोतु मे ॥ (अथर्व० पैप्प० ६ १८ २)

सर्वप्रथम इस मंत्र का २१ सहस्त्र जप कर सिद्ध कर लेवे इसके उपरान्त

'' **ॐ सं मा सिञ्चन्तु मरुतः सं पूषा सं वृहस्पतिः । सं मा यमाग्निः सिंचन्तु प्रजया च धनेन च। दीर्घमायुः कृणोतु मे**''। (अथर्व० पैप्प० ६ १८ १) इस मंत्र को तामपत्र पर लिखकर विधिपूर्वक षोडशोपचार पूजन कर प्रतिष्ठा कर लेवें। इससे ऐश्वर्य सुख की वृद्धि होती है। आयुवृद्धि के लिये अनुष्ठान करें तो इसके यंत्र की पूजा करनी चाहियें। गुरु , सोम, बुध के दिन इसका अनुष्ठान प्रारंभ करें। मांगलिक पदार्थों एवं इस यंत्र की पूजा कर लकड़ी या ऊन के आसन पर बैठकर रूद्राक्ष की माला पर ३ सहस्त्र जाप सात दिन तक नियमित रूप से करें। सातवे दिन २१०० मंत्रों से शुद्ध घी एवं अष्टगंधादि से हवन करने से निश्चय हि आयु की वृद्धि होती है अर्थात् वह जातक मृत्यु भय से मुक्ति को प्राप्त होता है। वाणिज्य (व्यापार) में लाभ प्राप्त करने के लिये उपरोक्त विधि से अनुष्ठान कर २१०० आहूतियों से हवन करना चाहिये। संतान सुख के लिये भी २१०० [illegible] से हवन करें। उपरोक्त मंत्र धन धान्य, आयु, एवं सन्तान सुख का [illegible] वाले है।

॥ वरुणमन्त्र प्रयोगः॥

(ऋण नाश एवं वृष्टिकामना हेतु)

त्रिचत्वारिंशदक्षरोमन्त्रः - ॐ ध्रुवासु त्वासु क्षितिषु क्षियंतो व्य ᳚ स्मत्पाशं वरुणो मुमोचत्। अवो वन्वाना अदितेरुपस्थाद्यूयंपात स्वस्तिभिः सदा नः स्वः।

विनियोगः - अस्य वरुणमन्त्रस्य वसिष्ठ ऋषिः। त्रिष्टुप्छंदः। वरुणो देवता। सर्वेष्टसिद्धये जपे विनियोगः।

ऋष्यादिन्यासः - ॐ वसिष्ठऋषये नमः शिरसि। त्रिष्टुप्छन्दसे नमः मुखे। वरुण देवतायै नमः हृदि। विनियोगाय नमः सर्वाङ्गे।

करन्यासः - ॐ ध्रुवासुत्वासुक्षितिषु इत्यंगुष्ठाभ्यां नमः। क्षियंतो व्यस्मत्पाशम् इतितर्जनीभ्यां नमः। वरुणो मुमोचदिति मध्यमाभ्यां नमः। अवो वन्वाना अदितेरिति अनामिकाभ्यां नमः। उपस्थाद्यूयंपात इति कनिष्ठिकाभ्यां नमः। स्वस्तिभिः सदा नः स्वः इति करतलकरपृष्ठाभ्यां नमः।

हृदयादिषडङ्गन्यासः - ॐ ध्रुवासुत्वासुक्षितिषु हृदयाय नमः। क्षियंतो व्यस्मत्पाशं शिरसे स्वाहा। वरुणो मुमोचत् शिखायै वषट्। अवो वन्वाना अदितेः कवचाय हुम्। उपस्थाद्यूयंपात नेत्रत्रयाय वौषट्। स्वस्तिभिः सदाः नः स्वः अस्त्राय फट्।

॥ मन्त्रवर्णन्यासः ॥

ॐ ध्रं नमः ध्रुं। दक्षपादाङ्गुल्यग्रे ॥१॥ ॐ वां नमः। दक्षपादांगुलिमूले ॥२॥ ॐ सुं नमः। दक्षगुल्फे ॥३॥ ॐ त्वां नमः। दक्षजानुनि ॥४॥ ॐ सुं नमः। दक्षपादमूले ॥४॥ ॐ क्षिं नमः। वामपादांगुल्यग्रे ॥६॥ ॐ तिं नमः। वामपादांगुलिमूले ॥७॥ ॐ षुं नमः। वामगुल्फे ॥८॥ ॐ क्षिं नमः। वामजानुनि ॥९॥ ॐ यं नमः। वामपादमूले ॥१०॥ ॐ तों नमः। गुदे ॥११॥ ॐ व्यं नमः। लिङ्गे ॥१२॥ ॐ स्मं नमः। आधारे ॥१३॥ ॐ त्पां नमः। नाभौ ॥१४॥ ॐ शं नमः। दक्षिणकुक्षौ ॥१५॥ ॐ वं नमः। वामकुक्षौ ॥१६॥ ॐ रुं नमः। पृष्ठे ॥१७॥ ॐ णों नमः। हृदि ॥१८॥ ॐ मुं नमः। दक्षिणस्तने ॥१९॥ ॐ मों नमः। वामस्तने ॥२०॥ ॐ चं नमः। गले ॥२१॥ ॐ अं नमः। दक्षिणहस्तांगुल्यग्रे ॥२२॥ ॐ वों नमः। दक्षिणहस्तांगुलिमूले ॥२३॥ ॐ त्रं नमः। दक्षिणमणिबन्धे ॥२४॥ ॐ न्वां नमः। दक्षिणकूर्परे ॥२५॥ ॐ

नां नमः। दक्षबाहुमूले ॥२६॥ ॐ अं नमः। वामहस्तांगुल्यग्रे ॥२७॥ ॐ दिं नमः। वामहस्तांगुलिमूले ॥२८॥ ॐ तें नमः। वाममणिबन्धे ॥२९॥ ॐ रुं नमः। वामकूर्परे ॥३०॥ ॐ पं नमः। वामबाहुमूले ॥३१॥ ॐ स्थां नमः। वक्रे ॥३२॥ ॐ द्यूं नमः। दक्षकपोले ॥३३॥ ॐ यं नमः। वामकपोले ॥३४॥ ॐ पां नमः। दक्षिणनासापुटे ॥३५॥ ॐ तं नमः। वामनासापुटे ॥३६॥ ॐ स्वं नमः। दक्षिणनेत्रे ॥३७॥ ॐ स्तिं नमः। वामनेत्रे ॥३८॥ ॐ भिं नमः। दक्षिणकर्णे ॥३९॥ ॐ सं नमः। वामकर्णे ॥४०॥ ॐ दां नमः। भ्रूमध्ये ॥४१॥ ॐ नं नमः। मस्तके ॥४२॥ ॐ स्वं नमः। शिरसि ॥४३॥

ध्यानम्

ॐ चन्द्रप्रभं पङ्कजसन्निषण्णं पाशाङ्कुशाभीतिवरं दधानम्।
मुक्ताविभूषांचितसर्वगात्रं ध्यायेत्प्रसन्नं वरुणं विभूत्यै ॥

इस प्रकार मानसिक पूजन करें। सर्वतोभद्रमण्डल पर मण्डूक आदि पीठ देवताओं की स्थापना करें ॐ मं मण्डूकादिपरतत्वांतपीठदेवताभ्यो नमः।

उसके बाद सोने या ताम्र से निर्मित मूर्ति का घृत से अभ्यजन करें। पश्चात् दुग्धधारा, जलधारा से अभिषेक कर स्वच्छ वस्त्र से पौंछें और पुष्पों के आसन पर यन्त्र के मध्य में स्थापना करें। देवता से आवरण पूजा की आज्ञा माँगे।

वरुण यन्त्रम्

प्रथमावरणम् - षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षुमध्ये दिक्षुच - ॐ हृदयाय नमः। हृदय श्री पादुकां पूजयामि तर्पयामि नमः। इति सर्वत्र ॥१॥ ॐ शिरसे स्वाहा। शिरः श्री पा०। ॐ शिखायै वषट्। शिखाश्री पा०। ॐ कवचाय हुम्। कवचश्री पा०। ॐ नेत्रत्रयाय वौषट्। नेत्रत्रयश्री पा०। ॐ अस्त्राय फट्। अस्त्रश्री पा०।

पुष्पाञ्जलि मादाय -

ॐ अभीष्ट सिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

द्वितीयावरणम् – ततोऽष्टदलेषु पूज्यपूजक योरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण **ॐ शेषाय नमः। शेषश्री पा०। ॐ वासुकये नमः। वासुकिश्री पा०। ॐ तक्षकाय नमः। तक्षकश्री पा०। ॐ कर्कोटकाय नमः। कर्कोटकश्री पा०। ॐ पद्माय नमः। पद्मश्री पा०। ॐ महापद्माय नमः। महापद्मश्री पा०। ॐ शङ्खपालाय नमः। शङ्खपालश्री पा०। ॐ कुलिकाय नमः। कुलिकश्री पा०।**

पुष्पाञ्जलि देवें – अभीष्टसिद्धिं........द्वितीयावरणाचर्नम्॥

तृतीयावरणम् – **भूपूरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च सम्पूज्य।**

पुष्पाञ्जलि देवें – अभीष्टसिद्धिं........ तृतीयावरण चर्नम्॥ ॐ पूजितास्तर्पिता सन्तु से जल छोड़ें।

इस मन्त्र का पुरश्चरण १ लाख जप का है। तथा दशांश हवन, तर्पण कर ब्राह्मण भोजन करायें।

॥ फलश्रुति ॥

सिद्धे मन्त्रे मन्त्री प्रयोगान् साधयेत् ।
तथा च लक्षमेकं जपेन्मन्त्रं पायसेन दशांशतः ।
सर्पिःसिक्तेन जुहुयान्मन्त्री मन्त्रस्य सिद्धये ॥१॥
ऋणमुक्त्यै जपेन्मन्त्रं प्रत्यहं साष्टकं शतम् ।
जपेनानेन लभते महतीमव्ययां श्रियम् ॥२॥
सितेक्षुशकलैर्मंत्री जुहुयाद्धृतसंप्लुतैः ॥
चतुर्दिनं दशशतमृणमुक्त्यै महाश्रियै ॥३॥
समिद्भिर्वेतसोत्थाभिः क्षीराक्ताभिर्दिनत्रयम् ।
जुहुयाद्वृष्टिसंसिद्ध्यै मन्त्रविद्विजितेन्द्रियः ॥४॥
अनेन विधिना मन्त्री सूर्ये शतभिषं गते ।
चतुःशतं घृतयुतं पायसं जुहुयाद्वशी ॥५॥
ऋणनाशाय संपत्त्यै वश्यारोग्याभिवृद्धये ।
भृगुवारे कृतो होमः पायसेन ससर्पिषा ।
महतीं संपदं कुर्यान्नाशयेत्सकलापदः ।
शालिभिघृतसंसिक्तैः सरिदंतरितः सुधीः ॥७॥
त्र्यहं चतुःशतं हुत्वा स्तंभयेत्परसैन्यकम् ।

सायं प्रत्यङ्मुखो वह्निमाराध्य प्रजपेन्मनुम् ॥८॥
चतुःशतं विमुच्येत मन्त्री सर्वैरुपद्रवैः ।
मन्त्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैजलैः ॥९॥
सर्वोपद्रवनाशाय समस्ताभ्युदयाप्तये ।
बहुना किमिहोक्तेन मन्त्रेणानेन साधकः ।
साधयेत्सकलान् कामाञ्जपहोमादितत्परः ॥१०॥

॥ इति वरुणत्रिचत्वारिंशदक्षरमन्त्र प्रयोगः ॥

१.॥ अनावृष्टिशमन प्रयोगः॥

(वरुण यन्त्र प्रयोगः २)

अकाल पड़ने पर इन्द्र को प्रसन्न करने के लिये वरुण मण्डल बनाकर ४९ मेघों का पूजन, इन्द्र का पूजन मन्त्रजप, वरुणमन्त्र जाप किया जाता है।

वरुण मन्त्र जप नाभि पर्यन्त जल में अथवा गीले वस्त्रों सहित करने पर शीघ्र फल देता है।

॥ वारुणसूक्तम् ॥

ॐ हिरण्यवर्णाः शुचय पावकाया सुजातः कश्यपो या स्विन्द्रः ।
अग्निं या गर्भदधिरे विरूपास्तान आपः श ठं स्योना भंवतु ॥१॥
ॐ या सा ठं राजा वरुणो याति मध्ये सत्यानृत अवपश्यं जनानाम् ।
मधुश्युतः शुचयोयाः पावकास्तान आप श ठं श्योना भवंतु ॥२॥
या सां देवादिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति ।
याः पृथिवीं पयसो दंति शुक्रास्तान आपः श ठं स्योनाभवंतु ॥३॥
ॐ शिवेन मा चक्षुषा पश्यतापः शिवया तनुवो पस्पृशत्व चं मे ।
सर्वा ठं अग्निं ठं रप्सुषदो हुवेवो मयि वर्चो बल्माजो निधत ॥४॥

वरुणमन्त्रपुरश्चरणम् (शारदातिलके) ॐ ध्रुवासुत्वासक्षितिषुक्षियंतो व्यस्मत्याशंवरुणोमुमोचत्। अवोवन्वानाआदिते रुपस्थाद्यूयं पातस्वस्तिभिः सदानः॥ द्विचत्वारिंशद्वर्णात्मक ऋग्वेदोक्तो मन्त्रः॥ इति॥

विनियोगः – अस्य वरुणमन्त्रस्य वसिष्ठ ऋषिः। त्रिष्टुप् छन्दः। वरुणो देवता। अनावृष्टिशमनार्थे जपे विनियोगः।

ऋष्यादिन्यासः – ॐ वसिष्ठ ऋषये नमः शिरसि। ॐ त्रिष्टुप् छन्दसे नमः मुखे। ॐ वरुणदेवतायै नमः हृदये। विनियोगाय नमः सर्वाङ्गे।

अथ षडङ्गन्यासः – ध्रुवात्वासक्षितिषु हृदयाय नमः। ॐ क्षियंतोव्यस्मत्पाशं शिरसे स्वाहा। ॐ वरुणो मुमोचत शिखायै वषट्। ॐ अवोवन्वाना अदिते कवचाय हुं। ॐ रुपस्थाद्यूयंपात नेत्रत्रयाय वौषट्। ॐ स्वस्तिभिः सदान इत्यस्त्राय फट्।

॥ मन्त्रवर्णन्यासः॥

ॐ ध्रुं नमः दक्षिणपादांगुल्यग्रे। ॐ वां नमः दक्षिण पादांगुलिमूले। ॐ सुं नमः दक्षिणगुल्फे। ॐ त्वां नमः दक्षिणजानुनि। ॐ सं नमः दक्षपादमूले। ॐ क्षिं नमः वामपादांगुल्यग्रे। ॐ तिं नमः वामपादांगुलिमूले। ॐ षुं नमः वामगुल्फे। ॐ क्षिं नमः वामजानुनि। ॐ यं नमः वामपादमूले। ॐ तों नमः गुदे। ॐ ष्यं नमः लिङ्गे। ॐ स्मं नमः नाभौ। ॐ त्यां नमः कुक्षौ। ॐ शं नमः पृष्ठे। ॐ वं नमः हृदये। ॐ रुं नमः दक्षिण स्तने। ॐ णों नमः वामस्तने। ॐ मुं नमः गले। ॐ मों नमः दक्षिणहस्तांगुल्यग्रे। ॐ चं नमः दक्षिणहस्तांगुलिमूले। ॐ अं नमः दक्षिणमणिबन्धे। ॐ वों नमः दक्षिणकूर्परे। ॐ वं नमः दक्षिणबाहुमूले। ॐ न्वां नमः वामहस्तांगुल्यग्रे। ॐ नां नमः वामहस्तांगुलिमूले। ॐ अं नमः वाममणिबन्धे। ॐ दिं नमः वामकूर्परे। ॐ तें नमः वामबाहुमूले। ॐ रुं नमः वक्त्रे। ॐ पं नमः दक्षकपोले। ॐ स्थां नमः वामकपोले। ॐ द्यूं नमः दक्षिणनासिकायाम्। ॐ यं नमः वामनासिकायाम्। ॐ पां नमः दक्षिणनेत्रे। ॐ तं नमः वामनेत्रे। ॐ स्वं नमः दक्षिणकर्णे। ॐ स्तिं नमः वामकर्णे। ॐ भिं नमः भ्रूमध्ये। ॐ सं नमः मस्तके। ॐ दां नमः शिरसि। ॐ नं नमः सर्वाङ्गे।

ध्यानम् –

चन्द्रप्रभं पङ्कजसन्निषण्णं पाशाङ्कुशाभीतिवरं दधानम्।
मुक्ताविभूषांचितसर्वगात्रं ध्यायेत्प्रसन्नं वरुणं विभूत्यै ॥१॥

इस मन्त्र से ध्यान कर मानसोपचार से पूजन करें। धर्मादिपरतत्त्वांतपीठदेवताः पूर्ववत्संपूज्य। मध्ये। मूलेन मूर्तिं प्रकल्प्य। आवहनादिपुष्पांतैरुपचारैर्भगवन्तं वरुणं संपूज्य। यन्त्र की आवरण पूजा करें।

प्रथमावरणम् - तद्यथा (षट्कोणे) प्राचीक्रमेण आग्नेयादिकोणकेसरेषु मध्ये दिक्षु च - ॐ ध्रुवासुत्वासक्षितिषु हृदयाय नमः। ॐ क्षियन्तोव्यस्मत्याशं शिरसे स्वाहा। ॐ वरुणो मुमोचत् शिखायै वषट्। ॐ अवोवन्नवानाअदिते कवचाय हुम्। ॐ रुपस्थाद्यूयम्पात नेत्रत्रयाय वौषट्। ॐ स्वस्तिभिः सदान इत्यस्त्राय फट्। इति षडंगानि पूजयेत्।

वरुण यन्त्रम्

द्वितीयावरणम् - (ततोऽष्टदलेषु प्राचीक्रमेण) - ॐ शेषाय नमः। ॐ वासुकये नमः। ॐ तक्षकाय नमः। ॐ कर्कोटकाय नमः। ॐ पद्माय नमः। ॐ महापद्माय नमः। ॐ शंखपालाय नमः। ॐ कुलिकाय नमः। इति पूजयेत्।

तृतीयावरणम् - (तस्माद्बाह्ये चतुरस्रे भूपुरे पूर्वादिदशदिक्षु) - ॐ लं इन्द्राय नमः। ॐ रं अग्नये नमः। ॐ मं यमाय नमः। ॐ क्षं निर्ऋतये नमः। ॐ वं वरुणाय नमः। ॐ यं वरुणाय नमः। ॐ सं सोमाय नमः। ॐ हं ईशानाय नमः। ॐ ईशानपूर्वयोर्मध्ये - ॐ आं ब्रह्मणे नमः। निर्ऋतिपश्चिमयोर्मध्ये - ॐ अं अनन्ताय नमः। इति पूजयेत्।

चतुर्थावरणम् - (तद्बहिस्तत्तत्समीपे) - ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अङ्कुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः। इत्यादि आयुधों का पूजन करें।

एवमावरणपूजां कृत्वा - धूपदीप नैवेद्यतांबूलदक्षिणानीराजन प्रदक्षिणा नमस्कारैः पूजां समाप्य। यथाविधि वाग्यतो जपं कुर्य्यात्। अस्य पुरश्चरणं लक्षजपः। जपान्ते वृष्टिकामनया वेतेसोत्थाभिः क्षीराक्ताभिः समिद्भिः पायसान्नेन सर्पिः सिक्तेन च दशांश होमं कृत्वा तद्दशांशेन तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशतः यथाशक्ति वा पायसान्नेन ब्राह्मणभोजनं च कार्यम् (शारदातिलके) लक्षमेकं जपेन्मन्त्रं पायसेन दशांशतः। सर्पिः सिक्तेन जुहुयान्मंत्री मन्त्रस्य सिद्धये॥१॥ ऋणमुक्त्यै जपेन्मन्त्रं प्रत्यहं साष्टकं शतम्। जपेनानेन लभते महतीमव्ययां श्रियम्॥२॥ शितेक्षुशकलैर्मंत्री जुहुयाद्घृतसंप्लुतैः। चतुर्दिनं

दशशतमृणमुक्त्यै महाश्रियै ॥३ ॥ समिद्भिर्वेतसोत्थाभिः क्षीराक्ताभिर्दिनत्रयम्। जुहुयाद्वृष्टिसंसिद्ध्यै मन्त्रविद्विजितेन्द्रियः ॥४ ॥ अनेन विधिना मन्त्री सूर्ये शतभिषं गते। चतुःशतं घृतयुतं पायसं जुहुयाद्वशी ॥५ ॥ ऋणनाशाय संपत्यै वश्यारोग्याभिवृद्धये। भृगुवारे कृतो होमः पायसेन च सर्पिषा ॥६ ॥ महती संपद कुर्यान्नाशयेत्सकलापदः। शालिभिर्घृत संसिक्तैः सरिदंतरितः सुधीः ॥७ ॥ त्र्यहं चतुःशतं हुत्वा स्तंभयेत्परसैन्यकम्। सायं प्रत्यङ्मुखो वह्निमाराध्य प्रजपेन्मनुम् ॥८ ॥ चतुःशतं विमुच्येत मन्त्री सर्वैरुपद्रवैः। मन्त्री प्रत्यङ्मुखो भूत्वा तर्पयेद्विमलैर्जलैः ॥९ ॥ सर्वोपद्रवनाशाय समस्ताभ्युदयाप्तये। बहुनाकिमिहोक्तेन मन्त्रेणानेन साधकः ॥१० ॥ साधयेत्सकलान्कामान्जपहोमादितत्परः ॥

२. ॥ अथवृष्टिप्रदविधानं द्वितीयम् ॥

(बृहदृग्विधाने शौनकः)

अच्छावदेति सूक्तं तु वृष्टिकामः प्रयोजयेत् ।
निराहारः क्लिन्नवासा अचिरेण प्रवर्षति ॥१ ॥
हुत्वायुतं वैतसीनां क्षीराक्तानां हुताशने ।
महद्वर्षमवाप्नोति सूक्तेनाच्छावदेन हि ॥२ ॥

अनेन सूक्तेन प्रत्यृचं वा दिश उपस्थेया इति ''सायणभाष्ये''। अथ अच्छावदेति सूक्तं ऋ० अ०४, अ० ४, वर्ग २७।

ॐ अच्छावदतवसंगीर्भिराभिः स्तुहिपर्जन्यं नमसाविवास ।
कनिक्रदद्वृषभोजीरदानूरे - तोदधात्योषधीषुगर्भम् ॥१ ॥
विवृक्षान्हतन्त्युतहन्ति रक्षसोविश्वविभायभुवनं महावधात् ।
उतानागाईषवृष्ण्यावतोयत्पर्जन्यः स्तनयन्हन्तिदुष्कृतः ॥२ ॥
रथीवकशयाश्वां अभिक्षिपन्नाविर्दतान्कृणुतेवर्ष्यां३ अह ।
दूरात्सिंहस्यस्तनथाउदीरतेयत्पर्जन्यः कृणुतेवर्स्यं नमः ॥३ ॥
प्रवातावान्तिपतयन्तिविद्युतउदोषधीर्जिहतेपिन्वतेस्वः ।
इराविश्वस्मैभुवनायजायतेयत्पर्जन्यः पृथिवींरेतसावति ॥४ ॥
यस्यव्रतेपृथिवीनन्नमीतियस्यमीतियस्य व्रतेशफवजर्भुरीति ।
यस्यव्रतओषधीर्विश्वरूपाः सनः पर्जन्यमहिशर्मयच्छ ॥५ ॥

दिवोनोवृष्टिंमरुतोररीध्वं प्रपिन्वतवृष्णोअश्वस्यधाराः ।
अर्वाङ्तेनस्तनयित्नुनेह्यपोनिषिञ्चन्नसुर पितानः ॥६ ॥
अभिक्रंदस्तनय गर्भमाधाउदन्वता परिदीयारथेन ।
दृतिंसुकर्षबिषितन्यञ्चसमा भवन्तूद्वतोनिपादाः ॥७ ॥
महान्तंकोशमुदचानिषिञ्चस्यन्दन्तांकुल्या विर्षिताः पुरस्तात् ।
घृतेनद्यावापृथिवीव्युन्धिसुप्रपाणं भवत्वघ्न्याभ्यः ॥८ ॥
यत्पर्जन्य कनिक्रदत्स्तनयन्हंसिदुष्कृतः ।
प्रतीदंविश्वं मोदतेयत्किं च पृथिव्यामधि ॥९ ॥
अबषीर्वर्षमुदुषूगृभाया कर्धन्वान्यत्येतवाउ ।
अजीजनओषधीर्भोजनाय कमुतप्रजाभ्योविमोदनीषाम् ॥१० ॥

इति दशर्चं सूक्तम्। अनेन सूक्तेन प्रत्यृचं वा अयुतवेतसीनां क्षीराक्तानां होमाच्छीघ्रं वर्षति। होमान्ते इदपर्जन्याय इति त्यागं कुर्यादितिपर्जन्यविधानम्।

३. ॥ अथ तिस्रोवाच इत्यादिसूक्तद्वयविधानम् ॥

(वृष्टिप्रद)

ऋग्विधाने - (शौनकः) - आस्यदघ्नं विगाह्यापः प्राङ्मुखः प्रयतः शुचिः सूक्ताभ्यां तिस्र आदिभ्यामुपतिष्ठेत भास्करम्। अनश्नतैतज्जप्तव्यं वृष्टिकामेन यत्नतः। पञ्चरात्रेऽप्यतिक्रांते महतीं वृष्टिमाप्नुयात्।

विनियोगः - ॐ तिस्रो वाच इत्यादिसूक्तस्य अग्निपुत्रः कुमार ऋषिः वसिष्ठो वा। त्रिष्टुप्छंदः। पर्जन्यो देवता। वृष्टिप्राप्त्यर्थे विनियोगः।

ॐ तिस्रो वाचः प्रवदज्योतिरग्राया एतद्दुह्रेमधुदोघमुधः ।
सवत्संकृण्वन् गर्भमोषधीनां सद्योजातो वृषभो रोरवीति ॥१ ॥
योवर्धनओषधीनां यो अपांयोविश्वस्यजगतोदेवईशे ।
सत्रिधातुशरणं शर्मयंसत्रिवर्तुज्योतिः स्वभिष्ट्य१ स्मे ॥२ ॥
स्तरीरुत्वद्भवति सूतउत्वद्यथावशं तन्वंचक्र एषः ।
पितुः पयः प्रतिगृभ्णातिमातातेन पितावर्धते तेनपुत्रः ॥३ ॥
यस्मिन्विश्वानिभुवनानित स्थुस्तिस्त्रोधावस्त्रेधाससंस्त्रुरापः ।
त्रयः कोशामउपसेचनासोमध्वश्चोतन्त्यभितोविरप्शम् ॥४ ॥

इदं वचः पर्जन्याय स्वराजेत्हृदोअस्त्वन्तरंतज्जुजोषत् ।
मयोभुवोवृष्टयः सन्त्वस्मेसुपिप्पलाओषधीर्देवगोपाः ॥५॥
पुरेतोधावृषभः शश्वतीनांतस्मिन्नात्मा जगतस्तस्थुषश्च ।
तन्मऋतं पातु शतशारदाय यूयंपातस्वस्तिभिः सदानः ॥६॥

॥ इति प्रथमसूक्तम् ॥

विनियोगः – ॐ पर्जन्यायेति सूक्तस्य अग्निपुत्रः कुमार ऋषिः वसिष्ठो वा। गायत्री छन्दः। पर्जन्योदेवता। वृष्टिप्राप्त्यर्थे जपे विनियोगः।

ॐ पर्जन्यायप्रगायतदिवस्पुत्रायमीडुषे। सनोयवसमिच्छतु॥१॥
योगर्भमोषधीनांगवांकृणोत्पर्वताम् । पर्जन्यः पुरुषीणाम् ॥२॥
तस्माइदास्येहविर्जुहोतामधुमत्तमम्। इलांनः संयतं करत् ॥३॥

॥ इति वृष्टिप्राप्तिकर विधानम् ॥

४. ॥ अन्यप्रयोगः ॥

नाभिपर्यन्त जल में शंकर का ध्यान करके मृत्युञ्जय जप करें। अथवा दुर्गा के मन्त्र का जप करें। संपुट पाठ करें तो गीलेवस्त्र पहन कर पाठ करें।

ॐ वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ।

५.॥ अनावृष्टि –निवारक प्रयोगः॥

अच्छी वर्षा हेतु पंचदेवताओं गणेश, सूर्य, शक्ति, शिव और विष्णु के पूजन सहित भगवान् वरुण के पूजन हेतु संङ्कल्प करे। पंचब्रह्मदेवताओं के पूजन के बाद भगवान् श्रीवरुणदेव का ध्यान करे।

ध्यानम्–

ॐ पुष्करावर्तकैर्मेघैः प्लावयन्तं वसुन्धराम् ।
विद्युत् गर्जित-सन्नद्ध-तोयात्मने नमाम्यहम् ॥
यस्य केशेषु जीमूतो नद्यः सर्वांग-सन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥

इस ध्यान को पढ़कर, अपने शिर पर पुष्प चढ़ाकर मानसोपचारों से पूजा करें। फिर अर्घ्य-स्थापन कर, पुनः भगवान् श्रीवरुण का ध्यान करते हुए उनका आवाहन करे तथा यथा-शक्ति उनका पूजन करें।

इसके बाद एकाग्रचित्त होकर, अच्छी वर्षा के लिये, दृढ़ निश्चय होकर, किसी नदी या उसके अभाव में किसी जलाशय (तालाब) के पास जाकर, ''हुं श्रीं हूं'' इस मंत्र का जप करते हुए उसमें प्रवेश करें। नाभि तक गहरे जल में खड़े होकर निम्न विनियोग पढ़े-

विनियोग: - **ॐ अस्य मंत्रस्य प्रजापतिः ऋषिः, त्रिष्टुप् छन्दः, श्रीवरुणः देवता एतद् राज्यमभिवाप्य सु-वृष्ट्यर्थं जपे विनियोगः।**

इसके बाद **ॐ वं** मंत्र का आठ हजार जप करें।

१. ॐ हूँ ह्रीं क्षं क्षां, क्षिं क्षीं, क्षुं क्षूं, क्षें क्षैं, क्षों क्षौं, क्षं क्षः, हुं फट् ठं ठः।

२. ॐ ह्रीं क्षें क्षिं क्षीं, क्षुं क्षूं, क्षें क्षैं, क्षों क्षौं, क्षं क्षः, हूं।

उक्त दोनो मंत्रो में से किसी एक मंत्र को जलाशय के मध्य में पूर्वमुख खड़े होकर जपे।

॥ अतिवृष्टि स्तंभन ॥

कोयले या भस्म से एक शिला पर षट्कोण बनाकर उसके मध्य में मेघ लिखकर खड्डा खोदकर उल्टा गाड़ देवें।

वृष्टिस्तंभन यन्त्रम्

उसके बाद मेघों की तरफ देखकर त्राटक करते हुये **मन्त्र जप करें।**

प्रयोग की सफलता आपकी इष्टशक्ति पर निर्भर है तथा आजमाइस किया हुया सफल प्रयोग है।

कार्य संपन्न होने पर शिला को बाहर निकालें दूध की धारा देवें, पञ्चामृत से धोयें शान्ति स्तोत्र पढ़ें। कई बार उपद्रव अधिक होने पर देखा गया है कि शिला के टुकड़े हो जाते हैं।

गायों को चारा, कबूतरों को अन्न डालें, ब्राह्मणभोजन, कन्याभोजन करायें।

मन्त्र - ॐ ह्लीं बगलामुखी मेघानां (इन्द्रस्य) वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा।

॥ अथ चोरनिवारणम् ॥

जलेरक्षतु वाराहः स्थले रक्षतु वामनः ।
अटव्यां नारसिंहश्च सर्वतः पातुः केशवः ॥१॥
जले रक्षतु नन्दीशः स्थले रक्षतु भैरवः ।
अटव्यां वीरभद्रश्च सर्वतः पातुः शङ्करः ॥२॥
अर्जुनः फाल्गुनो जिष्णुः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः ॥३॥
तिस्त्रो भार्याः कफल्लस्य दाहिनी मोहिनी सती ।
तासां स्मरणमात्रेण चोरो गच्छति निष्फलः ॥४॥
कफल्लकः कफल्लकः कफल्लकः ।
इति पठित्वा शयनं कार्यं तेन चोरो निष्फलो गच्छेत् ॥५॥

॥ अथ भूतोपद्रवनाशका उड्डीशमन्त्राः ॥

मन्त्रः - ॐ नमो भगवते नारसिंहाय घोररौद्रमहिषासुररूपाय त्रैलोक्या-डंबराय रौद्रक्षेत्रपालाय ह्रों ह्रों क्रीं क्रीं क्रीमिति ताडय ताडय मोहय मोहय द्रंभि २ क्षोभय २ आभि २ साधय २ ह्रीं हृदये आं शक्तये प्रीति ललाटे बंधय २ ह्रीं हृदये स्तंभय २ किलि २ ईं ह्रीं डाकिनि प्रच्छादय २ शाकिनीं प्रच्छादय २ भूतं प्रच्छादय २ प्रभूतं प्रच्छादय २ स्वाहा राक्षसं प्रच्छादय २ ब्रह्मराक्षसं प्रच्छादय २ सिंहिनीपुत्रं प्रच्छादय २ डाकिनीग्रहं साधनाय २ शाकिनीग्रहं साधय २ अनेन मन्त्रेण डाकिनीशाकिनी भूतप्रेतपिशाचाद्यैकाहिक - द्व्याहिक त्र्याहिकचातुर्थिक पञ्चवातिकपैत्तिकश्लैष्मिक सन्निपात केसरि डाकिनी ग्रहादीन्मुंच मुंच स्वाहा। गुरु की शक्ति मेरी भक्ति फुरो मन्त्र ईश्वरी वाचा।

॥ इति मन्त्रः॥

विधानम् - लोहे की सेल से २१ बार झाड़ दें अथवा छप्पर के तीले से झाड़ दें तो उन्मादादिक भूतबाधा दूर हो।

॥ अथडाकिनी से बालक छुडाने का मन्त्र ॥

ॐ कालाभैरव कपिली जटा रात दिन खेले चौपटा कालाभैरव भस्म मुसाण जेहि मांगू सो पकड़ी आन। डंकिनी संखिनी पटसिहारी जरख चढति गोरखमारी छोडिछोडिरे पापिनी बालक पराया गोरखनाथका परवाना आया॥ इति मन्त्रः॥

विधानम् - तीर से झाड़ दे और पानी अभिमन्त्रित करके पिलावें तो बालक डाकिनी से छुटे।

॥ प्रेतादि रोगादि झाड़ने का मन्त्र ॥

ॐ नमो आदेश गुरु को घोर घोर इन घोर काजीकी किताब घोर मुल्लाकी बाँग घोर रैगर की कुण्ड घोर धोबीका कुण्ड घोर पीपलका पान घोर देवकी दिवाल घोर आपकी घोर बिखेरता चल परकी घोर बैठता चल वज्रका किवाड़ तोड़ता चल सारका किवाड़ तोडता चल कुनकुन सो बन्द करता चल भूत को पलीत को देव को दानव को दुष्ट को मुष्ट को चोट को फेट को मेलेको घरेलेको उलकेको बुलके को हिडके को भिडके को ओपरी को पराई को भूतनी को पलीतनी को डंकिनी को स्यारी को भूचरी को खेचरी को कलुए को मलबे को उनको मथ बायके तापको तिजारीको माथाकी मथबायको मगरांकीपीडाको पेटकी पीडाको सांस को कांसको मरे को मुसाण को कुणकुणसा मुसाण कचिया मुसाण भुकिया मुसाण कीटिया मुसाण चीडीचौपाटा का मुसाण नुह्या मुसाण इन्हो को बंदकरि एडी की एडी बंध करि पीड़ाकी पीडीबंधकरि जांघकी जाडी बंधकरि कट्यांकी कडीबंधकरि पेटकी पीडा बंधकरि छातीकी शूल बंधकरि सरिकी सीस बंधकरि चोटीकी चोटीबंध करि नौनाडी बहतर कोठा रोमरोममें घर पिण्ड में दखलकर दश बंगालका मनसारा मसेबडा आकर मेरा कारज सिद्ध न करे तो गुरु उस्ताद से लाजे शब्द सांचा पिण्ड काचा फुरो मन्त्र ईश्वरी वाचा ॥

विधानम् - मद्य, मांस चढ़ावें, छडछडीला की धूप देवें, अतर, तैल दीपक, सभी प्रत्येक रविवार को देय। भांग सुलफा चाढ़ाना चाहि सिद्ध होने पर मन्त्र सात बार पढ़कर झाड़ दे तो सर्वोपद्रव दूर हो कर सुखी हो इसमें संदेह नहीं हैं।

॥ नजर झाड़ने का मन्त्र ॥

ॐ नमो सत्य नाम आदेश गुरु को ॐ नमो नजर जहाँ परपीर न जानी बोले छलसों अमृतवानी कहो नजर कहां ते आई यहां की ठौर तोहि कौन बनाई कौन जात तेरो कहा ठाम किसकी बेटी कहा तेरो नाम कहांसे उड़ी कहां को जाया अबही बसकर ले तेरी माया मेरी जात सुनो चित लाय जैसी होय सुनाऊं आय तेलन तमोलन चूहडी चमारी कायथनी खतरानी कुम्हारी महतरानी राजाकी रानी जाको दोष ताही के शिर पड़े जाहर पीर नजर से रक्षा करे मेरी भक्ति गुरु की शक्ति फुरो मन्त्र ईश्वरी वाचा ॥

अस्यविधानम् - इस मंत्र द्वारा मोरपंख से झाड़ दें तो आराम हो।

पलीता यंत्रम्

द	मृ	सि	ज	जं	त्र	०	०	०
अ	च	जा	पै	नि.	स्थै	०	०	०

इसयन्त्र को कागज पर लिखकर पलीता सुलगाकर सुंघावे तो प्रेत वकुरे बात करे जो पूछे उसका जवाब दे।

॥ अथडाकिनी के चोट मारने का मन्त्र ॥

ॐ नमो महाकाली जोगनी जोगनी पारशाकिनी कल्पवृक्षीय दृष्टि जोगनी सिद्धरुद्राय कालदंडेन साधय २ मारय २ चूरय २ अपहर शाकिनी सपरिवारं नमः ॐ हूं हूँ हैं ह्रौं फट् स्वाहा॥

अस्यविधानम् - इस मन्त्र से सात बार गूगल को पढ़कर ओखली में डाल मूसल से कूटे तो वह मूसल की चोट डाकिनी को लगेगी, अगर इस मन्त्र से अपना घोंटू मूंडे तो डाकिनी का सिर मुंड जायेगा, किसी चीज पर मन्त्र पढ़कर जिसके घर में डाले उसके घर में जाके डाकिनी बोलेगी। इस मन्त्र को पढ़कर आँखों में जल मारे तो खेल उठें।

॥ अथडाकन भक्षित का मन्त्र ॥

ॐ डाकन शाकन और सिहारी भैरो यतीके चक्र मारी अन्नपान खाय पराया तके तिस पापनका भण्डारा फूटे नरसा टूटे पाप न घूटे गुरु की शक्ति चेले की भक्ति फुरो मन्त्र ईश्वरी वाचा॥

विधानम् - सात बार झाड़ दें तो डाकिनी के खाये हुये को आराम होवें।

डाकिनी दूर करने का मन्त्र - **ॐ नमो आदेश गुरुका डाकिनी सिहारी किन्ने मारी जती हनुमन्त ने मारी कहां जाय दब की किन देखी जती हनुमन्त ने देखी सातवें पाताल गई सातवें पाताल से कौन पकड़ लाया जती हनुमन्त पकड़ लाया एक ताल दे एक कोठा तोड़ा दो ताल दे दो कोठा तोड़ा तीन ताल दे तीन कोठा तोड़ा चार ताले दे चार कोठा तोड़ा पांच ताल दे पांच कोठा तोड़ा छः ताल दे छः कोठा तोड़ा सात ताल दे सातवां कोठा खोल देखे तो कौन खड़ी है डाकिनी सिहारी भूतप्रेत चले जती हनुमन्त रे झाडे सूं चले ॐ नमो आदेश गुरु का गुरु की शक्ति मेरी भक्ति गुरु की शक्ति फुरो मन्त्र ईश्वरी वाचा॥**

विधानम् - मोर की पंख अथवा लोहे से झाड़ दें तो सर्वोपद्रव दूर हो।

अन्यत् - **ॐ नमो आदेश गुरु का गिरह बाज नटनीका जाया चलती बेर कबूतर खाया पीवे दारू खाय जो मांस रोगदोष को लावे फांस कहां कहां से लावेगा गुदगुद में सुवावेगा बोटी बोटी में से लावेगा चामचाम में से लावेगा नौ नाड़ी बहत्तर कोठा में से लावेगा मारमार बन्दी करकर लावेगा न लावेगा तो अपनी माता की सेज पर पग धरेगा मेरा भाई मेरा दिखा दिखलाय तो मेरी भक्ति गुरु की शक्ति फुरो मन्त्र ईश्वरी वाचा॥**

विधानम् - मोरपंख से झाड़ें तो भूतप्रेत डाकिनी शाकिनी सब भाग जायें।

डाकिनी के बकुराने का मन्त्र ॥

ॐ नमो आदेश गुरु का ॐ नमो जय नरसिंह तीन लोक चौदह भुवन में हाथ चाबी और होठ चाबी नयन लाल लाल सर्व वैरी पछाड मार भगतन को प्राण राखि आदेश आदि पुरुषको।

विधानम् - इस मन्त्र से पानी पढ़कर पिलावे फिर पूछे तो डाकिनी शाकिनी बोले।

॥ भूतप्रेत उपद्रव दबाने हेतु ॥

भित्वा पाताल मूलं चल चालि चलतं व्याल लील कराले विद्युद्दण्डं प्रचण्डं प्रहरण सहिते सद्भुजैस्तर्जयन्ती दैत्येन्द्रं क्रूर दंष्ट्रा कटकट घटिते स्पष्ट भीमाट्टहासे माया जीमूत माला कुहरित गगने रक्ष मां देवि पद्मे

विधानम् - मास के दूसरे शनिवार से प्रारंभ कर प्रथम अयुत जप करले। और इस श्लोक से जल अभिमन्त्रित कर प्रोक्षण करने से भूतप्रेत पिशाचादि उपद्रव दूर होते हैं। किन्नर यक्षादि के उपद्रव स्वरूप अग्नि, अस्थि आदि की वर्षा होती हो तो बन्द हो जाती है।

॥ रामायण के कुछ सिद्ध मन्त्र॥

जीविका प्राप्ती के लिये -

विश्वभरन पोषनकर जोई। ताकर नाम भरत अस होई॥

खोई वस्तु पुन: प्राप्त करने के लिये -

गई बहोर गरीब नेवाजू। सरल सबल साहिब रघुराजु ॥

लक्ष्मीप्राप्ति के लिये -

जिमि सरिता सागर महि जाहि। जद्यपि ताहि कामना नाहीं ॥
तिमि सुख संपत्ति बिनही बौलाऐ। धरम शील पहिं जाहिं सुभाए॥

पुत्रप्राप्ति के लिये -

प्रेम मगन कौसल्या निसिदिन जातन जान।
सुखत सनेह बस मात बाल चरित का गान ॥

विवाह के लिये -

तब जनक पाई बसिष्ठ आयसु ब्याह साज संवारिकै।
मांडवी श्रुत कीरति उरमिला कुँअरि लई हैकारिकै।

संकट नाश के लिये -

जो प्रभु दीन दयालु कहावा। आरति हरन वेदजनु गावा।
जपहि नामु जन आरतभारी। मिटहि कुसंकट होई सुखारी।
दीन दयालु विरिषु संभारी। हरहु नाथ मम संकट भारी।

मुकद्दमा जीतने के लिये -

पवनतनय बल पवन समाना। बुद्धि विवेक विज्ञान निधाना।

विद्याप्राप्ति के लिये -

गुरु गृहे गय पढन रघुराई। अल्पकाल विद्यासब पाई।

बिक्री बढाने का मन्त्र — ....

भंवर वीर तू चेला मेरा, खोल दुकान कहाकर मेरा
उठे जो डंडी बिके जो माल, भँवर वीर सोखे नहीं जाय।

विधान - रविवार के दिन काले उड़द लेकर उन पर २१ बार यह मन्त्र पढ़कर दुकान में डाल दें तो तीन रविवार में बिक्री तीन-चार गुनी बढ़ जायेगी।

शिघ्र मन्त्र सिद्ध करने की विधि -

शुभ मुहूर्त्त में रात्रि के उपरान्त पवित्र स्थान में काशी की ओर मुँह करके अष्टांग हवन सामग्री से एक माला या १०८ मन्त्र से आहुति देवे अर्थात् एक बार चौपाई पढ़कर एक आहुति देवे। इस प्रकार एक सौ आठ बार मन्त्र उच्चारण के साथ १०८ आहुतियाँ देने पर एक रात्रि में ही मन्त्र सिद्ध हो जाता है। फिर जब जिस कार्य के लिए आवश्यकता हो इसका श्रद्धापूर्वक जबतक कार्यसिद्ध न हो नित्य जप करते रहना चाहिये।

अष्टांग हवन सामग्री इस प्रकार है चन्दन का बुरादा, तिल, शुद्ध गौघृत, शक्कर, अगर, तगर, कर्पूर, केशर, नागरमोथा, पंचमेवा, जौं और चांवल।

रक्षा रेखा -

मन्त्रसिद्धि करने के लिए या किसी संकट पूर्ण स्थान पर रात्रि व्यतीत करने के लिए अपने चारों ओर रक्षा की रेखा खींच लेनी चाहिए श्री लक्ष्मणजी ने सीताजी की कुटिया के पास जो रक्षारेखा खींची थी उसी लक्ष्य पर यह रक्षामन्त्र है। इस की १०८ आहुतियां देकर सिद्ध कर लेना चाहिये।

मामभिरक्षय रघुकुल नायक । घृतवर चाप रुचिकर सायक ॥

॥ घण्टाकर्ण मणिभद्र यक्षराज साधन विधि ॥

यह सिद्ध मंत्र है साधक को सदाचारी होना चाहिये। सदाचार व तन्मनस्कता यदि हो तो इनकी काम्य साधना यश वृद्धि के साथ भोग मोक्ष दोनों देने वाली होती है। प्रेतादि उपद्रव शीघ्र नष्ट होते हैं।

घण्टाकर्ण के मंत्र इस प्रकार है-

(१)

ॐ ह्रीं श्रीं क्लीं घण्टाकर्ण महावीर सर्व व्याधिविनाशक ।
आधिं व्याधिं विपत्तिं च महाभीत्तिं विनाशय ॥
नाममंत्रोऽस्ति ते सिद्धः सर्व-मंगलकारकः ।
इष्टसिद्धिं महासिद्धिं जयं लक्ष्मीं विवर्धय ॥
त्वच्छ्रद्धाभक्तियोगेन भवन्तु सर्वशक्तयः ।
पराभवन्तु दुष्टाश्च शत्रवो वैरि-दुर्जनाः ॥
आपत्-कालेषु मां रक्ष मम बुद्धिं प्रकाशय ।
सर्वोपद्रवतो रक्ष घोररोगान् विनाशय ॥
ॐ ह्रीं श्रीं क्लीं घण्टाकर्ण महावीर ! धन समृद्धिं-प्रवर्द्धय।
राज्यं च राज्यमानं च बलं बुद्धिं प्रवर्द्धय ॥
ॐ क्रों ह्रीं श्रीं घण्टाकर्ण महावीर ! सर्वव्याधि विनाशक
महारोगान् भयान् घोरान् नाशय नाशय द्रुतम् ॥
दर्शनं देहि प्रत्यक्षं संरक्ष सर्व सङ्कटात् ।
रणे वने समुद्रे च रक्ष संरक्ष मे द्रुतम् ॥

अग्निचौरादितो रक्ष त्वन्नाममंत्रजापतः ।
ह्रीं घण्टाकर्ण! नमोऽस्तु ते ठः ठः स्वाहा ॥

(२)

ॐ घण्टाकर्ण महावीर सर्वव्याधि विनाशकः ।
विस्फोटकभयं-घोरं रक्ष रक्ष महाबल ॥

इस मंत्र के जप करने से समस्त विघ्न, उपद्रव दूर होते है।

(३)

ॐ ऐं ह्रीं श्रीं क्लीं नवपद मणिभद्राय नमः ।
ॐ ऐं ह्रीं श्रीं क्लीं मणिभद्र स्वाहा ॥
ॐ ह्रीं श्रीं भगवते श्रीमणिभद्राय ह्रीं श्रीं कण कण क्लीं फण फट् फट् स्वाहा ॥ ॐ क्लीं क्लीं क्लीं मणिभद्र-चेटकाय सर्व-सिद्धि-कराय मम स्वप्ने अमुक कार्यं दर्शय दर्शय स्वाहा ।
ॐ ॐ ॐ ॐ ॐ ।

लाल कनेर पुष्प पर मणिभद्र मंत्र का जप कर सिरहाने रखकर सोवें तो स्वप्न में वार्ता कहे। जैन ग्रंथों के अनुसार मणिभद्र व्यापार वृद्धिकारक है। सात सूंड के हाथी पर सवार है एवं व्यापार में कुशल है। कोई क्षेत्रपाल मानते हैं तो कोई यक्षराज मानते हैं।

नारियल की गिरी, छोहारा, दाख, घी, शक्कर, मधु इनसे १२००० बार **आहुतियाँ** देने से सर्व उपद्रवों की शान्ति होती है। प्रातः **जल** के ऊपर हाथ रखकर २१ बार मंत्र पढ़कर तीन अञ्जलि उस **जल** का पान करने से **विद्यावृद्धि** होती है। अपने ओढ़ने के वस्त्र को उक्त मंत्र से अभिमंत्रित कर ओढ़ने से सभी प्रकार के भयों की निवृति होती है। **लक्ष्मी प्राप्ति** के लिये भोजन करने के बाद श्वेत वस्त्र धारण कर पूर्वाभिमुख होकर बैठे। ७२ दिनों तक श्वेत आसन पर बैठकर सवा लाख जप करे। जप पूरा होने पर मेवो से होम करे। ६ महिने के भीतर धन की वृद्धि होती है।

मंत्र से सात बार फूँक देने से दाढ़ का दन्त क्लेश दूर होता है। कन्या द्वारा काते गये सूत के नौ तागों को सिर से पैर तक नाप कर, उसमें सात गाँठें देकर २१ बार अभिमंत्रण और गुग्गल की धूप देकर स्त्री की कमर में बाँधने से **गर्भस्तंभन** होता है। चन्दन को घिसकर उस जल को मंत्र से अभिमंत्रित कर भूत ग्रह से पीड़ित व्यक्ति को पिलाने से भूत भय दूर [illegible] बार [illegible] को ओढ़ने से

सिर का दर्द दूर होता है। शीतज्वर मासिकज्वर, मोतीझरा आदि २१ बार झाड़ने से दूर होते है।

बिक्री की जाने वाली वस्तुऐं यदि विक्रय न हो तो सात बार उन पर हाथ रखकर मंत्र पढ़ना चाहिये। इससे बिक्री में वृद्धि होगी। हिंगुल से घर के भीतर दीवार पर मंत्र लिखने से आधि व्याधि, महा-मारी आदि नहीं होती। मंत्र को १०८ बार **चित्त लेटकर** जप करे और धूप दे, नाभि पर घी का **दीपक** सुरक्षित रूप से जलाए, सात दिनो में चोरी गई वस्तु की प्राप्ति होती है।

॥ अथ प्रज्ञावर्द्धन स्तोत्रम् ॥

विनियोग: - **ॐ अस्य श्रीविवर्द्ध स्तोत्रमन्त्रस्य भगवानशिवः ऋषि अनुष्टुप् छन्दः स्कन्दकुमारो देवता प्रज्ञा सिद्धयर्थ जपे विनियोगः।**

योगेश्वरो महासेनः कार्तिकेयोऽग्निनन्दनः ।
स्कंदः कुमार सेनानी स्वामी शंकर सम्भवः ॥
गांगेयस्ताम्र चूडश्च ब्रह्मचारी शिखिध्वजः ।
तारकारिरुमापुत्रः क्रौंचारिश्च षडाननः ।
शब्द ब्रह्म समूहश्च सिद्धः सारस्वतो गुहः ।
सनत्कुमारो भगवान भोगमोक्षप्रदः प्रभुः ॥
शरजन्मा गणाधीशः पूर्वजो मुक्तिमार्गकृत् ।
सर्वागमप्रणेता च वाञ्छितार्थप्रदर्शकः ॥
अष्टाविंशति नामानि मदीयानीतियः पठेत् ।
प्रत्यूषे श्रद्धयायुक्तो मूको वाचस्पतिर्भवेत् ॥
महामन्त्र मयानीति मम नामानि कीर्तयेत् ।
महाप्रज्ञामवाप्नोति नात्रकार्याविचारणः ॥
पुष्यनक्षत्रमारभ्य पुनः पुष्ये समाप्य च ।
अश्वत्थमूले प्रतिदिनं दशवारं तु संपठेत् ॥
सप्तविंशादिनैरेकं पुरश्चरणकं भवेत्

संपुटमन्त्र -

या देवी स्तूयते नित्यं विबुधैः वेदपारगैः ।
सा मे [illegible] जिह्वाग्रे [illegible]

प्रतिदिन प्रात:काल ब्रह्ममुहुर्त्त में मयूर वाहिनी श्री सरस्वती की मूर्ति या चित्र के सामने घृतदीपक रखकर पंचोपचार से पूजा करके प्रथम उपर्युक्त संपुट मन्त्र की एक माला फिर स्तोत्र और अन्त में एक माला संपुट मन्त्र का जप करें।

पुष्य नक्षत्र के दिन से अगले पुष्य तक २७ दिन प्रतिदिन १० पाठ करें। अश्वत्थ (पीपल) वृक्ष के नीचे बैठकर २७ दिन में ही सिद्धि होती है। (शालिहासः)

॥ प्रस्थानसिद्धिप्रद मन्त्रः॥

ॐ क्लीं गच्छ गौतम्। शीघ्रं त्वं ग्रामेषु नगरेषु च द्रव्याच्छादन मिष्टान्नां कल्पयस्व महामुने! क्लीं ॐ ॥ श्रीगौतमाय नमः (५ बार जपें)

इस मन्त्र का गायत्री मन्त्र संपुटित कर ग्रहण में १०८ बार जप लेवें। फिर जब कभी यात्रा में जाना होतो गणपति स्मरण के पश्चात् ५ बार इस मन्त्र का स्मरण कर प्रस्थान करें। अवश्य ही यात्रा आनन्दपूर्वक निवृत्ति होगी। बहुधाः इसका अनुभव किया गया है। गौतम ऋषि का यह मन्त्र जावद के कर्मनिष्ठ महापुरुष के द्वारा प्राप्त हुआ।

॥ अथ शत्रुघ्नकवचम्॥

ध्यानम् –

शत्रुघ्नं धृतकार्मुकं धृतमहातूणीरबाणोत्तमं
पार्श्वे श्रीरघुनन्दनस्य विनयाद्वामे स्थितं सुन्दरम्।
रामं स्वीयकरेण तालदलजं धृत्वाऽतिचित्रं वरं
सूर्याभं व्यजनं सभास्थितमहंतं वीजयंतं भजे ॥

विनियोगः – **अस्य श्रीशत्रुघ्नकवचमन्त्रस्य अगस्त ऋषिः। श्रीशत्रुघ्नो देवता। अनुष्टुप् छन्दः। सुदर्शन इति बीजम्। कैकेयीनन्दन इति शक्तिः। श्रीभरतानुज इति कीलकम्। भरतमन्त्रीत्यस्त्रम्। श्रीरामदास इति कवचम्। लक्ष्मणांशज इति मन्त्रः। श्रीशत्रुघ्नप्रीत्यर्थं सकलमनः कामनासिद्ध्यर्थं जपे विनियोगः।**

करन्यासः – **ॐ शत्रुघ्नाय अंगुष्ठाभ्यां नमः। ॐ सुदर्शनाय तर्जनीभ्यां नमः। ॐ कैकेयी नन्दनाय मध्यमाभ्यां नमः। ॐ भरतानुजाय अनामिकाभ्यां नमः। ॐ भरतमंत्रिणे कनिष्ठिकाभ्यां नमः। ॐ रामदासाय करतलकरपृष्ठाभ्यां नमः।**

हृदयादिषडंगन्यासः – ॐ शत्रुघ्नाय हृदयाय नमः। ॐ सुदर्शनाय शिरसे स्वाहा। ॐ कैकेयीनन्दनाय शिखायै वषट्। ॐ भरतानुजाय कवचाय हुम्। ॐ भरतमंत्रिणे नेत्रत्रयाय वौषट्। ॐ रामदासाय अस्त्राय फट्।

ध्यानम् –

रामस्य संस्थितं वामे पार्श्वे विनयपूर्वकम्।
कैकेयीनन्दनं सौम्यं मुकुटेनातिरंजितम् ॥१॥
रत्नकंकणकेयूर वनमालाविराजितम्।
रशनाकुण्डलधरं रत्नहारसनूपुरम् ॥२॥
व्यजनेन वीजयंतं जानकीकांतमादरात्।
रामन्यस्तेक्षणं वीरं कैकेयीतोषवर्द्धनम् ॥३॥
द्विभुजं कंजनयनं दिव्यपीतांबरान्वितम्।
सुभुजं सुन्दरं मेघश्यामलं सुन्दराननम् ॥४॥
रामवाक्ये दत्तकर्णं रक्षोघ्नं खड्गधारिणम्।
धनुर्बाणधरं श्रेष्ठं धृततूणोरमुत्तमम् ॥५॥
सभायां संस्थितं रम्यं कस्तूरीतिलकांकितम्।
मुकुटस्थावतंसेन शोभितं च स्मिताननम् ॥६॥
रविवंशोद्भवं दिव्यरूपं दशरथात्मजम्।
मथुरावासिनं देवं लवणासुरमर्दनम् ॥७॥
इति ध्यात्वा तु शत्रुघ्नं रामपादेक्षणं हृदि।
पठनीयं वरं चेदं कवचं तस्य पावनम् ॥८॥

॥ स्तोत्रम् ॥

पूर्वे त्ववतु शत्रुघ्नः पातु याम्ये सुदर्शनः।
कैकेयीनन्दनः पातु प्रतीच्यां सर्वदा मम ॥९॥
पातूदीच्यां रामबन्धुः पात्वधो भरतानुजः।
रविवंशोद्भवश्चोर्ध्वं मध्ये दशरथात्मजः ॥१०॥
सर्वत पातु मामत्र कैकेयीतोषवर्द्धनः।
श्यामलाङ्गः शिरः पातु भालं श्रीलक्ष्मणांशजः ॥११॥
भ्रुवोर्मध्ये सदा पातु सुमुखोऽत्रावनीतले।
श्रुतकीर्तिपतिर्नेत्रे कपोले पातु राघवः ॥१२॥

कर्णौ कुण्डलकर्णोऽव्यान्नासाग्रं नृपवंशजः ।
मुखं मम युवा पातु पातु वाणीं स्फुटाक्षरः ॥१३॥
जिह्वां सुबाहुतातोऽव्याद्यूपकेतुपिता द्विजान् ।
चुबुकं रम्यचुबुकः कंठं पातु सुभाषणः ॥१४॥
स्कंधौ पातु महातेजा भुजौ राघववाक्यकृत् ।
करौ मे कंकणधरः पातु खड्गी नखान्मम ॥१५॥
कुक्षी रामप्रियः पातु पातु वक्षो रघूत्तमः ।
पार्श्वे सुरार्चितः पातु पातु पृष्ठं वराननः ॥१६॥
जठरं पातु रक्षोघ्नः पातु नाभिं सुलोचनः ।
कटी भरतमन्त्री मे गुह्यं श्रीरामसेवकः ॥१७॥
रामार्पितमनाः पातु लिङ्गमूरू स्मिताननः ।
कोदंडधारी पात्वत्र जानुनी मम सर्वदा ॥१८॥
राममित्रं पातु जंघे गुल्फौ पातु सुनूपुरः ।
पादौ नृपतिपूज्योऽव्याच्छ्रीमान्पादांगुलीर्मम ॥१९॥
पात्वंगानि समस्तानि ह्युदरांगः सदा मम ।
रोमाणि रमणीयोऽव्याद्रात्रौ पातु सुधार्मिकः ॥२०॥
दिवा मे सत्यसंधोऽव्याद्भोजने शरसत्करः ।
गमने कलकण्ठोऽव्यात्सर्वदा लवणांतकः ॥२१॥
एवं शत्रुघ्नकवचं मया ते समुदीरितम् ।
ये पठंति नरास्त्वेतत्ते नराः सौख्यभागिनः ॥२२॥
शत्रुघ्नस्य वरं चेदं कवचं मंगलप्रदम् ।
पठनीयं नरैर्भक्त्या पुत्रपौत्रप्रवर्द्धनम् ॥२३॥
अस्य स्तोत्रस्य पाठेन यं यं कामं नरोऽर्थयेत् ।
तं तं लभेन्निश्चयेन सत्यमेतद्वचो मम ॥२४॥
पुत्रार्थी प्राप्नुयात्पुत्रं धनार्थी धनमाप्नुयात् ।
इच्छाकामं तु कामार्थी प्राप्नुयात्पठनादिना ॥२५॥
कवचस्यास्य भूम्यां हि शत्रुघ्नस्य विनिश्चयात् ।
तस्मादेतत्सदा भक्त्या पठनीयं नरैः शुभम् ॥२६॥

॥ इति आनंदरामायणे सुतीक्ष्णागस्त्य संवादे शत्रुघ्नकवचं संपूर्णम् ॥

॥ श्रीमद्भागवतानुष्ठानचक्रम् ॥

एकाहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	३३५	१२	१३

एकाहपारायणं शुक्राचार्य्यमतात् श्रावणकृष्णपक्षे कुर्यात्

द्व्यहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	१९०	९	१३
२	१४५	१२	१३

त्र्यारुणिमतात् द्व्यहपारायणं श्रावण शुक्लपक्षे कुर्यात्

त्र्यहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	१५३	७	१५
२	१३८	१०	९०
३	४४	१२	१३

त्र्यहपारायणं हारीतमतात् मुक्तिकाम आश्विनशुक्लपक्षे कुर्यात्

चतुरहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	८१	४	२३
२	८९	८	१७
३	८३	१०	५२
४	८२	१२	१३

चतुरहपारायणं सर्वकामना प्राप्तौ शौनकमतात् भाद्रपद शुक्लपक्षे कुर्यात् ॥

पञ्चाहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	६९	४	७
२	६९	६	१९
३	६३	९	२४
४	६९	१०	६९
५	६५	१२	१३

पंचाहपारायणं अकृतव्रणम–तात सर्वकामनाप्राप्त्यर्थे भाद्रपदशुक्लपक्षे कुर्यात् ॥

षडहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	६१	३	३२
२	४६	५	१४
३	७०	८	२४
४	६३	१०	३९
५	७०	११	३९
६	२५	१२	१३

षडहपारायणं शांशपायनम–तात् धनप्राप्तिकामो भाद्रपद कृष्णपक्षे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	७१	४	९
२	६१	६	१३
३	५२	९	७
४	५१	१०	३४
५	३९	१०	७३
६	१७	१०	९०
७	४४	१२	१३

सप्ताहपारायणं शांशपायन मताद्धनप्राप्तिकामो भाद्रपद कृष्णपक्षे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	५३	३	२४
२	४३	५	३
३	५०	७	८
४	५९	१०	४
५	५१	१०	५५
६	४१	११	६
७	३८	१२	१३

सप्ताहपारायणं वशिष्ठ मतान्पुत्रप्राप्तिकामो वैशाखे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
[illegible]	४९	३	१०
२	६७	५	२३
३	३७	७	१५
४	४८	९	२४
५	४२	१०	४२
६	४८	११	९
७	४४	१२	१३

सप्ताहपारायणं सूतमतात्रिष्काम: कार्तिकशुक्लपक्षे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	२९	२	१०
२	६४	४	३१

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	४८	३	१९
२	५१	५	६

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	६१	३	३६
२	५७	५	२६

३	४५	६	१९
४	३९	८	२४
५	७३	१०	४९
६	७२	११	३१
७	१३	१२	१३

सप्ताहपारायणं विश्वामित्रमतात् संकटमोचनार्थं मार्गशीर्षे कुर्यात् ॥

३	४९	७	१०
४	५३	९	२४
५	४९	१०	४९
६	४१	१०	९०
७	४४	१२	१३

सप्ताहपारायणं जमदाग्निमतात्दिपनाशनकाम : पौषे : कुर्यात् ॥

३	३४	७	१५
४	४८	९	२४
५	९०	१०	९०
६	३२	११	३१
७	१३	१२	१३

सप्ताहपारायणं भारद्वाजमतात् बंधमोक्षकामो माघे कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	४८	३	१९
२	६०	५	१५
३	४५	७	१५
४	६०	१०	१२
५	७२	१०	८४
६	३७	११	३१
७	१३	१२	१३

सप्ताहपारायणं गौतममतात् शत्रुपराजयकाम : फाल्गुने कुर्यात् ॥

सप्ताहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	४९	३	२०
२	५०	५	६
३	३९	६	१९
४	५९	९	२०
५	३९	१०	३५
६	६१	११	६
७	३८	१२	१३

सप्ताहपारायणं अत्रिमता द्रोगमुक्तिकामश्चैवे कुर्यात् ॥ कुर्यात् ॥

दशाहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	३५	३	६
२	३४	४	७
३	३३	५	९
४	३६	६	१९
५	३९	८	२४
६	३५	१०	११
७	३४	१०	४५
८	३४	१०	७९
९	३४	११	२३
१०	२१	१२	१३

दशाहपारायणं कश्यपमता द्राज्यप्राप्तिकाम आषाढे शुक्लपक्षे कुर्यात् ॥

पञ्चदशाहपारायणम्

दिन	अध्याय	स्कंध	अध्याय
१	२१	२	२
२	२३	३	१५
३	२२	४	४
४	२३	४	२७
५	२२	५	१८
६	२३	६	१५
७	२४	८	५
८	२५	९	६
९	२२	१०	४
१०	२२	१०	२६
११	२३	१०	४९
१२	२१	१०	७०

मासपारायणम्

कृष्णपक्षे

दिन	अध्याय	स्कंध	अध्याय
१	११	१	११
२	१०	२	२
३	१०	३	२
४	१०	३	१२
५	११	३	२३
६	११	४	१
७	९	४	१०
८	१२	४	२२
९	१०	५	१
१०	९	५	१०
११	१०	५	२०
१२	११	६	५

शुक्लपक्षे

दिन	अध्याय	स्कंध	अध्याय
१	१४	८	१५
२	१३	९	४
३	१४	९	१८
४	१२	१०	६
५	११	१०	१७
६	१३	१०	३०
७	१२	१०	४२
८	१२	१०	५४
९	११	१०	६५
१०	१३	१०	७८
११	९	१०	९७
१२	१२	११	९

१३	२२	११	२	१३	११	६	१६	१३	१२	११	२१
१४	२३	११	२५	१४	१०	७	७	१४	१२	१२	२
१५	१९	१२	१३	१५	९	८	१	१५	११	१२	१३

वृहस्पतिमतात्सर्वकामासिकामी ज्येष्ठशुक्लपक्षे आषाढे वा कुर्यात् ॥

मासपारायणं यदाकृष्णादि तदा शुक्लांतं यदा शुक्लादि तदा कृष्णांतम्। एवं प्रजापालनादिसर्वकामनाप्राप्तिम् लकं वृहस्पतिमत-मिदम्। एवं द्विमासिकषाण्मासिक सांवत्सरिकादिकमपि पारायणे ज्ञेयम्। वृहस्पति मतस्पष्टिः समाप्ता॥ मतान्तरे वैशाखशुक्ल पञ्चमीमारभ्य ज्येष्ठशुक्ल पञ्चमीं यावत्॥

॥ अथ महाभारतश्रवण विधानम् ॥

(महाभारते)

अतः परं प्रवक्ष्यामि यानि देयानि भारते।
वाच्यमाने तु विप्रेभ्यो राजन्पर्वणिपर्वणि ॥१॥
स्वस्ति वाच्य द्विजानादौ ततः कार्ये प्रवर्तिते।
समाप्ते पर्वणि ततः स्वशक्त्या पूजयेद्द्विजान् ॥२॥
आदौ तु वाचकं चैव वस्त्रगंधसमन्वितम्।
विधिवद्भोजयेद्राजन्मधुपायसमुत्तमम् ॥३॥
ततो मूलफलप्रायं पायसं मधुसर्पिषा।
आस्तिकं भोजयेद्राजन्दद्याच्चैव गुडौदनम् ॥४॥
अपूपैश्चैव पूपैश्च मोदकैश्च समन्वितम्।
सभापर्वणि राजेन्द्र हविष्यं भोजयेद्द्विजान् ॥५॥
आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान्।
अरणीपर्व चासाद्य जल कुंभान्प्रदापयेत् ॥६॥
तर्पणानि च मुख्यानि वन्यमूलफलानि च।
सर्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ॥७॥
विराट्पर्वणि तथा वासांसि विविधानि च।
उद्योगे भरतश्रेष्ठ सर्वकामगुणान्वितम् ॥८॥
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलंकृतान्।
भीष्मपर्वणि राजेन्द्र दत्त्वा यानमनुत्तमम् ॥९॥

ततः सर्वगुणोपेतं मन्नं दद्यात्सुसंस्कृतम् ।
द्रोणपर्वणि विप्रेभ्यो भोजनं परमार्चितम् ॥१०॥
शराश्च देया राजेन्द्र चापान्यसिवरास्तथा ।
कर्णपर्वण्यपि तथा भोजनं सर्वकामिकम् ॥११॥
विप्रेभ्यः संस्कृतं सम्यग्दद्यात्संयतमानसः ।
शल्यपर्वणि राजेन्द्र मोदकैः सगुडौदनैः ॥१२॥
अपूपैस्तर्पणैश्चैव सर्वमन्नं प्रदापयेत् ।
गदापर्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ॥१३॥
स्त्रीपर्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदनं पुरस्ताच्च ऐषीके दापयेत्पुनः ॥१४॥
ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतम् ।
शान्तिपर्वणि च तथा हविष्यं भोजयेद्द्विजान् ॥१५॥
आश्विमेधिकमासाद्य भोजनं सर्व कामिकम् ।
तथाश्रमनिवासे तु हविष्यं भोजयेद्द्विजान् ॥१६॥
मौसले सार्वगुणितं गंधमाल्यानुलेपनम् ।
महाप्रस्थानिके तद्वत्सर्वकामगुणान्वितम् ॥१७॥
स्वर्गपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंश्रसमाप्तौ तु महस्त्रं भोजयेद्द्विजान् ॥१८॥
गामेकां निष्कसंयुक्तां ब्राह्मणाय निवेदयेत् ।
तदर्धेनापि दातव्या दरिद्रेणापि पार्थिव ॥१९॥
प्रतिपर्वसमाप्तौ तु पुस्तकं वै विचक्षणः ।
सुवर्णेन च संयुक्तं वाचकाय निवेदयेत् ॥२०॥
हरिवंशे पर्वणि च पायसं तत्र भोजयेत् ।
पारणे पारणे राजन्यथावद्भरतर्षभ ॥२१॥
समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः ।
शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ॥२२॥
अर्चयेत यथान्यायं गंधमाल्यैः पृथक्पृथक् ।
हिरण्यं च सुवर्णं च दक्षिणामथ दापयेत् ॥२३॥

सर्वथा तोषयेद्भक्त्या वाचकं गुरुमात्मनः ।
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा ॥२४॥
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्वदेवताः ।
अष्टादशपुराणानां श्रवणाद्यत्फलं भवेत् ॥२५॥
तत्फलं समवाप्नोति वैष्णवो नात्र संशयः ।
स्त्रियश्च पुरुषाश्चैव वैष्णवं पदमाप्नुयुः ॥२६॥
स्त्रिभिश्च पुत्रकामाभिः श्रोतव्यं वैष्णवं यशः ।
दक्षिणा चात्र देया वै निष्कपंचसुवर्णकम् ॥२७॥
वाचकाय यथाशक्त्या यथोक्तं फलमिच्छता ।
स्वर्णशृंगीं च कपिलां सवत्सां वस्त्रसंवृताम् ॥२८॥
वाचकाय च दद्याद्धि आत्मनः श्रेय इच्छता ।
अलंकारं प्रदद्याच्च पाण्योर्वै भरतर्षभ ॥२९॥
कर्णस्याभरणं दद्याद्धनं चैव विशेषतः ।
भूमिदानं समादद्याद्वाचकाय नराधिप ॥३०॥
शृणोति श्रावयेद्वापि सततं चैव यो नरः ।
सर्वपापविनिर्मुक्तो वैष्णवं पदमाप्नुयात् ॥३१॥
पितृनुद्धरते सर्वानेकादशसमुद्भवान् ।
आत्मानं ससुतं चैव स्त्रियं च भरतर्षभ ॥३२॥
दशांशश्चैव होमोऽपि कर्त्तव्योत्र नराधिप ।
इदं मया तवाग्रे च प्रोक्तं सर्वे नरर्षभ ॥३३॥

॥ इति महाभारतश्रवणविधानं समाप्तम् ॥

अथ श्रीवाल्मीकिमुनिकृतस्यादिकाव्यस्य श्रीमद्रामायणाख्यस्य नवाहपाठ विधानम्

(रामसेवाग्रन्थे)

माघकार्तिकवैशाखे चैत्र वान्यतमेपि च ।
यथावकाशः श्रद्धा च तथैव शृणुयान्नरः ॥१॥
चैत्रे माघे कार्तिके च सिते पक्षे च वाचयेत् ।

नवाहे सुमहापुण्यं श्रोतव्यं च प्रयत्नतः ॥२॥
पञ्चम्या दिनमारभ्य रामायणकथामृतम् ।
नवाहश्रवणेनैव सर्व पापैः प्रमुच्यते ॥३॥
तिथिः सैव महापुण्या स कालः सर्वपुण्यदः ।
यस्मिन्रमायणकथाश्रवणे जायते मतिः ॥४॥
पुण्यक्षेत्रे पुण्यतीर्थे तुलसीविष्णुसन्निधौ ।
स्वगृहे वा पठेद्यस्तु स देवैः परिपूज्यते ॥५॥
पूर्वोत्तरमुखो वक्ता श्रोतारस्तत्पुरः स्थिताः ।
एकाग्रतरचित्तेन पठेद्वा शृणुयान्नरः ॥६॥
व्यासासनं समास्तीर्य तदग्रे पुस्तकासनम् ।
वितानपल्लवो-पेतं कदलीस्तंभमण्डितम् ॥७॥
श्रोतृणामासनं स्थाप्यं विशालं तत्पुरः पुनः ।
श्रोतृभिश्च तथा वक्तुर्व्यासाद्ग्रंथस्य चोच्चता ॥८॥
पुराणं पूजयेन्नित्यं नित्यं व्यासस्य पूजनम् ।
मध्याह्ने घटिकायुग्मं विश्रामं कारयेत्तथा ॥९॥
कथान्ते भगवन्नामस्मरणं संप्रकीर्तितम् ।
समाप्तौ वस्त्रभूषाद्यैर्द्रव्यैर्व्यासस्य तोषणम् ॥१०॥

॥ अथ नवदिनपर्यन्तं कथाविश्रामस्थलकथनम् ॥

प्रथमे तु अयोध्यायाः षट्सर्गांते शुभा स्थितिः ।
तस्यैवाऽशीतिसर्गान्ते द्वितीये दिवसे स्थितिः ॥१॥
तथा विंशतिसर्गान्ते चारण्यस्य तृतीयके ।
दिने चतुर्थे षट्चत्वारिंशत्सर्गे कथास्थितिः ॥२॥
किष्किंधाख्यस्य कांडस्य पाठविद्भिरुदाहृता ।
सुसप्त चत्वारिंशत्के सर्गान्ते सुन्दरे स्थितिः ॥३॥
पञ्चमे दिवसे कुर्य्यादथ षष्ठे तथोच्यते ।
युद्धकाण्डस्य पञ्चाशत्सर्गान्ते विमला स्थितिः ॥४॥
एकोनशतसंख्याके सर्गान्ते सप्तमे दिने ।
युद्धस्यैव तु काण्डस्य विश्रामः संप्रकीर्तितः ॥५॥

तथा चोत्तरकाण्डस्य षट्त्रिंशत्सर्गपूरणे ।
अष्टमे दिवसे कृत्वा स्थितिश्च नवमे दिने ॥६॥
शेषं समाप्य युद्धस्य चान्त्यं सर्गं पुनः पठेत् ।
रामराज्यकथा यस्मिन्सर्ववांछितदायिनी ॥७॥
एवं पाठक्रमः पूर्वैराचार्यैश्च विनिर्मितः ।
यः करोति नरश्रेष्ठः शृणुयाद्वा समाहितः ॥८॥
धर्म्मार्थकाममोक्षाणां फलं त्वविकलं लभेत् ।
कथान्ते मण्डपं कृत्वा सर्वतोभद्रसंयुतम् ॥९॥
सस्थंडिलं सकुण्डं वा पताकाकदलीयुतम् ।
पूजयेद्गणराजं च ब्राह्मणैः स्वस्ति वाचयेत् ॥१०॥
मातृकापूजनं नान्दीश्राद्धं भूसुरवर्णनम् ।
मण्डले सर्वतोभद्रे हैमं रामं प्रपूजयेत् ॥११॥
जानकीसहितं वस्त्रभूषास्त्रक् चन्दनादिभिः ।
पार्श्वे भरतशत्रुघ्नौ हनुमन्तं पुरः स्थितम् ॥१२॥
पृष्ठे विभीषणं भक्तं सुग्रीवं तु समर्चयेत् ।
लक्ष्मणं पादपीठस्य सन्निधौ विधिनार्चयेत् ॥१३॥
चतुःशतोत्तरं चैव द्विसहस्रं तिलैस्तदा ।
हवनं मंत्रतः कुर्याद्द्वादशाक्षरविद्यया ॥१४॥
अष्टाक्षरेण वा रामषडक्षरत आचरेत् ।
तर्पणं तद्दशांशेन मार्ज्जनं तद्दशांशतः ॥१५॥
ब्राह्मणान्वैष्णवांश्चैव सदन्नेन तु भोजयेत् ।
एकपारायणस्यैषा संख्या होमे प्रकीर्तिता ॥१६॥
पाठवृद्ध्या तु होमस्य संख्यावृद्धिः प्रजायते ।
गोप्रदानादिकं सर्वं दानं शक्त्या प्रदापयेत् ॥१७॥
व्यासाय पुस्तकं दद्याद्धेमसिंहासने स्थितम् ।
सांगतासिद्धये तस्य स्वर्णमुद्रां समर्पयेत् ॥१८॥
भूयसीं दक्षिणां दत्त्वा दीनानाथान् समर्चयेत् ।
एवं कृते मनुष्याणां दुर्लभोऽपि मनोरथः ॥१९॥

श्रीरामस्य प्रसादेन सुलभः स्यान्न संशयः ।
प्रतिमां कलशोपेतां मण्डलेन समन्विताम् ॥२०॥
विसर्जयित्वाऽऽचार्याय दद्यात्कर्म्मांगसिद्धये ।
कृतकृत्यं भावयित्वा चात्मानं तु हरिं स्मरेत् ॥२१॥

॥ इति श्रीवाल्मीकि रामायण नवाहपारायणविधानम् ॥

॥ अथ पञ्चदशीकाम्य प्रयोगः ॥

विनियोगः – अस्य श्रीपञ्चदशीमन्त्रस्य दक्षिणामूर्तिऋषिः पंक्तिश्छन्दः त्रिपुरा देवता मम इह जन्मनि सकल दुरितोपशमनार्थं अमुककामनासिद्धये एतावत्संख्याक यन्त्रपूजनपूर्वक जपे विनियोगः।

ऋष्यादिन्यास – दक्षिणामूर्ति ऋषिये नमः शिरसे। पंक्ति छन्दसे नमः मुखे। त्रिपुरा० देवतायै नमः हृदये। विनियोगाय नमः सर्वाङ्गे।

ध्यानम् –

ॐ बालार्कद्युतितेजसां त्रिनयनां रक्ताम्बरोल्लासिनीं
नानाभूषणभूषितां सुविमलां रत्नासने संस्थिताम्।
हस्तैः पाशधनुः श्रृणिं सुरुचिरं पद्मं मुदा बिभ्रतीं
श्रीचक्रस्थितसुन्दरीं त्रिजगतामाधारभूतां भजे ॥१॥

इतिध्यात्वा यथामिलितोपचारैः प्राणप्रतिष्ठापूर्वकं यन्त्रस्य पूजनं विधाय यथासंख्याकमन्त्रैर्यन्त्रपूजनं कुर्य्यात्॥

यंत्र में अंकित अंकों के देवताओं का उनके कोष्ठक में पूजन करें।

मन्त्राः – ॐ एकपरमात्माने नमः, द्वाभ्यामश्विनीकुमाराभ्यां० त्रिभ्यो ब्रह्मविष्णुरुद्रेभ्यो० चतुर्भ्यो वेदेभ्यो० पञ्चभ्यः पृथिव्यादिभूतेभ्यो० षड्भ्यः ऋतुभ्यो० सप्तभ्यो मुनिभ्यो० अष्टभ्यो वसुभ्यो० नवभ्यो निधिभ्यो० एवं संपूज्य पुनः सम्पूज्य बलिं दद्यात्।

बलिं संस्थाप्य संप्रोक्ष्य मन्त्रः – ॐ श्रीं ऐं ह्रीं पञ्चदश्यै स्वाहा। इति॥

आरम्भादिसमाप्तिपर्यन्तं यन्त्रसंख्यां च कुर्यात्। दक्षिणां ब्राह्मणभोजनं च दत्त्वा विसर्जनं कुर्यात्। एवं कृते यन्त्रः सिद्धो भवति। सिद्धे मन्त्रे प्रकुर्वीत प्रयोगानिष्ट सिद्धये। इति पञ्चदशीयन्त्रपूर्णप्रयोगः समाप्त

वस्त्र, आसन, गंध एवं लेखनी का उल्लेख अलग-अलग कामना हेतु इस प्रकार है-

॥ अथ पञ्चदशीप्रयोगविधिः ॥

अथातः सम्प्रवक्ष्यामि सुन्दरीयन्त्रमुत्तमम्। यस्य विज्ञानमात्रेण त्रैलोक्य-विजयी भवेत्॥१॥ तद्यन्त्रं सम्प्रवक्ष्यामि शृणु यत्नेन साम्प्रतम्। नवधा कृतभूभागे नव कोष्ठानि चालयेत्॥२॥

तत्र सूत्रक्रमेणैव स्थाप्या अङ्का महेश्वरि। नव यन्त्राणि देवेशि प्रस्तारक्रम योगतः ॥३॥ तत्राश्वगतियोगेन हयमारुह्य पार्वती। तानि मार्गक्रमेणैव नव यन्त्राणि कारयेत् ॥४॥ एकादिरन्ध्रपर्य्यन्तं तत्रांकांस्तु प्रवेशयेत्। एतस्य फलबाहुल्यं शृणु यत्नेन साम्प्रतम्॥५॥ दशवारं तु सततं लोकसंमोहनं भवेत्। वारविंशतिकं कृत्वा सर्वाकर्षणकृद्भवेत्॥६॥ त्रिंशद्वारं नरः कृत्वा पृथिव्यां जयमाप्नुयात्। चत्वारिंशत्समारभ्य शतान्तं परमेश्वरि॥७॥ यः करोति महेशानि पुरश्चर्यायुतो नरः। अयुतन्तु पुरश्चर्य यन्त्रमात्रं समाचरेत्॥८॥ पुरश्चर्यां समाप्यैवं प्रयोगांश्च प्रकारयेत्। पुरश्चरणविहीनस्य नेदमुक्तं महेश्वरि॥९॥ जीवहीनो यथा देही सर्वकर्मसु न क्षमः। पुरश्चरणहीनन्तु तथा यन्त्रं प्रकीर्तितम्॥१०॥ अलक्त केन विलिखेन्मोहनार्थं महेश्वरि। गोरोचनेन विलिखेद्वशीकरणसिद्धये॥११॥ कस्तूर्य्या विलिखेद्देवि सर्वाकर्षणसिद्धये। हरिद्रया तु विलिखेत्सर्वेषां स्तंभकर्म[illegible]॥१२॥ केशरेण लिखेद्देवि देवतादर्शनाय वै। धुस्तूरस्य रसेनैव मारणार्थं लिखेत्सुधीः॥१३॥ शवाङ्गारेण विलिखेच्छत्रूच्चाटन कर्मणि। विद्वेषणे तु विलिखेद्विभीतकरसेन वै॥१४॥ चन्दनेन लिखेच्छान्तौ विशेषः कथ्यते शृणु। ब्राह्मणो विलिखेत् भूर्जे ताडपत्रे तु भूभुजः॥१५॥ वैश्यस्तु विलिखेद्देवि कार्पासे सर्वसिद्धये। शूद्रो हि विलिखेद्देवि भूमिभागे प्रयत्नतः॥१६॥ यवनस्याविकं प्रोक्तं कालिके सर्वकर्मसु। एवमेव लिखेन् मस्या ह्यनेषां पूर्व ईरितम् ॥१७॥ दूर्वया विलिखेच्छांतो वैश्ये जातभवामतः। स्वर्णेन विलिखेद्देवि मोहनार्थं स्वसिद्धये॥१८॥ रौप्येण विलिखेद्यत्नात् सर्वाकर्षणसिद्धये। काकपक्षोत्थलेखिन्या मारणार्थं लिखेच्छिवे॥१९॥ स्तम्भनार्थं तु विलिखेल्लेखिन्या सारसोत्थया। उच्चाटन द्वेषेणे तु लोहेन संलिखेत्सुधीः॥२०॥ लेखिन्या लक्षणं देवि प्रोक्तमष्टांगुलं ततः। पञ्चतत्त्व क्रमेणैव पञ्चकार्य प्रसिद्धये॥२१॥ अष्टांगादि दशांगादि तथा पञ्चदशप्रिये। अंकयंत्रेण कथितं किन्तु बीजे प्रकीर्नितम्॥[illegible]॥ रक्तांबरो रक्तमाल्यो रक्तवस्त्रानुभूषितः। रक्तासने विशेद्देवि [illegible] वा [illegible] ॥२३॥ स्त्रियं

न गच्छेत् नियतो ब्रह्मचारी भवेत्तदा। ब्रह्मचर्यरतो यस्तु तस्य सिद्धिर्न संशयः ॥२४॥ तदांकयन्त्रं कुर्वीत फलभागी तदा भवेत्। अंकत्रयं विहायाशु यः कश्चित्सिद्धिमिच्छति ॥२५॥ स चक्षुषा विना रूपं दर्पणे द्रष्टुमिच्छति। अयुतं विलिखेद्देवि वन्दीमोचन कर्म्मणि ॥२६॥ अयुतं द्वितीयं कृत्वा गतराज्यमवाप्नुयात्। अयुतं त्रितयं कृत्वा भूविजयी विजायते ॥२७॥ शापानुग्रहसामर्थ्यं भवेद्वेदायुते शिवे। वाणायुतप्रयोगेण वाक्सिद्धिश्च भवेद्ध्रुवम् ॥२८॥ रसायुतं लिखित्वा वै जलमध्ये विनिक्षिपेत्। जलक्षेपेण मार्गेण पृथ्वीशं तु वशं नयेत् ॥२९॥ सप्तायुतं लिखेद्धीमान् साक्षाल्लक्ष्मीपतिर्भवेत्। अष्टायुतं लिखेद्यो वै इष्टसिद्धिमवाप्नुयात् ॥३०॥ नंदायुतं लिखित्वा तु नवनाथसमो भवेत्। लक्षमात्रं लिखेद्यो हि शिवतुल्यो भवेत्क्षणात् ॥३१॥ प्रत्यहं विलिखेद्देवि शतं वा तु तदर्धकम्। त्रिशतं वा लिखेद्देवि सहस्रं वा तदर्धकम् ॥३२॥ एवं क्रमेण कथितः पुरश्चर्या-विधिस्तव। एवं यः कुरुते मर्त्यस्तस्य सिद्धिर्भविष्यति ॥३३॥

॥ इति श्री शिव ताण्डव प्रत्यक्ष सिद्धि पञ्चदशी यंत्र विधि समाप्तः ॥

॥ अथ प्रयोगविधिः ॥

करन्यासः - ॐ ऐं ऐं लं क्षं रं स्वाहा आचमनं सर्वशुद्धितया कर्तव्यं। ॐ ह्रां वां अंगुष्ठाभ्यां नमः। ॐ ह्रीं वीं तर्जनीभ्यां नमः। ॐ ह्रूं वूं मध्यमाभ्यां नमः। ॐ ह्रैं वैं अनामिकाभ्यां नमः। ॐ ह्रौं वौं कनिष्ठिकाभ्यां नमः। ॐ ह्रः वः करतलकरपृष्ठाभ्यां नमः।

हृदयादिन्यासः - ॐ ह्रां वां हृदयाय नमः। ॐ ह्रीं वीं शिरसे स्वाहा। ॐ ह्रूं वूं शिखायै वषट्। ॐ ह्रै वैं कवचाय हुं। ॐ ह्रौं वौं नेत्रत्रयाय वौषट्। ॐ ह्रः वः अस्त्राय फट्।

अथमन्त्रः - ॐ ऐं ह्रीं श्रीं क्लीं महात्रिपुरसुन्दरी स्वाहा।

पूर्वं पञ्चदशीविद्यामन्त्रस्य सपादलक्षजपं कुर्य्यात्। एवं कृते मन्त्रः सिद्धो भवति। सिद्धे मन्त्रे प्रकुर्वीत प्रयोगानिष्टसिद्धये। प्रथमं मन्त्रस्य पुरश्चरणं कुर्यात् पश्चाद् यन्त्रं साधयेत् ॥

पहले मन्त्र का पुरश्चरण करें पश्चात् यंत्र साधना करें।

अथातः संप्रवक्ष्यामि प्रयोगं महदद्भुतम्। रवौ वारेऽर्कदुग्धेन श्मशान भस्मना लिखेत् ॥१॥ साध्यवर्णस्य नामानि चितामध्ये विनिक्षिपेत्। विक्षिप्तो जायते मर्त्यः, अष्टोत्तरशतं तपेत्। पञ्चदशी विलोमं तु सन्ध्याकाले विशेषतः ॥२॥

चन्द्रवारे गृहीत्वा तु श्वेतदूर्वां च केशरम्। श्वेतगुञ्जासमायुक्तं कपिलापयमध्यतः ॥३॥ भौमवारे गृहीत्वा तु काकरक्तं सपक्षकम्। नामाक्षरं लिखेद्यन्त्रे मौनभावयुतो नरः ॥४॥ तस्य द्वारे लिखेद् भूमावुल्लंघ्योच्चाटनं भवेत्। कुटुम्बानां च सर्वेषां यदि शक्रसमो रिपुः ॥५॥ बुधवारे गृहीत्वा तु नागकेशररोचनम्। सर्षपा तैलयुक्तेन लिखेद्यन्त्रं तदुत्तमम् ॥६॥ कृत्वा तु वर्तिकां तस्य चालयेन्मन्त्रभाविताम्। नृकपाले कज्जलं तु तज्जपेन्मोहनं जगत् ॥७॥ गुरुवारे हरिद्रे द्वे रोचनागुरुसघृतम्। यन्त्रराजं समालिख्य तस्य मध्ये तु नामकम् ॥८॥ आसनान्ते खनित्वा तु यन्त्रं स्थाप्यं शुभानने। कर्षणं जायते देवि नान्या श्रेष्ठा क्रिया स्मृता ॥९॥

प्रयोगान्तरम् – अथातः सम्प्रवक्ष्यामि प्रयोगं महदद्भुतम्। भृगुवारे सकर्पूरं व चकुष्टमधुसमम् ॥१०॥ लिखित्वा यन्त्रराजं तु भूर्जपत्रे सुशोभनम्। दृष्ट्वा स्त्रीवशमायाति प्राणैरपि धनैरपि ॥११॥ शनिवारे चिताकाष्ठे पंचदश्या विलोमकम्। लिखित्वा यस्य नामानि श्मशाने निखनेद् बुधः। कुक्कुटस्य तु रक्तेन म्रियते नात्र संशयः ॥१२॥

अथातः संप्रवक्ष्यामि यन्त्रराजविधिस्तथा। यस्मै कस्मै न दातव्यं गोपनीयं च यत्नतः ॥१३॥ वटवृक्षतले यन्त्रं भूमिमध्ये ततो लिखेत्। कृष्णपक्षत्रयोदश्यां लेखिनीं वटवृक्षजाम् ॥१४॥ नीत्वारम्भं विधातव्यमेकचित्तेन मानवैः। अयुतं प्रजपेद्देवि धर्मकामार्थमोक्षदम् ॥१५॥ दाडिमीवृक्षलेखिन्या भूमौ यन्त्रसहस्त्रकम्। लिखित्वा जायते मोक्षो वन्दिनस्तु वरानने ॥१६॥ ब्रह्मवृक्षस्य लेखिन्या यन्त्रं पञ्चशतं लिखेत्। भूमिमध्ये दरिद्रस्य नाशनं भवति ध्रुवम् ॥१७॥ गोमूत्रं च शिलां चैव कर्पूरागरुमिश्रितम्। एकीकृत्याश्वत्थमूले लिखेद्यन्त्रं तु भूर्जके ॥१८॥ चिन्तितं चाचिरेणैव जायते निश्चितम्। प्रतापाल्लभते भोगानिन्द्रतुल्यपराक्रमान् ॥१९॥ बिल्वपत्ररसं ग्राह्यं हरिता लमनःशिले। बिल्वशाखजलेखिन्या सहस्त्रद्वितयं लिखेत् ॥२०॥ एकान्ते च शुभस्थाने भूमिमध्ये तथैव च। विलिख्यात्र शुभं यन्त्रं वाचां सिद्धिः प्रजायते ॥२१॥ अर्कपत्ररसेनैव अर्कपत्रे समालिखेत्। अष्टोत्तरशतं चैव रिपुवंशविनाशकृत् ॥२२॥ किंकरीवृक्षबन्धाद्वै ज्वरादिशूलकं तनौ। जायते नात्र संदेहो यदि शक्रसमो रिपुः ॥२३॥ पाषाणस्तंभनं देवि शत्रुद्वारे च भूमिके। हरिद्रालिखितं यन्त्रं स्थाप्यं तत्र सुशोभनम् ॥२४। एवं कृते तु देवेशि पितृपुत्रादिकैः सह. शत्रोः प्रजायते द्वेषो सत्यं सत्यं ब्रवीमि ते ॥२५॥ अपामार्गरसेनैव लिखितं [illegible] ऐकाहिकं तृतीयं च चतुर्थ[illegible] ॥२६॥ भृङ्गराजरसेनैव

यन्त्रं लेख्यं तु भूर्जके। धारयेद्वापि हृदये विवादविजयो भवेत्॥२७॥

अथातः सम्प्रवक्ष्यामि यन्त्रराजस्य सिद्धिदम्। लक्षयन्त्रं समालिख्य सिद्धपीठे शुभे दिने॥२८॥ भूमिमध्ये शुद्धचित्तो भूमिशायी जितेन्द्रियः। हवनादिकं तु कुर्याच्च सर्पिषा घृततण्डुलैः। शर्करामिश्रितैश्चैव यन्त्रसिद्धिः प्रजायते॥२९॥ यानि यानि च कर्माणि एकयन्त्रैः समालिखेत्। क्षणमात्रेण सिद्धिःस्यात् सत्यं सत्यं पुनः पुनः। देवरूपो भवेद्देवि नरः शीघ्रक्रियाकरः॥३०॥ भूर्जपत्रे लिखेद्यन्त्रं रोचनागुरुकुङ्कुमैः। कृत्वा च धूपदीपादि जलमध्ये विनिक्षिपेत्॥३१॥ रात्र्यन्ते स्वप्नमध्ये तु वरं देवि ददाम्यहम्। जीवन्मुक्तः सुभागी च सर्वान् कामानवाप्नुयात्॥३२॥ देवदत्तं महावीरं पञ्चदश्यास्तु यन्त्रकम्। वश्यं करोतु मे देवि जलमध्ये प्रवाहितम्॥३३॥ दुग्धमाषतिलांश्चैव शर्कराघृतवीरकान्। एकीकृत्य बलि दद्यात् कृष्णपक्षाष्टमीतिथौ॥३४॥ वश्यो भवति वीरोऽयं प्राणैरपि धनैरपि। सर्वकर्माणि सिद्धिं च यान्ति नात्र विचारणा॥३५॥

यंत्र-मंत्र साधना में देवदत्त कहीं लिखा हो तो उसका अर्थ साध्य शत्रु या मित्र का नाम लिखना चाहिये।

पूजायन्त्रम्

सुन्दरी ८	ॐ १	महा ६
ह्रीं ३	क्लीं ५	त्रिपुर ७
श्रीं ४	स्वाहा ९	ऐं २

प्रयोगयन्त्रम्

८	१	६
३	५	७
४	९	२

देवदर्शनयन्त्रम्

८	१	६
३	५	७
४	९	२

द्रव्यप्राप्तियन्त्रम्

२	९	४
७	५	३
६	१	८

वशीकरणयन्त्रम्

६	७	२
१	५	९
८	३	४

मारणोच्चाटनयन्त्रम्

२	७	६
९	५	१
४	३	८

इति मिश्रतन्त्रम् सम्पूर्णम्

परिशिष्ट

पेज नं० ३४३ का प्रयोग विधि के अन्तर्गत विभिन्न सूक्त-

(केतुंकृण्वन्न, अभिव्यये, बलंधेहि, वय सुपर्णा, विजिहोर्ष-वृहत्सा)

केतुं कृण्वन्नकेतवे पेशोमर्या अपेशसे। समुषद्भिरजायथाः ॥१ ॥

अभिव्ययस्व खदिरस्य सारमोजो धेहि स्पन्दने शिशपायाम् ।
अक्षवीलो वीलित वीलयस्व मा यामादस्मादव जीहियो नः ॥२ ॥

बलंधेहि तनूषु नो बलमिन्द्रानलुत्सु नः ।
बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥३ ॥

वय सुपर्णा उपसेदरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अपध्वान्तमूर्णहि पूर्धि चक्षुर्मुमुग्ध्यस्मान् निधनयेव बद्धान् ॥४ ॥

विजिहीष्व वनस्पते योनिः सूष्यन्त्या इव ।
श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चताम् ॥५ ॥

वृहत्साम सूक्तम्-

त्वामिद्धि हवामहे सा तौ वाजस्व कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्ततः ॥ १ ॥

सत्वं वज्रहस्त धुष्णुयाम हस्तवा नो अद्रिवः ।
गोमश्व रथ्यमिन्द्र संकिरसत्रावजंन जिग्युषे ॥२ ॥

॥ अथ शिव पञ्चावरण देवानां स्तुतिः॥

इस स्तोत्र में रुद्र यन्त्र में वर्णित पूजा का वृहत् कर्म है जो व्यक्ति नित्य रुद्र यन्त्र का अर्चन करने में असमर्थ हैं वे यदि इस स्तोत्र का पाठ करें तो उसे यन्त्रार्चन का पूर्ण फल मिलता है।

स्तोत्रं वक्षामि ते कृष्ण पंचावरणमार्गतः ।
योगेश्वरमिदं पुण्यं कर्म येन समाप्यते ॥१॥

जय जय जगदेकनाथ शम्भो, प्रकृतिमनोहर नित्यचित्स्वभाव ।
अतिगतकलुष प्रपञ्चवाचामपि, मनसां पदवीमतीततत्त्वम् ॥२॥

स्वभाव निर्मलाभोग जय सुन्दरचेष्टित ।
स्वात्मतुल्य महाशक्ते जय शुद्ध गुणार्णव ॥३॥

अनन्तकान्ति सम्पन्न जयासदृश विग्रह ।
अतर्क्य महिमाधार जयानाकुलमंगल ॥४॥

निरञ्जन निराधार जय निष्कारणोदय ।
निरन्तरपरानन्द जय निर्वृत्तिकारण ॥५॥

जयति परमैश्वर्य जयति करुणास्पद ।
जय स्वतन्त्र सर्वस्व जयासदृशवैभव ॥६॥

जयावृतमहाविश्व जयानावृत केनचित् ।
जयोत्तर समस्तस्य जयात्यन्तनिरुत्तर ॥७॥

जयाऽद्भुत जयाक्षुद्र जयाऽक्षत जयाऽव्यय ।
जयाऽमेय जयाऽमाय जयाऽभव जयाऽमल ॥८॥

महाभुज महासार महागुण महाकथ ।
महाबल महामाय महारस महारथ ॥९॥

नमः परमदेवाय नमः परमहेतवे ।
नमः शिवाय शान्ताय नमः शिवतराय ते ॥१०॥

त्वदधीनमिदं कृत्स्नं जगद्धि ससुराऽसुरम् ।
अतस्त्वद्विहितामाऽऽज्ञां क्षमतं कोऽतिवर्तितुम् ॥११॥
अयं पुनर्जनो नित्य भवदेकसमाश्रयः ।
भवानतोऽनुगृह्यस्मै प्रार्थितं सम्प्रयच्छतु ॥१२॥
जयाऽम्बिके जगन्मार्तजय सर्वजगन्मयि ।
जयाऽनवधिकैश्वर्ये जयाऽनुपम विग्रहे ॥१३॥
जय वाङ्मनसाऽतीते जयाचिद्ध्वान्तभाजके ।
जय जन्मजराहीने जय कालोत्तरोत्तरे ॥१४॥
जयाऽनेकविधानस्थे जय विश्वेश्वरप्रिये ।
जय विश्वसुराऽराध्ये जय विश्वविजृम्भिणि ॥१५॥
जयमङ्गल दिव्याङ्गे जय मङ्गल दीपिके ।
जय मङ्गल चारित्रे जय मङ्गल दायिनि ॥१६॥
नमः परमकल्याण गुण संचय मूर्तये ।
त्वतः खलु समुत्पन्नं जगत्त्वय्येव लीयते ॥१७॥
ज्वद्विनातः फलं दातुमीश्वरोऽपि न शक्नुयात् ।
जन्मप्रभृति देवेशि जनोऽयं त्वदुपाश्रितः ॥१८॥
पञ्चवक्त्रो दशभुजः शुद्धस्फटिक सन्निभः ।
वर्णब्रह्मकलादेहो देवः सकल निष्कल ॥१९॥
शिवमूर्तिसमारूढः शान्त्यतीतः सदाशिवः ।
भक्त्या मयार्चितो मह्यं प्रार्थितं शं प्रयच्छतु ॥२०॥
सदाशिवाङ्कमाऽऽरूढ़ा शक्तिरिच्छा शिवाह्वया ।
जननी सर्वलोकानां प्रयच्छतु मनोरथम् ॥२१॥
शिवयोर्दयितौ पुत्रौ देवौ हेरम्ब षण्मुखौ ।
शिवाऽनुभावौ पुत्रौ देवौ हेरम्ब षण्मुखौ ॥२२॥
शिवाऽनुभावौ सर्वज्ञौ शिवाभ्यां नित्यसत्कृतौ ।
सत्कृतौ च सदा देवौ ब्रह्माद्यैस्त्रिदशैरपि ॥२३॥
सर्वलोकपरित्राणं कर्तुमभ्युदितौ सदा ।
स्वेच्छावतारं कुर्वन्तौ स्वांशभेदैरनेकशः ॥२४॥

तາविमौ शिवयोः पार्श्वे नित्यमित्थं मयार्चितौ ।
तयोराज्ञां पुरस्कृत्य पार्थितं मे प्रयच्छताम् ॥२५॥
शुद्धस्फटिक संकाशमीशानाख्यां सदाशिवम् ।
मृर्द्धाभिमानिनी मूर्तिः शिवस्य परमात्मनः ॥२६॥
शिवार्चरतं शान्तं शान्त्यतीतं खमास्थितम् ।
पञ्चाक्षरान्तिमं बीजं कलाभिः पञ्चभिर्युतम् ॥२७॥
प्रथमावरणे पूर्वं शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं ते प्रयच्छतु ॥२८॥
बालसूर्य प्रतिकाशं पुरुषाख्यं पुरातनम् ।
पूर्ववक्त्राभिमानं च शिवस्य परमेष्ठिनः ॥२९॥
शान्त्यात्मकं मरुत्संस्थं शम्भोः पादार्चने रतम् ।
प्रथमं शिवबीजेषु कलासु च चतुश्कलम् ॥३०॥
पूर्वभागे मया भक्त्या शक्त्या सहसमर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥३१॥
अञ्जनादि प्रतीकाशमघोरं घोरविग्रहम् ।
देवस्य दक्षिणं वक्त्रं देवदेवपदार्चकम् ॥३२॥
विद्यापदं समारूढं वह्निमण्डल मध्यगम् ।
द्वितीयं शिवबीजेषु कलास्वष्टकलान्वितम् ॥३३॥
शम्भोर्दक्षिणदिग्भागे शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥३४॥
कुंकुमक्षोदसंकाशं वामाख्यं वरवेशधृक् ।
वक्त्रमुत्तरमीशस्य प्रतिष्ठायां प्रतिष्ठतम् ॥३५॥
वारिमण्डलमध्यस्थं महादेवार्चने रतम् ।
तुरीयं शिवबीजेषु त्रयोदशकलान्वितम् ॥३६॥
देवस्योत्तरदिग्भागे शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥३७॥
शङ्खकुन्देन्दु धवलं सद्याख्यं सौम्यलक्षणम् ।
शिवस्य पश्चिमं वक्त्रं शिवपादार्चने रतम् ॥३८॥

निवृत्तिपद निष्ठं च पृथिव्यां समवस्थितम् ।
तृतीयं शिवबीजेषु कलाभिश्चाष्टभिर्युतम् ॥३९॥
देवस्य पश्चिमे भागे शक्त्या सह समर्चितम् ।
पवित्रं परमं ब्रह्म प्रार्थितं मे प्रयच्छतु ॥४०॥
शिवस्य तु शिवायाश्च हृन्मूर्ति शिवभाविते ।
तयोराज्ञां पुरस्कृत्य ते मे कामं प्रयच्छताम् ॥४१॥
शिवस्य तु शिवायाश्च शिखामूर्त्ति शिवाश्रिते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥४२॥
शिवस्य च शिवायाश्च वर्मणा शिवभाविते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥४३॥
शिवस्य च शिवायाश्च नेत्रमूर्त्ती शिवाश्रिते ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥४४॥
अस्त्रमूर्ती च शिवयोर्नित्यम र्चनतत्परे ।
सत्कृत्य शिवयोराज्ञां ते मे कामं प्रयच्छताम् ॥४५॥
वामो ज्येष्ठास्तथा रुद्रः कालो विकरणस्तथा ।
बलो विकरणश्चैव बलप्रमथनः परः ॥४६॥
सर्वभूतमस्य दमन - स्तादृशाश्चाष्टशक्तयः ।
प्रार्थितं मे प्रयच्छन्तु शिवयोरेव शासनात् ॥४७॥
अथानन्तश्च सूक्ष्मश्च शिवाश्चेष्कनेत्रकः ।
एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिकः ॥४८॥
तथाष्टौ शक्तयस्तेषां द्वितीयावरणेबर्चिताः ।
ते मे कामं प्रयच्छतु शिवयोरेव शासनात् ॥४९॥
भवाद्या मूर्तयश्चाष्टौ तासामपि च शक्तयः ।
महादेवादयश्चान्ये तथैकादशमूर्तयः ॥५०॥
शक्तिभिः सहिताः सर्वे तृतीयावरणे स्थिताः ।
सत्कृत्य शिवयोराज्ञां दिशन्तु फलमीप्सितम् ॥५१॥
वृषराजो महातेजो महामेघसमस्वनः ।
मेरुमन्दरकैलास हिमाद्रिशिखरोपमः ॥५२॥

सिताभ्रशिखराकारककुदा परिशोभितः ।
महाभोगिन्द्रकल्पेन वालेन च विराजितः ॥५३॥
रक्तास्यशृंगाचरणो रक्तप्रायविलोचनः ।
पीवरोन्नतसर्वाङ्गः सुचारुगमनोज्ज्वलः ॥५४॥
प्रशस्तलक्षणः श्रीमान् प्रज्वलन्मणिभूषणः ।
शिवप्रियः शिवसक्तः शिवयोर्ध्वजवाहनः ॥५५॥
तथा तच्चरणन्यासपविता परविग्रह ।
गोराजपुरुषः श्रीमान् श्रीमच्छूलवरायुधः ।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु ॥५६॥
नन्दीश्वरो महातेजा नगेन्द्रतनयात्मजः ।
सनारायणकैर्देवैर्नित्यमभ्यर्च्य वन्दितः ॥५७॥
शर्वस्यान्तमुद्वारि सार्द्धं परिजनैः स्थितः ।
सर्वेश्वरसमप्रख्यः सर्वासुरविमर्दनः ॥५८॥
सर्वेशां शिवधर्माणामध्यक्षत्वेऽभिषेचितः ।
शिवप्रियः शिवसक्तः श्रीमच्छूलवरायुधः ॥५९॥
शिवाश्रितेषु संसक्तस्त्वनुरक्तश्च तैरपि ।
सत्कृत्य शिवयोराज्ञां स मे कामं प्रयच्छतु ॥६०॥
महाकालो महाबाहुर्महादेव इवापरः ।
महादेवाश्रितानां तु नित्यमेवाभिरक्षतु ॥६१॥
शिवप्रियः शिवासक्तः शिवयोरर्चकः सदा ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ॥६२॥
सर्वशास्त्रार्थतत्त्वज्ञः शास्ता विष्णोः परा तनुः ।
महामोहात्मतनयो मधुमांसासर्वप्रियः ।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु ॥६३॥
ब्राह्मणी चैव माहेशी कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा चण्डविक्रमा ॥६४॥
एता वै मातरः सप्त सर्वलोकस्य मातरः ।
प्रार्थितं मे प्रयच्छन्तु परमेश्वरशासनात् ॥६५॥

मत्तमातङ्ग वदनो गङ्गोमाशङ्करात्मजः ।
आकाश देहो दिग्बाहुः सोम सूर्याऽग्नि लोचनः ॥६६॥
ऐरावतादिभि र्दिव्यैर्दिग्गजै र्नित्यमर्चितः ।
शिवज्ञानमदोद्भिन्न स्त्रिदशानामविघ्नकृत् ॥६७॥
विघ्नकृच्चासुरादीनां विघ्नेशः शिवभावितः ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ॥६८॥
षड्मुखः शिवसम्भूतः शक्तिवज्रधरः प्रभुः ।
अग्नेश्च तनयो देवो ह्यपर्णातनयः पुनः ॥६९॥
गङ्गायाश्च गणाम्बायाः कृत्तिकानां तथैव च ।
विशाखेन च शाखेन नैगमेयेन चावृतः ॥७०॥
इन्द्रजिच्चेन्द्र सेनानीस्तारकासुर जित्तथा ।
शैलानां मेरुमुख्यानां वेधकश्च स्वतेजसा ॥७१॥
तप्तचामीकरप्रख्यः शतपत्रदलेक्षणः ।
कुमारः सुकुमाराणां रूपोदाहरणं महत् ॥७२॥
शिवप्रियः शिवासक्तः शिवपादार्चकः सदा ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु कांक्षितम् ॥७३॥
ज्येष्ठा वरिष्ठ वरदा शिवयोर्यजने रता ।
तयोराज्ञां पुरस्कृत्य सा मे दिशतु कांक्षितम् ॥७४॥
त्रैलोक्य वन्दिता साक्षादुल्काकारा गणाम्बिकाः ।
जगत्सृष्टि विवृद्धर्थं ब्रह्मणाभ्यार्थिता शिवात् ॥७५॥
शिवाया प्रविभक्ताया भ्रुवोरन्तर निस्सृता ।
दाक्षायणी सती मेना तथा हैमवती ह्युमा ॥७६॥
कौशिक्याश्चैव जननी भद्रकाल्यास्तथैव च ।
अपर्णायाश्च जननीपाटलायास्तथैव च ॥७७॥
शिवाऽर्चनरता नित्यं रुद्राणी रुद्रवल्लभा ।
सत्कृत्य शिवयोराज्ञां सा मे दिशतु कांक्षितम् ॥७८॥
चण्डः सर्वगणेशान्तः `दिशतु कांक्षितम् ॥७९॥
पिङ्गलो गणपः श्रीमान् शिवासक्तः शिवप्रियः ।
आज्ञया शिवयोरेव स मे कामं प्रयच्छतु ॥८०॥

भृङ्गीशो नाम गणपः शिवाराधनतत्परः ।
प्रयच्छतु स मे कामं पत्युराज्ञापुरस्सरम् ॥८१॥
वीरभद्रो महातेजा हिमकुन्देन्दुसन्निभः ।
भक्तकालिप्रियो नित्यं मातृणां चाभिरक्षिता ॥८२॥
यज्ञस्य च शिरोहर्ता दक्षस्य च दुरात्मनः ।
उपेन्द्रन्द्रेयमादीनां देवानामंगतक्षकः ॥८३॥
शिवास्यानुचरः श्रीमान् शिवशासन पालकः ।
शिवयो शासनादेव स मे दिशतु कांक्षितम् ॥८४॥
विष्णोर्वक्षः स्थिता लक्ष्मीः शिवयोः पूजने रता ।
शिवयो शासनादेव स मे दिशतु कांक्षितम् ॥८५॥
महामोदी महादेव्याः पादपूजापरायणा ।
तस्या एव नियोगेन सा मे दिशतु कांक्षितम् ॥८६॥
कौशिकी सिंहमारूढ़ा पार्वत्याः परमा सुता ।
विष्णोर्निद्रा महामाया महामहिषमर्दिनी ॥८७॥
निशुम्भशुम्भसंहत्री मधुमांसासवप्रिया ।
सत्कृत्य शासनं मातुः सा मे दिशतु कांक्षितम् ॥८८॥
रुद्रा रुद्रसमप्रख्याः प्रमथाः प्रमथितौजसः ।
भृतसख्या महावीर्या महादेवसमप्रभाः ॥८९॥
नित्यमुक्ता निरुपमा निर्द्वन्द्वा निरुपपल्लवाः ।
सशक्तयः सानुचरा सर्वलोकनमस्कृताः ॥९०॥
सर्वेषामेव लोकानां सृष्टिसंहरणक्षमा ।
परस्परानुरक्तश्च परस्परमनुव्रता ॥९१॥
परस्परमतिस्त्रग्धाः परस्परनमस्कृताः ।
शिवप्रियतमा नित्यं शिवलक्षणलक्षिताः ॥९२॥
सौम्या घोरस्तथा मिश्राश्चान्तरालद्वयात्मिका ।
विरूपाश्च सुरूपाश्च नानारूप धरास्तथा ॥९३॥
सत्कृत्य शिवयोराज्ञां ते मे कामं दिशन्तु वै ।
देव्याः प्रियसखीवर्गो देवीलक्षणलक्षितः ॥९४॥

सहितो रुद्रकन्याभि शक्तिभिश्चाप्यनेकशः ।
तृतीयावरणे शम्भोर्भक्त्या नित्यं समर्चितः ॥९५॥
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ।
दिवाकरो महेशस्य मूर्तिर्दीप्तसुमण्डलः ॥९६॥
निर्गुणो गुणसंकीर्णस्तथैव गुणकेवलः ।
अविकारात्मकश्चाद्यः एकः सामान्यविक्रियः ॥९७॥
असाधारणकर्मा च सृष्टिस्थिति लयक्रमात् ।
एवं त्रिधा चतुर्द्धा च विभक्तः पञ्चधा पुनः ॥९८॥
चतुर्थावरणो शम्भोः पुजितश्चानुगैः सह ।
शिवप्रियः शिवासक्तः शिवपादार्चने रतः ॥९९॥
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ।
दिवाकर षडङ्गानि दीप्ताद्याश्चाष्टशक्तयः ॥१००॥
आदित्यो भास्करो भानू रविश्चेत्य नुपूर्वशः ।
अर्को ब्रह्मा तथा रुद्रो विष्णुश्चादित्यमूर्तयः ॥१०१॥
विस्तरा सुतरा बोधिन्याप्यान्यपराः पुनः ।
उषा प्रभा तथा प्राज्ञा सन्ध्या चेत्यपि शक्तयः ॥१०२॥
सोमादिकेतु पर्यन्ता ग्रहाश्च शिवभाविताः ।
शिवयोराज्ञया नूना मङ्गलं प्रदिशन्तु मे ॥१०३॥
अथ वा द्वादशादित्या स्तथा द्वादश शक्तयः ।
ऋषयो देवगन्धर्वा पन्नगाप्सरा गणाः ॥१०४॥
ग्रामण्यश्च तथा यक्षाः राक्षसाश्च सुरास्तथा ।
सप्त सप्तगणाश्चैते सप्तछन्दोमया हयाः ॥१०५॥
वालखिल्यादयश्चैव सर्वे शिवपदार्चकाः ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ॥१०६॥
ब्रह्माथ देवदेवस्य मूर्तिर्भूमण्डलाधिपः ।
चतुःषष्टिगुणैश्वर्यो बुद्धितत्त्वे प्रतिष्ठितः ॥१०७॥
निर्गुणो गुणसंकीर्णस्तथैव गुणकेवलः ।
अविकारात्मको देवस्ततः साधारणः पुरः ॥१०८॥

असाधरणकर्मा च सृष्टिस्थितिलयक्रमात् ।
एवं त्रिधा चतुर्द्धा च विभक्तः पञ्चधा पुनः ॥१०९॥
चतुर्थावरणे शम्भोः पूजितश्च महानुगैः ।
शिवप्रियः शिवसक्तः शिवपादार्चने रतः ॥११०॥
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलम् ।
हिरण्यगर्भो लोकेशो विराटेश्वर सनातनः ॥१११॥
सनत्कुमारः सनकः सनन्दश्च सनातनः ।
प्रजानां पतयश्चैव दक्षाद्या ब्रह्मसूनवः ॥११२॥
एकादश सपत्निका धर्मः सङ्कल्प एव च ।
शिवार्चनरताश्चैते शिवभक्ति परायणाः ॥११३॥
शिवाज्ञावशगाः सर्वे दिशन्तु मम मङ्गलम् ।
चत्वारश्च तथा वेदाः सेतिहासपुराणकाः ॥११४॥
धर्मशास्त्राणि विद्याभिर्वैदिकीभिः समन्विताः ।
परस्पराविरुद्धर्था शिवप्रकृतिपादकाः ॥११५॥
सत्कृत्य शिवयोराज्ञां मङ्गलम् प्रदिशन्तु मे ।
अथ रुद्रो महादेव शम्भोर्मूर्तिर्गरीयसी ॥११६॥
वाह्नेयमण्डलाधीशः पौरुषैश्वर्यवान् प्रभुः ।
शिवाभिमानसम्पन्नो निर्गुणस्त्रिगुणात्मकः ॥११७॥
केवलं सात्त्विकाश्चापि राजसश्चैव तामसः ।
अविकाररतः पूर्वं ततस्तु समविक्रयः ॥११८॥
असाधारणकर्मा च सृष्ट्यादिकरणात्पृथक् ।
ब्रह्मणोऽपि शिरश्छेत्ता जनकस्तस्य तत्सुतः ॥११९॥
जनकस्तनयश्चापि विष्णोरपि नियामकः ।
बोधकश्च तयोर्नित्यमनुग्रहकरः प्रभुः ॥१२०॥
अण्डस्यान्तर्बहिर्वर्ती रुद्रो लोकद्वयाधिपः ।
शिवप्रियः शिवासक्तः शिवपादार्चने रतः ॥१२१॥
शिवस्याज्ञां पुरस्कृत्य स मे दिशतु मङ्गलम् ।
तस्य ब्रह्म षडङ्गानि विद्येशानां तथाष्टकम् ॥१२२॥

चत्वारो मूर्तिभेदाश्च शिवपूर्वाः शिवार्चकाः ।
शिवो भवो हरश्चैव मृडश्चैव तथापरः ।
शिवस्याज्ञां पुरस्कृत्य मङ्गलं प्रदिशन्तु मे ॥१२३॥
अथ विष्णुर्म महेशस्य शिवस्यैव परा तनुः ।
वारितत्त्वाधिपः साक्षादव्यक्तपदसंस्थितः ॥१२४॥
निर्गुणः सत्त्वबहुलस्थैव गुणकेवलः ।
अविकाराभिमानी च त्रिसाधारण विक्रयः ॥१२५॥
असाधारणकर्मा च सृष्ट्यादिकरणात्पृथक् ।
दक्षिणाङ्गभवेनापि स्पर्धमानः स्वयम्भुवाः ॥१२६॥
आद्येन ब्रह्मणा साक्षात्सृष्टः स्रष्टा च तस्य तु ।
अण्डस्यान्तर्बहिर्वती विष्णुर्लोकद्वयाधिपः ॥१२७॥
असुरान्तकरश्चक्री शक्रस्यापि तथानुजः ।
प्रादुर्भुश्च दशधा भृगशापच्छलादिह ॥१२८॥
भूभारनिग्रहार्थाय स्वेच्छयावतरत् क्षितौ ।
अप्रमेयबलौ मायी मायया मोहयंजगत् ॥१२९॥
मूर्ति कृत्वा महाविष्णुं सदाविष्णुमथापि वा ।
वैष्णवैः पूजितो नित्यं मूर्तित्रयमयासने ॥१३०॥
शिवप्रियः शिवासक्तः शिवापादार्चने रतः ।
शिवस्याज्ञां पुरस्कृत्य स मे दिशतु मङ्गलम् ॥१३१॥
वासुदेवोऽनिरुद्धश्च प्रद्युम्नश्च ततः परः ।
सङ्कर्षणः समाख्याताश्चस्त्रो मूर्तयो हरे ॥१३२॥
मत्स्यः कूर्मो वाराहश्च नारसिंहोऽथ वामनः ।
रामत्रयं तथा कृष्णोः विष्णुस्तुरगवक्त्रकः: ॥१३३॥
चक्रं नारायणस्यास्त्रं पाञ्चजन्यं च श्राङ्गकम् ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशतु मे ॥१३४॥
प्रभा सरस्वती गौरी लक्ष्मीश्च शिवभाविता ।
शिवयोः शासनादेव मङ्गलं प्रदिशन्तु मे ॥१३५॥
इन्द्रोऽग्निश्च यमश्चैव निर्ऋतिर्वरुणस्तथा ।
वायुः सोमः कुबेरस्य नथेशानस्त्रिशूलधृक् ॥१३६॥

सर्वे शिवार्चनरताः शिवसद्भावभाविताः ।
सत्कृत्य शिवयोराज्ञां मङ्गलं प्रदिशन्तु मे ॥१३७॥
त्रिशूलमथ वज्रं च तथा परशुसायकौ ।
खड्गपाशाङ्कुशाश्चैव पिनाकश्चायुधोत्तमः ॥१३८॥
दिव्यायुधानि देवस्य देव्याश्चैतानि नित्यशः ।
सत्कृत्य शिवयोराज्ञां रक्षां कुर्वन्तु मे सदा ॥१३९॥
वृषभ रूप धरो देवः सौरभेयो महाबलः ।
वडवाख्यानलस्पर्द्धी पञ्चगोमातृभिर्वृतः ॥१४०॥
वाहनत्वमनुप्राप्तस्तपसा परमेशयोः ।
तयोराज्ञां पुरस्कृत्य स मे कामं प्रयच्छतु ॥१४१॥
नन्दा सुनन्दा सुरभिः सुशीला सुमनास्तथा ।
पञ्च गोमातरस्त्वेताः शिवलोके व्यवस्थिताः ॥१४२॥
शिवभक्ति परा नित्यं शिवार्चनपरायणाः ।
शिवयोः शासनादेव दिशन्तु मम वाञ्छितम् ॥१४३॥
क्षेत्रपालो महातेजा नीलजीमूतसन्निभः ।
दंष्ट्राकराल वदनः स्फुरद्रक्ताधरोज्ज्वलम् ॥१४४॥
रक्तोर्ध्वमूर्द्धजः श्रीमान् भृकुटिकुटिलेक्षणः ।
रक्तवृत्त त्रिनयनः शशिपन्नगभूषणः ॥१४५॥
नग्नस्त्रिशूल पाशासि कपालोद्यत पाणिकः ।
भैरवो भैरवैः सिद्धैर्योगिनीभिश्च संवृतः ॥१४६॥
क्षेत्रे क्षेत्रसमासीनः स्थितो यो रक्षकः सताम् ।
शिवप्रणामपरमः शिव सद्भाव भावितः ॥१४७॥
शिवाश्रितान् विशेषेण रक्षन् पुत्रानिवौरसान् ।
सत्कृत्य शिवयोराज्ञां स मे दिशतु मङ्गलं ॥१४८॥
तालजंघादयस्तस्य प्रथमावरणेऽर्चिताः ।
सत्कृत्य शिवयोराज्ञां चत्वारः समवन्तुमाम् ॥१४९॥
भैरवाद्याश्च ये चान्ये समन्तात्तस्य वेष्टिताः ।
तेऽपि मामनुगृह्णन्तु शिवशासन गौरवात् ॥१५०॥

नारदाद्यश्च मुनयो दिव्या देवैश्च पूजिताः ।
साध्या नागाश्च ये देवा जनलोकनिवासिनः ॥१५१॥
विनिर्वृत्ताधिकारश्च महर्लोकनिवासिनः ।
सप्तर्षयस्तथान्ये वै वैमानिकगणैः सह ॥१५२॥
सर्वे शिवार्चनरताः शिवाज्ञावशवर्तिनः ।
शिवयोराज्ञया मह्यं दिशन्तु समकांक्षितम् ॥१५३॥
गन्धर्वाद्या पिशाचान्ताश्चतस्त्रो देवयोनयः ।
सिद्धा विद्याधराद्यश्च येऽपि चान्ये नभश्चराः ॥१५४॥
असुरा राक्षसाश्चैव पाताल तलवासिनः ।
अनन्ताद्यश्च नागेन्द्रा वैनतेयादयो द्विजा ॥१५५॥
कूष्माण्डाः प्रेत वेताला ग्रहा भूतगणाः परे ।
डाकिन्यश्चापि योगिन्यः शाकिन्यश्चापि तादृशाः ॥१५६॥
क्षेत्रारामगृहादीनि तीर्थान्यायतनानि च ।
द्वीपाः समुद्रा नद्यश्च नदाश्चान्ये सरांसि च ॥१५७॥
गिरयश्च सुमेर्वाद्याः काननानि समन्ततः ।
पशवः पक्षिणो वृक्षाः कृमिकीटादयो मृगाः ॥१५८॥
भुवनान्यपि सर्वाणि भुवनानामधीश्वराः ।
अण्डान्यावरणैः सार्द्धं मासाश्च दश दिग्गजा ॥१५९॥
वर्णाः पदानि मन्त्राश्च तत्त्वान्यपि सहाधिपैः ।
ब्रह्माण्डधारका रुद्रारुक्ताश्चान्ये सशक्तिकाः ॥१६०॥
यच्च किञ्चिज्जगत्यस्मिन्दृष्टं चानुमितं श्रुतम् ।
सर्वे कामं प्रयच्छतु शिवयोरेव शासनात् ॥१६१॥
अथ विद्या परा शैवी पशुपाशविमोचिनी ।
पञ्चार्थसंहिता दिप्या पशुविद्याबहिष्कृता ॥१६२॥
शास्त्रं च शिवधर्माख्यं धर्माख्यं च तदुत्तरम् ।
शैवाख्यं शिवधार्माख्यं पुराणं श्रुतिसम्मतम् ॥१६३॥
शैवाऽगमाश्च ये चान्ये कामिकाद्याश्चतुर्विधाः ।
शिवाभ्यामविशरेषेण उत्कृत्येह समर्चिताः ॥१६४॥

ताभ्यामेव समाज्ञाता ममाभिप्रेतसिद्धये ।
कर्मेदमनुमन्यन्तां सफलं साध्वनुष्ठितम् ॥१६५॥
श्वेताद्या नकुलीशान्ताः सशिष्याश्चापि देशिकाः ।
तत्संततीया गुरुवो विशेषाद् गुरवो मम ॥१६६॥
शैवा माहेश्वराश्चैव ज्ञानकर्मपरायणाः ।
कर्मेदमेमनुमन्यन्तां सफलं साध्वनुष्ठितम् ॥१६७॥
लौकिका ब्राह्मणाः सर्वे क्षत्रियाश्चविशःक्रमात् ।
वेदवेदाङ्गतत्त्वाज्ञाः सर्वशास्त्रविशारदाः ॥१६८॥
सांख्या वैशेषिकाश्चैव यौगा नैयायिका नराः ।
सौरा ब्राह्मास्तथा रौक्ता वैष्णवाश्चपरे नराः ॥१६९॥
शिष्टाः सर्वे विशिष्टाश्च शिवशासन यन्त्रिताः ।
कर्मेदमेमनुमन्यन्तां ममभिप्रेतसाधकम् ॥१७०॥
शैवाः सिद्धान्तमार्गस्थाः शैवाः पशुपतास्तथा ।
शैवाः महाव्रतधरा शैवाः कापालिकाः परे ॥१७१॥
शिवाऽज्ञापालकाः पूज्या ममापि शिवशासनात् ।
सर्वे मामनुगृहणन्तु शंसन्तु सफलक्रियाम् ॥१७२॥
दक्षिणज्ञाननिष्ठाश्च दक्षिणोत्तर मार्गगाः ।
अविरोधेन वर्तन्ता मन्त्रं श्रेयोऽर्थिनो मम ॥१७३॥
नास्तिकाश्च शठाश्चैव कृतघ्नश्चैव तामसाः ।
पाष[illegible]तिपापाश्च वर्तन्ता दूरतो मम ॥१७४॥
बहुभिः किं स्तुतैरत्र येऽपि केऽपि चिदास्तिकाः ।
सर्वे मानुगृहणन्तु सन्तः शंसन्तु मङ्गलम् ॥१७५॥
नमः शिवाय साम्बाय ससुतायादि हेतवे ।
पञ्चावरणरूपेण प्रपञ्चेनावृताय ते ॥१७६॥
इत्युक्त्वा दण्डवद्भूमौ प्रणिपत्य शिवं शिवाम् ।
जपेत्पञ्चाक्षरसीं विषमष्टोत्तर शतावराम् ॥१७७॥
तथैव शक्ति विद्यां च जपित्वा तत्सम र्पणम् ।
कूत्वा तं क्षमयित्वेशं पूजा शेषं समापयेत् ॥१७८॥

एतत्पुण्यतमं स्तोत्रं शिवयोर्हृदयंगमम् ।
सर्वाभीष्टप्रदं साक्षाद् भक्तिमुक्त्येकसाधनम् ॥१७९॥
य इदं कीर्तये न्नित्यं शृणुयाद्वा समाहितः ।
स विधूयाशु पापानि शिवसायुज्यमाप्नुयात् ॥१८०॥
गोघ्नश्चैव कृतघ्नश्च वीरहा भ्रूणहापि वा ।
शरणागतघाती च मित्रविश्रम्भ घातकः ॥१८१॥
दुष्टपापसमाचारो मातृहा पितृहापि वा ।
स्तवेनानेन जप्तेन तत्तत्पापात् प्रमुच्यते ॥१८२॥
दुःस्वप्नादि महाऽनर्थ सूचकेषु भयेषु च ।
यदि संकीर्तयेदेतन्न ततोऽनर्थभाग्भवेत् ॥१८३॥
आयुरारोग्यमैश्वर्यं यच्चान्यदपि वाञ्छितम् ।
स्तोत्रस्यास्य जपे तिष्ठंस्तत्सर्वं लभते नरः ॥१८४॥
असम्पूज्य शिवं स्तोत्र जपात्फल मुदाहृतम् ।
सम्पूज्य च जपे तस्य फलं वक्तुं न शक्यते ॥१८५॥
आस्तामियं फलावाप्तिरस्मिन् संकीर्तिते सति ।
सार्धमम्बिकया देवः श्रुत्वैव दिवि तिष्ठति ॥१८६॥
तस्मान्नभसि सम्पूज्य देवदेवं सहोमया ।
कृताञ्जलिपुटस्तिष्ठन् स्तोत्रमेतदुदीरयेत् ॥१८७॥

॥ इति शिव पञ्चावरण देवानां स्तुतिम्॥

॥ गणपति तर्पण प्रयोगः॥

जिस प्रकार रुद्राभिषेक का विशेष फल है उसी तरह से गणपति तर्पण का भी विशेष फल प्राप्त होता है। अभिष्ट कामना की सिद्धि होती है। अलग अलग कामना हेतु भी कुछ प्रयोग दिये गये हैं।

श्रीविद्यार्णव तन्त्रम्, श्रीविद्यारत्नाकर, शारदातिलक इत्यादि ग्रन्थों में गणपति तर्पण प्रयोग दिया गया है। कहीं कहीं क्लिष्टता है या स्पष्टीकरण पूर्ण नहीं है, अतः सरल विधि तर्पण प्रयोग की दी जा रही है।

अष्टाविंशाक्षरी मन्त्र – ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा॥

यह महागणपति मन्त्र है। इस मन्त्र का प्रयोग सभी दशमहाविद्याओं के साथ किया जा सकता है।

वैसे देवता के यन्त्रार्चन में भी तदङ्ग आवरण देवता का पूजन व तर्पण किया जा सकता है।

देवता के यन्त्रार्चन में तर्पण नाम के साथ एक बार ही करते हैं। वैदिक विधि में देव तर्पण एक बार, ऋषितर्पण २ बार, तथा मनुष्य तर्पण ३ बार करते हैं।

गणपति विशेष तर्पण में नाम के साथ ४ बार तर्पण उत्तम बताया है।

गणपति तर्पण प्रयोग हेतु दो तरह के तर्पण है।

१. यन्त्रार्चन के प्रयोग में आवरण पूजन में दिये गये देवताओं का नाम सहित तर्पण।

२. महागणपति के मन्त्र का तर्पण मन्त्र विधान।

विनियोग – अस्य श्री महागणपति मन्त्रस्य गणकः ऋषिः, निचृद् गायत्री छन्दः, महागणपति देवता महागणपति तर्पणे विनियोगः।

॥ षडङ्गन्यास ॥

श्रीं ह्रीं क्लीं	ॐ गां	हृदयाय नमः।
श्रीं ह्रीं क्लीं	श्रीं गीं	शिरसे स्वाहा।
श्रीं ह्रीं क्लीं	ह्रीं गूं	शिखायै वषट्।

श्रीं ह्रीं क्लीं क्लीं गैं कवचाय हुं।
श्रीं ह्रीं क्लीं ग्लौं गों नेत्रत्रयाय वौषट्।
श्रीं ह्रीं क्लीं गं गः अस्त्राय फट्।

इसी तरह से करन्यास करें।

॥ ध्यानम् ॥

ध्याये हृदब्जे शोणाङ्गं वामोत्सङ्गविभूषया ।
सिद्धलक्ष्म्या समाश्लिष्ट पार्श्वमर्धेन्दु शेखरम् ॥
वामाधः करतो दक्षाधः करान्तेषु पुष्करे ।
परिष्कृतं मातुलिङ्ग गदा पुण्ड्रेक्षुकार्मुकैः ॥
शूलेन शङ्खचक्राभ्यां पाशोत्पल युगेन च ।
शालिमञ्जरिका स्वीयदन्ताञ्चलमणीघटैः ॥
स्रवन्मदञ्च सानन्दं श्रीश्रीपत्यादि सम्वृतम् ।
अशेषविघ्न विध्वंसनिघ्न विघ्नेश्वरं भजे ॥

१. महागणपति पूजन यन्त्र के आवरण देवताओं का तर्पण प्रयोग -

श्री महागणपति यन्त्र प्रयोग पृष्ठ सं ७२ पर दिया गया है। यन्त्रार्चन में गुरुमण्डलार्चन पद्धति का अभाव रह गया अतः दिव्यौघादि गुरुवों का अर्चन इस प्रकार करें, तथा यन्त्रार्चन में इन्हीं गुरुवों का पूजन करें।

सर्वप्रथम - **श्रीं ह्रीं क्लीं ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ॥ श्री सिद्धलक्ष्मी सहित महागणपति श्री पादुकां पूजयामि तर्पयामि नमः।**

इस मन्त्र से देवता का १० बार तर्पण करें। तर्पण विधि हेतु गणपति यन्त्र या प्रतिमा को थाली में स्थापित करें। एक अर्घपात्र लेवें जल में चंदन, गंध, केसर, सुगधित द्रव्य, दूर्वा, अक्षत, पुष्पादि ड़ालें फिर अर्घ देकर तर्पण करते जायें।

॥ गुरुमण्डल देवता ॥

दिव्यौघ गुरु - १, ३ या ४ बार तर्पण करें।

श्रीं ह्रीं क्लीं विनायक सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं कवीश्वर सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं विरूपाक्ष सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥

श्रीं ह्रीं क्लीं विश्व सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं ब्रह्मण्य सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं निधीश सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥

॥ सिद्धौघ गुरु ॥

श्रीं ह्रीं क्लीं गजाधिराज सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं वरप्रद सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥

॥ मानवौघ गुरु ॥

श्रीं ह्रीं क्लीं विजय सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं दुर्जय सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं जय सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं दुःखारि सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं सुखावह सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं परमात्म सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं सर्वभूतात्म सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं महानन्द सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं फालचन्द्र सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं सद्योजात सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं बुद्ध सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥
श्रीं ह्रीं क्लीं शूर सिद्धाचार्य श्री पादुकां पूजयामि तर्पयामि नमः॥

॥ स्वगुरु क्रम ॥

पश्चात् स्वगुरु, परम गुरु, परात्परगुरु, परमेष्ठि गुरु का नाम स्मरण कर पूजन तर्पण करें।

शेष क्रम हेतु पृष्ठ ७२ पर जो आवरण देवता है उन सभी का पूजन तर्पण करें।

२. महागणपति के मन्त्र का तर्पण मन्त्र विधान।

अलग अलग कामना हेतु तर्पण प्रयोग विधि निम्न प्रकार से है -

विद्यार्णव तन्त्रे -

शण्डाकराग्रे गणपं जलेन प्रतर्पयेन्मुक्ति फलाय मन्त्री ।

तथेन्दिराकामनय गणेशं प्रतर्पयेन्मूर्ध्नि पयोभिस्त्र ॥१॥
गुह्यप्रदेशे मधुना गणेशं प्रतर्पयेत् कामफलाय विद्वान् ।
आकृष्टि वश्यादिनिमित्तमत्र प्रतर्पयेत्तं मधुभिश्च नेत्रे ॥२॥
भूपालवश्याय महागणेशं प्रतर्पयेच्चारु घृतेन पृष्ठे ।
ऊरुस्थले तैलसु-तर्पणं च महागणेश प्रियमेतदुक्तम् ॥३॥
एरण्डतैलेन तथास्य रण्डावश्याय नाभौ तिलतर्पणं स्यात् ।
स्कन्दप्रदेशेऽस्य पयः पयोभिः प्रतर्पणं प्रीतिविवर्धनाय ॥४॥
क्षीरेण दध्ना मधुनास्य तुण्डे प्रतर्पण धर्मविवृद्धिकृत स्यात् ।
एवं परिज्ञाय समस्तमेतत् कुर्यात् प्रयोगान् विधिना मनुजः ॥५॥
एवं मन्त्री य एवं गणपमनुवरं ह्यर्चना तर्पणाद्यै होमैर्जापैश्च -
सम्यक् प्रभजति विधिना प्राप्नुयात्मोऽत्रलोके ।
नानार्था भूपो भवति च वशगो मोहयेत् सर्वलोकान् ।
भुक्त्वा भोगान् यथेष्टं व्रजति स विमलां मुक्तिमन्ते दुरापाम् ॥६॥

गणपति के तर्पण पात्र में दूध, क्षीर, मधु, घृत, तैल, एरण्ड, सुगन्ति द्रव्यों को डाल कर कौन कौन से अंग पर तर्पण का क्या फल प्राप्त होता है यह विधि ऊपर समझाई गई है।

शारदातिलके -

हवनक्रम में भी अलग अलग द्रव्यों का महत्व है। चतुर्थी के दिन नारिकेल होम से श्रीवृद्धि होवे। शुक्लपक्ष की प्रतिप्रदा से लेकर प्रतिदिन चतुर्थी पर्यन्त नारिकेल, सत्तू, लाजा और तिल इनसे एक एक दिन के क्रम से एक एक द्रव्य का ४०० संख्या में होम करने से सबको वश में करने वाला होवे।

शुद्ध तिल से युक्त तण्डुल का होम लक्ष्मी प्रदा है।

त्रिमधु (घी, मधु, दूध, या शर्करा) से मिश्रित लाजा होम से उत्तम कन्या प्राप्त होवे।

यदि कन्या त्रिमधु युक्त लाजा होम करे तो उत्तम पति को प्राप्त करे। यदि प्रतिप्रदा से चतुर्थी पर्यन्त ४ रात्रि मे लवण मिश्रित दधि का होम करें तो साध्य व्यक्ति का वशीकरण होवे।

सफेद अर्क की जड़ अथवा रक्त चन्दन की लकड़ी अथवा हाथी के दांत से चबाने के बाद शेष बची लकड़ी को चन्द्रग्रहण काल में उसका स्पर्श कर गणेश

जी की अर्चना कर उक्त मन्त्र का जप कर भुजा में धारण करें तो विजय प्राप्त होवे।

॥ अथ तर्पण प्रयोग:॥

प्रतिदिन गणेशजी के निमित्त **गं गणेशं तर्पयामि**॥ इस मन्त्र से ४४४ बार तर्पण करे तथा प्रतिप्रदा से चतुर्थी पर्यन्त तक अलग अलग ४ द्रव्यों से पूर्वोक्त विधि से होम करे। ४९ दिन के भीतर साधक अपने अभीष्ट को प्राप्त करता है।

तर्पण प्रयोग प्रतिदिन करें। तर्पण संख्या के आधार पर तीन तरह का क्रम है -

१. सामान्य क्रम २. मध्यम क्रम ३. उत्तम क्रम

तर्पण प्रयोग में **विद्यार्णव तन्त्रम्** व **शारदा तिलक** में **तर्पयामि स्वाहा** लिखा है। जबकि श्री विद्या रत्नाकर में श्री करपात्रजी ने हवन पद्धति के अनुसार पहले होम फिर तर्पण के आधार पर नाम मन्त्र के बाद **स्वाहा** फिर **तर्पयामि** लिखा है। हमें यही उपयुक्त लगता है यह जरुरी नही है कि हवन करने पर ही स्वाहा लगता है, भावना से भी फल प्राप्त होता है।

१. सामान्य क्रम

इस क्रम के अनुसार १२४ तर्पण संख्या बनती है। प्रत्येक देवता के नाम का ४-४ बार तर्पण करें। प्रयोग के आदि और अन्त मे भी ४-४ बार गणेशजी के मूल मन्त्र का जप करे। देवता के नाम मन्त्र के साथ भी गणेशजी के मूल मन्त्र से ४ बार तर्पण करें। अत: जहां मूलम् लिखा हो वहां मूल मन्त्र समझना चाहिये।

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा॥ महागणपतिं तर्पयामि। १२ बार तर्पण करें।

श्रीं ह्रीं क्लीं ॐ पुष्टि स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं श्रीं लक्ष्मी नारायणौ स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं ह्रीं हरगौरी स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं क्लीं रतिकन्दर्पो स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं ग्लौं महीवराहौ स्वाहा महागणपतिं तर्पयामि [४ बार]

मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं गं लक्ष्मीगणनायकौ स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं गं आमोद सिद्धीं स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं गं प्रमोद सिद्धीं स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं गं सुमुख कान्तीं स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं गं दुर्मुख मदनावत्यौ स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं गं विघ्नमदद्रवे स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं गं विघ्नकर्तृद्राविण्यौ स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं शं शंखनिधिवसुधारे स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं पं पद्मनिधिवसुमत्यै स्वाहा	महागणपतिं तर्पयामि	[४ बार]
मूल मन्त्रेण	महागणपतिं तर्पयामि	[४ बार]

इस प्रकार यह कुल १२ + (२८ × ४) = १२४ बार तर्पण हुआ।

२. मध्यम क्रम

इस क्रम में २१६ बार गणपति का तर्पण होता है। प्रत्येक का ४-४ बार तर्पण होता है। इस क्रम में २६ प्रधान देवता है अतः २६×४ = १०४ बार तर्पण हुआ। २६ देवताओं के साथ-साथ मूल मन्त्र से भी २६×४ = १०४ बार तर्पण हुआ। अतः १०४+१०४ = २०८ बार नाम देवताओं के साथ तर्पण हुआ।

आदि में मूल मन्त्र से ४ बार तर्पण तथा अन्त में पुनः ४ बार तर्पण करने से २०८+४+४ = २१६ बार तर्पण प्रयोग हुआ।

अर्थात् आदि में ४ बार व अन्त में ८ बार तर्पण होता है।

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा॥ महागणपतिं तर्पयामि। ४ बार तर्पण करें।

श्रीं ह्रीं क्लीं श्रीं नारायण सहितां लक्ष्मीं (श्रियं) स्वाहा महा.तर्प. [४ बार]
मूल मन्त्रेण महा.तर्प. [४ बार]
श्रीं ह्रीं क्लीं श्रीं लक्ष्मीसहितं नारायणं (श्रीपतिं) स्वाहा महा.तर्प. [४ बार]
मूल मन्त्रेण महा.तर्प. [४ बार]
श्रीं ह्रीं क्लीं ह्रीं हर सहितां गौरी (गिरिजा) स्वाहा महा.तर्प. [४ बार]
मूल मन्त्रेण महा.तर्प.[४ बार]
श्रीं ह्रीं क्लीं ह्रीं गौरी सहितं हर (गिरिजापतिं) स्वाहा महा.तर्प. [४ बार]
मूल मन्त्रेण महा.तर्प.[४ बार]
श्रीं ह्रीं क्लीं क्लीं कामसहितां रतिं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं क्लीं रतिं सहितं कामं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं ग्लौं वराह सहितां महीं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं ग्लौं मही सहितं वराहं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं गं महागणपति सहितं लक्ष्मीं स्वाहा महा. तर्प. [४ बार]
मूल मन्त्रेण महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं लक्ष्मी सहितं महागणपतिं स्वाहा महा. तर्प. [४ बार]
मूल मन्त्रेण महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं आमोद सहितां सिद्धिं(ऋद्धिं) स्वाहा महा. तर्प. [४ बार]
मूल मन्त्रेण महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं सिद्धि (ऋद्धि) सहितं आमोदं स्वाहा महा. तर्प. [४ बार]
मूल मन्त्रेण महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं प्रमोद सहितां समृद्धिं स्वाहा महा. तर्प. [४ बार]
मूल मन्त्रेण महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं समृद्धि सहितं प्रमोदं स्वाहा महा. तर्प. [४ बार]
मूल मन्त्रेण महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं सुमुख सहितां कान्तिं स्वाहा महा. तर्प. [४ बार]
मूल मन्त्रेण महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं कान्ति सहितं सुमुखं स्वाहा महा. तर्प. [४ बार]

मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं दुर्मुख सहितां मदनावतीं स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं मदनावती सहितं दुर्मुखं स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं विघ्न (अविघ्न) सहितां मदद्रवां स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं मदद्रवा सहित विघ्नं (अविघ्नं) स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं विघ्नकर्तृ सहितां द्राविणीं स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं गं द्राविणी सहितं विघ्नकर्तारं स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं शं शंखनिधि सहितां वसुधारां स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं शं वसुधारा सहित शंखनिधिं स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं पं पद्मनिधि सहितां वसुमतीं स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
श्रीं ह्रीं क्लीं पं वसुमती सहितं पद्मनिधिं स्वाहा	महा. तर्प. [४ बार]
मूल मन्त्रेण	महा. तर्प. [४ बार]
पुनः मूल मन्त्रेण	महा. तर्प. [४ बार]

कुल २१६ बार तर्पण हुआ।

३. उत्तम क्रम

इस क्रम में ४४४ बार तर्पण होता है।

मूल मन्त्र २८ वर्ण का है अत: २८ वर्ण में एक एक वर्ण का ४ बार तर्पण होने से २८×४ = ११२ तर्पण हुआ। प्रत्येक वर्णाक्षर के बाद मूल मन्त्र से तर्पण २८×४ = ११२ बार तर्पण हुआ। मध्यम क्रम में २६ देवता बताये गये है, उनका २६×४ = १०४ तर्पण हुआ। २६ देवताओं के साथ मूल मन्त्र से तर्पण २६×४ = १०४ तर्पण हुआ।

कुल ११२+११२+१०४+१०४ = ४३२ तर्पण प्रयोग हुआ। आदि में मूल मन्त्र से १२ बार तर्पण करने पर ४३२+१२ = ४४४ तर्पण संख्या हुई।

ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा॥ महागणपतिं तर्पयामि। १२ बार तर्पण करें।

श्रीं ह्रीं क्लीं ॐ स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं श्रीं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं ह्रीं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं क्लीं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं ग्लौं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं गं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं गं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं णं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं पं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं तं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं ये स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं वं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]
श्रीं ह्रीं क्लीं रं स्वाहा महागणपतिं तर्पयामि [४ बार]
मूल मन्त्रेण महागणपतिं तर्पयामि [४ बार]

श्रीं ह्रीं क्लीं	वं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	रं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	दं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	सं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	वं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	जं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	नं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	मे स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	वं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	शं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	मां स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	नं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	यं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	स्वां स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	हां स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	श्रियं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]

मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	श्रीपतिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	गिरिजां स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	गिरिजापतिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	रतिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	रतिपतिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	महीं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	महीपतिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	महालक्ष्मीं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	महागणपतिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	ऋद्धिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	आमोदं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	समृद्धिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	प्रमोदं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	कान्तिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	सुमुखं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]

श्रीं ह्रीं क्लीं	मदनावतीं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	दुर्मुखं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	मदद्रवां स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	अविघ्नं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	द्राविर्णीं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	विघ्नकर्तारं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	वसुधारां स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	शङ्खनिधिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	वसुमतीं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]
श्रीं ह्रीं क्लीं	पद्मनिधिं स्वाहा	महागणपतिं	तर्पयामि	[४ बार]
मूल मन्त्रेण		महागणपतिं	तर्पयामि	[४ बार]

कुल ४४४ तर्पण संख्या।

पश्चात् गणपति का पंचोचार से पूजन कर जप करें एवं देवता को समर्पण करे।

गुह्यातिगुह्य गोप्ता त्वं गृहाण कृततर्पणम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादन्मयि स्थिरा ॥
आयुरारोग्यमैश्वर्यं बलं पुष्टिर्महद्यशः ।
कवित्वं भुक्तिमुक्ती च चतुरावृत्ति तर्पणात् ॥

अनेन कृतेन तर्पणन् भगवान श्री सिद्धलक्ष्मी सहितः श्री महागणपतिः प्रीयताम्॥

॥ अन्य कामना विशेषे तर्पण प्रयोगः॥

सभी प्रयोगों को शुक्लपक्ष से प्रारंभ करें तो उत्तम फल प्राप्त होता है।

१. सर्वाऽपद निवारणार्थे –

मन्त्र – ॐ गं गणपतिं तर्पयामि॥

चतुर्थी तिथि से २१ दिन तक प्रतिदिन ४४४ बार दुर्वाङ्कुरों द्वारा शुद्ध सुगन्धित जल से तर्पण करें।

इस प्रयोग से स्त्री पुरुष के दुर्व्यसन भी कम हो जाते है।

२. राज्ये शत्रु स्तंभनम् –

मन्त्र – ॐ वं वक्रतुडाय नमः।

विलोम मन्त्र – नमो (अथवा मः न) यण्डातुक्रव वं ॐ।

प्रतिप्रदा से ७ दिन दुर्वाङ्कुरों से गोरोचनादि सुगंधित द्रव्यों से प्रतिदिन ५१२ बार तर्पण करें।

मन्त्र पढ़कर **महागणपतिं तर्पयामि कहें।**

यदि प्रति विलोम अक्षर से तर्पण करें तो **मः महागणपतिं तर्पयामि** इस तरह प्रत्येक वर्ण से ४-४ बार तर्पण करें।

३. आयुवृद्धि व विद्या प्राप्ति हेतु हरगौरी गणेश तर्पणम्–

मन्त्र – ॐ गं गणपतिं पुष्टिसहितं तर्पयामि [४ बार]

ॐ गं तर्पयामि।

ॐ ह्रां ह्रीं	**हरसहितां गौरीं तर्पयामि**	**[४ बार]**
ॐ क्लीं	**श्रीं मनोभव सहितां रतिं तर्पयामि**	**[४ बार]**
ॐ ग्लौं	**वराह सहितां भुवं तर्पयामि**	**[४ बार]**
ॐ गं	**सिद्धि सहितं सुमुखं तर्पयामि**	**[४ बार]**
ॐ गं	**दुष्टदलन सहितं दुर्मुखं तर्पयामि**	**[४ बार]**
ॐ गं	**क्षेम सहितं विघ्नराजं तर्पयामि**	**[४ बार]**
ॐ गं	**अभया सहितं विद्याकर्तारं तर्पयामि**	**[४ बार]**
ॐ शं	**शङ्खनिधिं तर्पयामि**	**[४ बार]**
ॐ पं	**पद्मनिधिं सहितं तर्पयामि**	**[४ बार]**

शुक्ल प्रतिप्रदा से २१ दिन तक दुग्ध मिश्रित द्रव्य से तर्पण करने पर आयु वृद्धि

होवे। चतुर्दशी से कृष्णा एकादशी तक नदी के जल में पुष्पों सहित द्रव्य से तर्पणकरें तो विद्या प्राप्ति होवे।

यदि नदी के जल में खड़े होकर सूर्यमण्डल में गणेशजी का ध्यान करते हुए तर्पण करें तो श्रेष्ठ लाभ होवे।

४. वर प्राप्ति हेतु –

मन्त्र – ॐ श्रीं रति सहितं कामराजं तर्पयामि।

शुक्ला चतुर्थी से चतुर्दशी पर्यन्त ११ दिन तक यह प्रयोग १४४ बार प्रतिदिन करें।

५. कन्या प्राप्ति हेतु –

मन्त्र – ॐ श्री कामराज सहितं रतिं तर्पयामि।

प्रयोग विधि उपरोक्त।

६. वर कन्या हेतु महागणपति तर्पणम् –

मन्त्र – ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा॥

शुद्ध स्नान कर, सुप्रसन्न होकर, गंधादि का शरीर पर लेपन कर गणपति की प्रसन्नता हेतु शुक्ला प्रतिप्रदा व द्वितीया को ४४४ बार प्रत्येक माह में करते हुये १२ मास तक करें।

७. क्लेश व रोग शान्ति हेतु –

मन्त्र –

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

ॐ गिरिजेशं तर्पयामि।

शुक्लपक्ष की प्रतिपदा से चतुर्दशी तक मालती पुष्पों या दुर्वाङ्कुरों से प्रतिदिन २३५ बार तर्पण करें। विशेष कष्ट में २३५×४ = ९४० बार तर्पण करें।

८. कल्याण कामना हेतु तर्पण प्रयोग –

मन्त्र –ॐ ऋद्धि सहितं आमोदं तर्पयामि।

परोपकार व कल्याण कामना हेतु शुभदिन या प्रतिपदा ये ७ दिन बिल्व पत्र या

दुर्वाङ्कुरों से प्रतिदिन ४४४० बार तर्पण करें।

९. कीट उपद्रव शान्ति प्रयोग –

चतुर्थी तिथी से २१ दिन या जब तक मूषक कीट का उपद्रव शान्त नहीं हो तब तक २८ अक्षर वाले मूल मन्त्र से प्रतिदिन ५२१ बार तर्पण करें।

१०. पुत्र प्राप्ति हेतु गणेश तर्पणम् –

मन्त्र – ॐ उमापुत्रं तर्पयामि।

कृष्ण पक्ष की चतृर्थी से ३० दिन तक आम्र वृक्ष की मंजरी से या दुर्वाङ्कुरों से सुगन्धित जल द्वारा प्रतिदिन ४४४ बार तर्पण करें। उस जल से स्त्री व गर्भवती का अभिषिञ्चन कर पुत्र की कामना करें। १० ब्राह्मणों को भोजन करायें।

विशेष तर्पण में ४४४×४ – १७७६ बार तर्पण करें।

११. तेजवृद्धि हेतु प्रयोग –

मन्त्र – ॐ गं मदद्राविर्णी तर्पयामि।

शुक्ला चतुर्थी से कृष्णा चतुर्थी तक अपराजिता गिरिकर्णिका के फूल अथवा दुर्वाङ्कुरों को विलोम ग्रहण करते हुये शुद्ध जल से ४२१ बार तर्पण करें। विशेष प्रयोजन में १६८४ बार तर्पण करें।

१२. खोये हुये व्यक्ति व पशु हेतु तर्पण प्रयोग –

मन्त्र – ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षं हंसः सोहं पद्मनिधिं तर्पयामि।

शुक्ला चतुर्थी से कृष्णा चतुर्थी तक रक्त या नीलकमल अथवा दुर्वाङ्कुरों से प्रतिदिन ४४४४ बार तर्पण करने से व्यक्ति व पशु घर लौट कर आता है।

१३. नष्ट द्रव्य प्राप्ति हेतु प्रयोग –

मन्त्र – ॐ शं शंखनिधिं तर्पयामि।

शुक्ला चतुर्थी से ४५ दिन श्वेतार्क पुष्पों या दुर्वाङ्कुरों द्वारा सुगन्धित जल से प्रतिदिन ४४४ बार तर्पण करने से नष्ट वस्तु प्राप्त होवे।

१४. बंधन मुक्ति हेतु तर्पण प्रयोग –

मन्त्र – ॐ अभया सहितं विघ्नकर्तारं तर्पयामि।

चतुर्थी से प्रारंभ कर ३० दिन तक दुर्वाङ्कुरों से प्रतिदिन ४२१ बार तर्पण करें तो

संकट नाश होता है।

१५. शुभ व कल्याण प्राप्ति हेतु प्रयोग –

मन्त्र – ॐ क्षेमदायिनी सहितं विघ्नराजं तर्पयमि।

शुक्ला चतुर्थी से पूर्णिमा तक दुग्ध व दुर्वाङ्कुरों से शुद्ध जल द्वारा प्रतिदिन २४४ बार तर्पण करें।

१६. शत्रु उच्चाटन हेतु प्रयोग –

मन्त्र – ॐ सिद्धि सहितं आमोदं तर्पयामि।

प्रतिपदा से अमावस्या तक बिल्व पत्र या दुर्वाङ्कुरों द्वारा शुद्ध जल से प्रतिदिन ४४४ बार तर्पण करने से शत्रु के दुष्विचार नष्ट हो जाते हैं या अन्यत्र पलायन कर जाता है।

१७. शत्रु स्तम्भन हेतु प्रयोग –

मन्त्र – ॐ क्लीं श्रीं विष्णु सहितां श्रियं तर्पयामि।

प्रतिपदा से द्वादशी तक बिल्व पत्र या दुर्वाङ्कुरों द्वारा शुद्ध जल से प्रतिदिन ४४६६ बार तर्पण करने से दुष्ट मनुष्यों व दुष्ट पशुओं का स्तम्भन होता है।

१८. वशीकरण प्रयोग –

मन्त्र – क्लीं ग्लौं गणपतये सर्वजनं मे वशमानय स्वाहा।

शुक्ला चतुर्थी से पुनः शुक्ला चतुर्थी तक प्रतिदिन ४४४ बार तर्पण करने से राजा भी वश में होवे।

१९. वर्षा प्रयोजन हेतु प्रयोग –

मन्त्र – ॐ गजेन्द्र सहितं मेघं तर्पयामि।

आर्द्रा नक्षत्र के दिन से प्रारम्भ कर विशाखा नक्षत्र के दिन तक (१२ दिन) नाभि प्रदेश तक जल में स्थित होकर १००८ बार जप कर प्रतिदिन कर्पूर सुगन्धित जल से १४४ या ११४ बार तर्पण करें।

॥ इति श्री गणपति तर्पण विधानं सम्पूर्णम् ॥

॥ अथ गणपत्यथर्वशीर्षम् ॥

श्रीगणेशाय नमः । ॐ भद्रंकर्णेभि शृणुयामदेवाः॥ भद्रं पश्येमाक्ष भिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवा ठं सस्तनूभिर्व्यशेमहि देवहितं यदायुः। स्वति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वति नस्ताक्ष्योंअरिष्टनेमि। स्वस्ति नो बृहस्पतिर्दधातु। ॐ शान्तिः शान्तिः शान्तिः॥

॥ अथ गणपत्यथर्वशीर्षम् ॥

ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्ष्यं तत्त्वमसि। त्वमेवकेवलं कर्त्तासि। त्वमेवकेवलं धर्तासि। त्वमेवकेवलं हर्तासि। त्वमेवसर्वं खल्विदंब्रह्मासि। त्वं साक्षादात्मासि नित्यं। ऋतं वच्मि। सत्यं वच्मि। अवत्वं मां। अववक्तारं। अवश्रोतारं। अवदातारं। अवधातारं। अवानूचानमवशिष्यं। अवपश्चात्तात्। अवपुरस्तात्। अवोत्तरातात्। अवदक्षिणात्तात्। अवचोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्। त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्द द्वितीयोसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोसि। सर्वजगदिदं त्वत्तोजायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयिलयमेष्यति। सर्वं जगदिदं त्वयिप्रत्येति। त्वं भूमिरापोऽनिलो ऽनलोनभः। त्वं चत्वारि वाक् पदानि। त्वं गुणत्रयातीतः। त्वमवस्था त्रयातीत। त्वं कालत्रयातीत। त्वं देहत्रयातीत। त्वं मूलाधार स्थितोऽसिनित्यं। त्वं शक्तित्रयात्मकः। त्वांयोगिनोध्यायन्तिनित्यं। त्वं ब्रह्मा त्वं विष्णुस्त्व रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वंवायुस्त्वं सूर्यस्त्वंचन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम्। गणादीन्। पूर्वमुच्चार्य वर्णादींस्तदनन्तरं। अनुस्वारः परतरः। अर्धेन्दुलसितं। तारेणरुद्धं। एतत्तवमनुस्वरूपं। गकारः पूर्वरूपः। अकारोमध्यरूपं। अनुस्वार श्चांत्यरूपं बिन्दुरुत्तररूपं। नादः सन्धानं। सःहितासन्धिः। सैषागणेशविद्या। गणकऋषिः। निचद् गायत्री छन्दः। गणपतिर्देवता। ॐ गं गणपतये नमः।

ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि।

तन्नो दन्ती प्रचोदयात्॥

एकदन्तञ्चतुर्हस्तं पाशमङ्कुशधारिणम् ।
रदं च वरदं हस्तैर्विभ्राणं मूषकध्वजम् ॥

रक्तं लम्बोदरं शूपकर्णकं रक्तवाससं ।
रक्तगंधानुप्लिताङ्गं रक्तपुष्पैः सुपूजितम् ॥
भक्तानुकंपिनं देवं जगत्कारणमच्युतं ।
आविर्भूतञ्चसृष्ट्यादौप्रकृतः पुरुषात्परम् ॥

एवं ध्यायंति यो नित्यं स योगीयोगिनाम्वरः। नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्ते अस्तु लम्बोदरायैकदन्ताय विघ्नाशिने शिवसुताय श्रीवरदमूर्तये नमः। एतदथर्वशीर्षं योऽधीते। सब्रह्मभूतेयकल्पते। स सर्वतः विघ्नैर्न बाध्यते या। स सर्वतः सुखमेधते। स पञ्चमहापापात् प्रमुच्यते। सायधीमानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाश्यति। सायं प्रातः प्रयुञ्जानोऽपापोभवति।

सर्वत्राधीयानोऽपविघ्नोभवति। धर्मार्थकाममोक्षं च विन्दति। इदमथर्व शीर्षमशिष्याय न देयं। योयदिमोहाद्दास्यति। सपापीयान् भवति। सहस्त्रावर्तनाद्यं यं काममधीते। तं तमनेन साधयेत्। अनेन गणपतिमभिषिञ्चति। सवाग्मी भवति। चतुर्थ्यामनश्नन् जपति। सविद्यावान् भवति। इत्यथर्वणवाक्यं। ब्रह्माद्याचरणं विद्यात्। न विभेति कदाचनेति। यो दूर्वांकुरैर्यजति। सवैश्रणोपमोभवति। यो लाजैर्यजति। स यशोवान् भवति। समेधावान् भवति। यो मोदक सहस्त्रेण यजति। स वाञ्छितफलमवाप्नोति। यः साज्यसमिद्धिर्यजति। स सर्वं लभते। स सर्वं लभते अष्टौ ब्राह्माणान् सम्यग्ग्राहियत्वा। सूर्यवर्चस्वी भवति। सूर्यग्रहे महानद्यान् प्रतिमासन्निधौ वा जप्त्वा। सिद्धमन्त्रो भवति॥ महाविघ्नात्प्रमुच्यते। महादोषा त्प्रमुच्यते। महापापात्प्रमुच्यते। स सर्वं विद्धवति स सर्व विद्धवति। य एवं वेद। इत्युनिषत्। ॐ भद्रंकर्णेभि० ॥ ॐ स्वति न इन्द्रो० ॥

॥ इति गणपत्यथर्वशीर्षम् समाप्तम् ॥

सर्वकर्म अनुष्ठानप्रकाशः भाग (२) 'देवखण्ड'

'तन्त्रोक्त देव पूजा रहस्य'

देवखण्ड में गणेश, हनुमान, विष्णु, शिव, भैरव, रुद्रादि देवों के विविधप्रयोग दिये हैं। मृत्युञ्जय प्रयोग शरभ शालुव पक्षिराज, आशुगरुड़ प्रयोग, गंधर्वराज, कार्त्तवीर्यअर्जुन, परशुरामादि के विविध प्रयोग है। वांछाकल्पलता प्रयोग एवं अन्य कई प्रयोगों का वर्णन किया गया है। मूल्य २६०/-

सर्वकर्म-अनुष्ठानप्रकाशः भाग (३) 'देवीखण्ड पूर्वार्द्ध'

नवदुर्गा दशमहाविद्या रहस्य

उत्तर भारतीय व दक्षिण भारतीय पद्धति द्वारा सभी नवरात्र के कर्म का सम्पूर्ण विधान है। भगवती दुर्गा के नवदुर्गा स्वरूपों के प्रयोगों का वर्णन। काली, तारा, षोडशी, त्रिपुरभैरवी, भुवनेश्वरी, छिन्नमस्ता, बगुलामुखी, मातंगी, धूमावती, एवं कमलादि देवियों के यंत्रार्चन का सरल विधान स्तोत्र, कवच, सहस्रनाम एवं विविध काम्य प्रयोगों का वर्णन। मूल्य ५००/-

सर्वकर्म अनुष्ठानप्रकाशः भाग (४) 'देवीखण्ड उत्तरार्ध

'उपमहाविद्या रहस्य - प्रथम भाग'

सभी देवियों की मातृकायें, भगवती त्रिपुर सुन्दरी की १५ नित्याओं का अर्चन, नवदुर्गा, ब्राह्मयादि अष्टमातृकाओं का यंत्रार्चन, कौशिकी, अंबिका, शिवदूति गायत्रीब्रह्मास्त्र, श्यामा, बगला, प्रत्यङ्गिरा, गुह्यकाली प्रयोग, वाराही का यन्त्रार्चन आदि देवियों के प्रयोग दिये गये हैं। मूल्य ४००/-

सर्वकर्म अनुष्ठानप्रकाशः भाग (४) 'देवीखण्ड उत्तरार्ध

'उपमहाविद्या रहस्य - द्वितीय भाग'

त्रिपुरसुन्दरी के मन्त्र से गर्भस्थ कई प्रयोग, कालिक्रम की १५ नित्याओं के प्रयोग, कामकला काली, महामाया वैष्णवी (पञ्चमुखी चण्डिका), भद्रा, स्वाहा, स्वधा, षष्ठीदेवी, मंगलचण्डी विधान, पार्श्वनाथ, पद्मावति, पञ्चांगुलि, ज्वाला मालिनि गंगादि देवियों प्रयोग, ज्वालादेवी, सारिका महाराज्ञि यन्त्रार्चन, कवच, सहस्रनाम, शब्दकोष, व अन्य कई दुर्लभ प्रयोग दिये गये हैं।

लेखक :
पं. रमेश चन्द्र शर्मा (मिश्र)
विशेषज्ञ :
ज्योतिष, तंत्रशास्त्र, वास्तुशास्त्र एवं कर्मकाण्ड
(डिप्लो. मैकेनिकल इंजि.)